वे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BRAHMASŪTRAŚAṄKARABHĀṢYA

WITH THE COMMENTARY

BRAHMAVIDYĀBHARAṆA

OF

ŚRĪMAD - ADVAITĀNANDA - SWĀMI PĀDA

Edited by

Pt. S. R. KRISHNAMURTHI SASTRI

Hon. Professor, Sanskrit Education Society, Madras.

Published by

T. V. VISWANATHA AIYAR

Secretary

THE SANSKRIT EDUCATION SOCIETY. MA

14, EAST MADA STREET, MYLAPORE, MADRAS-600

1975

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

M.S.P. Sharma
Bharatiya Vidy
New

चतुस्सूत्रीभागः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Sri Sankaracharya ... Mahavidyalaya
Bharatiya Vid...

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मसूत्रशाङ्करभाष्यम्

श्रीमदद्वैतानन्दस्वामिपादैर्विरचितेन

ब्रह्मविद्याभरणेन

संवलितम्

न्यायवेदान्तविशारदैः
पं० एस्. आर्. कृष्णमूर्तिशास्त्रिभिः
विरचितया लघुटिप्पण्या समन्वितं संपादितं च

मद्रपुरीसंस्कृतविद्यासमितिसचिवैः
टि. वि. विश्वनाथार्यैः
[१४, पूर्वमाडवीथी मदरास्-६००००४]
प्रकाशितम्

१९७५

Bharatiya Vidya Bhavan's Sri Sankara Mahavidyalaya
193

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमं संस्करणम् १९७५
First Edition 1975

© The Sanskrit Education Society (Regd.) Madras.

Printed At Rathnam Press, Madras-600001

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BRAHMASŪTRAŚĀṄKARABHĀṢYA

WITH THE COMMENTARY

BRAHMAVIDYĀBHARAṆA

OF

ŚRĪMAD - ADVAITĀNANDA - SWĀMI PĀDA

Edited by
Pt. S. R. KRISHNAMURTHI SASTRI
Hon. Professor, Sanskrit Education Society, Madras.

Published by
T. V. VISWANATHA AIYAR
Secretary

THE SANSKRIT EDUCATION SOCIETY. MAD

14, EAST MADA STREET, MYLAPORE, MADRAS-60000

1 9 7 5

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

PREFATORY NOTE

This prefatory note is by way of an interim report on a publication project, which the Samskrit Education Society decided to undertake sometime in 1972. The *Brahma-Vidyabharanam* is an independent commentary on Sri Sankara's *Bashya* on the *Brahmasutras.* It is by a comparatively late author, Sri Advaitananda Swami. But it has achieved the status of a classic, being regarded as next in importance only to the *Panchapādika-Vivarana* and the *Bhamati,* the Gloss of Anandagiri and the *Ratnaprabha,* and as indispensable for the student of Advaita. The bare text, without the *Śankara-Bhashya* was published nearly eighty years ago and as been long out of print. As there was a felt need for an adequate edition of the work, the Society arranged for its editing by a distinguished scholar, Brahmasri Siruvamani R Krishnamurthi Sastrigal, the then Professor of Vedanta, Madras Sanskrit College, and now Professor in charge of the Samskrit Education Society's higher teaching in Vedanta and Nyaya. It was unanimously decided that the work should be got ready in time to be offered as a suitable contribution by the Society to the commemoration of the Satabhishekam of H. H. Sri Chandrasekharendra Saraswati Srīpādāh, Sri Sankaracharya of the Kanchi Kamakoti Peetha to whose inspiration and support the Society owes its foundation, and who has continued to ta[illegible] a gracious interest in its progress and work. But the [illegible] ordinary difficulties that attend book-publication these day[illegible] the great bulk of the work, which is expected to run to [illegible] volumes numbering about 1400 pages, have delayed the ex[illegible] of the project. The Society therefore decided to ma[illegible] auspicious occasion by getting ready the *Chatus-sūtri* port[illegible] placing it before His Holiness. It is expected that the [illegible] the first Volume, comprising the first Adhyaya of the *Sutras,* w[illegible] completed by June this year, and the second Volume in a tw[illegible] month.

In the history of Advaita scholarship (as in that o[illegible] schools) every age has contributed to the elucidation and r[illegible] ment of the basic ideas in the light of reflection and cri[illegible] both from within and from without. An early example of [illegible]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

was the emergence of the *Bhamati* and the *Vivarana* schools, which, while agreeing on the major doctrines, exhibit some variations in the extended application of deductions based on Sri Sankar's exposition in his *Bhashya.* The *Brahma-Vidya-bharanam* generally follows the *Bhamati School,* but it is by no means tied down to it. While trying to effect a synthesis, its principal aim is to bring out Sri Sankara's viewpoint as clearly as possible, and it follows whichever authority is in its view closest to it on any particular topic; and in doing this, it often takes an independent line. (See the Editor's notes on pp. 6 and 140). And with the same object, the author makes copious use of other standard works, such as Sri Appayya Dikshitar's *Nyaya Raksha-mani* etc.,

The book is thus in effect a compendium of Advaita teaching. It is written in a lucid but allusive style. Generally the author does not mention by name the authority whom he is reflecting or refuting. This, as well as the erudition of the author and the recondite nature of the subject makes elucidation indispensable. This is done admirably in the Editor's *Tippani.* It is never otiose or diffuse, but brings out the connecting threads of a complicated argument, gives the references to the authorities whom the author does not mention by name, often summing up their views very cogently, and points out in regard to every topic how the views of critics of Advaita are refuted. It provides adequate explana-...ns of the Nyaya and Mimamsa rules cited by controversialists ...lps the reader to get his bearings in following the quick ...fire of *Purva-paksha* and *Siddhanta.* The *Tippani* thus ...ly adds to the value of the work, and the editing conforms to ...est standards of scholarship.

...gh only a fraction of the work (in terms of length) could ...ght out in time, it may be claimed to represent the heart ..., dealing as it does with the *Chatus-sūtri* portion of the ... One need hardly emphasize the appropriateness of ...g such a work to the great Sage of Kanchi, the *Jivanmukta* ... presided with such distinction for nearly seventy years ...ne Kanchi Peetha of Sri Sankara and been a beacon to the ...s who yearn for the light. Realization of the truth of ...ita is not a matter of mere intellectual conviction but of

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

immediate experience, as Sankara himself has pointed out. Its proof is the life lived in accordance with that realization. It is the glory of the Indian spiritual tradition that no age has been without such living exemplars to strengthen conviction and fortify faith. We, the contemporaries of His Holiness, have every reason to consider ourselves supremely blest in this respect.

N. Raghunathan

Ananda-Māgha Purnima,
25th February 1975

(N. Raghunathan)
President,
(Samskrit Education Society)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

भूमिका

सुविदितमेतत्—यत् परमपुरुषार्थो मोक्ष इति । तस्यैतस्य परमपुरुषार्थस्य स्वरूपतत्प्राप्त्युपायादिप्रदर्शनार्थं प्रवृत्तानि मोक्षशास्त्रापरनामधेयानि दर्शनानि ।

तत्र चार्वाकादिनास्तिकदर्शनानां दर्शनत्वमेव न सम्भवति । तथा हि चार्वाकाः केचित् शरीराकारपरिणतभूतचतुष्टयमेव आत्मा, देहोच्छित्तिरेव मुक्तिः—इति वदन्ति । तत्र आत्मनाशे सति कस्य मोक्षः ? अतः चार्वाकनये मोक्षपदार्थ एव असमञ्जस इति न तेषां दर्शनं मोक्षशास्त्रं भवितुमर्हति ।

इन्द्रियाणि प्राणः मनो वा आत्मा—इति वदतां चार्वाकैकदेशिनां नयेऽपि तेषां भौतिकत्वेन विनाशित्वाभ्युपगमात् न मोक्षभागिता इति पूर्वोक्तदोष एव ।

किञ्च निरतिशयानन्दः खलु काम्यते । अतः तस्यैव मोक्षरूपता उचिता । को हि सर्वतःप्रेयस आत्मनः अभावं अभिकाङ्क्षेत । अतः तेषां नये मोक्षस्य अपुरुषार्थतैव ।

यावज्जीवं विषयसुखानुभवेन जीवनमेव मुक्तिः—इत्यपि न युक्तम् । देहनाशे मोक्षस्य अभावप्रसङ्गात् । अतो न चार्वाकदर्शनं दर्शनम् ।

सौत्रान्तिक - वैभाषिक - योगाचाराणां बौद्धानां दर्शनेऽपि क्षणिकं आ[illegible] विज्ञानमेव आत्मा—इत्यभ्युपगमात् प्रतिक्षणविनाशिनः तस्य मोक्षभागित्वासंभ[illegible] सन्ताननित्यत्वाश्रयणेऽपि क्षणिकविज्ञानसन्तानस्य सोपप्लवत्वात् दुःखरूपत[illegible] मोक्षभागिता । तन्निवृत्तौ तु स्वस्यैव अभावात् कस्य मोक्षः । सर्वज्ञसन्तानान्[illegible]नां मोक्षः इत्यपि न सम्भवति । सर्वज्ञस्य सर्वसोपप्लवविज्ञानाकारतया संसारि[illegible] । पेक्षयाऽपि उपप्लवाधिक्येन अत्यन्तदुःखरूपत्वात्, अन्यस्य अन्यान्तर्भावानु[illegible]

शून्यवादिबौद्धमते तु किं केन काम्येत, कामिनः कालत्रयेऽप्यसत्त्वात् [illegible]

आर्हतानां (जैनानां) दर्शनेऽपि—न आत्मनः एकरूपता, तस्य दे[illegible] रिमाणत्वाङ्गीकारात् । तथा च गजमशकादिदेहानां अनियतपरिमाणत्वात् परिमाणभे[illegible]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रव्यभेदात्, द्रव्याभेदेऽपि अवस्थाभेदात् परिणामिनः सावयवत्वनियमात्, सावयवत्वे च विनाशित्वनियमात् न विनाशिनः तदीयात्मनः मोक्षफलभागिता। मोक्षो ह्यविनाशिफलभूतः। विनाशित्वे तु न परमपुरुषार्थता। नित्यत्वं हि परमत्वम्। मोक्षः परमः पुरुषार्थ इति च सर्वैः मोक्षवादिभिः अभ्युपगम्यते। मोक्षस्य विनाशिपुरुषार्थत्वे इतरसुखपरित्यागेन मुमुक्षैव न स्यात्, मुक्तस्य पुनर्बन्धोऽपि स्यात्। अतो न आर्हतानां दर्शनमपि दर्शनम्।

यद्यपि आस्तिकानां दर्शनेषु न उक्तदोषः, देहेन्द्रियमनःप्राणातिरिक्तस्य स्थिरस्य आत्मनः अभ्युपगमात्, तथाऽपि तानि न अतिसमञ्जसानि। तथा हि— वैशेषिकदर्शने बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां आत्यन्तिकी युगपन्निवृत्तिः मोक्षः। स न समीचीनः, तेषां बुद्ध्यादीनां तद्दर्शने आत्मनः स्वाभाविकधर्माणां सति धर्मिणि समुच्छेदासंभवात्। तदुक्तं श्रीवार्तिककृद्भिः—'आत्मा कर्त्रादिरूपश्चेत् मा काङ्क्षीः तर्हि मुक्तताम्। न हि स्वभावो भावानां व्यावर्तेत औष्ण्यवद्रवेः॥' इति। धर्मिणा सहैव तदुच्छेदाङ्गीकारे कस्य मोक्षभागिता? ततश्च, मोक्षः अपुरुषार्थः स्यात्।

न्यायदर्शने आत्यन्तिकः एकविंशतिदुःखध्वंसो मोक्षः। सोऽपि न समीचीनः, सुखस्यैव पुरुषार्थत्वेन तस्य अपुरुषार्थत्वात् अल्पसुखे वैराग्यासम्भवेन तस्य मोक्षत्वे मुमुक्षैव न स्यात्। अधिकसुखेच्छया हि अल्पसुखोपेक्षा युज्यते। वैशेषिकदर्शनोक्तदोषोऽपि अत्र प्रसरति।

ईदृशी अनुपपत्तिः प्राभाकरमीमांसकदर्शनेऽपि तुल्या। देहेन्द्रियादि-[illegible]धस्य आत्यन्तिकोच्छेदो मोक्षः इति हि ते मन्यन्ते।

[illegible] भाट्टमीमांसकदर्शने नित्यसुखाभिव्यक्तिः मुक्तिः। तदपि न युज्यते। तत्र [illegible]नित्यसुखं आत्माभिन्नं, तर्हि संसारदशायां भानप्रसङ्गः। आवरणाङ्गीकारे [illegible], [illegible]स्य नित्यत्वे मोक्षेऽप्यभानप्रसङ्गः। आवरणस्य अनित्यत्वेऽपि उत्पत्तिविना-[illegible]र्वं मुक्तस्य पश्चात् बन्ध इति स्यात्। अनादित्वे विनाशाभावप्रसङ्गः। [illegible]भावस्य नाशादर्शनात्। अभावरूपत्वे आवारकत्वासंभवः। भावाभाव-[illegible]णत्वे अनिर्वचनीयत्वापत्त्या वेदान्तदर्शनप्रवेशापत्तिः। नित्यसुखस्य आत्म-[illegible]त्वेऽपि जन्यत्वे विनाशावश्यंभावात् न मोक्षरूपता। नित्यत्वेऽपि मोक्षे ज्ञानकारणीभूतेन्द्रियादीनामभावेन अस्वयंप्रकाशस्य तस्य प्रकाशासंभवेन पुनरप्य-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरुषार्थतैव । प्रकाशमानसुखस्यैव पुरुषार्थत्वसंप्रतिपत्तेः । ज्ञानकारणीभूतानां इन्द्रियादीनां मुक्तौ अङ्गीकारे संसारादविशेषः—इति ।

साङ्ख्यदर्शने यद्यपि स्वभावतः असङ्गो निर्विशेषः स्वयंप्रकाशः आत्मा, तथाऽपि आध्यात्मिकादित्रिविधदुःखस्य ऐकान्तिकात्यन्तिको निरोधो मोक्ष इति तत्र निरूपितम् । अतः तदपि न युक्तम्—सतो दुःखस्य निरोधासंभात् असतो निरोधस्य उत्पत्त्यसंभवात् । 'नासतो विद्यते भावः नाभावो विद्यते सतः' इति स्मृतेः । दर्शनेऽस्मिन् सत्कार्यवादाङ्गीकारात् न सतां दुःखानां आत्यन्तिको निरोधः संभवति । सत्त्वेऽप्याविर्भावतिरोभावौ संभवत इति चेत्, न—तयोरपि सत्त्वाविशेषात्, तत्राप्येवंकल्पने अनवस्था मूलक्षतिकरी । तयोः सदसद्विलक्षणत्वाङ्गीकारे अनिर्वचनीयत्वाभ्युपगमात् वेदान्तदर्शनप्रवेशापत्तिः । तस्मात् अस्मिन् दर्शने नितरां नोपपद्यते मोक्षः । किञ्च आनन्दरूपत्वात् मोक्षस्य अस्मिन् दर्शने आत्मनः आनन्दस्वरूपत्वानङ्गीकारात् अपुरुषार्थता ।

पातञ्जलदर्शने पुरुषार्थशून्यानां गुणानां आत्यन्तिको लयः कैवल्यम् । अस्य च फलतः साङ्ख्यदर्शनाविशेषात् तत्पक्षोक्तदोषाः प्रसज्यन्ते । चित्स्वरूपस्यात्मनः स्वरूपप्रतिष्ठा कैवल्यमित्युक्तेऽपि अनानन्दरूपस्य तस्य अपुरुषार्थत्वात् तदपि दर्शनं न उपादेयम् ।

वेदान्तदर्शनं तु उपादेयम्—तत्र देहेन्द्रियप्राणमनोबुद्ध्यहङ्काराद्यतिरिक्तो नित्यः अपरिणामी आत्मा, अतो न नास्तिकदर्शनोक्तदोषः । प्रकाशमान[illegible] पूर्णानन्दो मोक्षः, इत्यतः वैशेषिक-नैयायिक-प्राभाकरदर्शनोक्तदोषोऽपि न । स्वप्र[illegible]शात्मस्वरूपः पूर्णानन्दरूपो मोक्षः भावाभावविलक्षणमिथ्याभूतानिर्वचनीया[illegible] संसारदशायां आवृतः, वेदान्तमहावाक्यजनिततत्त्वसाक्षात्कारेण मिथ्याभूता[illegible] उच्छिन्ने तत्प्रयुक्तसर्वदृश्योच्छेदात् दृश्याननुवृत्तिः, अतो न संसार[illegible] अविशेषः, अतः भाट्टदर्शनोक्तदोषोऽपि नात्र प्रसरति इति—उपादेयं वे[illegible]न्तानां दर्शनम् । [illegible] ।

नन्वद्वैतदर्शनमेतत्, न वेदान्तदर्शनं—इति चेत्—उच्यते । [illegible] दर्शनमेव हि वेदान्तदर्शनम् । यतो वेदान्तानां परमतात्पर्यविषयीभूतं [illegible] अद्वैतमेव । वेदान्तपरमतात्पर्यञ्च श्रीमद्बादरायणापरनामकैः भगवद्व्यासाचार्यैः वेद[illegible]तात्पर्यनिर्णयानुकूलयुक्तिनिरूपणपरैः 'अथाऽतो ब्रह्मजिज्ञासा' इत्यादिभिः '[illegible]-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृत्तिः शब्दात्' इत्यन्तैः शारीरकमीमांसाशास्त्रापरनामधेयैः ब्रह्मसूत्रैः निरणायि। तानि च सूत्राणि अद्वैतपराणि, इत्यतः अद्वैतदर्शनमेव वेदान्तदर्शनं इति भगवद्व्यासाचार्याभिमतम्। वैयासिकं दर्शनमपि अद्वैतदर्शनमेव।

अत्र अपरे प्रत्यवतिष्ठन्ते—भास्करमध्वरामानुजश्रीकण्ठाचार्यादिभिः स्वस्वसिद्धान्तनिरूपणपरतया व्याख्यायमानानां ब्रह्मसूत्राणां कथं अद्वैतपरता निर्णेतुं शक्या—इति।

अत्रोच्यते—यद्ययमाक्षेपः तत्तन्मतानुयायिभिः क्रियते, तर्ह्ययमाक्षेपः तान् प्रत्यपि कर्तुं शक्यः। यतः परस्परं विरुद्धानि एतानि मतानि।

तथा हि—श्रीमच्छङ्करभगवत्पूज्यपादानां मते जीवब्रह्मणोरभेदः स्वाभाविकः पारमार्थिकश्च, भेदस्तु औपाधिकः अपारमार्थिकश्च। प्रपञ्चो मिथ्या। भास्कराचार्याणां मते जीवब्रह्मणोरभेदः स्वाभाविकः पारमार्थिकश्च, भेदस्तु औपाधिकोऽपि पारमार्थिकः। यादवप्रकाशानां मते जीवब्रह्मणोः स्वाभाविक एव भेदोऽभेदश्च। श्रीकण्ठरामानुजाचार्ययोः मते स्वाभाविक एव जीवब्रह्मणोर्भेदो विशिष्टाद्वैतं चेति। तत्र शिवपारम्यविष्णुपारम्याभ्यां तन्मतयोः विशेषः। मध्वाचार्याणां तु मते जीवब्रह्मणोर्भेद एव स्वाभाविकः।

एवं स्थिते 'विप्रतिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था' इति श्रीगौतमोक्तरीत्या मध्यस्थत्वेन सम्प्रतिपन्नसाक्षिवचनेनैव निर्णयः कर्तुं शक्यः। अत्र मध्यस्थत्वञ्च [दर्श]नान्तरसूत्रभाष्यवार्तिकादिकाराणां कपिलकणादादीनां सम्भवति। तेषां भेदाभेद[प्रति]पादकश्रुत्यर्थनिर्णये मध्यस्थत्वाभावेऽपि, व्यासमतानुवादतन्निराकरणपूर्वकस्व[मतस्था]पनाय व्याससिद्धान्तस्य अवश्यं ज्ञातव्यत्वात् तत्सिद्धान्ते स्वपक्षत्वाभिमान[राहित्या]च्चाच। ततश्च अस्मदादीन् प्रति मध्यस्थत्वेनसंप्रतिपन्नकपिलकणादगौतम[...]जैमिनितन्त्रेषु सूत्रभाष्यवार्तिकवृत्तिग्रन्थेषु पाशुपतबौद्धार्हतचार्वाकतन्त्रेष्वपि [...]र् परमतं न निराक्रियते तावत् स्वमतमप्रतिष्ठितं भवति' इति न्यायेन [स्वमतस्था]पनाय परमतनिराकरणप्रस्तावे कपिलकणादादिभिः अद्वैतमेव ब्रह्मसूत्र[सि]द्धान्त इति मत्वा अनूद्य निराकृतमिति तदेव अद्वैतं व्याससिद्धान्तः [नि]र्णयो भवति तत्त्वजिज्ञासूनाम्।

दृष्टश्चायं निर्णयप्रकारः शैववैष्णवग्रन्थेषु। यामुनस्तोत्रभाष्ये—हरिहरयोर्मध्ये कस्य सत्वाश्रयत्वमिति संशये सति 'स्यान्नागरद्राविडवेसरं च क्रमेण वै सत्वरज-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तमांसि । महीसुरोर्वीपतिवैश्यकाश्च हरिर्विधाता हर आदिदेवा: ॥' इति मध्यस्थ-शिल्पशास्त्रवचनबलेन विष्णोरेव सत्वाश्रयत्वमिति विशिष्टाद्वैताचार्यैः श्रीवेङ्कटनाथैः प्रतिप्रादितम्; तथा चतुर्वेदतात्पर्यसङ्ग्रहे शिवनारायणयोर्मध्ये कस्य नमश्शेषित्व-मिति संशये सति 'वज्रिण्या मुद्रया शक्रं पद्मिन्या दर्शयेद्विधिम्। शङ्खिन्या केशवं रुद्रं शिरस्यञ्जलिमुद्रया' इति मध्यस्थभरतशास्त्रवचनबलमनुसृत्य 'या शङ्खिनी भवति शङ्कर वज्रिणी या मुद्रा च या कमलिनी भरतोपदिष्टा। ताभिर्भवन्त्यभिनया विबुधान्तराणां मौलिस्पृशा करपुटाञ्जलिमुद्रया ते' इत्यनेन शिवस्यैव नमश्शेषित्वं इति प्रतिपादितं सुदर्शनाचार्यैः।

तत्रैवं सति दर्शनान्तरसूत्रकारादीनां वेदान्तदर्शनसूत्रकृद्व्याससिद्धान्तनिर्णये मध्यस्थत्वे च सिद्धे अद्वैतसिद्धान्तानुवादतन्निराकरणपराणां तदीयसूत्रादीनां उदाहर-णेन तदर्थवर्णनेन च अद्वैतसिद्धान्तस्य वेदान्तसिद्धान्तत्वोपपादनं परं अवशिष्यते। तदद्य क्रियते—

तथा हि—यथा वेदान्तशास्त्रे 'रचनानुपपत्तेश्च नानुमानम्' इत्याद्यधि-करणेषु भगवता व्यासेन सांख्यमतनिराकरणं कृतं, तद्वत् सांख्यतन्त्रेऽपि भगवता कपिलेन वेदान्तशास्त्राभिमताद्वैत-भेदौपाधिकत्व-प्रपञ्चानिर्वचनीयत्वाद्यनुवादपूर्वकं तन्निराकरणं कृतम्। तथा हि—सांख्यशास्त्रप्रथमाध्याये 'नाविद्यातोऽप्यवस्तुना बन्धायोगात्' 'वस्तुत्वे सिद्धान्तहानिः' 'विजातीयद्वैतापत्तिश्च' 'विरुद्धोभयरूपा चेत्' 'न–तादृक्पदार्थाप्रतीतेः' इति, तत्रैव 'उपाधिभेदेऽप्येकस्य नानायोग आकाशस्येव घटादिभिः' 'उपाधिर्भिद्यते न तु तद्वान्' 'एवमेकत्वेन परिवर्तमान[illegible] न विरुद्धधर्माध्यासः' 'अन्यधर्मत्वेऽपि नारोपात्तत्सिद्धिरेकत्वात्' 'नाद्वैतश्रुतिवि[illegible] जातिपरत्वात्' 'विदितबन्धकारणस्य दृष्ट्याऽतद्रूपम्' 'नान्धादृष्ट्या चक्षु[illegible] मनुपलम्भः' 'वामदेवादिर्मुक्तो नाद्वैतम्' 'अनादावद्य यावदभावाद्भविष्यद[illegible] 'इदानीमिव सर्वत्र नात्यन्तोच्छेदः' इति, पञ्चमाध्याये 'नाविद्याश[illegible] [illegible]रागानां निःसङ्गस्य' 'तद्योगे तत्सिद्धावन्योन्याश्रयत्वम्' इति, तत्रैव 'नाद्वैतमात्मनो लि[illegible] द्भेदप्रतीतेः' 'नानात्मनाऽपि प्रत्यक्षबाधात्' 'नोभाभ्यां तेनैव' 'ना[illegible]। नोभयं जगदुपादानकारणं निःसङ्गत्वात्' 'नैकस्यानन्दचिद्रूपत्वे द्वयोर्भेदात्[illegible] तत्रैव 'नानन्दाभिव्यक्तिर्मुक्तिः निर्धर्मत्वात्' इति, षष्ठाध्याये 'उपा[illegible] तत्सिद्धौ पुनर्द्वैतम्' 'न श्रुतिविरोधो रागिणां वैराग्याय तत्सिद्धेः' 'जगतस[illegible]त्वा-अदुष्टकारणजन्यत्वात् बाधकाभावात्' इति च।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतेषु परमतनिराकरणार्थेषु कपिलसूत्रेषु केवलाद्वैतदर्शनप्रक्रियासिद्धानामर्थानां अतिस्फुटतया प्रतीयमानत्वेन तादृशवाद्याकाङ्क्षायां, व्याससूत्रेषु परस्परविरुद्धार्थप्रतिपादकनानाभाष्यप्रचारेण संशये सति तन्निर्णयाकाङ्क्षायां च सत्यां, पतञ्जलि-जैमिनि-गौतम-कणादादिसूत्रकाराणां पाशुपतादितान्त्रिकमतप्रविष्टानां चार्वाकादिबाह्यमतप्रविष्टानां च अद्वैतानभ्युपगमात् वादित्वासंभवेन, पारिशेषिकप्रमाणात् प्रकारान्तरेण तन्निर्णयाकाङ्क्षानिवृत्त्यसंभवाच्च वेदान्तदर्शनसूत्रकृतो व्यासाचार्या एव वादित्वेन पर्यवस्यन्ति। इतरथा व्यासाचार्यान् विना यस्यकस्यचित् अन्यस्य अप्रसिद्धस्य वादित्वाभ्युपगमे वाद्यन्तराभिमतस्य अद्वैतस्य भगवद्व्यासतात्पर्यविषयत्वाभावेऽपि भास्करयादवप्रकाशश्रीकण्ठरामानुजमध्वादिभाष्यकाराभिमतार्थानां मध्ये अयमेवार्थः भगवद्व्यासतात्पर्यविषय इति केनापि निर्णेतुमशक्यत्वेन द्वैतवादिनां स्वपक्षस्थापनाभावप्रयुक्तवैतण्डिकत्वदूषणं आपद्येत। तस्मात् तदुभयाकाङ्क्षाशान्तये व्यासाचार्या एव तत्र वादिनः इति अकामेनापि अभ्युपगन्तव्यम्।

न च सांख्यसूत्रानूदितार्थस्य अद्वैतसिद्धान्तसिद्धस्य वेदान्तसूत्रेषु क्वाप्यप्रतीयमानत्वेन प्रत्यभिज्ञानाभावः शङ्क्यः। कपिलसूत्रगतकेवलाद्वैतवाद्यभिमतार्थानुवादबलेनैव अद्वैतं भगवद्व्यासतात्पर्यविषय इति निश्चयसम्भवे वेदान्तसूत्रेषु तत्प्रत्यभिज्ञाया अनपेक्षितत्वात्। प्रत्यभिज्ञाभावे अद्वैतमेव भगवद्व्यासाचार्याणां तात्पर्यविषय इत्यध्यवसितुं न शक्यते इति न शङ्क्यम्। अन्यस्य अद्वैतवादिनः अभावादेव व्यासाचार्या एव अद्वैतवादिनः इति पर्यवस्यति। यदि च वेदान्त-
...त्रेषु अतिस्फुटतया अद्वैतमेव प्रत्यभिज्ञायेत तदा परकीयभाष्यादिग्रन्थानामनारम्भ-
...त्वप्रसङ्गः।

अस्ति च भेदौपाधिकत्वाद्यंशे प्रत्यभिज्ञा ब्रह्मसूत्रेषु। 'उपाधिभेदेऽप्येकस्य
...ग आकाशस्येव घटादिभिः' इत्यादिकपिलसूत्रैरनूद्यमानस्य औपाधिक-
... 'अत एव चोपमा सूर्यकादिवत्' 'आभास एव च' इत्यादिसूत्रेषु
...नत्वात्। 'नात्माऽविद्या नोभयं जगदुपादानकारणं निःसङ्गत्वात्' इति
...ण निराक्रियमाणस्य ब्रह्मगतजगदुपादानत्वस्य 'जन्माद्यस्य यतः'
...व प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रद्वये प्रतीयमानत्वाच्च।

ननु, अनेन सूत्रेण निराक्रियमाणस्य प्रकृतिविशिष्टब्रह्मगतजगदुपादानत्वस्य श्रीकण्ठरामानुजादिमतसाधारणत्वेन कथं केवलाद्वैतवाद्यभिमतजगदुपादानत्वस्यैव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इयं प्रत्यभिज्ञा इति चेत्—उच्यते। तस्मिन् सूत्रे केवलात्मा जगदुपादानम्, उताविद्या, तद्विशिष्टात्मा वा इति त्रिधा विकल्प्य तन्निराकरणप्रस्तावे अविद्याजगदुपादानत्वनिराकरणपक्षे अवस्तुभूताविद्यैव अविद्याशब्दार्थ इति वक्तव्यम्; इतरथा रामानुजाद्यभिमतनित्यप्रकृतिपरत्वे सांख्यैरपि तादृशप्रकृतेरेव जगदुपादानत्वाभ्युपगमेन तन्निराकरणे स्वसिद्धान्तोच्छेदप्रसङ्गात्, 'नाविद्यातोऽप्यवस्तुना बन्धायोगात्' इति प्रथमाध्यायसूत्रगताविद्याशब्दस्य अवस्तुभूताविद्यापरतया निर्णीतत्वेन तत्प्रत्यभिज्ञानेन एतत्सूत्रगताविद्याशब्दस्यापि अवस्तुभूताविद्यापरत्वौचित्याच्च। तथा च अवस्तुभूताविद्याविशिष्टब्रह्मगतजगदुपादानत्वनिराकरणस्यैव अत्र वक्तव्यतया तस्य च जगदुपादानत्वस्य रामानुजादिमतसाधारणत्वाभावेन केवलाद्वैतवाद्यभिमतस्य जगदुपादानत्वस्यैव पूर्वोक्तवेदान्तसूत्रद्वयेऽपि प्रत्यभिज्ञाने न विवादो युक्त इति।

न च वेदान्त्येकदेशिनां आश्मरथ्य - औडुलोमि - काशकृत्स्न-बादरीणां मध्ये यस्य कस्यचित् मतमनूद्य तन्निराकरणसंभवः शङ्क्यः— स्वतन्त्रतन्त्रप्रवर्तकगौतमकणादादिमतनिराकरणप्रायपाठे प्रधानमल्लनिबर्हणन्यायेन वेदान्ततन्त्रप्रवर्तकव्यासमतस्यैव निराकरणीयत्वौचित्येन तदेकदेशिभूताश्मरथ्यादिमतनिराकरणस्य अन्याय्यत्वात्; अन्यथा 'ईक्षतेर्नाशब्दम्' इत्यादिसूत्रेषु साङ्ख्यमतनिराकरणस्थलेऽपि तदेकदेशिमतानामेव निराकरणीयत्वापत्तेः। न चेष्टापत्तिः। सकलभाष्येषु कपिलमतमेव लक्ष्यीकृत्य तन्मतनिराकरणदर्शनेन तद्विरोधापत्तेः। यदि च कपिलोक्तकेवलाद्वैतमतनिराकरणपरसकलसूत्राणां वेदान्त्येकदेशिभूताश्मरथ्यादिमतनिराकरणपरत्वम्, तदा तत्र व्यासमतनिराकरणाभावात् 'यावत् परमतं न निराक्रि[illegible] तावत् स्वमतमप्रतिष्ठितं भवति' इति न्यायेन कपिलस्य स्वसिद्धान्तासिद्धिप्रस[illegible]।

तस्मात् उक्तरीत्या कपिलसूत्रेषु केवलाद्वैतादेरतिस्फुटतया प्रतीयमान[illegible] तेषां अन्यथयितुं अशक्यत्वात्, तादृशाद्वैतवाद्यन्तराभावात्, अस्मिंस्तन्त्रे तन्त्र[illegible] वा यत्रकुत्रचित् भेदवादित्वेन व्यासमहर्षिमुररीकृत्य तदभिमतभेदानुवादपूर्वक[illegible]रणानां करणपरसूत्राणामभावात्, व्याससूत्रेषु महता प्रयत्नेन असाधारण्येन क[illegible]। लक्ष्यीकृत्य तन्मतनिराकरणेन तद्वत् कपिलसूत्रेष्वपि व्यासाचार्यानेव ल[illegible] तन्मतस्य निराकरणीयत्वावश्यंभावाच्च व्यासाचार्या एव तत्र वादित्वेन पर्यवस्य[illegible]

एवं यथा वेदान्तशास्त्रे 'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्' इत्यधिक[illegible] भगवद्भिः व्यासाचार्यैः कणादमतनिराकरणं कृतम्, तद्वत् वैशेषिकतन्त्रेऽपि भगवता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कणादेन व्यासाचार्याभिमतकेवलाद्वैतमेव निराकृतम् । तथा हि—वैशेषिकतन्त्र तृतीयाध्याये द्वितीयाह्निके, स्वसिद्धान्ते आत्मनो लिङ्गगम्यत्वं प्रतिपाद्य, वेदान्त्यभिमतात्मानं खण्डयितुं 'तस्मादागमिकः' इति सूत्रेण आगमैकसमधिगम्यमात्मानमनूद्य, तस्यैव आत्मनः 'सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यं सर्वशरीराणां' इति सूत्रेण तदभिमतमेकत्वमप्यनूद्य 'नानात्मानो व्यवस्थातः' 'शास्त्रसामर्थ्याच्च' इति सूत्रद्वयेन आत्मैकत्वनिराकरणपूर्वकं आत्मनानात्वं व्यवस्थापितम् । न्यायलीलावत्यामपि मुक्तिस्वरूपविचारावसरे अद्वैत्यभिमतं मुक्तिस्वरूपं अनूद्य निराकृतम् ।

एवं यथा वेदान्तशास्त्रे 'तर्काप्रतिष्ठानात्........' इत्यधिकरणे भगवद्भिः व्यासाचार्यैः गौतममतनिराकरणं कृतं तद्वत् न्यायतन्त्रेऽपि केवलाद्वैतमेव वेदान्तशास्त्राभिमतमित्यनूद्य निराकृतम्—चतुर्थाध्याये प्रथमाह्निके—'सङ्ख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्' इति । स्पष्टञ्चेदं व्याख्यातं न्यायमञ्जर्यां तथैव । तत्त्वचिन्तामणावपि वेदान्तिमतत्वेन अद्वैतदर्शनमेव अनूद्य निराकृतम् । गदाधरभट्टाचार्यैरपि मुक्तिवादे वेदान्तिमतत्वेन अद्वैतदर्शनमेव अनूदितम् ।

एवं यथा वेदान्तशास्त्रे 'एतेन योगः प्रत्युक्तः' इत्यधिकरणे भगवद्भिः व्यासाचार्यैः पतञ्जलिमतनिराकरणं कृतं, तद्वत् योगशास्त्रेऽपि केवलाद्वैतमेववेदान्तशास्त्राभिमतमित्यनूद्यनिराकृतम् । तथा हि भोजवृत्तौ—'स्वरूपप्रतिष्ठा वा चितिशक्तेः' इति सूत्रव्याख्यानावसरे 'ये तु वेदान्तवादिनः चिदानन्दमयत्वमात्मनो मोक्षं मन्यन्ते,तेषां न युक्तः पक्षः । तथा हि—आनन्दस्य सुखरूपत्वात् सुखस्य ... सदैव संवेद्यमानतयैव प्रतिभासात् संवेद्यमानत्वं च संवेदनव्यतिरेकेण अनुपपन्न...ते संवेदनसंवेद्ययोः अभ्युपगमात् अद्वैतहानिः' इत्यादिना वेदान्त्यभिमतत्वेन ...अद्वैतमेव अनूद्य निराकृतम् ।

एवं यथा वेदान्तशास्त्रे 'फलमत उपपत्तेः' इत्यधिकरणे भगवद्भिः ...चार्यैः जैमिनिमतनिराकरणं कृतं तद्वत् मीमांसाशास्त्रेऽपि केवलाद्वैतमेव ...शास्त्राभिमतमित्यनूद्य निराकृतम् । तथा हि—तर्कपादे वार्तिके—

'स्वयं च शुद्धरूपत्वात्, अभावाच्चान्यवस्तुनः ।
स्वप्नादिवत्, अविद्यायाः प्रवृत्तिः तस्य किंकृता ॥

अन्येनोपप्लवेऽभीष्टे द्वैतवादः प्रसज्यते ।
स्वाभाविकीमविद्यां तु नोच्छेत्तुं किञ्चिदर्हति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विलक्षणोपपाते हि नश्येत् स्वाभाविकी क्वचित् ।
न त्वेकात्माभ्युपायानां हेतुरस्ति विलक्षणः ॥'

इत्यादिना भट्टपादैरपि केवलाद्वैतमेवानूद्य निराकृतम् ।

पाणिनितन्त्रेऽपि भर्तृहरिणोक्तम्—

'यत्र द्रष्टा च दृश्यं च दर्शनं चापि कल्पितम् ।
तस्यैवार्थस्य सत्यत्वं आहुः त्रय्यन्तवादिनः ॥' इत्यादि ।

किञ्च यथा वेदान्तशास्त्रे 'पत्युरसामञ्जस्यात्' इत्यधिकरणे भगवद्भिः व्यासाचार्यैः पाशुपतमतनिराकरणं कृतम्, तद्वत् शैवागमेऽपि केवलाद्वैतमेव वेदान्तशास्त्राभिमतमित्यनूद्य निराकृतम् । तथा हि **मृगेन्द्रसंहितायां** ज्ञानपादे द्वितीयपटले—

भरद्वाज उवाच—

'वेदान्तसाङ्ख्यसदसत्पादार्थिकमतादिषु ।
ससाधना मुक्तिरस्ति को विशेषः शिवागमे ॥

शक्र उवाच—

प्रणेत्रसर्वदर्शित्वान्न स्फुटो वस्तुसङ्ग्रहः ।
उपायाः सफलास्तद्वत्, शैवे सर्वमिदंपरम् ॥
वेदान्तेषु एक एवात्मा चिदचिद्व्यक्तिलक्षितः ।
....
प्रतिज्ञामात्रमेवेदं निश्चयः किंनिबन्धनः ।
अथ प्रमाणं, तत्रात्मा प्रमेयत्वं प्रपद्यते ॥
यत्रैतदुभयं तत्र चतुष्टयमपि स्थितम् ।
अद्वैतहानिरेवं स्यान्निष्प्रमाणकताऽन्यथा ॥
भोगसाम्याविमोक्षौ च, यौ नेष्टावात्मवादिभिः ।'
.... इति ।

एवं च उक्तग्रन्थेषु तत्रतत्र केवलाद्वैतानुवादपूर्वकनिराकरणस्थले केवलाद्वैत- वेदान्तिमततत्त्वप्रतिपादनेन तादृशाद्वैतमेव वेदान्तशास्त्राभिप्रेतार्थं इति सिद्धे व्यासा-

2

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चार्याणां वेदान्तशास्त्रप्रवर्तकतया वेदान्तवादित्वावश्यंभावेन केवलाद्वैतमेव तेषामभिमतमिति स्पष्टम् ।

एवं बाह्यदर्शनेष्वपि वेदान्तिमतत्वेन अद्वैतानुवादः तन्निराकरणं च दृश्यते—

तत्त्वार्थसिद्धिनामके जैनग्रन्थे—'तत्त्वैकत्वमिति वा सर्वैक्यग्रहणप्रसङ्गः' 'पुरुष एवेदं विश्वं इत्यादि कैश्चित् कल्प्यते' इति ।

आप्तमीमांसाख्ये जैनग्रन्थेऽपि—'अद्वैतैकान्तपक्षेऽपि दृष्टो भेदो विरुद्ध्यते । कारकाणां क्रियायाश्च, नैकं स्वस्मात् प्रजायते' इति ।

तत्वार्थराजवार्तिकाख्ये जैनग्रन्थेऽपि—'ज्ञानादेव मोक्ष इति चेत्, अनवस्थानात् उपदेशाभावः' इति ।

बौद्धग्रन्थेष्वपि बुद्धचरिते—

'अध्यात्मकुशलेष्वन्यो निवर्त्यात्मानमात्मना ।
किञ्चिन्नास्तीति सम्पश्यन् आकिञ्चन्य इति स्मृतः ।

ततो मुञ्जादिषीकेव शकुनिः पञ्जरादिव ।
क्षेत्रज्ञो निस्सृतो देहात् मुक्त इत्यभिधीयते ।

एतत् तत्परमं ब्रह्म निर्लिङ्गं ध्रुवमक्षरम् ।
यन्मोक्ष इति तत्त्वज्ञाः कथयन्ति मनीषिणः ।' इति ।

तत्त्वसङ्ग्रहेऽपि—

'नित्यज्ञानविवर्तोऽयं क्षितितेजोजलात्मकः ।
आत्मा तदात्मकश्चेति सङ्गिरन्तेऽपरे पुनः ।' इति

किं बहुना—अर्थशास्त्रेऽपि अद्वैतदर्शनं वेदान्तदर्शनत्वेन अनूदितम्—
...नातौ—

"ब्रह्मैकमद्वितीयं स्यात् नेह नानाऽस्ति किञ्चन ।
मायिकं सर्वमज्ञानात् भाति वेदान्तिनां मतम् ॥" इति ।

...वं अद्वैतदर्शनमेव वेदान्तदर्शनं, अत एव वैय्यासिकं दर्शनं, अत एव ब्रह्मसूत्रतात्पर्यविषयः—इति सर्वदर्शनसिद्धान्तः राजनीतिशास्त्रसिद्धान्तश्च—इति सिद्धम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्वेवं सर्वदर्शनकारैः निराकृतमिदं अद्वैतदर्शनं कथं वेदान्तदर्शनं स्यात् ? अवेदान्तिभिः निराकृतत्वादेव इदं वेदान्तदर्शनम्–इत्यवेहि । किञ्च-निराकृतमिदं युक्त्याभासैः । अत एव ब्रह्मसूत्रकृद्भिः अद्वैतस्य औपनिषदत्वसमर्थनपुरस्सरं परोक्ता युक्तयः औपनिषदयुक्तिभिः आभासीकृताः । ननु व्यासादितुल्या आस्तिकतमाः कपिलादयो महर्षयः किं वेदान्ततात्पर्यानभिज्ञाः ? नानभिज्ञाः । किं तर्हि ? तत्तद्दर्शनसिद्धान्तव्यवस्थापनपराः । विवेचितमिदं श्रीविद्यारण्यस्वामिभिः तैत्तरीयकोपनिषदांव्याख्यानावसरे, सूतसंहिताव्याख्याने च ।

किञ्च उक्तशङ्कायाः समाधानं स्वसिद्धान्तस्य वेदान्तसिद्धान्तत्ववादिभिः परैरपि वक्तव्यम् । तत् तुल्यं अद्वैतिनामपि ।

किञ्च श्रुतितात्पर्यविषयत्वादप्यद्वैतस्य वेदान्तदर्शनं अद्वैतदर्शनमेव । अद्वैतस्य श्रुतितात्पर्यविषयत्वं च "मायामात्रमिदं द्वैतं अद्वैतं परमार्थतः" इति श्रुतिरेव आह । इयञ्च श्रुतिरिति परेषामपि सम्मतम् । यद्यप्यत्र न एवंविधश्शब्दोऽस्ति, तथाऽपि परमार्थत्वोक्तिसामर्थ्येनैव तल्लाभः । न हि तदेवैकं शाब्दं यत् प्रत्यक्षपठितम् । सामर्थ्यमपि हि शब्दैकदेशः । अत एव श्रुतद्रव्यदेवतासंबन्धान्यथानुपपत्तिकल्पितो यागः श्रौत एवेति मीमांसकाः ।

यत्तु श्रुतप्रकाशिकायां—सर्वप्रपञ्चमिथ्यात्ववादे श्रुतीनामपि मिथ्यात्वात् अप्रामाण्यमिति,

तन्नयुक्तम्—न हि मिथ्यात्वं अप्रामाण्यम् । तथा सति सत्यत्वमेव प्रा[illegible] स्यात् । न चेष्टापत्तिः । बौद्धाद्यागमानामपि भवन्मते सत्यत्वेन प्रामाण्यापत्तेः । यद्यपि वेदप्रामाण्यमपि प्रपञ्चान्तर्गतं मिथ्या । तथाऽपि प्रत्यक्षादीनामिव अर्थक्रिय[illegible] कारित्वप्रयोजकत्वाभ्युपगमात् न प्रकृतार्थसाधकत्वानुपपत्तिः ।

यत्तु मायामात्रश्रुतेः परकीयं व्याख्यानं, तत् स्वरूपव्याकरणेनैव [illegible]रगनां भवति । [illegible]।

तथा हि—परमार्थतः-परमार्थः उत्तमोऽर्थः भगवान् , तस्मात् , परमेश[illegible] प्रसादात् इति यावत् । महद्भिः यथावत्तयाज्ञातं ब्रह्मादिवस्तुजातं अज्ञैः द्विती[illegible] प्रकारेण-तद्वैपरीत्येन ज्ञातं द्वैतम् । तच्च मिथ्याज्ञानं तेषां मायामात्र-भगवदिच्छामात्रनिर्मितम् । तत् मिथ्याज्ञानं निवर्तते यस्मात् तत् अद्वैतम्—इति केषांचित्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्यानम् । केषांचित्-अद्वैतं-सजातीयद्वितीयरहितं इति कचित् व्याख्यानम्, बृहदारण्यके अद्वैतः-देवादिलक्षणभेदकाकारशून्यः इति व्याख्यानम् । एवं स्वच्छन्दं श्रुतिपदानां तत्रतत्र भिन्नभिन्नव्याख्यानं श्रौततत्त्वानिर्णायकं भवतीति कृतबुद्धयो विदाङ्कुर्वन्तु ।

किञ्च—पदसमभिव्याहारबलेन वाक्यात् प्रथमतः प्रतीयमानोऽर्थः सति सम्भवे वाक्यतात्पर्यविषयीभूतोऽर्थः, स एव उपादेयः—इति शब्दप्रमाणमर्यादा । एतदभिप्रेत्यैव भगवत्पादैः उक्तं तत्र तत्र—'संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञाने अभ्युपगम्यमाने तत्त्वमसीत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत, इति 'पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदानां समन्वयो ब्रह्मप्रतिपादनपरः उपलभ्यते'—इति च । एवंरूपश्च वेदान्तवाक्यार्थः प्रत्यग्ब्रह्मैक्यमेवेति स्वानुभवमनपह्नुवानैः अङ्गीकार्यः इति ।

किञ्च 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति वैयासिकं वचनम् । उपबृंहणं च पुराणादिभिर्भवति । पुराणानि च महापुराणोपपुराणभेदेन द्विविधानि । तत्र उपपुराणानि ब्रह्मकाण्डव्याख्याप्रधानानि । स्पष्टं चैतत् मानवपुराणे प्रथमाध्याये । तत्रापि मानवपुराणं विशिष्टम् । मनुवाक्यस्य च प्राबल्यं स्मृतिचन्द्रिकादिषु व्यक्तम् । तत्र च मानवोपपुराणे इयं मायामात्रश्रुतिः इत्थं व्याख्याता—

"असत्यद्वैतनिष्ठस्तु कर्मकाण्डस्सनातनः ।
वास्तवैकत्वनिष्ठस्तु ज्ञानकाण्डस्सुशोभनः ॥

द्वैतं मायामयं प्राह श्रुतिस्सत्यार्थवादिनी ।
वास्तवं प्राह चाद्वैतं सर्वमानातिगामिनी ।" इति ।

एतदुपबृंहणविरोधाच्च मायामात्रश्रुतेः परकीयं व्याख्यानं न युक्तम् । ...त्र हि मायाशब्दस्य 'अवास्तवः' इत्यर्थो वर्णित इति स्पष्टम् ।

पराशरोपपुराणेच—

'द्वयोर्भेदो न चेत्, तर्हि भेद एकस्य वस्तुनः ।
भेद एकस्य यः प्राप्तः तन्मृषा चन्द्रभेदवत् ।
तस्मात् सत्यचिदानन्दगुणा न परवस्तुनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वरूपमेव, भेदस्तु तस्य मायाविजृम्भितः ।
मायामात्रमिदं द्वैतं अद्वैतं परमार्थतः ।
इत्याह हि परा शुद्धा श्रुतिः सत्यार्थवादिनी ।' इति ।

एवं ऐक्यश्रुतीनामपि उपबृंहणविरुद्धं परेषां व्याख्यानम्, स्वारसिकार्थत्यागश्च । त्रिविधा हि ऐक्यश्रुतयः 'सदेव सौम्येदमग्र आसीत्' इत्यादयः ब्रह्मैक्यपराः 'एक एव हि भूतात्मा' इत्यादयः जीवैक्यपराः । 'अहं ब्रह्मास्मि' इत्यादयः जीवब्रह्मैक्यपराः । तासां सर्वासां परकीयं व्याख्यानं उपबृंहणविरुद्धम् ।

गरुडपुराणे हि उपान्त्याध्याये—

'अहंब्रह्मास्मिवाक्यार्थज्ञानात् मोक्षो भवेन्नृणाम् ।
वाक्यात् ज्ञानं भवेत् ज्ञानादहंब्रह्मपदार्थयोः ।
पदद्वयार्थौ द्विविधौ वाच्यौ लक्ष्यौ स्मृतौ बुधैः ।
वाच्यौ तु शबलौ ज्ञेयौ लक्ष्यौ शुद्धौ प्रकीर्तितौ' इत्युपक्रम्य
'ब्रह्माहमस्मि अहंब्रह्मेति अहंब्रह्मपदार्थयोः ।
अहंब्रह्मास्मिवाक्याच्च स्वानुभूतिफलात्मकम् ।
भवेदेकत्वविज्ञानं वेदान्तात् भवति ध्रुवम् ।'

इति अहंब्रह्मासीतिमहावाक्यं उपबृंहितम् ।

एतद्विरुद्धं विशिष्टाद्वैतम् । तन्मते हि ब्रह्मणो न एकत्वं, विशिष्टरूपत्वाभ्युपगमात् । विशिष्टस्य च विशेषणविशेष्यतत्संबन्धरूपत्रितयात्मकत्वात् । विशिष्टस्य अतिरिक्तत्वे विशेष्यस्य अनीश्वरत्वप्रसङ्गः । तस्यापि ईश्वरत्वे ईश्वरनानात्वप्रसङ्गः । एवं जीवात्मनामपि न एकत्वं तैरभ्युपगतम् । जीवब्रह्मैक्यं तैर्नाभ्युपगतम् । इत्थं हि तदीयभाष्यं—तत्वमस्यादिवाक्येषु सामानाधिकरण्यं न निर्विशेषवस्त्वैक्यपरं; तत्पदं हि सर्वज्ञं जगत्कारणं ब्रह्म परामृशति । त्वंपदं जीवशरीरकं ब्रह्म प्रतिपादयति । एवं प्रकारद्वयावस्थितैकवस्तुपरत्वं सामानाधिकरण्यस्य—इति ।

किञ्च **पराशरोपपुराणे** अष्टादशाध्याये शास्त्रस्वरूपं निरूप्य, सूत्रभाष्यव्याख्यानादीनां लक्षणमुक्त्वा,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सूत्रभाष्यादि शास्त्रं यत् तत् साक्षात् वेदसाधनम् ।
श्रोतव्यं स्वगुरोः स्वात्मस्वरूपप्रतिपत्तये ॥'

इत्युक्तम् । अत्र स्वात्मशब्दः न अन्तर्याम्यादिपरः, अनन्तरग्रन्थविरोधात् । अनन्तरं च

आत्मलाभात्परं नास्ति किञ्चिन्मात्रमपि द्विजाः ।
अतःस्वात्मानमीशानं लभेत स्वात्मना स्वयम् ॥

लब्धस्य लाभः अलब्धस्य लब्धव्यस्य तथैव च ।
द्विधा लाभः, स्वकं रूपं तत्र लब्धं हि सन्ततम् ॥

लब्धस्यालब्धताऽज्ञानात् लाभस्तस्यैव वेदनात् ।
स्वात्मलाभः स्वतः स्वात्मवेदनोत्पत्तिरेव हि ॥' इत्युक्त्वा

'अस्ति स्वात्मैव नैवान्यत् वस्तुतत्त्वनिरूपणे ।
व्यावहारिकदृष्ट्यैव विभाति स्वात्मनः पृथक् ॥

समस्तस्याप्यभावत्वात् भावः स्वात्मैव केवलम् ।
अस्यैवोपाधिभेदेन विभेदः कल्पितः स्वयम् ॥

नैव स्वाभाविको भेदो यतो दृश्यः स आत्मनः ।
स्वभावादेव यः साक्षी स एव परमशिवः ॥

तदैक्यं परमा मुक्तिः जीवसंज्ञस्य देहिनः ।
स्वत एव त्वभिन्नस्य तदैक्यं परमात्मना ॥

तदैक्याज्ञाननाशेन स्वत एव प्रकाशते ।
महदादि जगत् शून्यपर्यन्तमखिलं जडम् ॥

ब्रह्मात्मैक्यापरिज्ञानमहामायाविजृम्भणम् ।
संसारहेतुभूतस्य मूलाज्ञानस्य बाधकम् ।
ब्रह्मात्मैक्यपरिज्ञानं वेदादेव विजायते ॥' इति

इत्थं जगन्मिथ्यात्वजीवब्रह्माभेदप्रतिपादकोत्तरग्रन्थविरोधात् स्वात्मशब्दस्य अन्तर्याम्यादिपरत्वकल्पनं अयुक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केषाञ्चित् पुराणानां अप्रामाण्यकल्पकैरपि परैः अस्य पराशरपुराणस्य अप्रामाण्यं न शङ्कितुं शक्यम् । तत्र न तावत् कर्तृदोषात् अप्रामाण्यम् । 'पुलस्त्यवसिष्ठवरदानलब्धदेवतापरमार्थज्ञानः पराशरः परमाप्तः' इतिपरैरेव उक्तत्वात् । किञ्च पराशरपुराणे अष्टादशाध्यायान्ते शुकं प्रति अष्टादशाध्यायात्मकपुराणोपदेशानन्तरं

'मुनेः पराशरस्यास्य स्वानुभूतिप्रदायिनी ।
पार्वती परमा देवी तत्रैवाविरभूत् स्वयम् ॥'

इत्यनेन परदेवतासाक्षात्कारः पराशरस्योक्तः ॥

'विलोक्यशुकमाह्लादात् इदं वचनमब्रवीत् ।
मुनिनाऽनेन कल्याण यदुक्तं परमादरात् ।

सत्यमेव हि तत्सर्वं सत्यमुक्तं मयैव तु' इत्यनेन परदेवतया पराशरोक्तसर्वंसत्यमिति प्रतिज्ञातमित्युक्तम् । तस्मात् पराशरपुराणस्य कर्तृदोषादप्रामाण्यं शङ्कितुमशक्यम् । तथा सति विष्णुपुराणस्याप्यप्रामाण्यं स्यात् ।

किञ्च विष्णुपुराणस्य सर्वोत्तरत्वे श्रुतप्रकाशिकायां चत्वारो हेतवः उपात्ताः । तथा च श्रुतप्रकाशिका—अस्य तावत् पुराणरत्नस्य प्राच्योदीच्यादिसर्वविद्वज्जनविदितस्य पुराणान्तरेभ्योऽपि प्रसिद्धिप्राचुर्यात् धर्मशास्त्रेषु मानवस्येव व्याकरणेषु पाणिनीयस्येव च सजातीयप्रबन्धेभ्यः प्रकर्षातिशयो न अपह्नोतुं शक्यते । अत एव प्रसिद्धिप्रचुर्यात् कौर्मादेरिव नष्टकोशत्वशङ्का दूरोत्सारिता । अनतिविस्तरत्वाच्च प्रक्षेपशङ्का नावतरति । परोक्तिसिद्धपरिग्रहातिशयश्चेदम्—इति ।

एतच्च हेतुचतुष्टयं पराशरपुराणेऽपि विद्यते । पराशरप्रणीतत्वादेव परोक्तिसिद्धपरिग्रहातिशयत्वमस्य सिद्धम् । अनतिविस्तरत्वाच्च प्रक्षेपशङ्का नावतरति अनतिविस्तरत्वं च पुराणान्ते—

'अष्टोत्तरसहस्रैश्च श्लोकैरेव विनिर्मितम् । [illegible]नां
[illegible] ।
इदमष्टादशाध्यायैः शिवोऽत्रैव प्रदर्शितः' इतिवचनेनैव दर्शितम् । अत्र हि श्लोकानां अध्यायानां च संख्याकथनात् प्रक्षेपशङ्का निराकृता । अष्टोत्तरसहस्रश्लोकात्मकत्वात् अनतिविस्तरत्वं च सिद्धम् । अभियुक्तैः निबन्धनेषु उदाहृतत्वात् प्राच्योदिच्यादिसकलविद्वज्जनविदितत्वात् प्रसिद्धिप्राचुर्यं च सिद्धम् । तत एव नष्टकोशत्वशङ्काऽपि परास्ता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्थं हेतुचतुष्टयेनापि पराशरपुराणस्य पुराणरत्नत्वात् अप्रामाण्यशङ्कानवकाशात् तदुपबृंहितत्वात् अद्वैतश्रुतीनां अद्वैतपरत्वसिद्धिः ।

विष्णुपुराणेनाप्युपबृंहिताः अद्वैतश्रुतयः । तत्र हि उपक्रमे एव

'अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥'

इत्युक्तम् ।नेदं परेषामनुकूलम् । परैः विष्णवाख्यस्य परब्रह्मणः परमार्थतः कार्यकारणावस्थाद्वयाभ्युपगमात् कथं सदैकरूपरूपत्वम् ।

एवं जडभरतोपाख्याने स्पष्टं अद्वैतस्य परमार्थत्वमुक्तम् । तत्र यत्—

'परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतत् अन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः'

इत्यनेन अद्वैतस्य मिथ्यात्वमुक्तमिति—परैरुक्तम्, तत् पूर्वापरग्रन्थानभिज्ञतामूलकम् ।

तथा हि—भरतोपाख्याने राजभृत्यैः माहात्म्यापरिज्ञानात् शिबिकोद्वहने नियुक्तं जडभरतं प्रति राज्ञो वचनं 'किं श्रान्तोऽसि' इत्यादि । ततो राजानं प्रति भरतस्य वचनं

'आत्मा शुद्धोऽक्षरश्शान्तः निर्गुणः प्रकृतेः परः ।
प्रवृद्ध्यपचयौ नास्य चैकस्याखिलजन्तुषु । "इति ।

अत्र प्रत्यगात्मनः एकत्वं स्पष्टमुक्तम् । अनन्तरं 'भो भो विसृज्य शिबिकां' ...दि राजवचनम् । अनन्तरं भरतवचनं

'यदा समस्तभूतेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान् सोऽहं इत्येतद्विफलं वचः ...... ।
शरीराकृतिभेदास्तु भूपैते कर्मयोनयः ।' इति ।

अनेन औपाधिक एवात्मभेदः न पारमार्थिक इति स्पष्टीकृतम् । एवं आत्मैक्यमुक्त्वा अनन्तराध्याये राजप्रश्नस्य भरतोत्तरं—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'श्रेयांस्येवं अनेकानि शतशोऽथ सहस्रशः ।
सन्त्यत्र परमार्थस्तु न त्वेते श्रूयतां च मे ॥' इति ।

अनेन पुत्रराज्यादिश्रेयसां अपरमार्थत्वमुक्त्वा, यज्ञादीनां केषाञ्चित् परमार्थत्वमाशङ्क्य तदपि निराकृत्य, अनन्तरं

'परमात्मात्मनोर्योगः परमार्थ इतीष्यते'

इत्यनेन जीवब्रह्मयोगस्य परमार्थत्वं आशङ्क्य

'मिथ्यैतत् अन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ।'

इत्यनेन उक्तयोगस्य परमार्थत्वं निरस्तम् । निरस्यमानं मतमिदं भास्करादिमतं, औडुलोमिमतं, पाञ्चरात्रिकानां च मतम् । ते हि

'आमुक्तेर्भेद एव स्यात् जीवस्य च परस्य च ।
मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः' इति वदन्ति ।

ब्रह्मैव स्वाविद्यया संसरति, स्वविद्यया मुच्यते, न तु अन्यत् द्रव्यं अन्यद्रव्यात्मकतां एति-इति अद्वैत्यभिमतम् । पूर्वोक्तं मतं तु अद्वैतिनां दूष्यम् । तथा चोक्तं तैत्तिरीयकभाष्ये भगवत्पादैः—"न ह्यन्यस्य अन्यभावापत्तिः उपपद्यते । ननु तस्यापि तद्भावापत्तिः अनुपपन्नैव; न—अविद्याकृतातादात्म्यापोहार्थत्वात्" इति ।

इत्थं मतान्तरस्य परमार्थत्वं निरस्य

'तस्माच्छ्रेयांसि अशेषाणि नृपैतानि न संशयः ।
परमार्थस्तु भूपाल सङ्क्षेपाच्छ्रूयतां मम ॥

एको व्यापी समः शुद्धः निर्गुणः प्रकृतेः परः ।
जन्मवृद्ध्यादिरहितः आत्मा सर्वगतोऽव्ययः ॥

परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः ।
न योगवान् न युक्तोऽभूत् नैव पार्थिव योक्ष्यते ॥

तस्यात्मपरदेहेषु सतोऽपि एकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोः तथाऽस्य परमात्मनः ॥

एकस्वरूपभेदश्च बाह्यकर्मप्रवृत्तिजः ।
देवादिभेदेऽपध्वस्ते नास्त्येव आवरणे हि सः ॥'

इति ग्रन्थेन अद्वैतस्य परमार्थत्वं द्वैतस्य मिथ्यात्वं च स्वमतमिति दर्शितम् ।

यत्त्वत्र परेषां व्याख्यानम्—

दृष्टान्ते अनेकरन्ध्रवर्तिनां वाय्वंशानां न स्वरूपैक्यं, अपि तु आकारसाम्यमेव तेषाम् । वायुत्वेन एकाकाराणां रन्ध्रभेदनिष्क्रमणकृतो हि षड्जादिसंज्ञाभेदः—इति,

यच्च श्रुतप्रकाशिकायां श्रौते आकाशदृष्टान्तेऽपि एवं कल्पनम् ,

तदयुक्तम् । दृष्टान्तस्य लोकप्रसिद्धमात्रालम्बनत्वात् । अस्ति हि आकाशमेकमिति लोके प्रसिद्धिः । अतः तद्दृष्टान्तेन अत्मैकत्वसाधनं श्रुतिषु युज्यते । अन्यथा 'आकाशवत्सर्वगतश्चनित्यः' 'वायुर्यथैको भुवनं प्रविष्टः रूपंरूपं प्रतिरूपो बभूव' 'यथा सर्वगतं सौक्ष्म्यात् आकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते ॥' 'यथाऽऽकाशस्थितो नित्यं वायुस्सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीप्युपधारय' इत्यादिश्रुतिस्मृतिभिः आकाशवायुदृष्टान्तेन परमात्मनः एकत्वसर्वगतत्वनित्यत्वादिनिरूपणं अनुपपन्नं स्यात् । न ह्याकाशस्य वायोर्वा नित्यत्वं, उत्पत्तेः श्रुतिसिद्धत्वात् । किञ्च 'वेणुरन्ध्रविभेदेन' इति श्लोकद्वये, वायोस्सावयवत्वादिनिरूपणेन स्वरूपभेदं प्रसाध्य तद्दृष्टान्तेन आत्मनः स्वरूभेदस्य साधने, परमात्मनः पारमार्थिकः स्वरूपभेदः साधितः स्यात् । तत्र 'तथाऽस्य परमात्मनः' परमात्मशब्दश्रवणात् । न च एतद्दोषभयात् अस्य श्लोकद्वयस्य प्रत्यगात्मपरत्वं [illegible]त्यं वक्तुम् । तदा 'तथाऽस्य प्रत्यगात्मनः' इति पठितव्यं स्यात् । ततश्च अयमर्थः—परमात्मैव स्वाविद्यया संसरति, तस्य कर्मकृतदेवादिशरीराख्योपाधिकल्पित एव स्वरूपभेदः, न तु पारमार्थिकः । स्वात्मज्ञानेन उपाधिनिवृत्तौ स भेदो निवर्तते—इति । अतः स्वरूपभेद एव अत्र प्रतिषिध्यत इति युक्तम् ।

किञ्च उत्तराध्याये ऋभुनिदाघसंवादात्मकं उपाख्यानमुक्त्वा,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत् ।
सर्वभूतान्यभेदेन ददृशे स तदात्मना ॥' इति संवादं परिसमाप्य

'तथा त्वमपि धर्मज्ञ तुल्यात्मरिपुबान्धवः ।
भव सर्वगतं जानन्नात्मानमवनीपते ॥

सितनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तिदृष्टिभिरात्माऽपि तथैकः सन् पृथक् पृथक् ॥

एकः समस्तं यदिहास्ति किञ्चित् तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ॥

इतीरितिस्तेन स राजवर्यः तत्याज भेदं परमार्थदृष्टिः ।'
इत्यनेन आत्मैक्यज्ञानं अपवर्गसाधनमित्युक्तम् ।

तस्मात् 'परमात्मात्मनोर्योगः' इति पद्ये पाञ्चरात्रिकादिमतस्यैव प्रतिषेधः । अद्वैतसिद्धान्तस्तु प्रतिष्ठापितः ।

प्रत्युत परमतस्य प्रतिषेधः विष्णुपुराणे स्फुटमुपलभ्यते । तत्र हि 'परमात्मात्मनोर्योगः' इति पद्यात् पूर्वपद्ये

'ध्यानं नैवात्मनो भूप परमार्थार्थशब्दितम् ।
भेदकारि परेभ्यस्तु परमार्थो न भेदवान् ॥'
इत्युक्तम् ।

अत्र परमार्थवस्तुनो ध्यानं न परमार्थः इति, भेदवान् न परमार्थः इति चोक्तम् । तत् परेषां स्वसिद्धान्तविरुद्धम् । एवं उपबृंहणानुसारं श्रुतितात्पर्यविषयोऽर्थः अद्वैतसिद्धान्त एवेति स्थितम् ।

किञ्च वेदवेदाङ्गव्याख्यातॄणां परमाप्तत्वेन सकललोकस्तुतानां महानुभावानां आत्मैक्यवाद एव श्रौत इत्यभिमतम्—इत्यतोऽपि अद्वैतदर्शनमेव श्रौतं दर्शनम् ।

तथा हि भट्टपादैः अर्थवादाधिकरणे 'एतेन क्रत्वर्थकर्तृप्रतिपादनेन उपनिषदां नैराकाङ्क्ष्यं व्याख्यातं' इत्यनेन ग्रन्थेन आपाततः क्रत्वर्थत्वमात्रमात्मज्ञानस्योक्त्वा, व्याकरणाधिकरणे आत्मज्ञानस्य क्रत्वर्थत्वं पुरुषार्थत्वञ्च वर्णितम् । यथोक्तं राणके–'एतच्च संसारिरूपात्मप्रतिपादनाभिप्रायम् । असंसारिरूपसगुण-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निर्गुणात्मज्ञानस्याभ्युदयनिःश्रेयससाधनत्वेन पुरुषार्थतायाः साधुशब्दाधिकरणे वक्ष्यमाणत्वात्—इति ।

व्याकरणाधिकरणे च—

'वैत्रव हि विज्ञानं संस्कारत्वेन गम्यते ।
पराङ्गश्चात्मविज्ञानादन्यत्रेत्यवधारणात् ॥'

'आत्मज्ञानं हि संयोगपृथक्त्वन्यायेन क्रत्वर्थपुरुषार्थत्वेन ज्ञायते ।' इत्यादिग्रन्थेन आत्मज्ञानस्य पुरुषार्थत्वमुक्तम् ।

अनेन जीवस्य ब्रह्मात्मकत्वं गम्यते । जीवब्रह्मणोर्भेदे तु जीवज्ञानस्य क्रत्वर्थत्वात् तद्भिन्नब्रह्मज्ञानस्य पुरुषार्थत्वात् 'एकस्यतूभयत्वे संयोगपृथक्त्वं' इति न्यायो नावतरति । अत एव उत्तरत्र तरतिशोकमात्मविदित्याद्यात्मज्ञानफलश्रुतीनामर्थवादत्वं परिहर्तुं 'अप्रकरणगतानैकान्तिकक्रतुसंबन्धात्मसंबन्धानाञ्च न अञ्जनखादिरघृतादिफलश्रुतिवदर्थवादत्वं' इत्युक्तम् । राणके च—नन्वासां फलश्रुतीनां पर्णमयीन्यायेन अर्थवादत्वस्य संबन्धग्रन्थेऽभिहितत्वात् न फलसमर्पकत्वं युक्तमित्याशङ्क्याह—अप्रकरणगतेति । न चात्मनो द्वारभूतस्यैकान्तिकः—स्वाभाविकः क्रतुसंबन्धोऽस्ति, शरीरसंबन्धोपाधिकत्वात्कर्तृत्वस्य, अशरीरिरूपात्मज्ञाने तदभावात्—इत्युक्तम् । न हीदं भेदवादे घटते, तटस्थेश्वरस्य क्रतुसंबन्धस्य गगनकुसुमायितत्वात् 'जुह्वादीनामव्यभिचरितक्रतुसंबन्धात्तत्फलश्रुतिरर्थवादः आत्मनस्तु क्रतुसंबन्धस्यौपाधिकत्वेनास्वाभाविकत्वान्न तज्ज्ञानफलश्रुतेः अर्थवादत्वं' इति वक्तुमशक्यत्वात् ।

किञ्च तर्कपादे शबरस्वामिना देहातिरिक्त आत्मा साधितः । तत्र भट्टपादैः—'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेन' इति श्लोके देहातिरिक्ते प्रत्यगात्मनि वेदान्तानां प्रामाण्यमुक्तम् । इत्थं 'कर्त्रात्मपरा वेदान्ताः' इति निरीश्वरवादिनां मीमांसकानां मतं वेदान्तविरुद्धमनादृत्य परमात्मविवक्षया वेदान्तानां अकर्तरि प्रत्यगात्मनि प्रामाण्यमभ्युपगम्य 'तरतिशोकमात्मवित्' 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' 'सर्वांश्चलोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्यविजानाति' 'ब्रह्मवेद ब्रह्मैव भवति' इत्याद्यात्मज्ञानफलश्रुतीनां स्वार्थपरत्वसमर्थनात् भट्टपादानां अद्वैतमौपनिषदमित्यभिमतमिति—बालानामपि सुगमम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विशिष्य वेदान्ततात्पर्यनिर्णायकब्रह्मसूत्राक्षरार्थालोचनेऽपि अद्वैतदर्शनमेव वेदान्तदर्शनमिति स्फुटम् ।

तथा हि—"अथातो ब्रह्मजिज्ञासा" इत्यत्र मुमुक्षोः मोक्षसाधनं ब्रह्मज्ञानं इति सूत्रितम् । ब्रह्मज्ञानस्वरूपं च चतुर्थाध्याये सूत्रितम् । 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति । तत्र हि फलाध्याये 'आत्मेतितूपगच्छन्ति ग्राहयन्ति च' इति ब्रह्मात्मैक्यनिरूपणपरं अधिकरणम् । तत्र—शास्त्रप्रतिपाद्यः परमात्मा किं अहमिति प्रत्यक्त्वेन ग्रहीतव्यः किं वा मदन्य इति पराक्त्वेन—इति संशय्य, अपहतपाप्मत्वादिगुणः परमात्मा, तद्विपरीतगुणः शारीरः, अतः तयोस्तादात्म्यायोगात् पराक्त्वेनैव ग्रहीतव्य इति प्रापय्य; 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि' इति जाबालाः अहंब्रह्मास्मीति वाजसनेयिनश्च आत्मत्वेनैनमुपगच्छन्ति । ग्राहयन्ति च आत्मत्वेनैनं वेदवाक्यानि 'एष त आत्माऽन्तर्याम्यमृतः' 'एष त आत्मा सर्वान्तरः' इत्यादीनि । अतः अहमित्येव ग्रहीतव्यः—इति राद्धान्तितम् ।

यत्त्वत्र परेषां कल्पनम्—उपासितुरात्मेत्येवोपास्यं, उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथा आत्मा तथा आत्मनोऽपि परंब्रह्म आत्मा इत्येवोपासीत—इत्यर्थ इति;

तदेतत्कल्पनं पूर्वोक्तमन्त्रादिपरमाप्तकृततत्त्वमस्यादिमहावाक्यव्याख्यानविरोधात् अनादर्तव्यम् । किञ्चेदं कल्पनमनुपपन्नम् । जीवात् परमार्थतो भिन्नस्य ब्रह्मणः आत्मशब्दार्थत्वाभावात् । आत्मशब्दो हि जीवपरः योगेन रूढ्या च । योगश्च वेदोपबृंहणेन दर्शितः । तथा च महाभारते 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावः तस्मादात्मेति कीर्त्यते' इत्यात्मशब्दव्युत्पत्तिस्मरणम् । अस्माद्वेदोपबृंहणात् भोक्तुरेवात्मत्वं सिद्धम् । प्रसिद्धश्चात्मशब्दो जीवे श्रुत्यादिषु—

"आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति श्रुतिः ।

'यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात् स्वभावतः ।
न हि तस्य भवेन्मुक्तिः जन्मान्तरशतैरपि' इति स्मृतिः ।

'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावसुखदुःखापवर्गाः प्रमेयं' इति गौतमसूत्रम् ।

'नानात्मानो व्यवस्थातः' इति कणादसूत्रम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'अस्ति आत्मा नास्तित्वसाधकाभावात्' इति कापिलं सूत्रम् ।

'नित्यशुचिसुखात्मख्यातिरविद्या' इति पातञ्जलं योगसूत्रम् ।

'एक आत्मनः शरीरे भावात्' इत्यतिरिक्तात्मसाधकं व्याससूत्रम् ।

'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।'

इत्यभियुक्तानां वचनम् ।

'तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा' इति लौकिकं वचनम् ।

अत्र सर्वत्राप्यात्मशब्दो भोक्तरि प्रसिद्धः । इत्थं योगेन रूढ्या च आत्मशब्दस्य भोक्तृपरत्वात् तद्भिन्ने परमात्मनि वृत्तिरयुक्ता ।

किञ्च 'तदर्थ एव दृश्यस्यात्मा' इति पातञ्जलयोगसूत्रे तदर्थ एव दृश्यस्य आत्मा भवति—स्वरूपं भवतीत्यर्थः—इतिवैयासिकभाष्ये च आत्मशब्दस्य स्वरूपपरत्वदर्शनात्, जीवस्य ईश्वर आत्मेति वदता तयोरैक्यमुक्तं स्यात् । न हि भेदे सति जीवस्येश्वर आत्मा—स्वरूपं भवितुमर्हति । न हि घटस्य पट आत्मा, न वा कुड्यस्य कुसूल आत्मा ।

किञ्च जीवस्य ईश्वर आत्मेति वदता जीवस्येश्वरकार्यत्वं स्वीकृतं स्यात् । कार्यस्य हि कारणमात्मा । अस्ति हि लोके प्रसिद्धिः—मृदात्मको हि घटः तन्त्वात्मकः पटः इति । जीवस्य कार्यत्वे च अनित्यात्मवादिलोकायतादिमतप्रवेशस्स्यात् ।

किञ्च जीवं प्रति ब्रह्मण आत्मत्वे शुक्तौ रजतवत् रज्जौ सर्पवच्च ब्रह्मणि जीवः कल्पितः स्यात् । कल्पितस्याधिष्ठानमात्मा । यथोक्तं विष्णुपुराणे—'ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः । अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे' इति । उक्तञ्च कौर्मे—'ज्ञानस्वरूपमेवाहुः जगदेतद्विचक्षणाः । अर्थस्वरूपमेवाज्ञाः पश्यन्त्यन्ये कुदृष्टयः' इति । अर्थस्य ज्ञानमेव स्वरूपं, न तु तस्य स्वातन्त्र्येण स्वरूपमस्ति, कल्पितत्वात्—इति वचनद्वयस्यार्थः । ततश्च जीवस्य ब्रह्मणि कल्पितत्वे चिदाभासवादः स्वीकृतः स्यात् ।

किञ्च जीवस्य शरीरत्वात् तं प्रति ब्रह्मणः आत्मत्वमित्यनुपपन्नम् । शरीरत्वप्रतिपादकस्य यस्यात्माशरीरमित्यादिवचनस्य 'स्वे महिम्नि प्रतिष्ठितः' इत्यादिव्यपदेशवत् गौणत्वात् । मुख्यत्वे तु शरीरस्य सुखदुःखभोगसाधनत्वात् ईश्वरस्य भोक्तृत्वापत्त्या अनीश्वरत्वं स्यात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत एव श्रुतिः यस्यात्माशरीरमित्याद्युक्त्वा "नान्योऽतोस्ति द्रष्टा" इत्यनेन ब्रह्मातिरिक्तं चेतनं प्रतिषिध्य "अतोऽन्यदार्तं" इत्यनेन ब्रह्मातिरिक्तं अचेतनञ्च प्रतिषेधति । ततश्च 'यस्यपृथिवीशरीरं, यस्यात्माशरीरं' इत्यादि 'जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा' इत्यादिवत् अपवादायैव अध्यारोपमात्रमिति गम्यते । तस्मात् जीवस्य शरीरत्वात् ब्रह्मणः आत्मत्वमिति कल्पनं अनुपपन्नम् ।

यत्तु-भोगसाधनत्वं न शरीरत्वं किंतु नियम्यत्वं शरीरत्वं–इति कल्पनं, तदप्यसारम् । तस्मिन् पक्षे हि सुतरां आत्मत्वमनुपपन्नम् । न हि नियम्यस्य भृत्यस्य प्रभुरात्मा भवति । तथा सति नियम्यानां भृत्यानां चित्रप्रतिबिम्बादिवत् निरात्मत्वं स्यात् ।

किञ्च नियम्यत्वं दुर्निर्वचम् । वागादिभिः प्रेर्यमाणत्वं नियम्यत्वमितिचेन्न ; ब्रह्मणो वागाद्यभावात् । अन्यथा "अवागमनाः" इत्यादिश्रुतिविरोधात्, पृथिव्यादीनां नियम्यत्वाभावप्रसङ्गाच्च । न हि जडाः पृथिव्यादयः वागादिभिः भ्रूचलनादिभिर्वा प्रेरयितुं शक्यन्ते । वचनादिव्यापारवत्त्वे ब्रह्मणः सविकारत्वं स्यात् । नापि मृदादीनां कुलालादिभिरिव हस्तादिभिः प्रेर्यमाणत्वं नियम्यत्वम् । जीवानां नियम्यत्वाभावप्रसङ्गात् । न हि निरवयवा जीवा हस्तादिभिः प्रेरयितुं शक्यन्ते । किञ्च हस्तादिमत्त्वात् अब्रह्मत्वं स्यात् । "अचक्षुःश्रोत्रं तदपाणिपादं" इति हि श्रुतिः । किञ्च प्रेरकत्वात् कुलालादिवत् सविकारत्वं स्यात् । न च अयस्कान्तन्यायेन निर्विकारस्य प्रेरकत्वमिति युक्तम् । 'पुरुषाश्मवदिति चेत् तथाऽपि' इति सूत्रे सूत्रकृतैव अयस्कान्तदृष्टान्तस्य दूषितत्वात् । तस्मात् सर्वथा ब्रह्मणः प्रेरकत्वं चिदचिद्वस्तुनोः प्रेर्यमाणत्वं च असिद्धम् । तत्सिद्धावपि तदात्मत्वमीश्वरस्य असिद्धम् । राज्ञो भृत्यान् प्रति आत्मत्वाभावात् ।

तस्मात् सर्वथा जीवभिन्ने ब्रह्मणि आत्मशब्दानुपपत्तेः 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इत्यधिकरणे परकीयं कल्पनमसारम् ।

तदेवं प्रत्यग्ब्रह्मैक्यज्ञानं मोक्षसाधनमिति ब्रह्मसूत्रेण न्यायतो निर्णीतम् ।

तदर्थं तृतीयाध्याये ज्ञानसाधनानि निरूपितानि । तत्र वैराग्यं प्रथमे पादे उत्क्रान्तिनिरूपणद्वारेणोपपादितम् । द्वितीये, आद्येन अधिकरणचतुष्टयेन त्वंपदार्थः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शोधितः। तत्र स्वप्नसृष्टेर्मिथ्यात्वेन, सुखदुःखाद्यवभासेऽपि जीवोऽसङ्ग एवेति निरूपितः। सुषुप्तौ ब्रह्मैक्येन तदसङ्गत्वं अनुभावितम्। तस्यैव पुनःप्रबोधेन नित्यत्वमुक्तम्। मूर्च्छादिविचारेण श्वासादिसर्वव्यवहारलोपेऽपि मरणे जीवनाशो न शङ्कनीयः–इति। अनन्तरं "नस्थानतोऽपि" इत्याद्यधिकरणैः तत्पदार्थः शोधितः।

यत्तु परैः "दोषदर्शनाद्वैराग्योदयाय जीवस्यावस्थाविशेषाः निरूपिताः। इदानीं ब्रह्मप्राप्तितृष्णाजननाय प्राप्यस्य ब्रह्मणो निर्दोषत्वकल्याणगुणात्मकत्वप्रतिपादनाय आरभते नस्थानतोऽपीत्यादि इत्युक्तम्। तदयुक्तम्—छान्दोग्ये पञ्चाग्निविद्यायां उत्क्रान्तिं निरूप्य "तस्माज्जुगुप्सेत" इत्युक्तम्। याज्ञवल्क्यस्मृतौ च अवेक्ष्यागर्भवासाच्च कर्मजा गतयस्तथा" इत्यादिना गर्भवासपरलोकगमनागमनादिपर्यालोचनस्य वैराग्यहेतुत्वमुक्त्वा अनन्तरं ज्ञानं विहितम्। एवं श्रुतिस्मृतिपर्यालोचनया प्रथमपादार्थस्यैव ज्ञानसाधनवैराग्यार्थत्वं युक्तम्। स्वप्नाद्यवस्थानिरूपणस्य असङ्गत्वादिज्ञानहेतुत्वात् ब्रह्मात्मैक्यनिर्णयद्वारा मोक्षोपयोगित्वम्। बृहदारण्यके जनकयाज्ञवल्क्यसंवादे 'कतम आत्मेति' इत्यादिना 'अत ऊर्ध्वं विमोक्षायैव ब्रूहि' इत्यादिसन्दर्भपर्यालोचने मोक्षोपयोगित्वप्रतीतेः। छान्दोग्येऽपि प्रजापतिविद्यायां अवस्थात्रयनिरूपणस्य मोक्षोपयोगित्वं प्रतीयते।

किञ्च बृहदारण्यके अवस्थात्रयनिरूपणसन्दर्भे-देहादिव्यतिरिक्तत्वं स्वप्रकाशत्वं असङ्गत्वं च स्वप्नावस्थामाश्रित्य निरूपितम्। अद्वैतत्वं अलुप्तदृष्टिस्वरूपत्वं आनन्दैकस्वभावत्वं च सुषुप्त्यवस्थामाश्रित्य प्रतिपादितम्। किमेतत्सर्वं ब्रह्मैक्ययोग्यजीवस्वरूपनिर्णयाय उपयुक्त उत वैराग्याय? । परिशीलयन्तु कृतबुद्धयः।

माण्डूक्यतापनीययोश्च अवस्थात्रयं साधनं तुरीयं प्राप्यमिति मोक्षोपयोगित्वमेवोक्तम्। इत्थं श्रुतिसूत्रयोः अनुगमः अद्वैतसिद्धान्ते एव।

यत्तु स्वप्नस्य सत्यत्वं परैः सूत्रार्थतया उक्तं तत् 'वैधर्म्याच्च न स्वप्नादिवत्' इति सूत्रविरुद्धम्। यदपि 'मायामात्रं तु' इत्यत्र मायाशब्दःआश्चर्यवाचीत्युक्तं तदपेशलम्। बृहन्नारदीयवचनविरोधात्। मायाशब्दस्य आश्चर्यपर्यायत्वं न कोशादिषु दृष्टम्। 'देवमायेव निर्मिता' इत्यत्रापि दुर्घटत्वमेव मायाशब्दार्थः। "मायामात्रमिदं द्वैतं" इति श्रुतौ तदर्थकतयेव मायाशब्दः उपबृंहणैः निरूपित इति प्रागुक्तम्। "माययाऽपहृतज्ञानाः" "तस्मिंश्चान्यो मायया सन्निरुद्धः" इत्यादौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मायाशब्दस्य आश्चर्यार्थकत्वं अनन्वितम् । भागवतेऽपि "अविद्यमानोप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा" इति स्वप्नमिथ्यात्वं स्पष्टमुक्तम् । ततश्च मायाशब्दोमिथ्यापदार्थवचनः । 'मायां तु प्रकृतिं विद्यात्' 'एषा माया स्वाव्यतिरिक्तानि क्षेत्राणि दर्शयित्वा जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' इत्याद्याश्च श्रुतयः अत्रैवार्थे समञ्जसाः ।

एवं 'नस्थानतोपि' इत्याद्यधिकरणैः तत्पदार्थः शोधितः निष्प्रपञ्चनिर्विशेषस्वप्रकाशस्वरूप इति ।

यत्तु नस्थानतोपीतिसूत्रस्य परकीयं व्याख्यानं, तदयुक्तम्—तत्र 'उभयलिङ्गं' इत्यस्य 'सर्वत्र' इत्यनेनैव अभिसंबन्धकथनेन निषेधस्य प्रतियोग्यध्याहारक्लेशात्, उपाध्यवस्थानप्रयुक्तदोषसंबन्धाभावप्रतिपादनपरत्वेन सूत्रव्याख्यानात् तस्य च संभोगप्राप्तिसूत्रेणैव गतार्थत्वात् सूत्रस्य वैयर्थ्यापादकत्वात्, अधिकाशङ्कानिराकरणस्य सौत्रहेतुना अलाभात् सौत्रहेतोरपि आनर्थक्याच्च ।

"भेदादितिचेन्न प्रत्येकमतद्वचनात्" इति सूत्रस्यापि परकीयव्याख्यानमयुक्तम् । भेदादित्यस्य देहयोगरूपावस्थाभेदात् इत्यर्थकरणेन अध्याहारक्लेशात् उपस्थितिकल्पनक्लेशाच्च । अतद्वचनादित्यत्र तच्छब्दस्य दोषसंबन्धपरतया व्याख्यानेन प्रकृतावमर्शित्वस्वारस्यभङ्गाच्च ।

'अरूपदेव हि तत्प्रधानत्वात्' इति सूत्रं च निर्विशेषपरतां वेदान्तानां स्फुटयति । बहुव्रीह्यैव अर्थलाभेऽपि मतुबन्तप्रयोगः आपस्तम्बश्रौतसूत्रादिषु दृष्टः, 'असुब्वतः' इति महाभाष्यप्रयोगोऽपि ।

"आह च तन्मात्रं" इतिसूत्रस्य प्रकाशमात्रं ब्रह्म इत्यस्मिन्नेवार्थे स्वारस्यम् । यत्तु परेषां 'तन्मात्रमाह नान्यद्वाक्यान्तरावगतं निषेधति' इति व्याख्यानं, तत् न स्वरसम् । 'तदाह केवलं' इति हि तदा स्यात् ।

"प्रकृतैतावत्त्वं हि" इति सूत्रे प्रकृतपदं "अथात आदेशो नेति नेति" इति श्रुतेः ब्रह्मणि मूर्तामूर्तप्रपञ्चनिषेधार्थकत्वे एव स्वरसम् । न तु एतावत्त्वप्रतिषेधपरत्वे, एतावत्त्वस्य अप्रकृतत्वात्, अलोकसिद्धत्वाच्च । तस्य श्रौतत्वसाधने विधायनिषेधस्य प्रक्षालनाद्धीतिन्यायविषयता । अद्वैतसिद्धान्ते तु अध्यारोपापवादन्यायेन सार्थकता ।

4

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवञ्च निष्प्रपञ्चनिर्विशेषस्वप्रकाशरूपं ब्रह्म इत्येव उक्तसूत्रैः प्रतिपादितमिति युक्तम् ।

तदेवं जीवब्रह्मैक्यज्ञानोपयोगि जीवब्रह्मणोस्स्वाभाविकं रूपं सूत्रैर्निर्णीतम् ।

तदर्थं प्रपञ्चमिथ्यात्वं च सूत्रितम् । तथा हि—'असंभवस्तु सतोऽनुपपत्तेः' इति सूत्रे सतः अनुत्पत्तिरुक्ता । वियत्प्राणपादयोश्च प्रपञ्चस्य उत्पत्तिरुक्ता । तेन प्रपञ्चो न सन् इत्युक्तं भवति । 'नाभाव उपलब्धेः' इति सूत्रे दृश्यस्य प्रपञ्चस्य असत्त्वं निराकृतम् । तेन प्रपञ्चो न असन् इत्युक्तं भवति । 'नैकस्मिन्नसंभवात्' इति सूत्रे एकत्र सत्त्वासत्त्वे न संभवतः इत्युक्तम् । तेन प्रपञ्चस्य सदसद्रूपता नेत्युक्ता भवति । तदेवं प्रपञ्चः न सन् नासन् नापि सदसन् इत्युक्तया सत्त्वेन असत्त्वेन सदसत्त्वेन वा अनिर्वाच्यत्वरूपं मिथ्यात्वं सूत्रोक्तम् । एतच्च पञ्चपादिका-कृद्भिरुपपादितं मिथ्यात्वम् ।

'प्रकृतैतावत्त्वं हि प्रतिषेधति' इति सूत्रेण "द्वे वाव ब्रह्मणो रूपे" इत्यादेः "अथात आदेशो नेतिनेति" इत्यन्तस्य तात्पर्यं निर्णीतम् । तत्र च सूत्रे प्रकृतशब्देन ब्रह्मणि प्रतीतो मूर्तामूर्तप्रपञ्च उक्तः, प्रतिषेधतीत्यनेन ब्रह्मण्येव तन्निषेध उक्तः । तेन प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं प्रपञ्चस्योक्तम् । इदमेव शुक्तिरूप्यादीनां मिथ्यात्वम् । एतच्च प्रपञ्चस्य सूत्रोक्तम् । एतच्च मिथ्यात्वं विवरणकृद्भिरुपपादितम् ।

जिज्ञासासूत्रे ब्रह्मज्ञानं जीवस्य मोक्षसाधनं सूत्रितम् । मोक्षश्च सर्वानर्थ-निवृत्त्युपलक्षितं स्वप्रकाशपूर्णानन्दस्वरूपम् । तत्र आनन्दस्य स्वरूपत्वात् सर्वानर्थ-निवृत्तेरेव ज्ञानप्रयोज्यत्वम् । अतश्च प्रमातृत्वकर्तृत्वभोक्तृत्वादिप्रमुखस्य सर्वस्या-प्यनर्थस्य ज्ञाननिवर्त्यत्वसूचनात् प्रमातृत्वादेः मिथ्यात्वं सूचितम् । तेन प्रमेयस्य भोग्यादेः मिथ्यात्वमप्यर्थसिद्धम् । अनेन बन्धमिथ्यात्वमप्युक्तं भवति । स्पष्टञ्चैत-दुपपादितं पञ्चपादिकाविवरणकृद्भिः । एवञ्च अनेन सूत्रेण ज्ञाननिवर्त्यत्वरूपं मिथ्यात्वं प्रपञ्चस्य सूचितम् । अज्ञानमूलकत्वसूचनात् । अन्यथा ज्ञाननिवर्त्यत्वं प्रपञ्चस्य न स्यात्, यतो ज्ञानमज्ञानस्यैव निवर्तकमिति ।

'आत्मनि चैवं विचित्राश्च हि' इति सूत्रेण जीवे स्वप्नप्रपञ्च इव ब्रह्मणि दृश्यप्रपञ्चः—इत्युक्तम् । अत्र आत्मशब्देन जीवस्यैव ग्रहणं युक्तम्, दृष्टान्तत्वात्,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवंशब्देन च दृष्टान्तदार्ष्टान्तिकभावप्रतीतेः । परमात्मा दार्ष्टान्तिकः । अत्र स्वाप्नपदार्थपर्यालोचनायां बृहदारण्यके "न तत्र रथाः" इत्यादिना स्वप्नदृश्यं निषिध्य "अथ रथान्" इति स्वाप्नसृष्टिरुक्ता । तेन स्वात्यन्ताभाववति प्रतीयमानत्वं स्वाप्नस्य व्यक्तं प्रदर्शितं भवति । एतद्दृष्टान्तकरणात् परिदृश्यमानप्रपञ्चस्य एवंरूपं मिथ्यात्वमिति सूचितं भवति । इदं च मिथ्यात्वं तत्वप्रदीपिकाकृदादिभिः उपपादितम् । 'अतस्मिंस्तद्बुद्धिः अध्यासः' इति भाष्योक्तं च ।

अनेनैव सूत्रेण प्रमाणसिद्धभिन्नत्वं प्रपञ्चस्य सूचितं भवति । स्वाप्नदृष्टान्तकरणादेव । स्वाप्नो हि न प्रमाणसिद्धः—इति संप्रतिपन्नम् । प्रमाणसिद्धत्वन्नाम दोषाजन्यज्ञानविषयत्वम् । स्वप्नो हि निद्रादिदोषाधीनज्ञानविषयः । तद्दृष्टान्तेन प्रपञ्चसृष्टिं उपपादयत् सूत्रं प्रपञ्चसृष्टेर्मिथ्यात्वोपपादने पर्यवसितम् । इदं च मिथ्यात्वं आनन्दबोधाचार्यैरुपपादितम् । अन्येषां सर्वेषां मिथ्यात्वप्रकाराणां अत्रैव अन्तर्भावः ।

बन्धमिथ्यात्वं 'उत्तराच्चेत् आविर्भूतस्वरूपस्तु' इति सूत्रेणापि स्फुटीकृतम् । दहराधिकरणे हि 'दहरः परमात्मा, उत्तरेभ्यः-अपहतपाप्मत्वादिसत्यसङ्कल्पत्वान्तेभ्यो हेतुभ्यः—इत्युक्त्वा, उत्तरात्–प्राजापत्यवाक्यात् जीवेऽपि अपहतपाप्मत्वादीनां अवगमात् न ब्रह्मासाधारणत्वमुक्तहेतूनामित्यतो न दहरस्य ब्रह्मत्वसाधकत्वम्–इत्याशङ्क्य, 'आविर्भूतस्वरूपस्तु' इत्युक्तम् । 'आविर्भूतस्वरूपो जीवः प्राजापत्यवाक्यप्रतिपाद्यः इत्युक्त्या उक्तहेतूनां ब्रह्मासाधारणत्वनिर्वाहः कर्तव्यः । स च जीवैश्वरैक्यमन्तरा न कर्तुं शक्यः । भेदे सति उक्तशङ्कायाः परिहारालाभात् । सति च ऐक्ये बन्धमिथ्यात्वं सिद्धम् । किञ्चेदं जीवस्य अपहतपाप्मत्वादिकं नित्यसिद्धं वक्तव्यम् । अन्यथा मुक्तौ आगन्तुकत्वे सम्पद्याविर्भावसूत्रविरोधः । तत्र हि सूत्रे मुक्तौ आगन्तुकरूपं निषिद्धमिति परेषामपि सम्मतम् । एवं 'पराभिध्यानात्तु तिरोहितं....' 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' इति सूत्रविरोधः । तत्र हि अपहतपाप्मत्वसत्यसंकल्पत्वादेः बन्धमुक्त्योः तिरोभावाविर्भावयोरेव प्रतिपादनात् । तथा च अपहतपाप्मत्वादेः नित्यसिद्धत्वे बन्धमिथ्यात्वं दुर्वारम् । नित्यसिद्धं अपहतपाप्मत्वं हि सर्वदापाप्मरहितत्वम् । न च वस्तुतः सर्वदापाप्मरहिते पाप्मसम्बन्धः तन्मूलककर्तृत्वभोक्तृत्वसम्बन्धो वा पारमार्थिकः सम्भवति । एवं च बन्धमिथ्यात्वं सूत्रकृदभिप्रेतमिति स्फुटम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदेवं मोक्षसाधनीभूतजीवब्रह्मैक्यतज्ज्ञानोपयोगि सर्वं सूत्रोक्तं इति संक्षेपः।

ब्रह्मसूत्राणां शारीरकमीमांसाशास्त्रत्वप्रसिद्धिरपि जीवब्रह्मैक्यपरतां व्यनक्ति। ब्रह्मसूत्रेषु जीवो हि शारीरशब्देन निर्दिष्टः। शास्त्रस्यास्य शारीरकनामत्वं परेषामप्यभिमतम्। तदीयं शारीरपदव्याख्यानं तु असौत्रम्।

एवं ब्रह्मसूत्रेषु अद्वैतपरेषु सूत्रितानां अद्वैते वेदान्ततात्पर्यनिर्णायिकानां युक्तीनां सपरिकरं निरूपणाय शारीरकमीमांसाभाष्यं प्रणिन्युः श्रीमच्छङ्करभगवत्पादाचार्याः।

तस्यास्य भगवत्पादीयस्य शारीरकमीमांसाभाष्यस्य प्राधान्येन प्रवृत्तं व्याख्याप्रस्थानद्वयम्। तत्र श्रीपद्मपादाचार्यकृतपञ्चपादिकाप्रस्थानमेकम्। तस्य विस्तृता विवरणाख्या व्याख्या। विवरणेनैव पञ्चपादिकासिद्धान्तास्सर्वे सुज्ञेयाः। इदं पञ्चपादिकाप्रस्थानमाश्रित्य प्रस्थिता भाष्यव्याख्या श्रीरामानन्दमुनिप्रणीता रत्नप्रभानामिका, श्रीमदानन्दगिरिस्वामिप्रणीता न्यायनिर्णयाख्या अन्या। पञ्चपादिका तु चतुस्सूत्र्यन्तैव उपलभ्यते। परं तु उपरितनभाष्यस्यापि व्याख्यायां प्रवृत्ता स्यात्। यत आह अहङ्कारटीकायां—'विस्तरेण चैतत् सुगतमतपरीक्षायां वक्ष्यते' इति। पञ्चपादिकाविवरणे तु चतुस्सूत्र्यन्ते पञ्चपादिकाव्याख्याने अद्वैतसिद्धान्तप्रतिपाद्याः प्रमेयाः सर्वे सविमर्शं सोपपत्तिकं निरूपिताः। यतोऽयत्वेऽपि अद्वैतसिद्धान्तप्रक्रियाविषये कात्स्न्र्येन पञ्चपादिकाविवरणं आकरत्वेन प्रकाशते। व्यवह्रियते च अद्वैतग्रन्थकृद्भिस्तथैव, प्रमाणीक्रियते च।

अन्यत्तु आचार्यवाचस्पतिमिश्रकृतभामतीप्रस्थानम्। सा च भामती पञ्चपादिकाविवरणप्रस्थानतो वैलक्षण्येन प्रवृत्ता। यथा अवच्छिन्नो जीव इति भामती। प्रतिबिम्बो जीव इति पञ्चपादिका। विषयतया अविद्योपहितः ईश्वरः इति भामती। अविद्याबिम्ब ईश्वर इति पञ्चपादिका। शुद्धं ब्रह्म अन्तःकरणवृत्तेरप्यविषयः इति भामती। अन्तःकरणवृत्तिविषयः न तु चिद्विषयः इति पञ्चपादिका। मूलाज्ञानं शुद्धब्रह्माश्रितमिति पञ्चपादिका, जीवाश्रितमिति भामती। ब्रह्मात्मसाक्षात्कारः शब्दप्रमाणाद्भवति इति पञ्चपादिका। मनोरूपेन्द्रियेण भवतीति भामती। जगतो ब्रह्मैवोपादानं, तच्च विवर्तोपादानं, अविद्या तु दोषविधया निमित्तम्—इति भामती। अविद्या परिणाम्युपादानं ब्रह्म तु विवर्तोपादानं इति तु पञ्चपादिका। एवं बहुषु प्रक्रियासिद्धप्रमेयेषु वैलक्षण्येन प्रवृत्तमिदं अद्वैतपर्यवसायि प्रस्थानद्वयम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र भामती तत्तदधिकरणे भाष्योक्तपूर्वपक्षं भाष्योक्तसिद्धान्तोपमर्देन परिपोष्य परिपोषितपूर्वपक्षनिरसनपुरस्सरं भाष्योक्तसिद्धान्तस्यैव भाष्येणैव व्यवस्थापनं कुर्वन्ती सती न प्रतिपदं भाष्यव्याख्याने प्रवृत्ता। तत्र तत्र घट्टार्थं विभज्य भाष्यारूढं करोति। अत एव भामत्याः भाष्यविभाग इति प्रसिद्धिः। अत्र भाष्यखण्डव्याख्यानावसरे यथायोगं मीमांसान्यायसञ्चारः बहुषु स्थलेषु क्रियमाणो दृश्यते।

कृत्स्नं शारीरकमीमांसाभाष्यं व्याचक्षाणा इयं भामती तत्रतत्र आस्तिकनास्तिकदर्शनसिद्धान्तसिद्धानामर्थानां निरूपणे प्रसक्ते तत्तद्दर्शनप्रमाणभूतग्रन्थान् शब्दतोऽर्थतश्च निबध्नन्ती निबन्धसंज्ञां च लभते।

तमिमं भामतीनिबन्धं परमहंसपरिव्राजकाः श्रीअमलानन्दस्वामिनः वेदान्तकल्पतर्वाख्यया व्याख्यया अलञ्चक्रुः। इयं व्याख्या अन्वर्थनाम्नी संक्षिप्तशब्दा बह्वर्था अतएव गभीरा भामतीनिबद्धानर्थान् विशदयति पोषयति व्यवस्थापयति. क्वचित् क्वचित् भाष्यपदवाक्यार्थं वर्णयति, भाष्योक्ताः श्रुतीः विवृणोति, भामतीप्रस्थानाभिमतां प्रक्रियां भामतीमाश्रित्य तत्रतत्र विविच्य प्रदर्शयति च।

एवं बह्वर्थवहोऽयं कल्पतरुरपि, स्वार्थप्रकाशनपटीयसीं व्याख्यां आकाङ्क्षत इति अभिप्रयद्भिः श्रीनृसिंहाश्रमस्वामिभिः प्रोद्बोधिताः श्रीमदप्पयदीक्षितेन्द्राः कल्पतरुपरिमळाख्यां व्याख्यां आरचयामासुः। न केवलं इयं व्याख्या कल्पतरुं विकसयति। भाष्य-भामतीनिगूढान् भावानपि व्यञ्जयति। कल्पतर्वन्तग्रन्थलब्धं शास्त्रार्थं सविमर्शं परिष्कृत्य हस्तामलकीकरोति च।

परिमलस्यायमन्योऽप्यतिशयः—अप्रतिपत्त्यन्यथाप्रतिपत्त्यादीनां अवकाशं वारयन्ती वाक्यरचना, नव्यन्यायशास्त्रे दीधितिव्याख्यागदाधरीयवत् स्वाभिप्रेतार्थबोधार्थं व्याख्याननिरपेक्षता, विशदीभावः, भामतीकल्पतर्वोरुद्धृतमीमांसान्यायानां विस्तृतं विमर्शनं, कल्पतरुपर्यन्तेन ग्रन्थेन अपरिहृताः शङ्का उद्भाव्य स्वयं तत्परिहरणं, भाष्यभामतीकल्पतरूणां अवान्तरप्रमेयविषये ईषद्वैलक्षण्ये स्थिते भाष्योक्तस्यैव सोपपत्तिकं व्यवस्थापनं, तत्रतत्र अद्वैतसिद्धान्तोपरि द्वैतिभिर्विशिष्टाद्वैतिभिश्च उद्भाव्यमानानां दूषणाभासानां मूलव्याख्याव्याजेनैव अनवकाशीकरणं स्वयमपि तत्रतत्र मीमांसान्याययोजनेन अभिमतार्थव्यवस्थापनं—इत्यादिरूपः।

एवंरूपपरिमलान्तपञ्चग्रन्थीप्रतिपाद्यार्थपरिज्ञानेनैव वेदान्तमीमांसाशास्त्रार्थः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुपरिज्ञातो भवति, कात्स्न्येंन भाष्यभावोऽपि । अतएवाहुर्बिन्दुटीकायां श्रीब्रह्मानन्दस्वामिनः 'परिमळान्तं वेदान्तशास्त्रम्' इति ।

परं तु उक्तपञ्चग्रन्थ्याः व्याख्यानव्याख्येयभावेन प्रवृत्तत्वात् न अक्लेशेन शास्त्रार्थस्संपूर्णः सुज्ञेयो भवति इत्यभिप्रेत्य परिमलान्तशास्त्रार्थं साक्षात् भाष्यव्याख्यानेनैव बोधयितुं स्वयं च मन्तुं उत्सुकाः करुणापूर्णहृदयाः परमहंसपरिव्राजकाः श्रीमदद्वैतानन्दस्वामिनः ब्रह्मविद्याभरणाख्यां भाष्यव्याख्यां आरचयामासुः । तत्र परिमलान्तग्रन्थेषु यथावत्साकल्येन भाष्यार्थज्ञाने ये ये प्रतिपाद्यार्थाः प्रतिपादिताः कृत्स्नानपि तान् क्रोडीकृत्य तत्र तत्र भाष्यग्रन्थे समायोज्य कृत्स्नं शास्त्रार्थं सङ्ग्रथितवन्तस्ते ।

अन्यच्च—श्रीमदप्पय्यदीक्षितेन्द्राः विशिष्टशिवाद्वैतभाष्यस्य विस्तृतं व्याख्यारत्नं शिवार्कमणिदीपिकाख्यं अकार्षुः । व्याख्याव्याजेन भाष्यस्य चास्य अद्वैतपरमतात्पर्यं तत्र तत्र व्यञ्जयामासुः । कण्ठतश्च वर्णयामासुः शिवाद्वैतनिर्णयाख्येन ग्रन्थान्तरेण । तेषामयमभिप्रायः—अद्वैतपरमतात्पर्यवदेव भाष्यं ब्रह्मसूत्रभाष्यं भवितुमर्हति, यतो ब्रह्मसूत्राणि अद्वैत एव स्वरसतमानि—इति ।

एवं पूर्वोत्तरमीमांसावादनक्षत्रमालाख्यं विमर्शनप्रधानं ग्रन्थरत्नमपरं त एव दीक्षितेन्द्राः व्यरचयन् । तत्रापि अद्वैतशास्त्रार्थसम्बन्धिनोऽर्थाः केचन विमृश्य निर्धारिताः ।

तदेतेषु श्रीमद्दीक्षितेन्द्रग्रन्थेषु अद्वैतसिद्धान्तप्रमेयविशदीकरणाय बहवोऽर्थाः सङ्गृहीताः सन्ति—इत्यतः तदीयान् तानपि ग्रन्थान् पर्यालोच्य स्वीयभाष्यव्याख्यानाय अपेक्षितान् तत्रतत्र संयोजयन्ति स्म स्वीयग्रन्थेऽत्र इमे अद्वैतानन्द स्वामिनः । प्रदर्शितञ्चैतत् टिप्पण्याम् ।

इदञ्च ब्रह्मविद्याभरणाख्यं व्याख्यारत्नं परिमळान्तं भामतीप्रस्थानं प्रायशः अनुसरति, परन्तु क्वचित्क्वचित् पञ्चपादिकाविवरणप्रस्थानमनुसृत्य भाष्यं व्याचष्टे । यत्कारणं पार्थक्येन परिहारं विना तत्प्रस्थानरीत्या भाष्यार्थवर्णनेनैव शङ्काविशेषाणां परिहारो लभ्यते । क्वचिच्च स्वीयेन पथा । ईदृशो व्याख्याप्रकारभेदः तत्र तत्र टिप्पण्यां विविच्य प्रदर्शितः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्रेदं अवधेयम्—भगवत्पादभाष्ये तत्र तत्र शङ्काग्रन्थे उल्लिखित एवार्थः भगवत्पादभाष्यप्रादुर्भावादनन्तरं प्रवृत्तैः भाष्यैः सिद्धान्तत्वेन स्वीकृतः । तेन ज्ञायते सर्वेषामपि सिद्धान्तानां आकरभूतं श्रीमच्छङ्करभगवत्पादीयं भाष्यम् ।

तदिदं विजानन्तः प्रकृतव्याख्यातारः श्रीमदद्वैतानन्दस्वामिनः तत्र तत्र शङ्काग्रन्थं परकीयसिद्धान्तसिद्धार्थयोजनेन परिपोषयन्ति । परिहारभाष्यार्थवर्णनेन तत्तत्परकीयसिद्धान्तानामनवकाशं च स्फुटयन्ति । ईदृशः एतद्व्याख्यामहिमा तत्र तत्र टिप्पण्यां विविच्य प्रदर्शितः ।

किञ्चात्र द्वैतिभिः विशिष्टाद्वैतिभिश्च उद्भाव्यमाना दूषणाभासाः दूषकानां तदीयग्रन्थानां च नामापि अनिर्दिश्य अनुद्वेगकरेणैव वचनेन शङ्कासमाधानरूपेण अपोहिताः । अयमपि विशेषः टिप्पण्यां तत्र तत्र प्रदर्शितः ।

अन्योऽप्ययं महिमा अस्य । साकल्येन परिमलान्तग्रन्थोपपादितभाष्यभावार्थ-परिज्ञानोपयुक्तं यावत्, न किमपि ततोऽतिरिक्तं अस्यां व्याख्यायां उपवर्णितम्; न च न्यूनम् । परिमलान्तस्य तु व्याख्येयमूलग्रन्थभेदात् तत्तन्मूलार्थसमर्थनार्थं तत्सम्बन्धि तदपेक्षितमर्थजातं वर्णनीयं सम्पन्नम् । अस्य तु साक्षाद्व्याख्यारूपस्य न स निर्बन्धस्सञ्जातः । अतो भाष्यामृतमहाह्रदनिमज्जनेन तापशान्त्या निरतिशयानन्दमनुबुभूषूणां इदं व्याख्यानं अतीव हिततममिति नात्यन्तमतिशयोक्तिः ।

किञ्च 'यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता ॥' इति वार्तिकोक्तरीत्या नैकाः प्रक्रियाः अद्वैतप्रतिपत्त्युपयोगिन्यः सन्ति । तत्र न प्रक्रियाविशेषे अस्या व्याख्याया अभिनिवेशः । यत्र यत्प्रक्रियाश्रयणे भाष्यवाक्यं अक्लेशेन सुबोधं यथाश्रुतं समञ्जसतमं भवति तां प्रक्रियामाश्रित्य तं भाष्यं व्याख्याति । अनेन कश्चित् परमो लाभोऽस्माकं—यत् प्रक्रियाणां मूलभूतं भाष्यं परिज्ञायत इति ।

इमे अद्वैतानन्दस्वामिनः चोळदेशीयाः पञ्चनदक्षेत्रवासमकुर्वन् इति प्रसिद्धिः । एतेषां आश्रमगुरवः श्रीभूमानन्दस्वामिनः, विद्यागुरवः श्रीरामानन्दमुनीन्द्राः । एतेषां प्रशिष्याः श्रीअच्युतकृष्णानन्दतीर्थाः व्याख्यारचने कुशलतमा इति प्रसिद्धाः कृष्णालङ्काराख्यसिद्धान्तलेशसङ्ग्रहव्याख्याकर्तारः तैत्तिरीयकभाष्यव्याख्यावनमाला-कर्तारः भामतीविवरणकर्तारश्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इयं च व्याख्या तदात्वे उपलब्धान् पञ्चषकोशान् ततस्तत आनीय समञ्जसपाठं कोशं आश्रित्य मुद्रापिता महामहोपाध्यायैः मादृशानां प्राचार्यस्थानापन्नैः श्रीहरिहरशास्त्रिपादैः । परन्तु मुद्रितस्य ग्रन्थस्यास्य अलाभः, ग्रन्थमहिमा च पुनर्मुद्रणे निमित्तं संपन्नम् ।

अस्य ग्रन्थस्य समग्रा आन्ध्रलिप्यांहस्तलिखितप्रतिकृतिः आन्ध्रप्रदेशान्तर्गतात् अमलापुरात् अशीतिवर्षात्प्रागानीता मद्रपुरीयहस्तलिखितपुस्तकालये विद्यते । अनया सह मुद्रितपुस्तकस्य तोलनं कृत्वा यः पाठः शुद्धतर इति प्रत्यभात् स उपरि निवेशितः, अन्यः पाठः पाठान्तरत्वेन अधस्तात् दत्तः । तद्विवेचने परं विद्वांसः प्रमाणम् । स्वमतिविमलतायै कृतं लघु टिप्पणं अत्र योजितम् ।

तदेवंरूपग्रन्थसम्पादनमुद्रणप्रकाशनादि सर्वं येषां करुणाविलासविजृम्भितं, येषां अनुग्रहात् परं अभिलषणीयं चिरं अनुसन्दधानोऽपि न पश्यामि, तेषां उदारचरितानां श्रीकाञ्चीकामकोटिपीठाधीश्वराणां चरणनलिनयोः सविनयसाष्टाङ्गप्रणामपरम्परा विधाय, ग्रन्थमिमं सविनयं श्रद्धाभक्तिपुरस्सरं करकमलयोः समर्पयामि ।

ग्रन्थस्यास्य मद्रपुरीसंस्कृतविद्यासमितिद्वारा प्रकटीकरणे बद्धपरिकराणां संस्कृतविद्यासमित्यध्यक्षाणां श्री एन्. रघुनाथार्यवर्याणां, संस्कृतविद्यासमितिसचिवानां श्री टि. वि. विश्वनाथार्यवर्याणां च हार्दान् अनेकान् धन्यवादान् निवेदयामि ।

अपेक्षितहस्तलिखितप्रतिकृतेः प्रदानेन उपकृतवतां मद्रपुरीयहस्तलिखितपुस्तकालयाध्यक्षाणां सविधे भवामि भविष्यामि च कृतज्ञः ।

विना विलम्बं अस्य ग्रन्थस्य मुद्रणादिविषये संस्कृतविद्यासमितिनिर्वाहकैरवश्यकर्तव्यानि बहूनि कार्याणि स्वयं श्रद्धया उत्साहेन निष्कामं तदातदा निर्वर्तितवन्तः निर्वर्तयन्तश्च सन्तः मम च पुरूफ्पत्रशोधनतोलनादौ बहु साहाय्यमाचरितवन्तः मद्रपुरीयसंस्कृतकलाशालासाहित्यवेदान्ताध्यापकाः श्रीशिवरामदीक्षिताः, पुरूफ्पत्रशोधनादिना अनुलेखनादिना यदा यदा मम यद्यदपेक्षितं तत्तत्कार्यकरणेन च बहूपकारिणः मत्सविधे प्रमाणविद्यां अध्यात्मविद्यां च अधीयानाः मद्रपुरीय विश्वालये दर्शनविभागे अध्यापकाः श्रीवीलिनाथशर्माणश्च श्रीपरमाचार्यानुग्रहात् श्रेयोभाजनं भूयासुः इति श्रीपरमाचार्यपादान् प्रार्थये ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समीचीनया रीत्या मुद्रणं कृतवतां मद्रपुरीस्थरत्नमुद्रणालयाधिकृतानां कृतज्ञोऽस्मि ।

इदंग्रन्थप्रकाशने परमनिदानभूतानां जगद्गुरूणां श्रीकाञ्चीकामकोटिपीठाधीशानां चरणनलिनयोः विधाय पुनः साष्टाङ्गप्रणामपरम्पराः विरमति

आनन्दमाघपूर्णिमा
चेन्नपुरी

श्रीपरमाचार्यशरणः
एस्. आर्. कृष्णमूर्तिशास्त्री

॥ श्रीरामः सहायः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीगुरुभ्यो नमः

ब्रह्मसूत्रशाङ्करभाष्यव्याख्यानं

ब्रह्मविद्याभरणम्

श्रीमदद्वैतानन्दस्वामिविरचितम्

[1]वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥ १ ॥

[2]शङ्कराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावये ॥ २ ॥

श्रीगुरुभ्यो नमः

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥
गुरूणां करुणापूर्णनिदेशबलमाश्रितः ।
स्वमत्याः शोधनकृते तनोमि लघुटिप्पणम् ॥

1. इदम्पद्यस्थाने 'श्रीगणेशाय नमः' इत्येतावन्मात्रं कोशे आन्ध्रलिपिलिखिते वर्तते ।

2. **शङ्कराश्लेषेति** शिवालिङ्गनाविर्भूतनिरतिशयानन्दपूर्णां जगद्वन्दितचरणाब्जां ब्रह्मविद्याधिष्ठात्रीं केनोपनिषत्प्रसिद्धां उमां ध्यायामि इति **एकोऽर्थः**। अखण्डब्रह्मविषयीकरणेन प्रकाशमानपूर्णानन्दप्रतिबिम्बगर्भितां परमपुरुषार्थसाधनत्वेन सर्वैरादृतां तत्त्वमस्यादिमहावाक्यजनितां अखण्डाकारवृत्तिरूपां ब्रह्मविद्यां मनसि सुस्थिरीकरोमि-प्रत्यग्ब्रह्मैक्यं अनुसन्दधे इति **अपरोऽर्थः**। व्याख्यातृत्वेन श्रीमच्छङ्करभगवत्पादानाश्रित्य स्वीयतात्पर्यविषयीभूतसर्वार्थलाभेन आनन्दपूर्णामिव रोचमानां अत एव सर्वैः वेदार्थजिज्ञासुभिः समाश्रितां अद्वैतब्रह्मविद्यासम्पादयित्रीं उपनिषदं परिशीलये इति **अन्योऽर्थः**। विभावयतेः अलङ्करणार्थेऽपि प्रयोगदर्शनात् **ब्रह्मविद्याभरणं** इति स्वीयग्रन्थनामापि **सूचयति** 'ब्रह्मविद्यां विभावये' इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेदान्तनिकुरुम्बेण तात्पर्येण प्रकाशितः ।
स्वात्मानन्दैकरस्येन कल्याणाय शिवोऽस्तु नः ॥ ३ ॥

स्वानन्दाम्बुधिमग्नचित्तमनिशं निर्धूतमायामलं
कारुण्यार्जवशान्तिसौरभमसुं देव्या [1]गिरां सेवितम् ।
रामानन्दमुनिं मुनीन्द्रनिकरैरासेवितं सर्वदा
चित्ते सङ्कलयामि वेदशिरसस्तत्त्वावबोधाप्तये ॥ ४ ॥

[2]मुग्धं मामनुगृह्य यः करुणया तुर्योङ्कृतिप्रस्फुर-
द्भासां वेदवतीं विकल्पगलितां विद्यां ददौ चिन्मयीम् ।
भूमानन्दपदस्थितो गुरुरसौ पूज्याधिपूज्यः सदा
चेतो मे कुरुतादलङ्कृतमतिस्वच्छैः स्वपादाम्बुजैः ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

[3]अनेन सूत्रेण 'साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्म जिज्ञासितव्यम्' इति प्रतिपाद्यते । एतत्सूत्रावतारिकारूपेण 'युष्मदस्मत्प्रत्ययगोचरयोः' इत्यादिना

---

1. आ. गिरा

2. इदं पद्यं मुद्रिते नास्ति ।

3. श्रीमच्छारीरकमीमांसाशास्त्रारम्भसमर्थनपरं 'अथातो ब्रह्मजिज्ञासा' इति आदिमं सूत्रम् । तत्र न्यायतः विषयप्रयोजनसम्बन्धाधिकार्यात्मकानुबन्धचतुष्टयसद्भाव-निर्णयेन शास्त्रारम्भः समर्थ्यते । ब्रह्मशब्दार्थो विषयः । जिज्ञास्यत्वोक्तेः । परमप्रयोजनं मोक्षः । अत्र भामती — ब्रह्मशब्दार्थः आत्मा, 'बृहत्त्वाद् बृंहणत्वाद्वा आत्मैव ब्रह्मेति गीयते' इति शिवपुराणवचनात् । स चात्मा देहेन्द्रियबुद्धिव्यतिरिक्तः 'अहं कर्ता' इति प्रत्यक्षेण प्रमितः । कर्त्रादिरूपमेव तस्य तत्त्वम् । अतश्च ब्रह्मणः तत्त्वतो निश्चितत्वेन अजिज्ञास्यत्वात् न विषयत्वमिति विषयाभावः—इति शङ्कायां, उक्तप्रत्यक्षस्य आत्मतत्त्वाविषयकत्वेन अप्रमात्वं व्यवस्थाप्य असंदिग्धत्वेऽपि विपर्यस्तत्वात् ब्रह्मशब्दार्थस्यात्मनः तत्त्वतो जिज्ञास्यत्वसम्भवेन विषयत्वात् विषयसिद्धिः इति निरूपयितुं अहंप्रत्ययस्य विपर्यासरूपत्वव्यवस्थापनाय प्रवृत्तमध्यासभाष्यम्—इति प्रस्थिता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सर्वे वेदान्ता आरभ्यन्ते' इत्यन्तेन भाष्येण [1]कर्तृत्वादिबन्धस्य आक्षेपसमाधानाभ्यां मिथ्यात्वं प्रतिपाद्यते। कथमिदमुपपद्यते—पदविधया वा वाक्यविधया वा यः सूत्रेणार्थः संगृह्यते [2]स एव भाष्ये विशदतया प्रतिपादनीयः, बन्धमिथ्यात्वं तु सूत्रेण न कथञ्चिदपि संगृहीतम्।

संगृहीतमिति वदामः— सूत्रे ब्रह्मपदं विषयनिर्देशकम्। तेन च प्रत्यगभिन्नं ब्रह्मैव विवक्षितम्। यथा चैतत् तथा [3]उत्तरत्र स्पष्टं भविष्यति। न च

पञ्चपादिका तु—ब्रह्मशब्दार्थः प्रत्यगभिन्नं ब्रह्म। तच्च असम्भवि 'अहं कर्ता' इत्यादिप्रत्यक्षप्रमाणविरोधात्, अतो विषयाभावः—इति शङ्कायां विरोधपरिहारार्थं उक्तप्रत्यक्षस्य भ्रमत्वं कर्तृत्वादीनां आविद्यकत्वेन मिथ्यात्वञ्च उपवर्ण्य मिथ्याभूतकर्तृत्वादिना स्वाभाविकब्रह्मरूपतायाः अविरोधेन प्रत्यग्ब्रह्मैक्यसम्भवात् प्रत्यगभिन्नब्रह्मरूपविषयसिद्धिः इति प्रतिपादयितुं प्रवृत्तमध्यासभाष्यम्—इति प्रस्थिता।

सम्मतमेवेदं भामत्या अपि। आशङ्कनप्रकारभेदेऽपि पर्यवसितार्थाभेदात्। जिज्ञास्यं आत्मनस्तत्त्वं ब्रह्मरूपता इत्येव हि भामतीकृतामपि अभिमतम्। भामत्यां हि "शारीरकमीमांसायां प्रदर्शयिष्यामः" इति भाष्यस्थं शारीरकमीमांसापदं "शरीरमेव शरीरकम्, तत्र निवासी शारीरको जीवात्मा, तस्य त्वम्पदाभिधेयस्य तत्पदाभिधेयपरमात्मरूपतया या मीमांसा सा तथोक्ता" इति व्याख्यातम्। अत्र प्रत्यगात्मनः ब्रह्मात्मता प्रकृतशास्त्रस्य विषयः इति स्पष्टमुक्तम्।

तदेवं प्रत्यगभिन्नब्रह्मणः शास्त्रविषयत्वं प्रस्थानद्वयसम्मतम्। अतः प्रायशो भाष्यव्याख्याव्याजेन व्याख्यानव्याख्येयभावक्लेशहानेन, व्याख्यानव्याख्येयभावेनभाष्यभावप्रकाशकभामतीकल्पतरुपरिमलान्तशास्त्रार्थसङ्ग्रहरूपोऽपि अयं व्याख्याग्रन्थः पञ्चपादिकाप्रस्थानशैल्या अध्यासभाष्यं अवतारयति—'**अनेन सूत्रेण**' इत्यादिना '**सङ्गतम्**' इत्यन्तेन ग्रन्थेन।

1. **कर्तृत्वादीति** आदिशब्देन भोक्तृत्वं कामसङ्कल्पादयश्च गृह्यन्ते।

2. **स एव भाष्ये इति** अन्यथा भाष्यत्वव्याघातात्। "सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः" इति हि भाष्यलक्षणम्। अत्र 'सूत्रार्थो वर्ण्यते यत्र तत् भाष्यम्' इत्यभिधाने वृत्तिग्रन्थस्यापि भाष्यत्वप्रसङ्गः। तद्व्यावृत्त्यर्थं 'वाक्यैः' इति विशेषणम्। वार्तिकादिव्यावृत्त्यर्थं 'सूत्रानुकारिभिः वाक्यैः' इति। 'स्वपदानि वर्ण्यन्ते' इत्येतावन्मात्राभिधाने सङ्ग्रहविवरणरूपप्रकरणेष्वतिव्याप्तिः, इत्यत उक्तं 'सूत्रार्थो वर्ण्यते' इति।

3. **उत्तरत्र**—'ब्रह्म च वक्ष्यमाणलक्षणं' 'ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य' इति भाष्यव्याख्याने जन्मादिसूत्रभाष्यव्याख्याने च।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बन्धमिथ्यात्वं विना जीवब्रह्मैक्यं सम्भवति । [1]विरुद्धकर्तृत्वाकर्तृत्वधर्माक्रान्तयोरैक्यायोगात् । कर्तृत्वस्य मिथ्यात्वे तु न तत् अकर्तृत्वेन विरुद्धयते । विषमसत्ताकयोर्भावाभावयोः शुक्तौ रजतत्वतदभावयोरिव समावेशसम्भवात् । अवच्छेदकभेदेन संयोगतदभावयोरिव कर्तृत्वतदभावयोरपि समावेशोपपत्तौ मिथ्यात्वमेव किमर्थं तदुपपादनाय प्रतिपाद्यते इति तु न [2]शङ्कनीयम् । प्रत्यगभिन्नब्रह्मप्रकरणान्तर्गतैः 'असङ्गो ह्ययं पुरुषः' [बृ. उ. ४-३-१५] 'असङ्गो न हि सज्जते' [बृ. उ. ४-२-४] 'कामःसङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' [बृ. उ. १-५-३] 'स समानस्सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव' [बृ. उ. ४-३-७] इति

'निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमला धर्माः प्रकृतेस्ते तु नात्मनः' ॥ [वि. पु. ६-७-२२]

'सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्'
[वि. पु. २-१२-४५]

इत्यादिभिःश्रुतिस्मृतिवाक्यैः जीवत्वावच्छेदेनापि [3]सङ्गाभावः तस्य चान्योपाधिकस्य आत्मनि मिथ्यात्वं इति [4]प्रतिपादयद्भिः प्रकारान्तरेण तदुपपादनस्य

---

1. विरुद्धेति न च कर्तृत्वाकर्तृत्वयोः कालभेदेन अविरोधः शङ्क्यः । तथा सति ऐक्यस्य कादाचित्कत्वापत्त्या सार्वदिकैक्यबोधकतत्त्वमस्यादिश्रुतिविरोधापत्तेः ।

2. शङ्कनीयमिति शङ्का चेयं आश्मरथ्याचार्याणां मतेन । ते हि सार्वदिकसत्यभेदाभेदवादिनः 'जीवत्वेश्वरत्वाभ्यां भेदः, चित्त्वेन अभेदः । नातो भेदाभेदयोर्विरोधः, अवच्छेदकभेदात् । तद्वत् कर्तृत्वतदभावयोरपि सत्ययोः' इति मन्यन्ते ।

3. मु. सङ्गाभावं ।

4. प्रतिपादयद्भिरिति 'योऽयं विज्ञानमयः' इति वाक्ये प्रकृतं जीवं 'अयं पुरुषः' इत्यनूद्य असङ्गत्वबोधिका 'असङ्गोह्ययं पुरुषः' इति श्रुतिः जीवत्वावच्छेदेन सङ्गाभावं प्रतिपादयति । एवं 'दक्षिणेऽक्षन् पुरुषः' इत्युपक्रान्तं जीवं 'स एषः' इत्यनूद्य 'नेति नेत्यात्मा, असङ्गो न हि सज्जते' इति बोधयन्ती श्रुतिरपि जीवत्वावच्छेदेन सङ्गाभावं प्रतिपादयति । आत्मधर्मत्वेन पराभ्युपगतानां मनस्तादात्म्येन मनोधर्मत्वं प्रतिपादयति 'कामः सङ्कल्पः' इत्यादिश्रुतिः । 'स समानस्सन्' इति श्रुतिः बुद्ध्युपाधिकस्य सतः कर्तृत्वं 'ध्यायतीव' इति श्रुतिः इवशब्देन तन्मि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]निराकृतत्वात् । अतः प्रत्यगभिन्नब्रह्मरूपविषयोपपादकतया सूत्रसूचितं बन्धमिथ्यात्वमिति भाष्यमपि तत्प्रतिपादकं तेन सङ्गतम् ।

अध्यासभाष्येण च इत्थमधिकरणं सूच्यते—

वेदान्तमीमांसाशास्त्रमारम्भणीयं न वा इति विषयसम्भवासम्भवाभ्यां संशये [2]पूर्वःपक्षः नारम्भणीयमिति । [3]विरुद्धधर्माक्रान्तयोरैक्यायोगेन जीवब्रह्मैक्यं विषयो न सम्भवति । न च 'अहं कर्ता, अहं भोक्ता' इति प्रतीयमानो [4]जीव एव विषयः । तस्य प्रत्यक्षसिद्धस्य तेनैव रूपेण [5]विचारविषयत्वासम्भवात् । न च

थ्यात्वं च प्रतिपादयति। विष्णुपुराणमपि प्रकृते जीवं 'अयमात्मा' इति अनूद्य 'निर्वाणमय एव' इति बोधयत् जीवत्वावच्छेदेन बन्धाभावं प्रतिपादयति। ज्ञानस्वरूपादात्मनोऽन्यस्य असत्यत्वोक्त्या धर्माणां मिथ्यात्वं 'प्रकृतेस्ते' इत्युक्त्या आत्मनि तेषामौपाधिकत्वं च प्रतिपादयति ।

निर्वाणमय एव—निर्वाणं मुक्तिः, 'मुक्तिः कैवल्य**निर्वाण**श्रेयोनिःश्रेयसामृतम्' इत्यमरः। स्वार्थे मयट् । मुक्तिस्वरूप एवेत्यर्थः। एवकारेण जीवत्वावच्छेदेनापि बन्धो व्यावर्त्यते ।

1. **निराकृतत्वादिति** तात्पर्याविषयतायाः ज्ञापितत्वात् इत्यर्थः। अन्यथोपपादने असङ्गत्वादिप्रतिपादकवाक्यानां ऐक्यप्रकरणपाठवैयर्थ्यापत्तेः इति भावः। प्रकरणस्य जीवब्रह्मैक्यपरता च सुषुप्त्युत्क्रान्त्यधिकरणे स्पष्टीभविष्यति ।

2. **पूर्वः पक्ष इति** आत्मवत् अनात्मनामपि सत्यत्वमेव। 'स्थूलोऽहम्' इत्यादिः देहेन्द्रियात्मव्यवहारो गौणः। 'अहं कर्ता' इत्यादिः कर्तृभोक्त्रात्मधीः कामसंकल्पादिसंसर्गधीश्च प्रमैव। आगमापेक्षया प्रत्यक्षं प्रबलम्। 'असङ्गो ह्ययं पुरुषः' इत्यादिश्रुतयः स्तुतिपराः—इति पूर्वपक्षिणोऽभिप्रायः ।

3. **विरुद्धधर्माक्रान्तयोः**—कर्तृत्वादि-तदभावरूपविरुद्धधर्मवतोः । तत्र कर्तृत्वादिकं जीवे प्रत्यक्षप्रमितम्, ब्रह्मणि तदभाववत्त्वं श्रुतिप्रमितम्। यद्यप्यैक्यमपि श्रुतिप्रमितमिति तदप्यङ्गीकर्तुं युक्तम्, तथापि नाहंब्रह्मेतिभेदप्रत्यक्षविरोधात् ऐक्ये न श्रुतिः प्रमाणम् इत्यभिप्राय । न च शुद्धस्य जीवस्वरूपस्य ब्रह्मैक्ये न प्रत्यक्षविरोध इति वाच्यम्। अहमर्थातिरिक्ततादृग्जीवस्वरूपे प्रमाणाभावात्। न च त्वंपदार्थशोधकवाक्यानि प्रमाणानि। तेषामप्यहंकर्तेत्यादिप्रत्यक्षविरोधेन अन्यपरत्वात् इत्यभिमानः।

4. **जीव एवेति** तस्यैव बृहत्त्वात् बृंहणत्वाद्वा ब्रह्मशब्दार्थत्वसम्भवात् इति भावः ।

5. **विचारविषयत्वासम्भवादिति** अनेन भामत्युक्तः पूर्वपक्षोऽपि सङ्गृहीतः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभुत्वनित्यत्वादिना जीवरूपस्य सर्वज्ञत्वादिना ईश्वररूपस्य वियदादिसर्गप्रकारस्य उपासनाभेदाभेदादिप्रकारस्य च प्रमाणान्तरानधिगतस्य विचारविषयत्वं मुमुक्षूणामुपपद्यते । अद्वैतिमते प्रत्यगभिन्नब्रह्मज्ञानस्यैव मोक्षसाधनतया तदुपयोगितयैव अन्यस्य सर्वस्य विचारणीयत्वेन तदसम्भवे इतरविचारस्य [1]व्यर्थतापत्तेः ।

[2]अथ 'अहं करोमि, भुञ्जे' इत्यादिप्रत्यक्षस्य 'स्थूलोऽहं' इत्यादि-

---

1. **व्यर्थतापत्तेरिति** सिद्धान्ते व्यर्थतापरिहारप्रकारस्तु आनन्दमयाधिकरणावतरणभाष्यव्याख्यानावसरे प्रतिपादयिष्यते ।

2. 'युष्मदस्मत्' इत्यादि 'मिथ्येति भवितुं युक्तं' इत्यन्तभाष्ये भागद्वयं वर्तते । तत्र 'सुतरां इतरेतरभावानुपपत्तिः' इत्यन्तः अध्यासाभावे हेतुप्रतिपादको भागः । 'इत्यतोऽस्मत्' इत्यादिः 'मिथ्येति भवितुं युक्तं' इत्यन्तः अध्यासाभावप्रतिपादकः ।

तत्र अधिष्ठानसामान्यांश-आरोप्यसजातीयविशेष-तादात्म्यप्रमाऽऽहितसंस्कारः अध्यासे हेतुः, आत्मानात्मनोः तादृशप्रमाभावाद्धेतोः अध्यासाभावः इति **पञ्चपादिकाविवरणप्रस्थानाभिमता व्याख्या** ।

अत्र इतरेतरभावपदं विरुद्धस्वभावयोरिति पदञ्च यथाश्रुतार्थकम् ।

अधिष्ठानारोप्याभिमतयोः भेदाग्रहः अध्यासे हेतुः, तदभावाद्धेतोः अध्यासाभावः इति **भामतीप्रस्थानाभिमता व्याख्या** । अत्र विरुद्धस्वभावपदं विरुद्धस्वभावत्वेन निश्चितार्थकम्, इतरेतरभावपदञ्च इतरेतरभावप्रतीत्यर्थकम् । एवं व्याख्याने बीजादिकं इतरेतरभावपदव्याख्यानावसरे स्पष्टीभविष्यति ।

प्रकृतव्याख्याग्रन्थस्तु यद्यपि परिमलान्तं भामतीप्रस्थानं अनुसरति, तथाऽपि तत्र न निर्भरः । यत्र भाष्यग्रन्थस्वरसः तमेव प्रस्थानमनुसरति । क्वचित् भामतीप्रस्थानं, क्वचित् पञ्चपादिकाविवरणप्रस्थानं, क्वचित् स्वीयम् । एतच्च उत्तरत्र तत्र तत्र विविच्य प्रदर्शयिष्यते ।

प्रकृते च 'युष्मदस्मत्' इत्यादि 'मिथ्येति भवितुं युक्तं' इत्यन्तं भाष्यं स्वरसतरं व्याख्यातुकामा इमे व्याख्यातारः स्वीयेन पथा व्याचक्षते ।

तथा हि—'सुतरामितरेतरभावानुपपत्तिः' इत्यन्तं भाष्यं देहेन्द्रियात्मैक्याध्यासाभावं साधयति । अध्यासाभावे हेतुभूतो भेदग्रहः विरुद्धस्वभावयोरिति हेतुगर्भविशेषणेनैव सङ्गृहीतः । 'इत्यतोऽस्मत्' इत्यादि 'मिथ्येति भवितुं युक्तं' इत्यन्तं तु भाष्यं कर्तृभोक्त्रन्तःकरणात्मैक्याध्यासाभावं साधयति । तत्र चाध्यासाभावे हेतुप्रदर्शनपरं 'सुतरामितरेतरभावानुपपत्तिः' इत्यन्तं भाष्यम् । तच्च हेतुत्वं परम्परया । तद्यथा—सर्वप्रत्यययाथार्थ्यवादी अत्र मुख्यः पूर्वपक्षी । यतो भाष्यकृतां 'सर्वथापि तु अन्यस्यान्यधर्मावभासतां न व्यभिचरति' इति अयथार्थप्रत्ययसमर्थने निर्भरो दृश्यते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]विसंवादिप्रत्यक्षसजातीयस्य [2]निरस्तसमस्तदोषाशङ्कतात्पर्योपेतागमविरुद्धस्य

'उपलभ्याप्सु चेत् गन्धं केचिद्ब्रूयुरनैपुणाः ।
पृथिव्यामेव तं विद्यादपो वायुं च संश्रितम् ॥'

[म. भा. १२-२३८-७८]

इति वचनविरुद्धस्य 'सुरभि जलं, सुरभिः पवनः' इति प्रत्यक्षस्य पार्थिवावयवसंसर्गेणेव अन्तःकरणतादात्म्येन औपाधिकधर्मावगाहितया भ्रमत्वोपपत्तौ स्वाभाविकासङ्गत्वप्रतिपादकागमबाधितानां कर्तृत्वादीनां न ब्रह्मात्मैक्यविरोधित्वमिति विषयसम्भवेन न विचारारम्भानुपपत्तिः इति चेत्

[3]न—प्रत्यक्षागमयोर्विरोधे हि प्रत्यक्षस्योपजीव्यतया[4]तदनुसारेण आगमस्यैव नयनमुचितम् । इतरथा वेदान्तार्थबोधस्यैव [5]अनुन्मेषप्रसङ्गात् । कर्तृत्वादीनामिव

तस्य च पूर्वपक्षिणोऽयमभिसन्धिः—यत् सिद्धान्ती 'अहं कर्ता' इत्यादिप्रत्यक्षं अप्रमां मन्यते, तथा सत्येव कर्तृत्वादेः मिथ्यात्वेन तदभावेनाविरोधात् जीवब्रह्मैक्यरूपविषयसिद्धिरिति—तन्न युक्तम्—अहंप्रत्यक्षस्य क्वचिदप्यप्रमात्वादर्शनात् ।

यदपि मन्यते 'स्थूलोऽहं' इत्यादेरप्रमात्वं दृष्टं तद्वत् स्यात् इति—तदपि न—शरीरात्मभेदप्रत्यक्षनिश्चयसद्भावेन 'स्थूलोऽहं' इत्याद्यप्रमाप्रत्ययस्यैवाभावात् । 'स्थूलोऽहं' इत्यादिर्व्यवहारस्तु गौणः । यदपि आगमविरुद्धत्वादप्रमां मन्यते—तदपि विपरीतम्—प्रत्यक्षस्यैव प्रबलत्वात्— इति ।

तमेवंरूपं पूर्वपक्षं शब्दतोऽर्थतश्च वर्णयति युष्मदसदित्यादि मिथ्येतिभवितुंयुक्तमित्यन्तं भाष्यं—इति प्रकृतव्याख्यातुः व्याख्याप्रकारः । तदेतत्सर्वं अध्यासाक्षेपभाष्यलभ्यमर्थजातं शङ्कातत्परिहाराभ्यां वर्णयन् पूर्वपक्षं प्रपञ्चयितुमारभते—**अथेत्यादिना** । तत्र तावत् प्रत्यक्षादागमस्य प्राबल्यमाश्रित्य आशङ्कते सिद्धान्ती—**अथेति** ।

1. **विसंवादिप्रत्यक्षसजातीयस्येति** इदं प्रत्यक्षस्य दौर्बल्ये हेतुगर्भं विशेषणम् ।

2. **निरस्तसमस्तदोषाशङ्कतात्पर्योपेतेति** इदं आगमस्य प्राबल्ये हेतुगर्भं विशेषणम् ।

3. अथेत्यादिशङ्कां प्रत्यक्षस्य आगमात् प्राबल्यसमर्थनेन निराकरोति—**न—प्रत्यक्षेत्यादिना** ।

4. **उपजीव्यतयेति** प्रबलत्वेनेति शेषः ।

5. **अनुन्मेषप्रसङ्गात्**—अनुत्पत्तिप्रसङ्गात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्णपदतत्प्रत्यक्षादीनामपि [1]बाध्यत्वापत्त्या शुक्तिरजतादिवत् [2]कार्याक्षमत्वापत्तेः। [3]न च—तेषां तात्त्विकत्वापहारेऽपि व्यावहारिकत्वं नापह्रियते, तावन्मात्रेण च कार्यक्षमत्वमुपपन्नमिति नोपजीव्यविरोधः, उपजीव्यस्य व्यावहारिकत्वस्यानुपमर्दात् उपमर्दितस्य च तात्त्विकत्वस्यानुपजीव्यत्वात् इति—वाच्यम्। पदार्थेषु तात्त्विकत्वव्यावहारिकत्वविभागस्य श्रौतबाधनिर्धारणात् प्रागसिद्धेः। तन्निर्धारणे हि सति बाधितानां पारमार्थिकत्वानुपपत्त्या प्रातिभासिकत्वे अर्थक्रियाकारित्वानुपपत्त्या च शुक्तिरजतवैलक्षण्येन व्यावहारिकत्वं नाम धर्मान्तरं अर्थक्रियाप्रयोजकं स्वीकर्तव्यम्। तथा च प्राप्तमितरेतराश्रयत्वम्[4]—बाधे सति व्यावहारिकत्वार्थक्रियाकारित्वयोः प्रयोज्यप्रयोजकत्वं तत्त्वे च उपजीव्यविरोधपरिहारेण बाधः—इति। [5]न च उपक्रमोपसंहारैकरूप्यादिलिङ्गैः तात्पर्यस्य निष्प्रपञ्चप्रत्यगभिन्न-

---

1. **बाध्यत्वापत्त्या**—मिथ्यात्वापत्त्या—असत्यत्वापत्त्येति यावत्।

2. **कार्याक्षमत्वापत्तेरिति**—कार्यकारित्वे अबाध्यत्वरूपं सत्यत्वं प्रयोजकम्। दृश्यते चात्र बोधरूपकार्यकारित्वं, तेन निश्चीयते—वर्णपदतत्प्रत्यक्षादिकस्य नागमेन बाध इति। ततश्च 'आगमबाधितानां कर्तृत्वादीनां' इत्ययुक्तम्। न च कर्तृत्वादितत्प्रत्यक्षादीनां अनुपजीव्यत्वात् आगमेन बाधो युक्त इति वाच्यम्। उपजीव्यजातीयस्यापि प्रबलत्वात्, दृष्टो हि प्राण्यङ्गत्वहेतुकस्य नरशिरःकपालशुचित्वानुमानस्य साध्यप्रसिद्ध्यर्थं शङ्खरूपदृष्टान्ते साध्यनिश्चयार्थं चोपजीव्यशुचित्वबोधकागमसजातीयेन 'नारं स्पृष्ट्वाऽस्थि सस्नेहं सवासा जलमाविशेत्' इति अशुचित्वबोधकागमेन बाधः इति भावः।

3. भामत्युक्तं उपजीव्यविरोधपरिहारप्रकारं आशङ्क्य निराकरोति—**न चेति**।

4. **इतरेतराश्रयत्वमिति** यद्यपि चन्द्रतारकादिपरिमाणप्रत्यक्षस्य आगमविरोधेन अप्रामाण्यदर्शनात् तेनापि स्वप्रामाण्यसिद्ध्यर्थं इतराविरोधस्य अवश्यापेक्षणीयत्वेन अन्योन्याश्रयतौल्यम्, तथापि औत्सर्गिकं प्रत्यक्षस्य जात्यैव प्राबल्यं इत्यभिमानः।

ननु श्रोत्रेन्द्रियेण जायमानं प्रत्यक्षं शब्दस्वरूपं तस्य सत्यत्वं च विषयीकरोति। श्रुत्या च सत्यत्वांशप्रत्यक्षमेव बाध्यते। तच्च न श्रुतेः उपजीव्यम्। कल्पितशब्दस्यापि बोधकत्वेन शाब्दबोधार्थं तत्सत्यत्वस्य अनपेक्षितत्वात्। यच्च शब्दस्वरूपांशप्रत्यक्षं उपजीव्यं तत् न बाध्यते, विरोधाभावात्। अतो नोपजीव्यविरोधः, इत्यपि एकसत्तावादमाश्रित्य सुवचम् इति चेत्—न। तथासति प्रत्यक्षस्य सर्वथा अप्रामाण्यापत्तेरिति भावः।

5. तात्पर्यवत्त्वेन आगमस्य प्राबल्यं भामत्युक्तं आशङ्क्य निराकरोति—**न चोपक्रमेति**। अनेन—यत् तात्पर्योपेतत्वं आगमस्य प्राबल्ये हेतुरित्युक्तं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मविषयस्य निर्धारणेन तन्निर्वाहार्थं प्रत्यक्षस्यातत्त्वावेदकत्वसिद्धौ उक्तगत्या व्यावहारिकत्वं कल्प्यत इति साम्प्रतम् । उपजीव्यप्रमाणविरुद्धार्थे तात्पर्यकल्पनस्यैवानुन्मेषात् । अर्थान्तरतात्पर्यकत्वे उपक्रमादिसहितवाक्यस्वारस्यभङ्गापत्तिरिति चेत्, न - इष्टत्वात् । तवापि प्रत्यक्ष[1]स्वारस्यभङ्ग आपन्नः । गृह्यमाणं ज्ञानं स्वतःप्रामाण्याभ्युपगमात् प्रमाणत्वेनैव गृह्यते ।

[2]तथा च प्रथमोपस्थितप्रामाण्यबाधोऽपि । न च चरमोपस्थितोपजीवकस्वारस्यानुसारेण प्रथमोपस्थितोपजीव्यस्वारस्यबाधो न्याय्यः । अपि तु आगमस्वारस्यबाध एव । उपजीवकगतत्वात् चरमोपस्थितत्वाच्च । अत एव 'आदित्यो [3]यूपः' [तै. ब्रा. २.१.७] 'यजमानः प्रस्तरः' [तै. सं. १.७.४] इत्यत्र [4]स्वारसिकार्थस्य प्रत्यक्षबाधेन तेजस्वित्वक्रतुनिर्वर्तकत्वगुणमादाय सामानाधिकरण्यमिति स्वीक्रियते । स्तावकवाक्येषु तथा स्वीकारेऽपि अज्ञातार्थज्ञापकेषु न प्रत्यक्षानुसार इति चेत्, न—'सोमेन यजेत' 'कृष्णलं[5] श्रपयेत्' इत्यत्र [6]प्रत्यक्षविरोधपरिहाराय मत्वर्थलक्षणोष्णीकरणपर्यन्तत्वयोः स्वीकारात्, भवद्भिरपि तत्त्वमस्यादौ भागत्यागलक्षणायाः तदर्थमेव स्वीकाराच्च ।

[7]अपि च प्रत्यक्षप्रामाण्यज्ञानं निरवकाशम्, श्रुतिस्तु [8]लाक्षणिकेऽप्यर्थे सावकाशा, अतः 'सावकाशनिरवकाशयोर्निरवकाशं बलीयः' इति न्यायेनापि

तन्निरस्तम् । निरस्तसमस्तदोषाशङ्कत्वं तु न प्राबल्ये हेतुः, अपि तु प्रामाण्ये । प्रामाण्यञ्च उपजीव्यप्रमाणाविरुद्धार्थेऽपि सम्भवतीति भावः ।

1. **स्वारस्यम्**—प्रतीयमानार्थे प्रामाण्यम् ।

2. असंजातविरोधित्वेन प्रत्यक्षस्य प्राबल्यमाह—**तथाचेति** । अत्र प्रत्यक्षं ज्ञानप्रामाण्यग्राहकसाक्षिरूपम् ।

3. **यूपः**—दृष्टादृष्टसंस्कारविशिष्टो दारुविशेषः । **प्रस्तरः**—दर्भमुष्टिविशेषः ।

4. **स्वारसिकार्थस्य**—शब्दशक्त्या प्रतीयमानार्थस्य ।

5. **कृष्णलः**—सुवर्णविकारभूतो माषः ।

6. **प्रत्यक्षविरोधपरिहारायेति** प्रत्यक्षविरोधः सिद्धान्तकथनावसरे उपपादयिष्यते ।

7. निरवकाशत्वेन प्रत्यक्षस्य प्राबल्यमाह—**अपि चेति** । अवकाशः—लब्धविषयकत्वम् ।

8. लाक्षणिके—लक्ष्ये । मु. लाक्षणिकार्थेऽपि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यक्षप्रामाण्यज्ञानमेव बलीयः। न च व्यावहारिकप्रामाण्ये सावकाशम्। [1]एतत्परिभाषाया अद्वैतिपरि[2]कल्पिताया निर्मूलाया वस्तुव्यवस्थापकत्वायोगात्।

[3]ननु 'स्थूलोऽहं कृशोऽहं मनुष्योऽहं अन्धोऽहं बधिरोऽहं मूकोऽहम्' इति शरीरेन्द्रियधर्माणां भासमानानां आत्मनि तत्तद्धर्म्यध्यासपूर्वकत्वं[4] वक्तव्यम्। अतो विसंवादिस्थूलोऽहमित्यादिप्रत्यक्षसजातीयस्य 'अहं करोमि' इत्यादेरपि अन्तःकरणतादात्म्याध्यासपूर्वकं तद्धर्मावगाहित्वमेवोचितम्। एवं च सम्भावितप्रामाण्येन कथं तद्विपरीतायाः श्रुतेः अन्यथानयनम्। किं तु 'सुरभि जलम्' इति प्रत्यक्षस्येव आगमेन तद्बाध एवोचितः। उपजीव्यत्वप्रथमोपस्थितिनिरवकाशत्वानां असम्भावितप्रामाण्ययोः सन्निपात एव प्राबल्यप्रयोजकत्वम्। 'आदित्यो यूपः' इत्यादौ च अन्यथानयने [5]गत्यन्तरमेवानुसरणीयं इति चेत्

न—स्थूलोऽहमित्येवंरूपेण शरीरात्माभेदावगाहिज्ञानस्यैवासम्प्रतिपत्तेः। आत्मशरीरयोरभेदज्ञानस्य तद्भेदाग्रहजन्यत्वेन तद्भेदग्रहे सति असम्भवात्। आत्मशरीरयोर्भेदग्रहः प्रसिद्ध एव 'मम शरीरं' इत्यभिज्ञारूपः। प्रत्यभिज्ञयाऽपि तद्भेदो गृह्यते 'य एवाहं बाल्ये पितरावन्वभूवं स एव स्थाविरे प्रणप्तॄननुभवामि'

---

1. **एतत्परिभाषाया अद्वैतिपरिकल्पिताया इति** परिभाषा—आधुनिकसङ्केतितार्थकः शब्दः, आधुनिकः सङ्केतो वा। परिकल्पितायाः—भ्रममूलिकायाः। अबाधितविषयकं हि प्रमाणं नाम, व्यावहारिकविषयकं च बाधितविषयकम्, व्यावहारिकत्वस्य ब्रह्मज्ञानातिरिक्ताबाध्यत्वसमानाधिकरणबाध्यत्वरूपत्वात्, बाध्यत्वाघटने शुद्धब्रह्मणः शशशृङ्गस्य च व्यावहारिकत्वापत्तेः, ततश्च व्यावहारिकविषयकं बाधितविषयकमिति तत्र प्रामाण्यव्यवहारादिः भ्रममूलकः। ततश्च व्यावहारिकप्रामाण्यं नाम अप्रामाण्यमेवेति न तेन प्रामाण्यज्ञानस्य विषयसिद्धिरिति भावः।

2. मु. कल्पिताया वस्तुव्यवस्थापकत्वासम्भवात्।

3. प्रत्यक्षस्य प्राबल्ये हेतवः उपपादिताः, दौर्बल्ये हेतुभूतां अप्रमात्वशङ्कां आशङ्क्य निराकरोति—**'ननु स्थूलोऽहं' इत्यादिना 'श्रुतिस्वारस्यभङ्ग इति'** इत्यन्तेन ग्रन्थेन।

4. **धर्म्यध्यासपूर्वकत्वं**—धर्मितादात्म्याध्यासव्याप्यत्वम्। तेन धर्मितादात्म्याध्यासधर्मसंसर्गाध्यासयोः पूर्वोत्तरकालीनत्वस्य अप्रामाणिकत्वेऽपि न क्षतिः।

5. **गत्यन्तरमिति**—अतत्परागमापेक्षया प्रत्यक्षप्राबल्यरूपं हेत्वन्तरं इत्यर्थः। सिद्धान्तनिरूपणावसरे चेदं स्पष्टीभविष्यति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति । न च शरीरमेवात्र प्रत्यभिज्ञायत इति वाच्यम् । प्रत्यभिज्ञाया अवस्थाद्वयानुयायिवस्तुविषयत्वात् । शरीरयोश्च परिमाणभेदेन भिन्नतया अनुयायित्वासम्भवात् । अवयवोपचयापचयाभ्यां [1]हि स्थौल्यकार्श्यादिरूपः परिमाणभेदो वाच्यः, अवयवोपचये आगतैरवयवैः पूर्वसिद्धावयविनिवेशायोग्यैः तत्साहाय्येन अवयव्यन्तरमारभ्यते, अपचये तु अवयवविश्लेषेण असमवायिकारणसंयोगनाशात् पूर्वावयविनि नष्टे अवशिष्टैः खण्डोऽवयव्यारभ्यते, इति शरीरयोर्भेदेन प्रत्यभिज्ञाविषयत्वासम्भवः । अतः प्रत्यभिज्ञाबलात् अनुयाय्यात्मा स्वीकर्तव्यः । शरीरं च नानुयायि । अतः प्रत्यभिज्ञाबलादपि तद्भेदोऽवगतः । [2]स्वप्ने च देवशरीरमात्मानमनुभूय जाग्रति मनुष्यशरीरं पश्यन्नपि प्रत्यभिजानाति 'स्वप्ने य एवाहं देवशरीरमात्मानमन्वभूवं स एवाहं मनुष्यशरीरमात्मानमनुभवामि' इति । तत्र च देहयोर्भेदः स्पष्टमनुभूयते । न च—तावता आत्मनोऽवस्थाद्वये ऐक्यं शरीरयोर्भेद इत्येतावत् सिद्ध्यति, तत्रापि परिमाणभेदात् द्रव्यभेद [3]आनुमानिकः । स्वप्नजाग्रच्छरीरयोस्तु भेदः प्रत्यक्षः, ताभ्यामात्मनो भेदस्त्वानुमानिक एव - येषु व्यावर्तमानेषु यत् अनुवर्तते तत् तेभ्यो भिन्नं यथा कुसुमेभ्यः सूत्रं, तथा चायं, तस्मात्तथा—इति, आनुमानिकभेदग्रहश्च नापरोक्षभ्रमविरोधीति—वाच्यम् । भेदकसाक्षात्कारस्य भेदसाक्षात्कारनियतत्वं[4] शुक्तित्वसाक्षात्कारेण रजतभेदसाक्षात्कारात् तावत् स्वीकर्तव्यम् । [5]प्रकृते द्वाभ्यां भेदकस्यैकत्वस्य आत्मनि साक्षात्कारात् भेदसाक्षात्कारोऽप्यवश्यम्भावी । एवं [6]बाह्यान्तःकरणाध्यासोऽपि न सम्भवति । तत्रापि 'मम

---

1. मु. हि नास्ति

2. आनुमानिको भेदकप्रत्यय उक्तः । प्रात्यक्षिकं भेदकप्रत्ययं दर्शयति—**स्वप्ने इत्यादिना । स्पष्टं अनुभूयते**—प्रत्यक्षविषय इत्यर्थः ।

3. **आनुमानिक इति** प्रत्यक्षेण तु 'योऽयं मम देहो बाल्ये तथा पुष्ट आसीत् स एवेदानीं वार्धके कृशः' इति अभेदस्यैव प्रतीतेः इति भावः ।

4. **नियतत्वम्**—व्याप्यत्वम् ।

5. **प्रकृते इति** एकस्मादात्मनो भेदकस्यानेकत्वस्य शरीरे साक्षात्काराभावेऽपि इति शेषः ।

6. **बाह्यान्तःकरणेति** बाह्यकरणान्तःकरणेत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चक्षुः, मम श्रोत्रं, मम मनः' इति भेदग्रहस्य सत्त्वात् । [1]कथं च बहुत्वेनावधृतानां देहेन्द्रियान्तःकरणानां प्रत्यभिज्ञावधृतैकत्वे आत्मन्यध्यासः । बहुत्वैकत्वलक्षणवैलक्षण्यग्रहस्य अभेदभ्रमपरिपन्थित्वात् ।

तथा च 'मनुष्योऽहं' इत्याद्यभेदग्रहो न सम्भवति, येन तद्दृष्टान्तेन करोमीत्यादेः अप्रामाण्यशङ्काकलङ्कितया श्रुतितो दौर्बल्यं शंक्येत । तत्सिद्धं उपजीव्यप्रत्यक्षस्वारस्यानुसारेण श्रुतिस्वारस्यभङ्ग इति ।

न चैवं 'सुरभि जलं' इत्यादिप्रत्यक्षस्याप्यागमेन बाधोन स्यादिति शंक्यम् । जले हि सौरभाश्रयचन्दनादिसम्पर्कः, पवने च पुष्पवाटिकातो निर्गत एव तथा प्रत्यय इति तत्रापि सौरभाश्रयपुष्पावयवसम्पर्कः सम्प्रतिपन्नः । तत्राकुशलानां सौरभासंसर्गाग्रहसम्भवात् जलादौ तदारोपः सम्भवतीति युक्तं स्मृतेस्तत्र विवेचकत्वम् । [2]न चैवं कर्तृत्वाद्याश्रयभूतं किंचिद्द्रव्यं संप्रतिपन्नम् । येन तदुपाधिकः कर्तृत्वादिप्रत्ययः स्यादात्मनि भ्रमरूपः ।

[3]ननु मनुष्योऽहमित्यादिप्रत्ययाभावे कथं [4]सामानाधिकरण्यव्यवहारः शब्दाभिलापरूपः 'मनुष्योऽहम्' इति । [5]व्यवहर्तव्यज्ञानाभावे व्यवहारानुपपत्तेः । न च—नायं व्यवहारस्सामानाधिकरण्यावगाही, किं तु [6]शरीरसम्बन्धावगाही,

---

1. भेदकसाक्षात्कारस्य साक्षादपि अभेदग्रहविरोधित्वमाह—**कथञ्चेत्यादिना** **अध्यासः**-एकस्मिन्नात्मनि अनेकेषां शरीरेन्द्रियान्तःकरणानां 'स्थूलोऽहमन्धः कर्ता' इत्येवंरूपो युगपदध्यासः ।

2. **न चैवमिति** 'कामः सङ्कल्पः' इत्यादिश्रुतिः 'लाङ्गलं जीवनं' इतिवत् औपचारिकाभेदपरा इत्यभिमानः ।

3. देहेन्द्रियात्मैक्यप्रत्ययाभावे बाधकमाशङ्कते - **ननु मनुष्योऽहमित्यादीति** । अन्धोऽहमित्यादिरादिशब्दार्थः ।

4. **सामानाधिकरण्यव्यवहारः**—अभेदव्यवहारः ।

5. **व्यवहर्तव्येति** व्यवहारः शब्दप्रयोगः, तत्र शब्दस्मृतिःकारणं, तत्र च एकसम्बन्धिज्ञानविधया व्यवहर्तव्यज्ञानं कारणं इति भावः ।

6. **शरीरसंबन्धेति** अभेदातिरिक्तस्वस्वामिभावादिरूपसंबन्धेत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]अर्श आद्यच्प्रत्ययसम्भवात् । अन्धादिशब्दानां विकलाङ्गवाचिनां [2]गणे पाठात् । मनुष्यादिशब्दानां तु आकृतिगणत्वात् सङ्ग्रहो भविष्यति । अचश्च 'तदस्यास्त्यस्मिन्निति मतुप्' इतिविहितमत्वर्थीयतया सम्बन्धवाचकत्वमुपपन्नमिति—वाच्यम् । 'गच्छामि कृश्यामि कुणिरहम्' इत्यादिव्यवहाराणां [3]तथा निर्वाहासम्भवात् । तत्राध्यासस्यागत्या आश्रयणे 'अन्धोऽहं' इत्यत्रापि तथैवास्तु । न च तथा सति विकलाङ्गवाचिनां गणपाठो व्यर्थस्स्यादिति वाच्यम् । [4]स्वरार्थतया पाठोपपत्तेः । वर्णवाचिनां हि नीलादिशब्दानां [5]मतुब्लोपेनैव सम्बन्धबोधोपपत्तौ गणपाठस्य [6]स्वर एव प्रयोजनमित्यङ्गीकरणीयम् । तत् तुल्यमन्धादिशब्देष्वपि । न च शुक्लैः प्रासादैः धवले नगरे 'शुक्लं नगरं' इति प्रयोगः शुक्लगुणयुक्तप्रासादवैशिष्ट्यबोधक इति सम्बन्धद्वयबोधनाय प्रत्ययद्वयमावश्यकमिति वाच्यम् । तत्र सन्निवेशविशेषविशिष्टा गृहा एव नगरं इत्यभ्युपगमे साक्षादेव सम्बन्धः[7]शुक्ल-

---

1. **अर्शआद्यच्प्रत्ययेति** 'अर्शआदिभ्योऽच्' (पा. सू. ५-२-१२७) इति सूत्रविहिताच्प्रत्ययेत्यर्थः ।

2. **गणे**—अर्शआदिगणे ।

3. **तथा निर्वाहेति** अच्प्रत्ययान्तत्वमाश्रित्य भेदसम्बन्धावगाहित्वसमर्थनेत्यर्थः । आख्यातान्तानां गणपाठाभावात् । विकलाङ्गवाचिनोऽपि कुणिशब्दस्य गणान्तर्भावस्य वैयाकरणासम्मतत्वात् । अच्प्रत्ययान्तत्वे 'कुणिः' इति शब्दस्य साधुत्वनिर्वाहासम्भवाच्च । अतो गमनकार्श्याद्याश्रयाभेदो वा आश्रयत्ववैशिष्ट्यं वा आत्मनि व्यवह्रियते इति वक्तव्यम् । तच्चोभयं वस्तुतः शरीरे नात्मनि । तथा च आत्मनि तादृशव्यवहारो देहात्मैक्यादिप्रत्ययरूपाध्यासाभावे न सम्भवति । अभिलापजन्यप्रतीतेः अभिलप्यमानप्रतीतिसमानविषयकत्वनियमात् , व्यवहारस्य व्यवहर्तव्यज्ञानजन्यत्वनियमात् , धर्मसंसर्गाध्यासस्य धर्मितादात्म्याध्यासव्याप्यत्वनियमाच्च इति भावः ।

4. **स्वरार्थतयेति** 'चितः' [पा. सू. ६-१-१६३] इति सूत्रविहितान्तोदात्तस्वरप्रयोजनकतयेत्यर्थः । 'अन्धो मणिमविन्दत्' इत्याद्युदाहरणम् ।

5. **मतुब्लोपेनैवेति** 'गुणवचनेभ्यो मतुपो लुक् (इष्टः)' वक्तव्यः [पा. सू. ५-२-९४ म. भा] इति विहितेनेत्यादिः । लुप्तस्य मतुपः स्मरणेनेत्यर्थः ।

6. **स्वर एव प्रयोजनमिति** न च गणपाठेन उभयसिद्धौ मतुब्लोपविधानं व्यर्थमिति शङ्क्यम् । गणापठितेभ्यः गुणान्तरवाचिभ्यः सम्बन्धबोधनिर्वाहार्थं मतुब्लोपविधानस्य आवश्यकत्वात् , तेनैव वर्णरूपगुणवचनेभ्यः सम्बन्धबोधनिर्वाहे गणपाठस्य उभयार्थत्वे गौरवात् स्वर एव प्रयोजनमिति भावः ।

7. **शुक्लत्वस्य**—शुक्लगुणस्य ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वस्येति न प्रत्ययद्वयापेक्षा। गृहाधिकरणस्य स्थलस्यैव नगरत्वे तु परम्परासम्बन्धस्य एकेनैव बोधनात् न प्रत्ययद्वयापेक्षा। [1]अन्यथा 'अश्वेतत नगरं' अपुष्प्यद्वनं' इत्यादौ [2]का गतिः। अतस्सामानाधिकरण्यव्यवहारोपपादकतया देहेन्द्रियाद्यध्यासः स्वीकर्तव्यः—इति चेत्

न—भेदग्रहेणाध्यासानुपपत्तौ व्यवहारस्य गौणत्वोपपत्तेः। गृहीतभेदयोर्हि सिंहमाणवकयोः 'सिंहो माणवकः' इति व्यवहारो गौण इति सर्वसम्प्रतिपन्नम्। अध्यासवादिनाऽपि हि कायव्यूहवतां योगिनां अपरोक्षीकृताद्वैतात्मतत्त्वानां जीवन्मुक्तानां च स व्यवहारो गौणोऽवश्यमङ्गीकर्तव्यः।

तस्मात् मनुष्योऽहमिति दृष्टान्तेन अप्रामाण्यशङ्काया अनुन्मेषात् निर्णीतप्रामाण्येन उपजीव्यतया प्रबलेन प्रत्यक्षेण आगमस्याद्वैतात्मावबोधकत्वे विरोधात्[3] अर्थान्तरपरत्वमेव स्वीकर्तव्यमिति विषयाभावः। विषयाभावे च प्रयोजनमपि न सम्भवति। विषयप्रमा हि साक्षात्प्रयोजनम्। न चासम्भाविते विषये प्रमा सम्भवति। परमप्रयोजनं च प्रत्यगभिन्नब्रह्मविषयाज्ञाननिवृत्तिपूर्वकं जीवस्य नित्यसिद्धब्रह्मात्मनाऽवस्थानम्। न च तदपि सम्भवति। प्रमाणाभावेन ब्रह्मात्मताया [4]एवाभावात्, श्रुतेरन्यपरत्वस्य[5] दर्शितत्वात्। प्रमाणान्तरस्य चासम्भवात्।

अतो विषयप्रयोजनयोरभावेन शास्त्रं नारम्भणीयमित्यभिप्रेत्य विषयप्रयोजन-

---

1. **अन्यथा**—एतादृशस्थलेषु परम्परासम्बन्धबोधस्य अप्रामाणिकत्वे अनङ्गीकारे वा।

2. **का गतिरिति** गत्यभावः—प्रत्ययद्वयाभावात् विवक्षितार्थस्य बोधहेत्वभाव इत्यर्थः। 'श्विता वर्णे' इति धातोर्लङि निष्पन्नं हि 'अश्वेतत' इति रूपं, एवं 'पुष्पविकसने' इति धातोः 'अपुष्प्यत्' इति। आख्यातान्तबोध्यं श्वेतवर्णवैशिष्ट्यं साक्षात् प्रासादेष्वेव न नगरे। विकासवैशिष्ट्यं च वृक्षेष्वेव। नास्ति च प्रत्ययान्तरम्। अतः परम्परयैव नगरवनयोः तद्वैशिष्ट्यं बोध्यत इत्यङ्गीकार्यं इति भावः।

3. मु. बोधकत्वविरोधात्

4. मु. एवासम्भवात्

5. **अन्यपरत्वस्य**—अन्यपरत्वेनोपपादनीयत्वस्य।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अध्यासभाष्यम्

युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः तमःप्रकाशवद्विरुद्धस्वभावयोः इतरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरां इतरेतरभावानुपपत्तिः ;

निर्णयोपयोगिनमध्यासमाक्षिप्य परिहरति—**'युष्मत्'** इत्यादिना **नैसर्गिकोऽयं लोकव्यवहारः'** इत्यन्तेन भगवान् भाष्यकारः ।

अत्र **युष्मत्प्रत्ययगोचरत्वं** [1]युष्मच्छब्दोल्लेखिप्रत्ययगोचरत्वं **विषयस्य** शरीरादेः । **अस्मत्प्रत्ययगोचरत्वं** अस्मच्छब्दोल्लेखिप्रत्ययगोचरत्वं **विषयिणः**-आत्मनः । अनेन च विरुद्धप्रवृत्तिनिमित्तकशब्दप्रतिपाद्यत्वेन [2]भेदग्रहो दर्शितः । यद्यपि इदंशब्दोल्लेखिप्रत्ययगोचरत्वमेव जडस्य वक्तुमुचितम् , [3]सम्बोध्यचेतनस्यैव हि युष्मच्छब्दोल्लेखिप्रत्ययगोचरत्वम् , तथापि इदंशब्दोल्लेखिप्रत्ययगोचर एव

---

1. **युष्मच्छब्दोल्लेखीति** युष्मच्छब्देन उल्लेखः—अभिलापः अस्य इति युष्मच्छब्दोल्लेखी । युष्मच्छब्दोल्लेख्येत्यर्थः । उल्लेख्येत्येव वा पाठः । एवं अस्मच्छब्दोल्लेखीत्यत्रापि । एवं च भाष्ये युष्मदस्मत्पदयोः तच्छब्दोल्लेख्ययोः लक्षणा । अतः 'प्रत्ययोत्तरपदयोश्च' [पा. सू. ७-२-९८] इति सूत्रकार्यं त्वमादेशरूपं न भवति । मुख्ययोरेव सर्वादिगणपाठस्य सिद्धान्तितत्वात् मुख्ये एव सर्वनामकार्यप्रवृत्तेः । अन्यथा 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वां नावौ [पा. सू. ८-१-२०] इति सूत्रे 'युष्मदस्मदोः' इति प्रयोगस्य असाङ्गत्यप्रसङ्गात् इति भावः ।

2. **भेदग्रहो दर्शित इति** । न चैवं सति विरुद्धस्वभावयोरिति पुनरुक्तं स्यात् इति वाच्यम् । 'ममेदं शरीरं' इति भेदग्रहोऽनेन दर्शितः, 'शरीरात्मानौ भिन्नौ' इति भेदग्रहो विरुद्धस्वभावयोरित्यनेन दर्शित इति वैलक्षण्यात् ।

3. **सम्बोध्यचेतनस्यैवेति** — सम्बोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचको युष्मच्छब्दः । सम्बोध्यत्वञ्च वक्तुरव्यवहितशब्दजन्यबोधाश्रयत्वेनेच्छाविषयत्वम् । तादृशेच्छा च अभ्रान्तानां चेतनविषयिण्येव भवति, अचेतनानां बोधाश्रयत्वासम्भवात् । भ्रान्तिश्च न वस्तुसाधिका । तथा च सम्बोध्यचेतन एव युष्मच्छब्दबोध्यः । अभिलापजन्यप्रतीतितुल्यत्वादभिलप्यमानप्रतीतेः युष्मच्छब्दोल्लेख्यप्रत्ययगोचरत्वमपि सम्बोध्यचेतनस्यैवेत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वभिन्नत्वगुणयोगात् अत्यन्तविरोधख्यापनाय [1]तथोपचरितः। इदमसच्छब्दयोर्हि 'इमे वयं' 'अयमहमस्मि' [छा. उ ८-११-१] इति लौकिकवैदिकसामानाधिकरण्यव्यवहारप्राचुर्यात् तथाविरोधो न स्फुरति। युष्मदस्मच्छब्दयोस्तु प्रचुरसामानाधिकरण्यप्रयोगाभावात् स्फुरति विरोधः। अनेन च 'ममेदं शरीरं' इतिप्रतीतिर्दर्शिता। **तमःप्रकाशवत् विरुद्धस्वभावयोः**— तथाऽवगतयोः इति यावत्। भेदाग्रहाभावसिद्ध्यर्थं विरुद्धस्वभावत्वग्रहणमेव प्रतिपादनीयमिति तथा व्याख्यातम्। विरुद्धस्वभावत्वं च [2]परम्परानात्मत्वम्। **इतरेतरभावानुपपत्तौ सिद्धायां** तादात्म्यप्रतीत्यनुपपत्तौ सिद्धायाम्। एवं च यत् सिद्धान्तिनोच्यते शरीरात्माभेदभ्रमवत् कर्त्रात्माभेदभ्रमोऽपि सम्भवतीति, तत् निरस्तम्। 'ममेदं शरीरं' इत्यादिभेदग्रहे हि जाग्रति शरीरात्मनोरभेदभ्रम एव न सम्भवति। **तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः**- इतरेतरभावः धर्माणां [3]व्यत्यासः, [4]तदध्यासानुपपत्तिः। धर्म्यभेदा-

---

1. **तथोपचरित इति** युष्मच्छब्दोल्लेखिप्रत्ययगोचरपदेन गौण्या वृत्त्या उक्त इत्यर्थः। गोचर इति प्रथमान्तम्। तथा च गौणत्वादपि सर्वनामकार्यं न भवति, 'गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः' इति न्यायात् इति भावः। **तथोपचरितं** इति मुद्रितपुस्तकपाठः। तत्र गोचरपदं सप्तम्यन्तम्। युष्मच्छब्दोल्लेखिप्रत्ययगोचरपदं गौण्या प्रयुक्तं इत्यर्थः।

2. **परस्परानात्मत्वम्**—परस्परभेदः

3. **व्यत्यासः**—इतरेतरत्र भावः–संसर्गः। अयमेव धर्माणां इतरेतरभावः। धर्मिणोस्तु इतरेतरभावः–इतरेतरत्वं–तादात्म्यम्।

4. **तदध्यासानुपपत्तिरिति** एवञ्च 'तद्धर्माणामपि सुतरां इतरेतरभावानुपपत्तिः' इत्यत्रापि इतरेतरभावपदेन तत्प्रतीतिरेव विवक्षितेत्युक्तं भवति। ननु इतरेतरभावानुपपत्तिः–तत्प्रतीत्यनुपपत्तिः इति किमर्थमिदं क्लिष्टव्याख्यानम्। अधिष्ठानसामान्यांशाध्यस्यमानविशेषांशयोः क्वचिद्वास्तवतादात्म्ये सत्येव तत्प्रमितिजन्यसंस्कारापेक्षः 'इदं रजतं' इत्याद्यध्यासो दृष्टः, तदसम्भवः इह अध्यासासम्भवहेतुत्वेनोच्यत इत्यास्तां–इति चेत्; न–आत्मानात्मनोः वास्तवतादात्म्यासम्भवस्य सिद्धान्तिनाऽप्यङ्गीकृतत्वेन विरोधहेतुना तत्साधनस्य सिद्धसाधनदुष्टत्वात्। संस्कारस्य अध्यासकारणतायां प्रमितिजन्यत्वस्य अप्रयोजकत्वात्, नभोनैल्यभ्रमे व्यभिचाराच्च। नन्वेवं सति—'अतोऽस्मत्' इत्यादिभाष्ये इतरेतरभावानुपपत्त्या अध्यासाभावसाधनं दृश्यमानमनुपपन्नं स्यात्। तस्या इतरेतरभावप्रतीत्यनुपपत्तिरूपाया अध्यासाभावत्वेन साध्याविशेषात्। न च—अनुपपत्तिः उपपत्त्यभावः, भेदाग्रहरूपाध्यासोपपत्त्यभावेन हेतुना अध्यासाभावः साध्यते, अतो न साध्याविशेषः—इति वाच्यम्। भिन्नत्वेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ध्यासाभावादेव धर्माध्यासाभावे [1]अर्थसिद्धे पुनः प्रतिपादनं शङ्काविशेषनिराकरणार्थम्।

[2]ननु मास्तु धर्म्यभेदाध्यासः, तदभावेऽपि जपाकुसुमाभेदाध्यासरहिते स्फटिके जपाकुसुमारुणिम्न इव शरीरे [3]आत्मधर्मस्य चैतन्यादेरध्यासः किं न स्यात्।

न च—तदभेदाध्यासः, तत्प्रतिबिम्बो वा [4]अगृहीतभेदः तद्धर्माध्यासप्रयोजकः। स्फटिके चास्ति जपाकुसुमप्रतिबिम्बः स्फटिकादगृहीतभेदः। शरीरे च आत्माभेदाध्यासनिराकरणात् अगृहीतभेदः शरीरे आत्मप्रतिबिम्बो वक्तव्यः।

गृहीतयोरित्यर्थकतया व्याख्यातेन 'विरुद्धस्वभावयोः' इत्यनेन हेतुगर्भविशेषणेन उक्तार्थलाभेन पुनः उपपत्त्यभावोक्तेः अनतिप्रयोजनकत्वात्। न च 'अहं मनुष्यः' इत्यादिप्रतीतौ अध्यासलक्षणाभावेन अध्यासत्वाभावः साध्यत इति न साध्याविशेष इति शङ्क्यम्। अतोऽस्मत्प्रत्ययेत्यतः प्राक्तनग्रन्थेन 'अहं मनुष्यः' इत्यादिप्रतीतौ अध्यासलक्षणाभावस्य अप्रतीतेः तत्परत्वकल्पनस्य क्लिष्टत्वात्, अतः इतरेतरभावानुपपत्तिपदस्य इतरेतरभावप्रतीत्यभावार्थकत्वेन व्याख्यानमनुपपन्नं—इति चेत्, उच्यते-शरीरात्माभेदभ्रमवत् कर्त्रात्माभेदभ्रमः सम्भवतीति यत् सिद्धान्तिना सिषाधयिषितं तत्र दृष्टान्तनिरासि इतीत्यन्तभाष्यं दार्ष्टान्तिकनिरासि अवशिष्टं भाष्यं, अतो नाविशेषः। स्पष्टञ्चैतत् 'इत्यतोऽस्मत्' इत्यादिभाष्यावतरणे।

1. **अर्थसिद्धे**—अर्थः—अनुमानं 'शरीरं आत्मधर्माध्यासरहितं, आत्मतादात्म्याध्यासशून्यत्वात्, यो यत्तादात्म्याध्यासरहितः स तद्धर्माध्यासरहितः, यथा पटत्वाध्यासरहितो घटादिः' इत्येवमाकारम्, तेन निर्णीते।

2. शङ्काविशेषनिराकरणार्थमित्युक्तं, निराकर्तव्यं शङ्काविशेषमाह—**ननु** इत्यादिना **तन्निराकरणं च** इत्यतः प्राक्तनेन ग्रन्थेन।

अयमत्र शङ्काग्रन्थार्थसंक्षेपः—शरीरात्मनोर्भेदनिश्चयेन धर्म्यभेदाध्यासाभावेऽपि धर्मसंसर्गाध्यासः सम्भवति, स्फटिके जपाकुसुमलौहित्याध्यासवत्। स्फटिके जपाकुसुमप्रतिबिम्बस्येव शरीरे आत्मप्रतिबिम्बस्य भेदाग्रहसम्भवात्। आत्मनश्च नीरूपत्वेऽपि गगनस्येव प्रतिबिम्बः सम्भवति। 'जले आलोकप्रतिबिम्ब एव, तत्र गगनप्रतिबिम्बभ्रमः' इति तु न युक्तम्। बाधकाभावात्। न च प्रतिबिम्बद्वयकल्पनागौरवं बाधकम्। आलोकप्रतिबिम्बे गगनप्रतिबिम्बभ्रमपक्षेऽपि भ्रमसिद्धस्य अनिर्वचनीयस्य गगनप्रतिबिम्बस्य अवश्याभ्युपगन्तव्यत्वेन गौरवस्य तुल्यत्वात्, बिम्बातिरिक्तप्रतिबिम्बानङ्गीकारपक्षे गौरवाभावात्, 'रूपवत एव प्रतिबिम्बः' इति नियमस्य च अप्रयोजकत्वात्—इति।

3. आ. आत्मधर्मभूतस्य

4. मु. तदगृहीत

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोऽपि न सम्भवति। नीरूपस्य आत्मनः प्रतिबिम्बासम्भवात्। रूपवत एव प्रतिबिम्ब इति हि नियमः इति—वाच्यम्। नीरूपस्यापि गगनस्य जले प्रतिबिम्बदर्शनेन नियमभङ्गात्।

[1]अथ जले न गगनप्रतिबिम्बः। अपि तु आलोकप्रतिबिम्ब एव गगनप्रतिबिम्ब इति भ्रममात्रम्। अतो न नियमभङ्गः। ननु—नायं नियमस्साधुः। प्रतीत्यनुसारी हि नियमः कल्पनीयः। न त्वप्रयोजकनियमानुसारेण गगनप्रतिबिम्बप्रतीतेरप्रामाण्यं कल्पयितुं युक्तम्। अन्यथा 'रूपवत एव चाक्षुषत्वं' इति 'स्वगतरूपचाक्षुषविषयत्वमेव द्रव्यस्य' इति च नियमं परिकल्प्य 'विशालं नभः' 'नीलंनभः' 'नीलं सलिलं' इत्यादिप्रतीतीनामपि [2]अन्यविषयत्वपरिकल्पनापत्तेः। यदिच—रूपवदेव चाक्षुषमिति स्वगतरूपचाक्षुषविषयत्वमेव द्रव्यस्येति च न नियमः, किं तु स्वगतेन अन्यगतेन आरोपितेन वा रूपेण सम्बद्धस्य चाक्षुषत्वं, तादृशरूपचाक्षुषविषयत्वमेव द्रव्यस्य इत्युच्येत, तदा रूपवत एव प्रतिबिम्ब इत्यपि नियमो मास्तु, यथाकथञ्चिद्रूपोपहितस्य प्रतिबिम्ब इत्येवास्तु। तथा च आकाशस्याप्यालोकरूपोपधानेन आरोपितरूपोपधानेन च प्रतिबिम्बसम्भवे किमिति तत्प्रतीतेर्भ्रमत्वं कल्प्यते। एवमात्मनोऽपि शरीररूपोपधानेन प्रतिबिम्बोऽस्तु। दृश्यते हि दर्पणादिगतनैल्याद्युपधानेनापि मुखादिप्रतिबिम्बः इति चेत्; न—येनापि हि गगनप्रतिबिम्ब इष्यतेतेनाप्यालोकप्रतिबिम्बस्तावदभ्युपगन्तव्यः। [3]अन्यथा वैशाल्यप्रतीत्यनुपपत्तेः। यत्ररूपं [4]भासते तत्रैव परिमाणभानमिति नियमात्। एवं च आलोकप्रतिबिम्बे भासमानस्य वैशाल्यस्य गगनप्रतिबिम्बगततया भानमिति भ्रमोऽपि स्वीकार्यः। तद्वरं

---

1. गगनप्रतिबिम्बवादमाक्षिपति — **अथेत्यादिना**—न रूपोपधानेन इत्यतः प्राक्तनेन ग्रन्थेन।

2. **अन्यविषयत्वपरिकल्पनापत्तेरिति** बाह्यगगनविषयाणां इत्यादिः। आलोकगतवैशाल्यादिविषयकत्वकल्पनापत्तेरित्यर्थः। न चेष्टापत्तिः। 'अप्रत्यक्षेऽपि ह्याकाशे बालाः तलमलिनताद्यध्यस्यन्ति' इति भाष्यविरोधात्।

3. **अन्यथेत्यादि** गगनप्रतिबिम्बमात्राभ्युपगमे कूपाधिकपरिमाणरूपस्य प्रतिबिम्बगतविशालत्वस्य अचाक्षुषत्वप्रसङ्गात्। परिमाणस्य रूपसामानाधिकरण्येनैव भाननियमात्, कूपाधःप्रदेशे नैल्यभानेऽपि मध्ये तदभानात्, कूपमध्ये परिमाणाभाने वैशाल्यप्रतीत्यनिर्वाहात् इति भावः।

4. मु. प्रतिभासते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आलोकस्यैव प्रतिबिम्बोऽस्तु, तत्रैव गगनप्रतिबिम्बत्वभ्रममात्रम्। तलमलिनत्वादिकं च आलोकप्रतिबिम्ब एवाध्यस्यताम्। कल्पनालाघवात्। एवं च रूपवत एव प्रतिबिम्ब इति न नियमभङ्गः। रूपोपहितस्य प्रतिबिम्ब इति कल्पने तु अनन्तरासम्प्रतिपन्न आकाशप्रतिबिम्ब एव मूलम्। स तु न सम्भवति गौरवपराहतत्वात् इत्युक्तम्। बहिस्तु आकाशस्य सर्वसम्प्रतिपन्नत्वात् 'विशालं नभः' 'नीलं नभः' इति प्रतीतेर्यथार्थत्वे[1] न गौरवमिति तदुपपत्तये रूपोपहितस्य चाक्षुषत्वमित्येव स्वीक्रियते। तथा च नीरूपस्यात्मनो न प्रतिबिम्बस्सम्भवति। एवमपि गगनप्रतिबिम्बत्वभ्रमाश्रयः यथा जले [2]आलोकोऽस्ति, तस्मिंश्च गगनधर्मस्य तलमलिनत्वस्यारोपे स एव बाह्यगगनसदृशः तलमलिनत्वादिविशिष्टगगनत्वप्रकारकप्रत्ययविषयो भवति, [3]तादृशालोकेन कूपस्य भेदाग्रहशालिनां च 'कूपे तलमलिनत्वादिकं' इत्यपि भ्रमो भवति; एवं शरीरे आत्मप्रतिबिम्बत्वभ्रमाश्रयः कश्चिदस्ति चेत् तत्र आत्मधर्मस्य चैतन्यादेरध्यासः सम्भवेत्, तस्य चेतनत्वेनावगम्यमानस्य शरीरात् भेदाग्रहे सति तत्रापि तद्धर्माध्यासः सम्भवेत्। न तु शरीरे आत्मप्रतिबिम्बत्वभ्रमाश्रयः कश्चिदस्ति। एवं च अभेदाध्यासाभावेऽपि जपाकुसुमारुणिम्न इव आत्मधर्मस्य चैतन्यादेरध्यासोऽस्त्विति कथमुच्यत इति चेत्

[4]न—रूपोपधानेन प्रतिबिम्ब [5]इति पक्षे 'जलान्तर्गततया अपूर्वो गगनप्रतिबिम्बः कल्पनीयः' इति 'बाह्य एवाकाशे प्रतिहतैर्नायनरश्मिभिः संसृष्टे जलान्तर्गतत्वमारोप्यते' इतिवदन्तं प्रति वक्तुं न शक्यते, [6]बाह्यगगने च आलोक-

---

1. **यथार्थत्वे**—यथा भासते तथात्वे। नभोगतवैशाल्यादिविषयकत्वे इति यावत्।

2. **आलोकः**—आलोकप्रतिबिम्बः

3. **तादृशालोकेन**—तादृशेन आलोकप्रतिबिम्बेन

4. गगनप्रतिबिम्बवादं समर्थयति—**न रूपोपधानेनेत्यादिना**।

5. **इति पक्षे** इति **कथं गौरवं** इत्यनेन सम्बध्यते। गौरवं नास्तीत्यर्थः।

6. प्रतिबिम्बस्य बिम्बाभेदपक्षाश्रयणेन गगनप्रतिबिम्बकल्पनागौरवं परिहृत्य, तत्पक्षाश्रयणेनैव 'आलोकप्रतिबिम्बे भासमानस्य वैशाल्यस्य गगनप्रतिबिम्बगततया भानमिति भ्रमोऽपि स्वीकार्यः' इत्युक्तं गौरवमपि परिहरति—**बाह्यगगने इति**। गगनगततया गगनगतस्यैव भानात् इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रूपोपहिते सर्वसम्प्रतिपन्नतया भवताऽप्यभ्युपगता वैशाल्यप्रतीतिः भ्रम इत्यपि वक्तुं न शक्यते इति, कथं गौरवम् । प्रत्युत भवत एव गौरवम् । तलमलिनत्वस्य गगनगततया सर्वप्रतीतिसिद्धस्य प्रतिबिम्बप्रत्यये आलोकगततया [1]आरोपस्य स्वीकारात् । यन्मते च अपूर्व एव प्रतिबिम्बो जले उत्पद्यते तत्रापि न वैशाल्यस्य गगनप्रतिबिम्ब गततया भानं भ्रमः । आलोकरूपोपहितस्यैव प्रतिबिम्बाभ्युपगमात् । न च प्रतिबिम्बद्वयाभ्युपगमात् गौरवम् । येनापि हि आलोकप्रतिबिम्ब एव गगनप्रतिबिम्ब [2]इति भ्रमः स्वीक्रियते, तेनापि आलोकप्रतिबिम्बाधिष्ठानो गगनप्रतिबिम्ब उत्पद्यत इति वक्तव्यम् । अनिर्वचनीयवादाभ्युपगमात् । तदस्तु जलाधिष्ठान एव । किमनया कुसृष्ट्या । अपि च गगनप्रतिबिम्बाभ्युपगमे बिम्बसदृशः प्रतिबिम्ब इति तलमलिनताप्रत्यये नापूर्वं किञ्चित् कल्पनीयम् । तदनभ्युपगमे तु आलोकप्रतिबिम्बे अक्लृप्तस्तदध्यासः कल्पनीय इति विपरीतं गौरवम् । तस्मान्नीरूपस्याप्याकाशस्य रूपोपधानेनेव आत्मनोऽपि रूपोपधानेन प्रतिबिम्बे न काचिदनुपपत्तिः ।

तथा च स्फटिके जपाकुसुमारुणिम्न इव धर्म्यध्यासाभावेऽपि शरीरे आत्मधर्मस्य चैतन्यादेरध्यासः किं न स्यादिति शङ्का ।

तन्निराकरणं च तद्धर्माणामपीत्यनेनेत्थं विवक्षितम् । वेदान्तिनो हि 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' [ब्र. सू. ३-२-२०] इति सूत्रे वक्ष्यमाणरीत्या अन्तःकरणाद्यैक्याध्यासमापन्नस्य तद्धर्मानुविधायित्वमेव तत्र प्रतिबिम्बितत्वमिति मतम् । न तु मुख्यं सूर्यप्रतिबिम्बादिवत् । तदुपपत्तिश्च तत्रैव स्फुटीभविष्यति । अन्तःकरणाद्यैक्याध्यासश्च न सम्भवतीत्युक्तम् । अतो न तद्धर्माध्यासः ।

[3]धर्म्यभेदाध्यासाभावेऽपि नीलं सलिलमिति सलिले नैल्याध्यासो दृश्यते, एवं प्रकृते किं न स्यात्—इति शङ्कायां **सुतरामिति** । अन्यत्र यथाकथञ्चित् अस्तु नाम, परस्परधर्म्यभेदाध्यासपूर्वक एव चिज्जडयोः परस्परधर्माध्यास इति वदता सिद्धान्तिना तथा शङ्कितुमेव न शक्यं इति भावः ।

---

1. मु. आरोप्यस्य
2. मु. इति स्वीक्रियते
3. तद्धर्माणामपीत्युक्तमेव सुतरामित्यनेनापि उच्यते इति भामती ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम् । तथाऽपि —

एवं देहात्माध्यासरूपं दृष्टान्तं निरस्य तेन सम्भावनीयं बुद्ध्यात्मनोरैक्याध्यासमपि निरस्यति—**इत्यतोऽस्मत्प्रत्ययगोचरे इति** । अत्र विषयशब्दोऽन्तःकरणप्रतिपादकः । [1]**तद्विपर्ययेणेति** उत्तरत्र अध्यासः इत्यनेन सम्बध्यते । एकत्र आत्मा अधिष्ठानं अन्यत्र जडोऽधिष्ठानं इत्यध्यासयोर्वैपरीत्यम् । **मिथ्येति भवितुं युक्तमिति** । न सम्भवतीति यावत् ।

तथापि इत्यादेः परिहारस्यायमाशयः—

श्रुतितदन्यप्रमाणविरोधे हि श्रुतेरेव प्राबल्यं वैदिकैरभ्युपगन्तव्यं इत्युत्सर्गः । [2]'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्' इति स्मृतेः । न च इदं वचनं आगमैकसमधिगम्यस्वर्गयागादिसाध्यसाधनभावादौ तत्प्राबल्यप्रतिपादनपरम्, न तु प्रत्यक्षसाधारणात्मविषये---इति वाच्यम् । तथासङ्कोचकल्पने प्रमाणाभावात्, एकविषयानेकविरुद्धप्रमाणसन्निपाते निर्णयोपयोगितया प्राबल्यप्रतिपादनेन अपेक्षितार्थसमर्पकत्वे सम्भवति विरुद्धप्रमाणान्तराप्रसक्त्या व्यर्थत्वापादकस्य आगमैकसमधिगम्यविषयकत्वस्य कल्पयितुमनुचितत्वाच्च[3] ।

[4]उपजीव्यप्राबल्यन्यायश्च न प्रकृते सम्भवति । सामान्यन्यायस्य 'उपजीव्योपजीवकयोरेव [5]उपदेशानुपदेशत्वे विपरीतं बलाबलं' इति विशेषन्यायेन बाधात् ।

---

1. **तद्विपर्ययेणेति** विषयिणि विषयाध्यासः तच्छब्दार्थः । तद्विपर्ययेणेत्यस्य विवरणं 'विषये' इत्यन्तम् । प्रस्थानान्तरयोस्तु विषयः तच्छब्दार्थः ।
2. प्रत्यक्षस्य जात्या प्राबल्यं पूर्वपक्षोक्तं निराकरोति—**प्राबल्यमिति** । इदं मनुवचनमिति सिद्धान्तलेशसङ्ग्रहटीकाकृतः । ब्रह्मतर्कवचनमिति न्यायामृतव्याख्यातारः ।
3. **अनुचितत्वाच्चेति** अद्वैतात्मनोऽपि आगमैकसमधिगम्यत्वात्—इत्यपि बोध्यम् ।
4. उपजीव्यत्वेन प्रत्यक्षस्य प्राबल्यमुक्तं निराकरोति—**उपजीव्येति** ।
5. **उपदेशानुपदेशत्वे** इति यथायोगमन्वयः । न तु यथासङ्ख्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न चाप्रयोजकत्वम् । अनुपदेशस्य दुष्टत्वसम्भवात् । स च दोषः क्वचिदप्रामाण्य-शङ्काकलङ्कितत्वम्, क्वचिद्विलम्बितप्रवृत्त्यादिकम् । तद्यथा—कुण्डपायिनामयने[1] श्रुतस्य 'यो होता सोऽध्वर्युः [ता. ब्रा. 25-4-5] इति वाक्यस्य, [2]विरुद्धार्थ-कयोर्होत्रध्वर्युशब्दयोः [3]सामानाधिकरण्यनिर्वाहार्थं प्रथमश्रुतहोतृशब्दानुसारेण अध्वर्यु-शब्देन लक्षणयोपस्थापिते अध्वर्युकार्ये [4]होतृविधायकत्वे स्थिते, यूपपरिव्याणे[5] करणस्य 'परिवीरसि' [तै. सं. 1-3-6] इति मन्त्रस्य [6]अन्यत्राध्वर्युप्रयोज्यस्यापि अत्र वचनानुसारेण होत्रा प्रयोगः प्राप्नोति । अतिदेशानुसारेण च होतृकार्यान्तर्गते । 'युवा सुवासाः [तै. ब्रा 3-6-1] इति [7]वर्तमानतानुवादिमन्त्रे होता [8]प्राप्नोति न चोभावपि मन्त्रौ होत्रा प्रयोक्तुं शक्यौ । परिव्याणसङ्कल्पमारभ्य तत्समाप्ति-पर्यन्तः कृत्स्नोऽपि वर्तमानकाल इति तावन्तं कालं वर्तमानतानुवादी मन्त्रः प्रयो-क्तव्यः, परिव्याणाव्यवहितपूर्वक्षणे करणमन्त्रः [9]समारम्भणीयः, इत्येककालसमावे-शात् । तत्रान्यतरबाधे वर्तमानतानुवादिमन्त्रबाध एवाश्रितः[10] । तत्र होतुरतिदेशः [11]तत्कार्यस्य च प्रत्यक्षेण 'यो होता सोऽध्वर्युः' इत्यनेन उपजीव्यः । प्राप्तोभया-नुवादेन सम्बन्धमात्रविधानात् । होतृप्राप्त्यर्थं होतृकार्यमप्युपजीव्यम् । पदार्थानां कार्यसुखेनैव विकृतिषु प्राप्तेः स्वीकारात् । न चात्र सावकाशनिरवकाशन्यायः ।

---

1. **कुण्डपायिनामयने**—तन्नामके सत्रे ।
2. **विरुद्धार्थकयोः**—अत्यन्तभिन्नार्थवाचिनोः ।
3. **सामानाधिकरण्यनिर्वाहार्थम्**—प्रतीयमानस्य अभिन्नार्थबोधानुकूलाकाङ्-क्षादिमत्त्वस्य अबाधाय ।
4. **होत्रिति** कर्तृत्वेनेत्यादिः ।
5. **परिव्याणे** इति परिव्याणं—रशनया परितो वेष्टनम्
6. **अन्यत्र**—प्रकृतौ
7. **वर्तमानतानुवादीति** क्रियमाणानुवादिनोऽभिधानम् ।
8. **प्राप्नोति**—ज्योतिष्टोमात् द्वादशाहे ततो गवामयने ततः कुण्डपायिनामयने इत्येवं चोदकपरम्परया अग्नीषोमीयस्य पशोः कुण्डपायिनामयनप्राप्त्या तदङ्ग-मन्त्रप्रयोगे होता कर्तृत्वेन प्राप्नोति ।
9. मु. समापनीयः
10. **आश्रितः**—तृतीयाष्टमदशमे पूर्वमीमांसकैः न्यायतोनिर्णीतः ।
11. **तत्कार्यस्य**—'यो होता सोऽध्वर्युः' इति वचनानुसारेण होतृकर्तव्यत्वेन प्राप्तस्य अध्वर्युकार्यस्य ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वचनस्य परिवीरसीतिमन्त्रातिरिक्तेऽप्याध्वर्यवे सावकाशत्वात् । अतः उपजीव्यस्यापि विलम्बितप्रवृत्तिकतया शीघ्रप्रवृत्तिकेन उपदेशेन बाध इत्येव स्वीकर्तव्यम् । एवं प्रकृतेऽपि सम्भाविताप्रामाण्यस्य प्रत्यक्षादेः उपदेशेन तद्विपरीतेन बाधो भविष्यति ।

[1]एवमुपजीव्योपजीवकयोरेव तात्पर्यलिङ्गसहितस्य उपजीवकस्य तद्रहितादुपजीव्यात् प्राबल्यमभ्युपगन्तव्यम् । अद्वैतविषयकोपक्रमादीनां[2] इदमेव प्रयोजनम्—यत् प्रमाणान्तरानुसारेण तत्त्वमस्यादिवाक्यस्य अर्थान्तरशङ्कानिराकरणम् । न च तथा प्रत्यक्षादेस्तत्त्वावेदकत्वमेव स्वीकर्तव्यमित्यत्र किञ्चिन्निर्बन्धकारणमस्ति । अतोऽन्यथासिद्धिशङ्काकलङ्कितप्रत्यक्षविरोधं तिरस्कृत्य तात्पर्यग्रहे[3] न काचिदनुपपत्तिः । अत एव [4]लाघवरूपतात्पर्यलिङ्गसहकृतेन[5] 'हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयति' [तै. 5 - 5 - 1] इति विधिना हिरण्यगर्भइतिमन्त्रस्यान्यथानयनमाश्रितम् । इदं हि वचनं वायव्यपशावाम्नायते—प्रकृतौ च द्वावाघारौ-प्रथमः प्राजापत्यः, द्वितीयः ऐन्द्रः समन्त्रकः । तत्रैव च मन्त्रजन्यादृष्टम् । न तु प्रथमेऽमन्त्रके । तत्र यदि आघारसामान्यप्रतिपादकेनानेन विधिना [6]मन्त्रलिङ्गस्वारस्यानुरोधेन[7] 'प्रजापतिर्वै हिरण्यगर्भः' [तै. सं. 5-5-1] इत्यर्थवादस्वारस्यानुरोधेन च प्रथमाघार एव मन्त्रो विधीयेत, तदा अदृष्टं किञ्चित् परिकल्पनीयम्, तस्य [8]प्रथमाघारोपकारकत्वं तत्र मन्त्रजन्यत्वसामान्यं तद्विशेषश्चेति बहु कल्पनीयं

---

1. तात्पर्यवत्त्वस्य प्राबल्यप्रयोजकतां समर्थयति—**एवमुपजीव्येति** ।

2. मु. उपक्रमानां

3. **न काचिदनुपपत्तिरिति** एतेन - उपजीव्यप्रमाणविरुद्धार्थकत्वे तात्पर्यवत्त्वमेव न सिद्ध्यति—इति शङ्का सत्तात्रैविध्यवादे अन्योन्याश्रयशङ्का च निरस्ता वेदितव्या ।

4. **लाघवरूपतात्पर्यलिङ्गसकृतेनेति** लाघवस्य उपपत्तिरूपतात्पर्यलिङ्गे अन्तर्भावो वेदितव्यः ।

5. मु. सहकृतत्वेन

6. **मन्त्रलिङ्गस्वारस्यानुरोधेनेति** हिरण्यगर्भशब्दस्य प्रजापतिनामत्वप्रसिद्ध्या प्राजापत्याघारे मन्त्रविधिः मन्त्रलिङ्गस्वारस्यमनुरुन्धे इति भावः । मन्त्रघटकपदमुख्यार्थसम्बन्धिक्रियायां मन्त्रविनियोजकत्वं मन्त्रलिङ्गस्य स्वारस्यम् ।

7. मु. स्वारस्यानुसारेण

8. **प्रथमाघारोपकारकत्वमिति** अपूर्वजनने प्रथमाघारसहकारित्वं इत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्यात् । द्वितीयाघारे तद्विधाने तु प्रकृतौ तस्य मन्त्रसामान्याद्दृष्टसम्बन्धः क्लृप्त इति विधेर्मन्त्रविशेषसम्बन्धमात्रपरत्वमिति लाघवरूपतात्पर्यलिङ्गोपेतेन द्वितीयाघारे मन्त्रविधानेन विनियोज्यतया विनियोगविध्युपजीव्यस्यापि[1] स्वरसतो[2] हिरण्यगर्भप्रकाशकस्य [3]लक्षणया इन्द्रप्रकाशकत्वं स्वीकृतम् । तत् सिद्धं प्रबलश्रुतिप्रमाणानुसारेण वर्णपदादिस्वरूपमात्रोपजीवनमभ्युपगम्य अनपेक्षितलौकिकप्रमाणगततत्त्वावेदकत्वबाधेऽपि न काचिदनुपपत्तिः ।

[4]एवं च यत् प्रामाण्यज्ञानस्य प्राथम्यं प्राबल्ये प्रयोजकमुक्तं, तत् विपरीतम् । तत्रैव हि प्रथमस्य प्राबल्यं यत्रोत्तरेण तदपेक्ष्यते । यथा 'प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तन्निरवपत्' [तै. सं. 2-3-12] इत्युपक्रमेण असञ्जातविरोधिना दातुरिष्टिरिति बोधे सति 'एकवाक्यतापन्नानां सम्भूयैकार्थप्रतिपादकत्वं इति व्युत्पत्त्या[5]तमपेक्षमाणस्य 'यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणान् चतुष्कपालान्निर्वपेत्' [तै. सं. 2-3-12] इति [6]तदुपसंहारस्य [7]तद्विरोधेन प्रतिग्रहीतुरिष्टिरित्येवंरूपार्थबोधकत्वानुपपत्त्या [8]णिजर्थान्तर्भावेन दातुरेवेष्टिरित्येवंरूपार्थबोधकत्वमुपेयते । अनपेक्षत्वे तु स्वप्रमाणानुसारेण लब्धात्मकस्य उत्तरज्ञानस्यैव प्राबल्यम् । यथा बहिष्पवमानार्थं हविर्धानात्

---

1. **विनियोगविध्युपजीव्यस्येति** मन्त्रस्येति शेषः । प्रसिद्धं मन्त्रमादाय तद्विनियोगस्य कार्यत्वात् मन्त्रविध्युपजीव्यत्वं मन्त्रस्येति भावः ।

2. **स्वरसतः**—रूढ्या ।

3. **लक्षणयेति** रूढिभिन्नत्वगुणेन योगोऽत्र लक्षणाशब्देन अभिहितः । योगेनेत्यर्थः । सूक्तस्य ऐन्द्रत्वात् योगाश्रयणं न दोष इति भावः । अर्थवादगतप्रजापतिशब्दस्यापि इदमुपलक्षणम् ।

4. असञ्जातविरोधित्वन्यायेन प्रत्यक्षस्य प्राबल्यं पूर्वपक्षोक्तं निराकरोति—**एवञ्चेति** एवञ्च—प्रत्यक्षप्रामाण्यस्य श्रुत्यनपेक्षितत्वे सिद्धे ।

5. **तमपेक्षमाणस्येति** प्रजापतिरित्याद्युपक्रमवाक्यं तच्छब्दार्थः ।

6. **तदुपसंहारस्येति** अनुपदोक्तेष्टिः तच्छब्दार्थः ।

7. **तद्विरोधेनेति** इष्ट्युपक्रमवाक्यं तच्छब्दार्थः ।

8. **णिजर्थान्तर्भावेन** प्रतिगृह्णातेः 'प्रतिग्राहयेत्' इति अन्तर्भावितणिजर्थपरत्वाश्रयणेन—दानलक्षकत्वेनेति यावत् । इदमेव व्यवधारणकल्पनेत्युच्यते - यत् प्रतिगृह्णातेः प्रतिग्रहविपरीतदानार्थकत्वाश्रयणम् । आ. णिजन्तर्भावेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहिर्निर्गच्छतामाम्नातान्वारम्भाणां विच्छेदे कुतश्चिन्निमित्तात् प्राप्ते प्रायश्चित्तमाम्नायते 'यद्युद्गाताऽपच्छिद्येत अदक्षिणं तं यज्ञं परिसमाप्य पुनर्यजेत तत्र तद्दद्यात् यत् पूर्वस्मिन्[1] दास्यन् स्यात् यदि प्रतिहर्ता सर्ववेदसं दद्यात्' इति। तत्र विरुद्धयोः क्रमेणापच्छेदे कर्तव्यतया प्राप्तयोः समुच्चयासम्भवादन्यतरबाधेऽवश्यं स्वीकर्तव्ये पूर्वनैमित्तिककर्तव्यताज्ञानानपेक्षेण स्वप्रमाणप्राप्तेन उत्तरनैमित्तिककर्तव्यताज्ञानेन पूर्वनैमित्तिककर्तव्यताज्ञानबाध एवाश्रितः। लोके इदं रजतमिति पूर्वज्ञानस्य उत्तरेण 'नेदं रजतं शुक्तिरेव' इति ज्ञानेन बाधदर्शनात्। तथाच उत्तरेण श्रौतात्मज्ञानेन प्रत्यक्षप्रामाण्यज्ञानस्यैव बाधो भविष्यति।

ननु[2] उत्तरज्ञानेन पूर्वज्ञानस्यबाधे नेदमुदाहरणम्। न ह्यत्र पूर्वनैमित्तिककर्तव्यताज्ञानं भ्रमरूपम्। अस्मिन्नपि प्रयोगे पूर्वनैमित्तिककर्तव्यताया उत्पन्नत्वात्। सा तु उत्तरनैमित्तिककर्तव्यतया नाश्यते, बदरे पूर्वोत्पन्ना श्यामतेव उत्तरोत्पन्नया रक्ततया, इति चेत्

न–तत्क्रतुप्रयोगे तदेव कर्तव्यम्, यत् तत्प्रधानोद्देशेन कर्तव्यतया विधीयते। तदेव च प्रयोगविधिना कर्तव्यतया विधीयते, यदङ्गविधिभिः प्रधानोपकारतया विनियुज्यते। न च विरोध्युत्तरनिमित्ताक्रान्ते क्रतौ पूर्वनिमित्तसम्बन्धिनोऽङ्गत्वं बोध्यते विधिना। [3]विचारदशायां नैमित्तिकशास्त्रद्वयं [4]पर्यालोच्य [5]तदर्थयोर्नैमित्तकयोर्विरुद्धयोः क्रमेण सम्पन्नयोःसमुच्चयासम्भवं [6]लौकिकन्यायेन उत्तरेण पूर्वस्य बाध्यत्वं च अनुसन्धाय विरोध्युत्तरनिमित्तरहितक्रतावेवाङ्गत्वबोधे विधेस्तात्पर्य

---

1. मु. पूर्वत्र

2. अनुपदोक्तार्थे न्यायामृतोक्त अपच्छेदन्यायवैषम्यं परिहर्तुं आशङ्कते-**नन्विति**।

3. **विचारदशायामिति** वर्तमानं इति शेषः।

4. **पर्यालोच्येति** पर्यालोच्य अनुसन्धाय तात्पर्यं निर्धार्यते इति सम्बन्धः।

5. **तदर्थयोर्नैमित्तिकयोरित्यादि** नैमित्तिकयोः प्रायश्चित्तयोः समुच्चयासम्भवे हेतुगर्भविशेषणं 'विरुद्धयोः' इति। उत्तरेण पूर्वस्य बाध्यत्वे हेतुगर्भविशेषणं 'क्रमेण संपन्नयोः' इति। संपन्नयोः—प्रतीतयोः।

6. **लौकिकन्यायेन**—शुक्तिरजतज्ञानस्थलीययुक्त्या।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निर्धार्यत इति तादृशप्रयोगे पूर्वस्य नैमित्तिकस्याङ्गत्वाभावे [1]कर्तव्यतापि नास्तीति, विरोध्युत्तरनिमित्तं भविष्यति इति द्रागेव पुरुषैर्निर्णेतुमशक्यतया तद्दोषोपप्लवेन जायमानः पूर्वनैमित्तिककर्तव्यताप्रत्ययो भ्रम एवेति, पश्चात् उत्तरनिमित्तसम्पाते तन्नैमित्तिककर्तव्यताज्ञानेनोत्तरभाविना शास्त्रानुमतेन च पूर्वं बाध्यत इति युक्तमुदाहरणम्। मीमांसकमर्यादामतिलंघयता च वक्तव्यम्—बदरश्यामतोपमितं किं पूर्वनैमित्तिकस्य कर्तव्यत्वम्?। कृतियोग्यत्वं तावत् उत्तरनैमित्तिकेनापि न नाश्यते। कृत्युपहितत्वं तु निष्पन्नमेव न भवति। प्रधानवैकल्यप्रयोजको यदनुष्ठानाभावस्तत्त्वं[2] इति चेन्न। अनुष्ठानाभावस्य वैकल्यप्रयोजकत्वं नाम 'यस्मिन् प्रयोगे पूर्वनैमित्तिकानुष्ठानाभावः सति निमित्ते, तत्र सर्वत्रापि परमापूर्वाजनकत्वं इति [3]व्याप्तिरूपं वक्तव्यम्। तत्र विरोध्युत्तराभावे इति विशेष्यते न वा। यदि विशेष्येत, विरोध्युत्तरनिमित्तवति क्रतौ[4] पूर्वनैमित्तिकस्य, प्रधानवैकल्यप्रयोजको यदनुष्ठानाभावः तत्त्वरूपं [5]कर्तव्यत्वमेव नास्ति। द्वितीये तु नियमभङ्गः। विरोध्युत्तरापच्छेदवति तदनुष्ठानाभावेऽपि वैकल्यस्याभावात्। अथ अङ्गत्वं कर्तव्यत्वमुच्यते, तदपि न। अङ्गत्वं

---

1. **कर्तव्यतापि नास्तीति** 'पूर्वनैमित्तिककर्तव्यताप्रत्ययो भ्रम एव' इत्यनेन सम्बध्यते।

2. **तत्त्वमिति** प्रधानवैकल्यप्रयोजकस्वाननुष्ठानकत्वं इति यावत्।

3. **व्याप्तिरूपं वक्तव्यमिति** अन्यादृशस्य असम्भवात्, अननुष्ठानप्रधानवैकल्ययोर्हि अभावरूपतया जन्यजनकभावो न सम्भवति। नापि व्यापकत्वरूपं सम्भवति। यत्र उद्गातृमात्रापच्छेदवति क्रतौ तत्प्रायश्चित्तं कृतं कारणान्तरात् वैकल्यश्च तत्र प्रधानवैकल्यसत्त्वेऽपि उद्गात्रपच्छेदनिमित्तकप्रायश्चित्ताननुष्ठानाभावेन व्यभिचारात्। तस्मात् व्याप्यत्वरूपं वक्तव्यमिति भावः।

4. क्रतौ वैकल्यप्रयोजकत्वरूपं कर्तव्यत्वमेव नास्ति इति मुद्रिते पाठः। तदनन्वितं इत्यतः प्रकृतव्याख्यात्रा अनुसरिष्यमाणग्रन्थेष्वन्यतमे समानप्रकरणे परिदृश्यमाना आनुपूर्वी अत्र योजिता।

5. **कर्तव्यत्वमेव नास्तीति** केवलस्य नैमित्तिकाननुष्ठानस्य प्रधानवैकल्यव्याप्यत्वं नास्ति। अनुपदं वक्ष्यमाणव्यभिचारात्। किन्तु सनिमित्तत्व-विरोध्युत्तरनिमित्तशून्यत्व-उभयविशिष्टप्रयोगसमवेतस्यैव। तथा च विरोध्युत्तरनिमित्तवत्क्रतुप्रयोगसमवेतस्य पूर्वनैमित्तिकाननुष्ठानस्य प्रधानवैकल्यव्याप्यत्वाभावात् प्रधानवैकल्यव्याप्यस्वाननुष्ठानकत्वरूपं कर्तव्यत्वं पूर्वनैमित्तिकस्य तत्र नास्तीत्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्निपत्योपकारजनकत्वं, आरादुपकारजनकत्वं वा । उभयत्रापि योग्यत्वविवक्षायां तत् उत्तरेण न नाश्यते । फलोपहितत्वं तु नोत्पन्नमेव । न चागमापायिभूतमखण्डं कर्तव्यत्वं नाम धर्मान्तरं कल्प्यत इत्यत्र किञ्चित्प्रमाणमस्ति । तस्मात् न श्यामरक्ततान्यायः प्रकृते उपन्यासार्हः । किं तु शुक्तितत्वज्ञानन्याय एव ।

ननु[1] भवतोऽप्युत्तरज्ञानेन पूर्वज्ञानस्य किंरूपो बाधो विवक्षितः । ध्वंसो वा, स्वरूपतो विषयतश्चाभावो वा । नाद्यः । [2]तस्य विभुविशेषोत्तरगुणमात्रसाधारणस्य द्विक्षणमात्रावस्थायिनां कालसाधारणस्य वा विरोध्युत्तरज्ञानासाधारणत्वानुपपत्तेः[3] । नापि द्वितीयः । लब्धात्मकयोर्ज्ञानविषययोः [4]अभावबोधासम्भवात् । उत्पत्तिप्रतिबन्धस्तु उत्तरज्ञाने असम्भावित एव । न च अप्रामाण्यबोधनं पूर्वज्ञाने उत्तरज्ञानेनैवेति नियमः । प्रतिबिम्बादिभ्रमस्थले [5]वृक्षाणामूर्ध्वाग्रताज्ञानादिना पूर्वेणाप्युत्तरज्ञाने अप्रामाण्यबोधनात् । तस्मात् पूर्वज्ञानाद्व्यावृत्तं विरोध्युत्तरज्ञानासाधारणं बाधकत्वं निर्वक्तव्यमिति चेत्, उच्यते—विषयस्य तात्त्विकत्वाभावबोधनद्वारा पूर्वज्ञानस्याप्रामाण्यबोधनमेव बाधकत्वम् । तच्चोत्सर्गत उत्तरज्ञानस्येति तावन्मात्रेणापच्छेदनयप्रवृत्तिः । यत्र [6]पूर्वज्ञानस्य प्रवृत्तिसंवादः उत्तरज्ञानस्य तद्विसंवादो लोके, वेदे च न्यायतः पूर्वस्यैव प्राबल्यं, तत्र [7]स उत्सर्गः परित्यज्यते । यथा वृक्षाणामूर्ध्वाग्रत्व

---

1. क्रमिकापच्छेदस्थले पूर्वोत्तरनैमित्तिककर्तव्यतयोर्नाश्यनाशकभावः पूर्वपक्ष्यभिमतः, स न सम्भवतीति सिद्धान्तिनोक्ते, सिद्धान्त्यभिमतः पूर्वोत्तरज्ञानयोः बाध्यबाधकभावोऽपि न सम्भवतीति प्रत्यवतिष्ठते पूर्वपक्षी—**ननु भवतोऽपीत्यादिना** । तत्र-स्वबाधकत्वं किं स्वनाशकत्वं किं वा स्वस्वविषयान्यतरत्वावच्छिन्नाभावबोधकत्वं इति विकल्पार्थः । **उत्तरज्ञानेन** उत्तरज्ञानेनैव 'कर्तुं शक्यः' इति शेषः । **अभावः**—त्रैकालिकाभावबोधनम् ।

2. **तस्येत्यादि** इत्थमत्र योजना — विभुविशेषोत्तरगुणमात्रसाधारणस्य कालसाधारणस्य वा द्विक्षणमात्रावस्थायिनां तस्य-ध्वंसकत्वस्य इति । मात्रपदं कात्स्न्यार्थकम्

3. **अनुपपत्तेरिति** इदमुपलक्षणम्—विरोध्युत्तरज्ञानाभावेऽपि पूर्वज्ञानस्य बाधितत्वव्यवहारप्रसङ्ग इत्यपि बोध्यम् ।

4. **अभावेति**—त्रैकालिकाभावेत्यर्थः ।

5. मु. वृक्षाणामुपर्यग्रता

6. मु. पूर्वप्रमाणस्य

7. मु. 'स' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञाने, यथा वा श्रुतिलिङ्गादौ । [1]तत्र च पूर्वज्ञानस्य बाधकत्वं श्रुतिलिङ्गादौ लोके निरुपाधिकभ्रमस्थले च उत्पत्तिप्रतिबन्धः । उत्तरस्य स्वप्रामाण्यबोधकत्वमेव । सोपाधिकभ्रमस्थले पूर्वस्यापि तथैव । वेदान्तवाक्यानां च उत्तरत्वेन [2]स्मृतिन्यायाभ्यां प्राबल्येन च लौकिकप्रमाणबाधकत्वमास्थेयम् ।

[3]उक्तगत्या व्यावहारिकत्वेन सावकाशस्य प्रामाण्यज्ञानस्य न सावकाशनिरवकाशन्यायविषयता । अस्तु वा निरवकाशता । तथापि स्थूलोऽहमित्यादिभ्रमेषु प्रामाण्यावगाहिन इव कर्त्रादिज्ञाने प्रामाण्यावगाहिनोऽपि न क्वचिदप्यवकाशः कल्पनीयः । [4]विशेषशास्त्रोपदेशापर्यालोचनामूलस्य तद्विषयेऽपि सामान्यशास्त्रातिदेशाभ्यां जनितस्य ज्ञानस्य हि न कश्चिदपि प्रवृत्तिसंवादी विषयः कल्प्यते [5]प्रातिभासिकत्वोपपत्तेरिति । तद्वत् [6]प्रकृतेऽपि ।

यच्च—स्थूलोऽहमित्यादिभ्रमोऽसम्प्रतिपन्नः, भेदस्य गृहीतत्वादिति । तत्र ममशरीरंममचक्षुरित्यादिरूपेण भेदग्रहः न स्थूलोऽहमित्यादिरूपस्याभेदग्रहस्य विरोधी ।

---

1. मु. तत्र ज्ञानस्य

2. **स्मृतिन्यायाभ्यां**—'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्' इति स्मृतिः । 'उपजीव्योपजीवकयोः अनुपदेशोपदेशत्वे विपरीतं बलाबलम्' 'तात्पर्यवद्वाक्यं इतरापेक्षया प्रबलम्' इति च न्यायः ।

3. निरवकाशत्वेन प्रत्यक्षस्य प्राबल्यं पूर्वपक्षोक्तं निराकरोति—**उक्तगत्येति** । उक्तगत्या - पूर्वपक्षनिरूपणावसरोक्तप्रकारेण । व्यावहारिकत्वेन—व्यावहारिकप्रामाण्यविषयकत्वेन । न च अद्वैतिपरिकल्पितताया निर्मूलाया एतत्परिभाषाया वस्तुव्यवस्थापकत्वासंभव उक्त इति शङ्क्यम् । जात्या, उपदेशत्वात्, परत्वात्, तात्पर्यवत्वाच्च, प्रबलया अद्वैतश्रुत्या प्रत्यक्षबाधस्य व्यवस्थापितत्वेन बाधितस्यापि तस्य ज्ञानत्वेन निर्विषयत्वायोगात् उचितविषयसमर्पणेन शुक्तिरूप्यादिबुद्धिवत् अनुग्राह्यतया 'सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यम्' सत्यश्चानृतश्च सत्यमभवत्' इत्यादिश्रुत्यवलम्बेन यावद्ब्रह्मज्ञानाबाध्यविषयसमर्पणात् तथाभूतविषयकत्वस्यैव व्यावहारिकप्रामाण्यमितिव्यपदेशात् तस्य च उक्तोपपत्तिसहितश्रुतिमूलत्वेन निर्मूलत्वाभावात् ।

4. विशेषशास्त्रापवादाप

5. **प्रातिभासिकत्वोपपत्तेः** — भ्रमत्वोपपत्तेः ।

6. **प्रकृतेऽपि**—कर्त्रात्मज्ञानप्रामाण्यज्ञानेऽपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रूपान्तरेण भेदग्रहस्य रूपान्तरेणाभेदग्रहापरिपन्थित्वात् । चैत्रमैत्रयोः [1]स्वरूपतो [2]भेदेन गृहीतयोरपि [3]व्यत्यासेन भ्रमविषयत्वदर्शनात् ।

अपि चायं सम्बन्धग्रहः, न साक्षात् भेदग्रहः । स च 'स्थूलस्य शरीरं' 'घटस्य स्वरूपं' इत्यभेदेऽपि दृश्यत इति कथं ततो भेदनिश्चयः । न च द्वाभ्यां शरीराभ्यां बाल्यवार्द्धकयोरेकत्वेन प्रत्यभिज्ञारूपात् भेदकसाक्षात्कारात् आत्मनि भेदो गृह्यत इति वाच्यम् । परिणामवादे ह्यवयवोपचयापचयाभ्यां न शरीरभेदः । एकस्यैव शरीरस्य अपचयो नाम अवयवविश्लेषावस्था उपचयस्त्ववयवान्तरसंश्लेषावस्थेत्यवस्थाद्वयानुयायितया शरीरस्यैव 'य एवाहं बाल्ये पितरावन्वभूवं स एवाहं स्थाविरे प्रणप्तॄननुभवामि' इति प्रत्यभिज्ञाविषयत्वोपपत्तेः । न च अनुभवितृत्वावगाहिन्याः प्रत्यभिज्ञायाः न शरीरविषयत्वं सम्भवति तथा चानुभवितृत्वमेव भेदकमस्त्विति - शंक्यम् । तदपि हि 'य एवाहं बाल्ये पुष्टः पितरावन्वभूवं स एव स्थाविरे कृशः प्रणप्तॄननुभवामि' इति पुष्टत्वादिशरीरधर्मसामानाधिकरण्येनानुभूयते । अत एव आरम्भवादे शरीरभेदे सत्यपि न प्रत्यभिज्ञया एक आत्मा सिध्यति अवस्थाद्वयानुयायी । 'य एवाहं कृशः स एव स्थूलः' इति [4]शरीरेऽपि प्रत्यभिज्ञादर्शनात् तथा 'सत्यपि भेदे आत्मनि प्रत्यभिज्ञा' इति [5]शङ्कासमुन्मेषात् ।

'य एवाहं स्वप्ने देवः स एव मनुष्यः' इति प्रतीतिस्तु 'यदेव रजतं सैव शुक्तिः' इतिवत्[6] स्वप्नशरीरस्य मिथ्यात्वेन सर्वसम्प्रतिपन्नतया 'बाधायां सामाना-

---

1. **स्वरूपतो भेदेन गृहीतयोः** — 'अयमस्माद्भिन्नः' इति ज्ञातयोः ।
2. मु. भेदे गृहीते तयोरपि
3. **व्यत्यासेन**—चैत्रे मैत्र इति मैत्रे चैत्र इति ।
4. **शरीरेऽपीति**—परिणामभेदेन भिन्ने इत्यादिः ।
5. मु. शङ्का समुन्मिषेत्
6. **इतिवत्**—इत्याकारकप्रतीतिरिव बाधायां सामानाधिकरण्यावगाहिनी-इति सम्बन्धः । बाधायां सामानाधिकरण्यावगाहिनी—बाधा-भ्रमप्रतीतस्य वस्तुनोऽभावः, तन्निष्ठं यत् सामानाधिकरण्यं-अधिष्ठानतादात्म्यं तद्विषयिणी 'देवशरीरत्वाभाववान् मनुष्यशरीरोऽहं' इति । "न तु देवशरीरोऽहं मनुष्यशरीरः" इति शरीरद्वयानुयाय्यात्मैक्यविषयिणी । एवञ्च **स्थायितया**—उक्तैक्यरूपस्थायित्वहेतुकः यः आत्मनि देहाद्भेदनिर्णयः तत्र भेदकसाक्षात्कारविधया न उपयोगिनी इत्यर्थः । उक्तप्रतीतेः ऐक्यविषयकत्वसंशयेन ऐक्यस्य संशयात् भेदस्यापि संशय इति न भेदनिर्णयः सम्भवतीति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धिकरण्यावगाहिनी' इतिशङ्काकलङ्किता न स्थायितया देहादात्मनि भेदनिर्णयोपयोगिनी ।

बहुत्वेन गृहीतानां देहेन्द्रियाणां एकस्मिन्नात्मन्यभेदभ्रमोऽपि न विरुद्धः । रूपान्तरेण वैलक्षण्यग्रहस्य रूपान्तरेणाभेदभ्रमाविरोधित्वादेव । यथा अधीयानानधीयानयोश्चैत्रमैत्रयोस्समीपस्थिते [1]देवदत्ते 'अधीयानो मैत्रः' इति [2]द्वयोरेकस्मिन्नभेदारोपः एवमेकस्मिन्नात्मनि बहूनां देहेन्द्रियाणामारोपोपपत्तेः ।

भेदकसाक्षात्कारश्च दोषविशेषे न भ्रमविरोधी । शङ्खत्वसाक्षात्कारेऽपि पीतिमभ्रमदर्शनात् । एवं जीवन्मुक्तानामपि प्रारब्धदोषविशेषात् सम्भावितो 'मनुष्योऽहं' इति भ्रमः पामराणामपि नास्तीति साहसमात्रम् । चार्वाकव्यतिरिक्तानां च सर्वेषामपि एतस्य भ्रमत्वे न विप्रतिपत्तिः ।

ततश्च [3]बहुषु प्रदेशेषु दृष्टाप्रामाण्यस्याहंप्रत्ययस्य कर्तृत्वाद्यंशेऽप्यप्रामाण्यसम्भवात् तत्र प्रामाण्यज्ञानस्य न क्वाप्यवकाशः कल्पनीयः । ततश्च श्रुत्यनुसारेण 'अहं कर्ता अहं भोक्ता' इति प्रत्यक्षस्य औपाधिकत्वे सिद्धे तत्र 'मम मनः कामयते' इति प्रत्यक्षसिद्धः 'कामस्सङ्कल्पः' इत्यादिश्रुतिसिद्धश्च मनोरूप उपाधिः सम्भवति । तत् सिद्धं श्रुतितदन्यप्रमाणयोर्विरोधे प्रमाणान्तरस्यान्यथानयनम् ।

कथं तर्हि 'सोमेन यजेत' इत्यादिषु सोमादिपदानां लक्षणा ।

उच्यते—तात्पर्यविषये श्रुतेः प्रमाणान्तरेण नान्यथाकरणम् । 'सोमेन यजेत इत्यत्र विशिष्टभावनैव[4] तात्पर्यविषयः । तस्याश्च सोमयागसंसर्गघटितत्वात् तात्पर्याविषयीभूतोऽपि स प्रतीयते । तथा च करणीभूतयागेन समानपदोपात्तेन [5]अवरुद्धायां भावनायां करणतया पदान्तरोपात्तस्य सोमस्य पार्थक्येनान्वयासम्भवात्,

---

1. **देवदत्ते इति** । दृश्यमानेन रूपेण चैत्रमैत्राभ्यां भेदग्रहे सत्यपि इति शेषः ।

2. **द्वयोरिति** । अधीयानत्वमैत्रत्वाकारेण चैत्रमैत्रयोः इत्यादिः ।

3. मु. बहुष्वपि

4. **विशिष्टभावनैवेति**—वाक्यान्तरविहितयागानुवादेन गुणविध्यादेः शास्त्रे निराकृतत्वात् इति भावः ।

5. **अवरुद्धायां**—निवृत्तकरणाकाङ्क्षायाम ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh. BVBSSMV

यागभाव्यकभावनामध्याहृत्य तस्यां सोमस्य करणतया 'सोमेन भावयित्वा यजेत' इतिप्रकारेण वचनव्यक्तिकल्पने अध्याहारविरुद्धत्रिकद्वयापत्तिदोषाभ्यां, यजिसामानाधिकरण्येन [1]वाक्यभेदपरिहाराय अन्वये वक्तव्ये अभेदस्य तात्पर्याविषयीभूतस्य प्रत्यक्षबाधिततया प्रत्यक्षसिद्धसाध्यसाधनभाव एव वक्तव्य इति तत्र [2]मत्वर्थलक्षणा । 'आदित्यो यूपः' इत्यादौ च स्तुतिविशिष्टवाक्यार्थ एव तात्पर्यं न मुख्यसंसर्ग इति तत्र प्रत्यक्षानुसारः । तात्पर्याविषयस्यापि यथा शब्दात् प्रत्ययः तथा देवताधिकरणे वर्णयिष्यते । तत्त्वमसीतिवाक्ये च निर्विशेष एव तात्पर्यमिति तदर्थमेव भागत्यागलक्षणाश्रयणं न प्रत्यक्षानुरोधाय ।

ननु—कृष्णलं श्रपयेदित्यत्र प्रकृतितः प्राप्तस्य द्वारलोपान्निवर्तमानस्य पाकस्यैव प्रतिप्रसवविधिरिति तस्यैव तात्पर्यविषयता स्वरसतोऽवगम्यते । तत्र कथं प्रत्यक्षानुरोधेन उष्णीकरणे लक्षणाश्रयणे तात्पर्यविषये श्रुतेः प्राबल्यं इति नियमनिर्वाहः

उच्यते—तात्पर्यविषये श्रुतेः प्राबल्यं इत्युत्सर्गः । स तु 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलं' इति नीत्या क्वचित् प्रत्यक्षस्यात्यन्तागतिकत्वे परित्यज्यते । तत्र हि [3]विक्लत्त्यभावः प्रवृत्तिसंवादी न प्रातिभासिकः । किं तु व्यावहारिकः । तत्र पाकोऽपि यदि व्यावहारिकः कल्प्येत, तदा समानसत्ताकयोर्विरोध इति प्रपञ्चतदभावन्यायेन सत्ताभेदं परिकल्प्य तात्त्विके पाके स्वीकृते अद्वैतावबोधकप्रबलानेकवाक्यविरोधः । तत्स्वीकारेऽपि तदप्रत्यक्षत्वनिर्वाहाय तस्यावृतत्वेन [4]व्यवहाराविषयत्वं वक्तव्यम् । तथा च तद्बोधने वाक्यवैयर्थ्यमपि स्यात् । प्रातिभासिकत्वे

---

1. **वाक्यभेदपरिहाराय यजिसामानाधिकरण्येन अन्वये वक्तव्ये**—इत्यन्वयः 'सोमेन यागं भावयेत्' 'यागेन स्वर्गं भावयेत्' इति वचनव्यक्तिकल्पने प्रसज्ज्यमानस्य विध्यावृत्तिलक्षणवाक्यभेदस्य परिहारायेत्यर्थः ॥

2. **मत्वर्थलक्षणेति** तथासति मत्वर्थघटकसम्बन्धस्य साध्यसाधनभावरूपत्वेन न प्रत्यक्षविरोध इति भावः ।

3. **विक्लत्त्यभाव इति**—पाकार्थकश्राधातोः विक्लत्तिरर्थः । 'पचेर्हि विक्लत्तिः प्रधानार्थः' इति महाभाष्योक्तेः । विक्लत्तिर्नाम पूर्वरूपरसनाशपूर्वकः रूपरसान्तरप्राप्तिः, तदभावः इत्यर्थः ।

4. **व्यवहाराविषयत्वमिति**—अभिज्ञाऽभिवदनादिरूपव्यवहारायोग्यत्वमित्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्योन्यस्मिन् अन्योन्यात्मकतां अन्योन्यधर्मांश्च अध्यस्य इतरेतराविवेकेन अत्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते

तु शुक्तिरजतादिवदपरोक्षः[1] स्यादिति प्रत्यक्षस्य [2]अत्यन्तागतिकत्वपरिहाराय वाक्यवैयर्थ्यपरिहाराय च उष्णीकरणे लक्षणा ।

तस्मात् प्रबलस्य प्रमाणस्य सति सम्भवे दुर्बलप्रमाणानुसारेणान्यथानयनायोगात् अद्वैतात्मबोधकत्वे न काचिदनुपपत्तिः श्रुतेरिति विषयसम्भवेन तत्प्रतीतिद्वारा मोक्षरूपस्य प्रयोजनस्यापि सम्भवात् आरम्भणीयं शास्त्रम् ।

ननु आरम्भणाधिकरणे, शास्त्रस्य प्राबल्यं तदनुसारेण प्रत्यक्षनयनं इत्येतत् सर्वं व्यवस्थापयिष्यते, पुनः किमर्थं इह तन्निरूपणम्

उच्यते—वक्ष्यमाण एवार्थश्शास्त्रारम्भोपयोगितया इह [3]स्मारितः । [4]अथवा बहुशो दृष्टाप्रामाण्येन प्रत्यक्षेण आत्मनि कर्तृत्वादिकं सत्यमेवेति न विस्रम्भणीयम्, अपि तु श्रुतिर्यादृशमात्मतत्त्वं बोधयति तथैव स्वीकर्त्तव्यमिति [5]प्रतिपादनाय । एवं तत्त्वावेदकत्वात् प्रच्युतस्य व्यावहारिकत्वेन [6]कार्योपयोगिता तत्र प्रतिपादनीया ।

अक्षरार्थस्तु—**अन्योन्यात्मकतामध्यस्य अहमिदमिति व्यवहारः, अन्योन्यधर्मांश्चाध्यस्य ममेदमिति व्यवहारः** इति योजना । अहमिदमित्यनेन

---

1. **अपरोक्षः स्यादिति**—न च शाब्दपरोक्षत्वेऽपि भ्रमानुमितिविषयस्येव प्रातिभासिकत्वं सम्भवतीति शङ्क्यम् । अपौरुषेयशब्दात्मकश्रुतिबोध्यत्वे प्रातिभासिकत्वस्यैवासम्भवात् । अनिषेध्यत्वेन साक्षात् श्रुतिजन्यबोधविषयस्य अप्रातिभासिकत्वव्याप्तेः ।

2. **अत्यन्तेत्यादि**—अत्यन्तागतिकत्वं-निर्विषयत्वं, तत्परिहाराय पाकस्य तात्त्वकत्वाङ्गीकारे वाक्यवैयर्थ्यम्, शुद्धब्रह्मान्यस्य व्यवहाराविषयस्य बोधनेन प्रयोजनाभावात् । वाक्यावैयर्थ्याय व्यावहारिकत्वाङ्गीकारे व्यावहारिकपाकाभावप्रत्यक्षस्य निर्विषयत्वम् । व्यवहारविसंवादेन पाकस्य व्यावहारिकत्वानुपपत्तिश्च । न च पाकाभावस्तात्त्विकः । शुद्धब्रह्मान्यत्वे अद्वैतहानेः । शुद्धब्रह्मानन्यत्वे व्यवहारदशायां तदप्रत्यक्षत्वापत्तेः ।

3. **स्मारित इति**—भाष्यकृद्भिरित्यादिः । पञ्चपादिकामनुसृत्येदम् ।

4. भामतीमनुसृत्याह—**अथवेति** । यद्यपि भामत्यां इह व्यावहारिकत्वेन बोध्यम् । निर्वाहः कृतः, अस्मिंश्चग्रन्थे, तथापि श्रोतृबुद्धिसौकर्यार्थं तत्सिद्धस्यैवात्रानुवादः इति

5. मु. प्रतिपादनायैव । तत्त्वा०

6. **कार्योपयोगितेति** सर्वप्रपञ्चसाधारण्येन इति शेषः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मिथुनीकृत्य 'अहमिदं' 'ममेदं' इति नैसर्गिकोऽयं लोकव्यवहारः ।

मनुष्योऽहमितिशब्दाभिलापरूपो व्यवहारः इतिशब्देन प्रवृत्तिनिवृत्त्यादिरूपश्च विवक्षितः । ममेदमित्यनेन 'मम सुखं' 'मम रूपं' इत्येवं शब्दाभिलापरूपो व्यवहारः इतिशब्देन प्रवृत्त्यादिरूपश्च विवक्षितः । व्यवहारपर्यन्तानुधावनं अध्यासाभावे व्यवहारो न स्यादिति उपपत्तिसूचनाय । न चायं गौणः । मुख्यत्वस्य तत्र सर्वानुभवसिद्धत्वात् । नाप्ययं परम्परासम्बन्धेन आत्मनि मनुष्यत्वावगाही । उत्सर्गप्राप्तस्य साक्षात्सम्बन्धस्य परित्यागानौचित्यात्, साक्षात्सम्बन्धावगाहित्वानुभवाच्च । न च विवेकिनां साक्षात्सम्बन्धस्य बाधितत्वात् परम्परासम्बन्धविषयत्वं स्वीकर्तव्यमिति वाच्यम् । तेषामपि प्रारब्धादिदोषवशेन तादात्म्याध्यासानुवृत्तौ तन्मूले साक्षात्सम्बन्धावगाहिनि व्यवहारे बाधकाभावात् । विवेकमूलकस्तु 'नाहं मनुष्यो न च देवयक्षो भिक्षुश्च नाहं निजबोधरूपः' इत्येव । विदुषामपि लौकिकव्यवहारे लोकसाम्यं भाष्यकार एव वक्ष्यति 'पश्वादिभिश्चाविशेषात्' इति । लोकानां[1]व्यवहारः लोकव्यवहारः । अध्यासव्यवहारक्रिययोः लोकससमानः कर्तेति क्त्वाप्रत्ययः । अध्यासे निमित्तमाह—**इतरेतराविवेकेनेति** । ममशरीरमिति विवेके सत्यपि 'नाहं मनुष्यः' इत्येवंरूपस्य अपरोक्षस्य विवेकस्याभावात् अध्यास उपपद्यत इति तात्पर्यम् । चार्वाकनिराकरणार्थम्—**अत्यन्तविविक्तयोर्धर्मधर्मिणोरिति** । धर्मिणोर्विवेकः तादात्म्याभावः । धर्माणां विवेकः संसर्गाभावः । ननु—इतरेतराविवेकशब्दोदितो भेदाग्रहो धर्म्यारोप्योपस्थितिकालिक एवाध्यासहेतुः,[2] अध्यासप्राचीना चोपस्थितिः [3]प्रमारूपैव वक्तव्या, सा च अद्वैतवादिनो न सम्भवतीति, अत उक्तम्—**सत्यानृते मिथुनीकृत्येति** । प्रमारूपैवोपस्थितिरुपयुज्यत इति न नियमः, अप्रयोजकत्वात्—इति आरोप्यसमर्पकेणानृतशब्देन सूचितम् । मिथुनीकरणं उपस्थितिविषयत्वम् । ननु—नाप्रयोजकत्वम् । अध्यासप्राचीनोपस्थितेरपि भ्रमत्वाङ्गीकारे साऽप्युपस्थितिर्भ्रममूलेति पूर्वपूर्वभ्रमानवस्थितिस्स्यात् । न च प्रवाहानादित्वान्नदोषः । प्रलये प्रवाहविच्छेदेन तथा कल्पनायोगात् । न च तदापि पूर्वकल्पीयाध्याससंस्कारसत्त्वात् नानु-

---

1. **लोकानां**—अविवेकिनाम् । लोक इति व्यवहारः इति **पञ्चपादिका** ।
2. **अध्यासहेतुरिति**—तथैव अन्वयव्यतिरेकदर्शनात् इति भावः ।
3. **प्रमारूपैवेति**—शुक्तिरजतभ्रमस्थले तथैव दर्शनात् इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पपत्तिरिति शङ्क्यम् । तथासति क्वचित् संस्कारः क्वचिदध्यास इति वैरूप्यापत्तेः— इत्यत आह—**नैसर्गिक इति** । व्यवहारनैसर्गिकत्वोक्त्या तत्कारणस्याध्यासस्य [1]नैसर्गिकत्वमाक्षिप्तमिति प्रकृतशङ्कानिराकरणलाभः । सर्वत्रापि पूर्वपूर्वाध्याससंस्कार-सचिवात् भेदाग्रहात् उत्तरोत्तराध्यास इति न वैरूप्यमिति भावः ।

नैसर्गिकत्वं अनादित्वं, तत् प्रवाहान्तर्गतव्यक्तीनां न सम्भवति । जन्य-त्वात् । नापि प्रवाहस्य । तस्य क्रमिकोत्पत्तिशालिव्यक्तिव्यतिरेकाभावात् । तत् कथं नैसर्गिकत्वम्? उच्यते—द्विविधमनादित्वं स्वरूपेण प्रवाहतश्च । आद्यं अजन्या-नामेव । द्वितीयं तु जन्यानाम् । [2]तच्च द्वयोर्व्यक्त्योर्मध्ये अन्यतरव्यक्तिगतजातियुक्त-व्यक्तिं विना पूर्वकालस्यावर्तनम् । अस्तिच अध्याससंस्कारव्यक्त्योर्मध्ये अन्यतर-व्यक्तिजातीयया कयाचित् व्यक्त्या पूर्वकालस्यापि युक्तता । [3]ननु प्रलये निराश्रयः

---

1. **नैसर्गिकत्वमाक्षिप्तमिति**—एतेन 'नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यस्य 'नैसर्गिकोऽध्यासः' इत्युपसंहारभाष्येण विरोधपरिहारलाभोऽपि सूचितः । आक्षिप्ताध्यासनैसर्गिकत्वोपसंहाररूपत्वसम्भवात् । अत्र व्यवहारनैसर्गिकत्वोक्तिस्तु अध्याससद्भावे तन्नैसर्गिकत्वे च उपपत्तिसूचनाय ।

2. **तच्चेत्यादि** स्वपूर्वकालत्वव्यापकस्वसजातीयकत्वमिति यावत् । स्वसजाती-यत्वञ्च प्रकृते स्वस्वीयसंस्कारान्यतरमात्रगतजातिमत्त्वं विवक्षितम् ।

3. **अत्रेदमवधेयम्**—भुक्त्वा व्रजतीतिवत् क्रियान्तरानुपादानं, अध्यस्य नैस-र्गिकोऽयं लोकव्यवहारः इति स्वरूपमात्रपर्यवसानं, मिथुनीकृत्येति पदस्वारस्यं, 'नैसर्गि-कोऽध्यासः' इति उपसंहारभाष्यस्वारस्यं च अनुसृत्य अध्यासमिथुनीकरणलोकव्यवहा-राणां एकार्थता वर्णिता **पञ्चपादिकाप्रस्थाने** ।

शङ्काविशेषनिराकरणरूपफलविशेषलाभेन सार्थक्यं अभिप्रेत्य एकार्थत्वोपपत्तीनां गतिवर्णनपुरःसरं भिन्नार्थता वर्णिता **भामतीप्रस्थाने** ।

इयञ्च व्याख्या भामतीप्रस्थानमनुसृत्य प्रवृत्ता । परन्तु कल्पतरुकृद्भिः स्वातन्त्र्येण कृतस्य परिमले उपपादितस्य शङ्काविशेषपरिहारस्य भाष्यपदेनैव लाभं सम्पादयितुं 'मिथ्याज्ञाननिमित्तः' इति पदं तच्छङ्काविशेषनिराकरणपरतया अवतारयति, वर्णयति च पञ्चपादिकाप्रस्थानरीत्या तत्पदस्य अर्थं—**ननु प्रलये इत्यादिना** । मिथ्या च तत् अज्ञानं च मिथ्याऽज्ञानं, तत् निमित्तं-उपादानं यस्य सः—मिथ्याऽज्ञाननिमित्तः । भामत्यभिमतस्य मिथ्याभूतं यत् ज्ञानं-अध्यासः तद्धेतुकत्वस्य लोकव्यवहारे 'अध्यस्य लोकव्यवहारः' इति क्त्वाप्रत्ययेन अध्यासस्य पूर्वकालीनत्वोक्त्यैव लाभात् स्पष्टीकर-णस्य च प्रयोजनविशेषाभावात् पुनरुक्तिः स्यादित्यतोहेतोः अत्र भामतीप्रस्थानं नानुसृतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संस्कारो नोपपद्यते । न चान्तःकरणादिकं तदाश्रयः । तेषां सर्गश्रवणेन तदानीमसत्त्वावगमात् । नाप्यात्मा । उपाधिव्यतिरेकेण शुद्धस्य तदाश्रयत्वायोगात्, इत्यत उक्तम्—**मिथ्याज्ञाननिमित्त इति** । अनृताज्ञाननिबन्धन इत्यर्थः । व्यवहारोपादानत्वं च संस्काराध्यासद्वारा विवक्षितमज्ञानस्य । तथा च प्रलये अज्ञानस्य तदुपहितचैतन्यस्य च सत्त्वात् न आश्रयानुपपत्तिरिति भावः । सत्यानृते मिथुनीकृत्य अत्यन्तविविक्तयोर्धर्मधर्मिणोरितरेतराविवेकेन अन्योन्यस्मिन् अन्योन्यात्मकतां अन्योन्यधर्मांश्चाध्यस्य मिथ्याज्ञाननिमित्तो नैसर्गिकः अहमिदंममेदमिति लोकव्यवहारः—इति भाष्ये योजना ।

[1]सत्यानृते मिथुनीकृत्येत्यनेन अन्तःकरणादेर्मिथ्याभूतस्यापि पूर्वपूर्वाध्यासविषयत्वमुक्तम् । तन्न सम्भवति, असतोऽनृतस्य प्रतीत्ययोगात् । ननु—देहेन्द्रियादयो नात्यन्तमसन्तः, किन्तु अनिर्वचनीयाः । [2]ते च सदसद्विलक्षणाः, अतो न प्रतीत्यनुपपत्तिः इति चेत्, न—पदार्थानां सदसद्विलक्षणत्वायोगात् । सद्विलक्षणत्वं ह्यसतः असद्विलक्षणत्वं च सतः । एवं च यथा सदसत्त्वं एकस्य विरुद्धत्वान्नाङ्गीक्रियते एवमुभयविलक्षणत्वमपि विरोधादेव नाङ्गीकरणीयम् । तस्मात् सर्वं सदेव, भासमानत्वात्, आत्मवत् । न च शुक्तिरजतादौ व्यभिचारः, [3]तेषामपि सत्त्वाभ्युपगमात् ।

---

1. **सत्यानृते मिथुनीकृत्येत्यनेनेत्यादिना** 'आह कोऽयं' इत्यादिभाष्यमवतारयति । इदमवतरणं भामत्यनुसारेण । आत्मानात्मनोः भेदनिश्चयात् शास्त्रारम्भोपयोगिविषयप्रयोजनसिद्धिहेत्वध्यासाक्षेपे तस्य समाधानं कृतं 'लोकव्यवहारः' इत्यन्तेन भाष्येण । 'आरोप्यस्यानृतस्य प्रतीतिरेवायुक्ता' इति पुनरप्यध्यासाक्षेपे तत्समाधानपरं 'आह कोऽयं' इत्यादिभाष्यं 'कथं पुनः प्रत्यगात्मनि' इत्यतः प्राक्तनम् । 'कथं पुनः' इत्यादि 'तमेतमविद्याख्यं' इत्यतः प्राक्तनं भाष्यं, आत्मनोऽधिष्ठानत्वानुपपत्त्या पुनरप्यध्यासाक्षेपे तत्समाधानपरम् । ततः प्रभृति 'सर्वलोकप्रत्यक्षः' इत्यन्तं अध्यासस्य व्यवहारसामान्यहेतुत्वोपपादनेन दृढीकरणपरं अनर्थहेतुताप्रदर्शनपरञ्च—इति **भामतीव्याख्याप्रकारः** ।

निरूपयितव्योऽध्यासः 'लोकव्यवहारः' इत्यन्तेन भाष्येण स्वरूपतो निरूपितः । 'आह कोऽयं' इत्यादि 'कथं पुनः प्रत्यगात्मनि' इत्यन्तं अध्यासलक्षणप्रदर्शनपरम् । तदादि 'तमेतं अविद्याख्यं' इत्यतः प्राक्तनं अध्याससम्भावनाप्रदर्शनपरम् । तदादि 'सर्वलोकप्रत्यक्षः' इत्यन्तं अध्यासे प्रत्यक्षानुमानार्थापत्त्यागमाख्यप्रमाणप्रदर्शनपरम्—इति **पञ्चपादिकाव्याख्याप्रकारः** ।

2. मु. तेच नास्ति

3. आ. तस्यापि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आह—कोऽयमध्यासो नामेति । उच्यते—स्मृतिरूपः परत्र पूर्वदृष्टावभासः ।

[1]इदन्त्वेन भासमानं हि वस्तु द्व्यात्मकं शुक्त्यवयवैरजतावयवैश्चारब्धं शुक्तित्वरजतत्वधर्मशालि । तच्च दोषाभावदशायां शुक्तित्वेन प्रतीयते, रजतत्वेन न प्रतीयते । शुक्तित्वज्ञानेन प्रतिबन्धात् । तत्रापि शुक्त्यवयवानां भूयस्त्वम्, अल्पत्वं रजतावयवानाम् । अतो लोके शुक्तिरित्येव व्यवहारः । दोषेण च शुक्तित्वज्ञाने प्रतिबद्धे [2]रजतत्वेन प्रतीयते । दोषापगमे शुक्तित्वज्ञानेन रजतव्यवहाराभाव एव बाध इत्युच्यते । एवं मरुमरीचिषु तोयभ्रमेऽपि द्रष्टव्यम् । अतो नाध्याससम्भवः—इत्यभिप्रायेणाक्षिपति–आह **कोऽयमिति** ।

परिहरति—**स्मृतिरूप इति** । ननु आक्षेपमपरिहृत्य लक्षणकथनमसङ्गतम् । न च लक्षणकथनेनैव तद्गतैः पदैः आक्षेपसमाधानं लभ्यत इति पृथक्तदकरणमिति वाच्यम् । तादृशपदानुपलम्भात् । [3]लक्षणत्वमप्येतस्य न सम्भवति । स्मृतिरूपत्वं हि यद्यपि [4]इदंरजतमित्यनुभवानन्तरं जायमानायां [5]स्मृतावस्ति, तथापि [6]परत्रेतिपदं न सम्भवति । तथा अनुभवरूपेषु भ्रमेषु स्मृतिरूपपदवल्लक्षणमसम्भवि ।

---

1. विशिष्टाद्वैत्यभिमतं सत्ख्यातिवादं उपस्थापयति—**इदन्त्वेनेत्यादिना** । यद्यप्यस्मिन् भाष्ये 'आह—कोऽयमध्यासो नाम' इत्याक्षेपः अर्वाचीनाभिमतसत्ख्यातिवादाभिप्राय इति वक्तुं न युक्तम्, तथाऽपि अत्र भाष्ये पूर्वपक्षत्वेन सामान्यतः सूचितः सत्ख्यातिवाद एव अर्वाचीनैर्मतान्तरस्थैः प्रक्रियाविशेषरचनया सिद्धान्तत्वेनाश्रितः-इत्यभिप्रायेण अर्वाचीनोक्तमपि अत्र अवतारिकायां योजितम् । यतः 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति समाधानभाष्यार्थनिरूपणे अर्वाचीनप्रक्रियाया अप्यनवकाशो भवति ।

2. मु. रजतत्वेनैव

3. भाष्ये उत्तरत्र 'अध्यासो नाम अतस्मिन् तद्बुद्धिरित्यवोचाम' इति अध्यासलक्षणं स्मार्यते । तदनुसारं 'स्मृतिरूपः' इत्यादि लक्षणवाक्यं तादृशलक्षणार्थकतया व्याख्यातुं यथाश्रुतार्थे अनुपपत्तीः प्रकटयति— **लक्षणत्वमपीत्यादिना** । न च अत्रापि 'अतस्मिन् तदबुद्धिः' इत्येव लक्षणवाक्यं युक्तमिति वाच्यम् । अख्यातिवादसत्ख्यातिवादयोः निराकरणयुक्तेः स्पष्टत्वाय शब्दान्तरेणोक्तेः अभिमतत्वात् । यत् भामत्यां यथाश्रुतार्थमादाय सर्वत्र लक्ष्ये लक्षणसमन्वयनिर्वहणं कृतं तत् परमतानुसारेण ।

4. **इदं रजतमित्यनुभवेति** शुक्तौ इत्यादिः ।

5. मु. स्मृतौ त्वस्ति

6. **परत्रेतिपदं**-परत्रेति पदार्थः । परत्रेतिपदार्थघटितं लक्षणं इति यावत् । एवं 'स्मृतिरूपपदवत्' इत्यस्याप्यर्थो बोध्यः । **न सम्भवतीति शुक्तौ रूप्यभ्रमजन्यस्मृतौ यत्रानुभूतं तत्रैव भानात् इति भावः** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किं च परत्रेतिपदेन यदि पूर्वदृष्टदेशादन्यदेशत्वं विवक्षितं, तदा अहङ्काराद्यध्यासेष्वव्याप्तिः। यस्मिन्नेव साक्षिणि पूर्वं दृष्टा अहङ्कारादयः तत्रैवाध्यासात्। यदि सत्ये इत्यर्थः, तदा जडे आत्माध्यासस्य [1]अन्योन्याध्यासमतेऽभ्युपगमात् तत्राव्याप्तिः। जडस्यानृततया 'सत्ये पूर्वदृष्टावभासः' इति लक्षणासङ्गतेः।

पूर्वदृष्टत्वं चाव्यापकम्[2]। शुक्तिरजतादेरपूर्वस्यैवाभ्युपगमात्। एवं पीतशङ्खविभ्रमेऽपि। [3]ननु 'पीतःशङ्खः' इति न शुक्तिरजतभ्रमवत् अपूर्ववस्तुविषयको भ्रमः, किं तु नायनरश्मिगतस्य पित्तद्रव्यस्य रश्मिभिस्सह शङ्खे संसृष्टस्य यः पीतिमा [4]साक्षात्सम्बन्धेन तद्विषयकः, तस्य च आरोपात् [5]पूर्वं दर्शनं सम्भवतीति न तत्र पूर्वदृष्टपदाव्याप्तिरिति चेत्, न – पित्तपीतिम्नः अयोग्यतया दर्शनासम्भवात्। अन्यथा कनकलिप्तशङ्खस्य पीतिम्नोऽन्यैर्गृह्यमाणत्ववत् पित्तद्रव्यलिप्त शङ्खस्य पीतिम्नोऽन्यैर्गृह्यमाणत्वापत्तेः। न च–दूरोत्पतितस्य विहगस्य तद्विषयकपूर्वदर्शनधाराशालिना पुरुषेणैव ग्रहणं नान्येन, एवमेतस्य पुरुषविशेषेणैव ग्रहणमिति–वाच्यम्। तथासति तच्चक्षुस्संयुक्तचक्षुषा पुरुषेण तद्ग्रहणवत् [6]तादृशेन एतस्यापि ग्रहणं स्यात्। पक्षिणोऽन्तरालदेश इव चक्षुश्शङ्खयोरन्तरालदेशेऽपि [7]तद्दर्शनं स्यात्। अत एव दोषयुक्तपुरुषेण तस्य ग्रहणमित्यपि परास्तम्। अन्तराले ग्रहणापत्तेरेव। शङ्खसमीपदेश एव तस्य ग्रहणयोग्यत्वं नान्यत्रेति कल्पनं तु पित्त-

---

1. **अन्योन्याध्यासमते**—सिद्धान्ते।

2. **अव्यापकमिति** अधिष्ठानभूतस्य इदमादेः पूर्वदृष्टस्य रजतादौ अध्यासे लक्षण सद्भावात् असम्भवो नोक्तः। **अपूर्वस्यैव**—पूर्वाननुभूतस्यैव।

3. 'पीतः शङ्खः' इति भ्रमः अनुभूयमानारोपः—इति वदन् अन्यथाख्यातिवादी शङ्कते—**ननु पीतः शङ्ख इत्यादिना**।

4. **साक्षात्सम्बन्धेनेति** परम्परासम्बन्धेन पीतिमावगाहित्वे प्रमात्वापत्तिरिति भावः।

5. **पूर्वं दर्शनं सम्भवतीति** संसर्गारोपकालेऽपि पित्तपीतिम्नोऽनुभूयमानत्वात् 'पीतः शङ्खः' इति भ्रमस्य नानुभूयमानारोपत्वक्षतिः। न चैवमपि आरोप्यमाणसंसर्गांशे पूर्वदर्शनाभावात् लक्षणाव्याप्तिरिति शङ्क्यम्। पीतिमसंसर्गस्य कनके पूर्वं दृष्टत्वात् इत्यभिमानात्।

6. **आ. तादृशेनैव तस्यापि**

7. **मु. तादृग्दर्शनं**

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रव्यगतपीतिमैव गृह्यत इत्यत्र प्रमाणावतारं विना अनुचितम् । [1]नील्यादिसम्पर्करहिते स्वच्छजले 'नीलं सलिलं' इति भ्रमे [2]उक्तगतेरसम्भवाच्च । तस्मात् [3]अपूर्वस्यैव पीतिमादेः उत्पत्तिरिति अव्याप्तं पूर्वदृष्टपदम् ।

ननु—पूर्वदृष्टपदं पूर्वदृष्टसजातीयपरम् । तथाच नोक्तदोषः[4] । न च पित्तदोषयुक्तस्य गर्भान्निर्गतस्य पीतिमभ्रमे सजातीयपूर्वदर्शनासम्भव इति वाच्यम् । जन्मान्तरीयस्य तत्रापि सम्भवादिति चेत्, न—एवमपि येनकेनचिद्धर्मेण साजात्यस्य सर्वसाधारणत्वात् अव्यावर्तकं पदं व्यर्थमापद्यते ।

ननु--येन प्रकारेणाध्यासः तेन प्रकारेण पूर्वदर्शनं विवक्षितम् । न च तथापि[5] [6]व्यर्थता । न हीदं लक्षणान्तर्गतम्, किं तु [7]अध्यासकारणनिरूपणपरमिति चेत् , न--संसर्गाध्यासे तदसम्भवात् । संसर्गांशे [8]निष्प्रकारकतया 'येन प्रकारेण'

---

1. **नीली**—श्यामवर्णो लताविशेषः। नीलमृत् आदिशब्दार्थः ।

2. **उक्तगतेः**—पीतशङ्खभ्रमस्थले उक्तस्य प्रकारस्य। नील्यादिगतस्य नीलिम्नः अनुभूयमानस्य जले साक्षात्संसर्गाक्गाहित्वस्येति यावत् ।

3. मु. अपूर्वस्यैवोत्पत्ति

4. **नोक्तदोष इति** प्रातिभासिकव्यावहारिकयोः अनुगता एका रजतत्वादिजातिः अभ्युपगन्तव्या, भ्रमे तादृशजातिवैशिष्ट्यभानश्च अभ्युपगन्तव्यम् । अन्यथा इष्टतावच्छेदकवैशिष्ट्यज्ञानाभावात् व्यावहारिकार्थिनः प्रातिभासिके प्रवृत्तिर्न स्यात् । तथा च पूर्वदृष्टकनकगतपीतरूपसजातीयत्वं प्रातिभासिके शङ्खपीतिम्नि वर्तत इति पूर्वदृष्टत्वघटित-लक्षणस्य शुक्तिरूप्यपीतशङ्खादिभ्रमेषु नाव्याप्तिरित्यर्थः ।

5. आ. तथासति

6. **व्यर्थतेति** अतिव्याप्त्याद्यवारकत्वात् इति भावः। न च व्यर्थविशेषण-घटितस्य लक्षणत्वं युक्तं, लक्षणेन लक्ष्येतरभेदाद्यनुमाने व्याप्यत्वासिद्ध्यापत्तेः ।

7. **अध्यासकारणेति** पूर्वदर्शनस्य नष्टत्वसम्भवात् कथं अध्यासात् पूर्वं नियत-सत्त्वं इति चेत् न—पूर्वदर्शनाधीनस्मरणस्य अध्यासकारणत्वे तात्पर्यात्। स्मरणस्य अनियतत्वात् कथं तदपीति चेत्, न—स्मृतिनियमकल्पनेनोपपत्तेः। अथ वा पूर्वदर्शनाधीनसंस्कारस्य अध्यासकारणत्वे तात्पर्यम्। अत एव 'अधिष्ठानज्ञानदोषसंस्कार-रूपकारणत्रितयजन्योऽध्यासः' इति विवरणादिषु संस्कारस्य अध्यासकारणत्वोक्तिः इति भावः ।

8. **निष्प्रकारकतयेति** विशिष्टज्ञाने संसर्गस्य केनचित् रूपेण भानेऽपि तद्रूप-निष्ठविषयतायाः प्रकारतानात्मकत्वात् इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्येवंरूपस्यासम्भवात् । सन्ति च केवलसंसर्गाध्यासाः । [1]यथा दर्पणे मुखाध्यासः । तत्र हि 'दर्पणं मुखं वा परस्परमध्यस्यते' इति नानिर्वचनीयख्यातौ वक्तुं शक्यम् । तयोर्व्यावहारिकत्वेन प्रातिभासिकाध्यासानिर्वाहात् । किं तु तयोराधाराधेयभाव एव । न च सोऽधुना केनचित्प्रकारेणानुभूयते, येन 'तत्सजातीयस्य तत्समानप्रकारोपस्थितिः कारणं' इति निरुह्येत । एवं 'रक्तः पटः' इत्यत्रापि कुसुम्भादिगतस्य रक्तिम्नः पटे साक्षात्सम्बन्धस्याभावात् सोऽध्यस्यते । [2]यदि तु— दर्पणे अपूर्वमेव मुखमुत्पद्यत इति मतम् । पटे च रञ्जकद्रव्यसम्बन्धात् वर्णान्तरमेव रञ्जकद्रव्यवर्णेन सदृशं तदुत्कर्षापकर्षानुगतोत्कर्षापकर्षशालि पटेन साक्षात्सम्बद्धं [3]जायत इति तत्र न कस्याप्यध्यासः । अपूर्वमुखाध्यासे च तत्समानप्रकारकप्रतिबिम्बसजातीयमुखविषयोपस्थितिः [4]सम्भाव्यते—इत्युच्यते, तदाऽपि चूर्णलिप्ते घटे वर्णान्तरोत्पादासम्भवात् 'शुक्लो घटः' इति साक्षात्संसर्गविषयतया [5]अध्यासत्वावश्यम्भावात् तत्रोक्तकारणासम्भवः । न च तत्रापि चूर्णोपादानभूतेषु पाषाणेषु

---

1. प्रतिबिम्बविभ्रमस्य केवलसंसर्गाध्यासत्वं प्रतिबिम्बस्वरूपसत्यत्ववादाश्रयणेन उपपादयति—**यथेत्यादिना** ।

2. प्रतिबिम्बस्वरूपमिथ्यात्ववादाश्रयणेन प्रतिबिम्बविभ्रमस्य केवलसंसर्गाध्यासत्वं आक्षिपन् शङ्कते-**यदि त्विति** ।

3. **जायत इति** दृष्टा हि हरिद्रासम्बन्धात् चूर्णे रक्तिम्नः सलिलसम्बन्धात् भूतले नीलिम्नश्च उत्पत्तिः इति भावः । रञ्जकद्रव्यवर्णात् वर्णान्तरत्वस्य उपपादकं वर्णान्तरस्य विशेषणद्वयम् ।

4. **सम्भाव्यत इति** ननु—प्रतिबिम्बस्वरूपसत्यत्ववादे दर्पणाभिहतानां नयनरश्मीनां परावृत्य स्वमुखग्राहकत्वं अङ्गीक्रियते, न तन्मिथ्यात्ववादे । तथा च तत्र प्रतिबिम्बसजातीयबिम्बमुखस्य कथं पूर्वदर्शनं सम्भाव्यते ? न च नासादिप्रदेशावच्छेदेन बिम्बमुखस्य पूर्वदर्शनं सम्भवतीति वाच्यम् । तावता नयनगोलकादिप्रतिबिम्बाध्यासानुपपत्तेः—इति चेत्—उच्यते—मुखसामान्यानुभवसंस्कारमात्रेण दर्पणे मुखविशेषाध्यासोपपत्तेः । न चैवं मुखसामान्यानुभवस्य तज्जन्यसंस्कारस्य वा मुखविशेषाध्यासहेतुत्वे चैत्रमुखदर्पणयोः सांमुख्ये सति यस्य कस्यापि मुखस्य अध्यासः स्यात् इति वाच्यम् । बिम्बभूतमुखविशेषसाम्मुख्यस्य नियामकत्वाङ्गीकारात् इति भावः । 'बिम्बभूतमुखविषयोपस्थितिः' इत्यनुक्त्वा 'मुखविषयोपस्थितिः' इति सामान्योक्त्या अयं पूर्वदर्शनसंभावनाप्रकारो ज्ञापितोऽपि ।

5. मु. अध्यासावश्य०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वह्निसम्पर्कात् श्वेतिम्न इव अपूर्वस्य अत्रापि [1]तथाविधस्य तस्य उत्पत्तिः किं न स्यादिति वाच्यम्। तत्र वह्न्यपगमेऽपि तस्यानुवर्तमानतया तथाऽङ्गीकारेऽपि चूर्णापाये तदनुपलम्भेन तथाऽङ्गीकारायोगात्। एतादृशेषु [2]संसर्गमात्राध्यासेषु नोक्तं कारणं सम्भवति। शुक्तिरजताध्यासेऽपि संसर्गांशे तन्न सम्भवति। न च संसर्गातिरिक्ताध्यास एव तस्य कारणत्वमिति शङ्कनीयम्। कुत्राप्यसम्भावितस्य [3]व्यक्तिविशेषस्य स्वप्ने [4]सजातीयपूर्वदर्शनासम्भवात्, असम्भाविते वस्तुनि जन्मान्तरीयस्यापि तस्य कल्पयितुमयोगात्। तस्मात् कथमेतदध्यासलक्षणमुपपद्यत इति चेत्—

उच्यते—इमामेवानुपपत्तिं मनसि निधाय 'अध्यासो नाम अतस्मिन् तद्बुद्धिरित्यवोचाम' इत्यनुवादव्याजेन एतस्यार्थं स्फुटीकरिष्यति भाष्यकारः। तेन हि आरोप्याभावस्याधिष्ठाने [5]प्रतिपादनात् एकत्र समानसत्ताकयोः प्रतियोगितदभावयोर्विरोधाद्विषमसत्ताकत्वसूचनेन, आरोप्याभावस्य च वस्तुतोऽधिष्ठानातिरेकानभ्युपगमात् 'अधिष्ठानविषमसत्ताकस्य बुद्धिः अध्यासः' इति फलितोऽर्थः। तदनुसारेण [6]स्मृतिरूपपदं स्मर्यमाणवस्तुसादृश्यप्रतिपादकम्। तत्सादृश्यं च प्रतीतिकाले असत्त्वम्। परत्रेति तु अधिष्ठाने इत्यर्थकम्। तथा च अधिष्ठाने अपरोक्षतया भासमानस्य स्वरूपतोऽसत्त्वायोगात् अधिष्ठानस्य यादृशं सत्त्वं तादृशसत्त्वराहित्ये प्रतिपादिते अधिष्ठानविषमसत्ताकावभासत्वं लक्षणं पर्यवस्यति।

---

1. **तथाविधस्यतस्योत्पत्तिः**—तत्सदृशस्यापूर्वस्योत्पत्तिः। उत्पादकस्तु चूर्णलेपः।

2. मु. संसर्गाध्यासेषु

3. **व्यक्तिविशेषस्य स्वप्ने**—व्यक्तिविशेषविषयके स्वाप्नविभ्रमे

4. **सजातीयपूर्वदर्शनासम्भवादिति** ननु प्रतिबिम्बसजातीयमुखसामान्यानुभवरूपेण पूर्वदर्शनेन तत्संस्कारेण वा मुखविशेषसान्निध्यवशात् मुखविशेषाध्यासो यथा, तथा पुरुषसामान्यानुभवरूपेण पूर्वदर्शनेन तत्संस्कारेण वा शुभाशुभहेत्वदृष्टानुरोधेन असम्भावितस्यापि तत्कालोत्पन्नस्य व्यक्तिविशेषस्य स्वाप्नविभ्रमः सम्भवतीति चेत्—सत्यम्—अध्याससामान्यकारणपरस्य भाष्यस्य संसर्गातिरिक्ताध्यासकारणप्रतिपादकत्वेन व्याख्यानायुक्ततायामेव तात्पर्यम्।

5. **प्रतिपादनादिति** 'अतस्मिन्' इत्यत्र अतच्छब्दः बहुव्रीहिः इति भावः।

6. **स्मृतिरूपपदमिति** 'अवभासे स्मृतिसादृश्यप्रतिपादकं सत् अवभास्यस्य' इति शेषः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्विदमपि स्वप्नविभ्रमे न सम्भवति, तत्राधिष्ठानासम्भवात्। न च तत्र [1]साक्ष्येवाधिष्ठानम्। तस्य पारमार्थिकत्वेन प्रातिभासिकस्वाप्नपदार्थान् प्रति केवलस्याधिष्ठानत्वायोगात्, अध्यस्तरजतादौ प्रातिभासिके व्यावहारिकशुक्त्याद्यवच्छिन्नस्यैव तस्य [2]तथात्वात्, 'अहं गजः, मयि गजः' इति [3]प्रतिभासापत्तेश्च, इति चेत्—

न—अज्ञानान्तःकरणतद्धर्माणां व्यावहारिकपदार्थानवच्छिन्ने तत्र अध्यस्तानां प्रातिभासिकत्वाभ्युपगमेन 'प्रातिभासिकाध्यासे व्यावहारिकपदार्थावच्छिन्नस्यैव साक्षिणोऽधिष्ठानत्वं' इति नियमस्याप्रयोजकस्यानभ्युपगमात्। 'अहं गजः, मयि गजः' इति प्रतीतिस्तु क्वचिदिष्टैव। सर्वत्र तु न भवति। दोषवैचित्र्यात्। अविद्यादीनां प्रातिभासिकत्वञ्च 'आनावृतचैतन्यविषयतानियतस्वरूपत्वं प्रातिभासिकत्वम्, तादृशविषयतया [4]कदाचित्सम्बद्धस्वरूपत्वं व्यावहारिकत्वं' इति मतमनुसृत्य द्रष्टव्यम्। [5]यन्मते तु अविद्यातिरिक्तदोषाजन्यत्वं व्यावहारिकत्वं अविद्यातिरिक्तदोषजन्यत्वं प्रातिभासिकत्वं, तत्र[6] अविद्यान्तःकरणतद्धर्माणामपि व्यावहारिकत्वमेव[7]।

---

1. **साक्षी**—आत्मचैतन्यम्। 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रादिति भावः।

2. **तथात्वादिति** स्वप्ने व्यावहारिकपदार्थानां प्रतिभासस्य असम्भवात् अनङ्गीकाराच्च व्यावहारिकावच्छिन्नस्वाप्नाधिष्ठानमिति वक्तुमशक्यत्वात् इति शेषः।

3. **प्रतिभासापत्तेश्चेति** शरीरान्तरेव स्वाप्नपदार्थानां सत्ताप्रतिभासादेः सिद्धान्तसिद्धत्वात् तथाभूतानाञ्च अन्तःकरणादीनां एवमेव प्रतिभासात् स्वाप्नानामपि एवं प्रतिभासापत्तिरिति भावः। यद्वा अन्तःकरणस्य व्यावहारिकत्वमुपेत्य तदवच्छिन्नस्य अधिष्ठानत्वे दोषमाह—**'अहं गजः' 'मयि गजः' इति प्रतिभासापत्तेश्चेति**।

4. मु. कदाचित्सम्बद्धत्वं

5. **यन्मते इत्यादि** न च एतन्मतानुसरणे 'प्रातिभासिकाध्यासे व्यावहारिकपदार्थावच्छिन्नस्यैव साक्षिणोऽधिष्ठानत्वं' इति नियमस्य अविद्यान्तःकरणादिषु पूर्वोक्तव्यभिचाराभावात्, अविद्यातिरिक्तनिद्रादिदोषजन्यत्वेन प्रातिभासिकानां स्वाप्नपदार्थानां उक्तनियमविरोधात् व्यावहारिकानवच्छिन्ने साक्षिणि अध्यासोक्तिरयुक्तेति शङ्क्यम्। उक्तनियमस्य अप्रयोजकत्वे एव पूर्वग्रन्थतात्पर्यात्।

6. मु. तदा

7. मु. व्यावहारिकत्वं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं च स्वाप्नस्यापि अधिष्ठानभूतेन पारमार्थिकेन साक्षिणा विषमया [1]मिथ्यात्वरूपया सत्तया समन्वयात् लक्षणानुगतिः ।

ननु सिद्धान्ते 'ब्रह्मण एव सत्ता नान्यस्य' इत्यभ्युपगमात् कथं स्वाप्नेषु आत्मसत्तातो विलक्षणा सत्तेति चेत्—

उच्यते—लक्षणे सत्ताशब्देन तारत्वादिवदुत्कर्षविशेषात्मकाः केचन अखण्डोपाधिभूता[2] धर्मा विवक्षिताः । न च तत्र प्रमाणाभावः । श्रुत्या हि वियदादिसत्तातो ब्रह्मण उत्कृष्टा सत्ता निर्दिश्यते 'सत्यस्य सत्यं....प्राणा वै सत्यं तेषामेष सत्यं' [बृ. उ. २-१-२०] इति । प्रत्यक्षेण शुक्ते रजतसत्तातो विलक्षणा सत्ता गृह्यते— रजतापेक्षया शुक्तिस्सत्येति । एवं स्वाप्नशुक्तिकादिषु तस्यामेवावस्थायामध्यस्तरजते सत्तावान्तरभेदः प्रतीतिसिद्धो द्रष्टव्यः । यद्गतमवभास्यं तत् अधिष्ठानम् । ततश्च जडेऽपि ब्रह्माधारत्वमारोपितमिति तत् अधिष्ठानम् । जडसत्तातश्च ब्रह्मसत्ता उत्कृष्टेति अधिष्ठानविषमसत्ताकावभासत्वं जडे ब्रह्माध्यासेऽप्यस्तीति लक्षणसमन्वयः । एवं तत्र तत्र लक्षणयोजना द्रष्टव्या ।

ख्यात्यन्तरवैषम्यं च स्वपक्षे अनेन सूच्यत इति तासामनादेयत्वसूचनद्वारा प्रकृताक्षेपपरिहारोऽपि सूचितः । तार्किकपक्षे ह्यधिष्ठानं अवभास्यस्य रजतादेः हट्टादिकं, तत्समानसत्ताकं च रजतम् । सत्ख्यातिमते च शुक्तिरेवाधिष्ठानम्, किं तु रजतं शुक्तिसमानसत्ताकम् । आत्मख्यातिमते आत्मा अधिष्ठानं, तत्समानसत्ताकं चारोप्यम् । अख्यातिमते तु तार्किकवदेव सर्वम् । असंसर्गाग्रहः परं विशेषः । तेषु मतेषु अधिष्ठानविषमसत्ताकत्वाभावः । असत्ख्यातिर्द्विधा । शून्यवादिनां निरधिष्ठाना । तान्त्रिकाणां [3]केषांचित् साधिष्ठाना असदारोप्या । आद्याया [4]अधिष्ठानपदेन व्यावृत्तिः । अपरायास्तु अवभासपदेन । यद्यपि लक्षणे अवभासपदं

---

1. मिथ्यात्वरूपया—मिथ्यात्वेन परिचायकेन परिचितया । अतः अध्यासलक्षणघटकसत्ताया वक्ष्यमाणाखण्डोपाधित्वस्य न क्षतिः ॥

2. मु. भूता विवक्षिताः

3. केषांचित्—माध्वैरनुस्रियमाणानाम्

4. अधिष्ठानपदेन व्यावृत्तिरिति स्वाधिष्ठानविषमसत्ताकत्वस्य असति स्वाधिष्ठानाप्रसिद्ध्या निरूपयितुमशक्यत्वात् इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञानसामान्यपरम्, ज्ञानसामान्यान्तर्गतपरोक्षज्ञानविषयत्वं च असतोऽपि सम्भवत्येव, तथापि रजताद्यध्यासेष्वपरोक्षेषु अवभासपदं वस्तुगत्या अपरोक्षावभासपरं पर्यवस्यतीति तेन तद्व्यावृत्तिः ।

पूर्वदृष्टपदं च क्वचित्पूर्वमारोप्यसजातीयोपस्थितिरपेक्षितेत्येतावन्मात्रपरं सत् शङ्काविशेषनिराकरणार्थम् । सा चैवम्—समानसत्ताकयोरारोप्यविशेषाधिष्ठानसामान्यांशयोरैक्यज्ञानजन्यसंस्कारोऽध्यासेनापेक्षितः, शुक्तिरजताध्यासे तथा दर्शनात् । प्रकृते च न सम्भवति, आत्मना समानसत्ताकस्यान्यस्याभावात्—इति । अप्रयोजकत्वात् नायं नियमः साधुः । अपूर्वव्यक्तिविषयस्वप्ने तदभावात् व्यभिचारदुष्टश्च ।

इदं च लक्षणं अनिर्वचनीयस्यारोप्यस्योत्पत्तिं स्वीकृत्य लक्ष्येषु सङ्गमनीयम् । न च सदसद्विलक्षणत्वं विरुद्धं । सद्विलक्षणत्वं हि बाध्यत्वम् । असद्विलक्षणत्वं च सस्वरूपत्वम् । तच्च सम्भवत्येव शुक्तिरजतस्य । लब्धस्वरूपं हि तत् । अन्यथा शशशृङ्गादिवत् अपरोक्षत्वानुपपत्तेः । बाधश्च एकावच्छेदेन स्वोपादाने त्रैकालिकोऽभावः । सोऽपि रजतस्य नेदंरजतमिति प्रमाणसिद्धः । तदा परं विरोधः स्यात्—यदि सद्विलक्षणत्वं निस्स्वरूपत्वं असद्विलक्षणत्वं सस्वरूपत्वं इत्येवं विवक्षितं स्यात् । न तु तथा विवक्षितम् । प्रकारान्तरस्य दर्शितत्वात् । न च—[1]सोऽपि प्रकारो विरुद्धः, स्वोपादाने त्रैकालिकाभावस्यायोगादिति—वाच्यम् । प्रतीत्यनुसारेण हि विरुद्धत्वमविरुद्धत्वं च व्यवस्थापनीयम् । एवं च यथा पुरुषवति भूतले 'दण्डी पुरुषो नास्ति' इति प्रतीत्या प्रतियोगितावच्छेदकविशिष्टस्यैव प्रतियोगिनोऽभावेन सह विरोधः, एवं समानसत्ताकस्यैव तेन सह विरोध इति नियमः ।

[2]एतेन—यत् सत्ख्यातिवादिनोक्तम्—शुक्तित्वाधिकरणे इदमि रजतत्वं वर्तत इति, तत् प्रत्युक्तम् । यदि तत् [3]प्रतिभाससमानकालं इष्यते, तदा [4]असन्मत-

---

1. मु. सोऽपि वि०
2. विशिष्टाद्वैत्यभिमतं सत्ख्यातिवादं निराकरोति—**एतेनेत्यादिना** ।
3. मु. प्रतिभासकाल उत्पद्यते
4. **असन्मतप्रवेश इति** न च प्रतिभाससमानकालस्यापि तस्य परैः सत्यत्वाभ्युपगमे कथमस्मन्मतप्रवेश इति वाच्यम् । प्रसिद्धरजतोत्पादकसामग्रयभावस्य व्यवस्थापयिष्यमाणत्वेन सत्यत्वासम्भवः इत्यभिप्रायात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रवेशः। यदि तु त्रैकालिकं कथं [1]विरोधपरिहारः। न च तत्र किञ्चित् प्रमाणमस्ति। इदंरजतमितिप्रतीतेः तात्कालिकरजतमादायापि सम्भवात्। न च तत्र प्रसिद्धरजतोत्पादिका सामग्री सम्प्रतिपन्ना।

ननु—त्रिवृत्करणश्रुतिबलात् शुक्त्यारम्भकद्रव्येण सह तेजसः संसृष्टतया शुक्त्यारम्भकाले तैजसैरवयवै रजतमारभ्यत इति न सामग्र्यनुपपत्तिः। न च—शुक्तौ रजतसंसर्गोऽनुपपन्नः, द्रव्यान्तरेण सहात्यन्तिकस्य द्रव्यान्तरसंसर्गस्यादर्शनादिति—वाच्यम्। नीवारेषु व्रीहिसंसर्गस्यात्यन्तिकस्य[2] सर्वसम्प्रतिपन्नत्वात्। अत एव—दर्शपूर्णमासयोर्नित्यतया अवश्यकर्तव्यत्वे यदा [3]सकला व्रीहयो न लभ्यन्ते तदा [4]विकलान्नीवारगतानुपादाय यष्टव्यमिति व्यवस्थापितं पूर्वतन्त्रे—इति चेत्—

न—यदि तैजसैरवयवैः शुक्तिकायां रजतमारब्धं भवेत्, तदा रजतयुक्तमृदादिदाहे रजतपरिशेषवत् शुक्तिदाहे [5]रजतपरिशेषोऽपि स्यात्। 'औषधपुटसंयुक्तस्य दाहे यथा रजतस्य न परिशेषः, किं तु भस्मीभावः, एवं शुक्तिसंयुक्तस्यापि' इति कल्पनं तु शुक्तौ सार्वकालिकरजतमस्तीत्यत्र प्रमाणावतारं विनाऽनुचितम्। त्रिवृत्करणश्रुतिः महाभूतानां संसर्गं प्रतिपादयन्ती न तत्र रजतपरिणामे प्रमाणम्। न च क्वचिन्नीवारादौ तथादृष्टमिति अन्यत्रापि तथाऽभ्युपगन्तुं युक्तं असति प्रमाणे। न च नीवारेषु व्रीहयो विद्यन्ते। रूपरससंस्थानविशेषनियतस्य व्रीहित्वस्य नीवारेषु कथञ्चिदपि अभ्युपगन्तुमशक्यत्वात्।

तर्हि कथं तेषां प्रतिनिधित्वं कथं वा व्रीहिभिः [6]समानधर्मत्वम्? एवम्—दर्शपूर्णमासयोः 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इति नित्यत्वमुपश्रुत्य तत्र च

---

1. **विरोधेति** नेदंरजतमितिप्रमितिसिद्धेन त्रैकालिकाभावेन विरोधेत्यर्थः।

2. **आत्यन्तिकस्य**—यावद्धर्मिस्वरूपं स्थायिनः

3. **सकलाः** — आत्यन्तिकद्रव्यान्तरसंसर्गरहिताः

4. **विकलान्**—आत्यन्तिकद्रव्यान्तरसंसर्गवतः

5. **रजतपरिशेषोऽपिस्यादिति** इदमुपलक्षणम्—शुक्तिदाहे क्षारभाववत् द्रवीभावस्याप्युपलब्धिप्रसङ्गः, आघाने रजतशकलालाभे शुक्तिशकलोपादानप्रसङ्गः, इत्यपि बोध्यम्।

6. **समानधर्मत्वम्**—अवघातादिः समानो धर्मः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केनचिन्निमित्तेन मुख्यद्रव्यासम्भवं भाविनं कदाचित् अनुसन्धाय विचारावस्थः पुरुषः 'व्रीहिभिर्यजेत' इति नियमशास्त्रस्य [1]आक्षेपापवादकस्य अशक्त्या तस्यां दशायामप्रवृत्तिमालोच्य नित्यचोदनाया द्रव्याक्षेपकताशक्तिमकुण्ठितामनुसन्दधानः, यदि कथञ्चिदपि मुख्यशास्त्रानुग्रहो भवेत् तदा तमनादृत्य न यत्किञ्चित् द्रव्यं आक्षेप्तव्यमिति निर्धार्य, व्रीहिषु यादृशरसयुक्ता अवयवाः तादृशरसयुक्ता अवयवा नीवारेष्वपि विद्यन्त इति स्मरन्, तावन्मात्रानुग्रहो मुख्यशास्त्रस्यानुसर्तव्य इति, मुख्यस्य पयसोऽलाभे नालिकेररसः तत्सदृशो लोके सन्निधाप्यत इति लौकिकन्यायसनाथाया नित्यचोदनाया अत्यन्तसदृशद्रव्याक्षेपकत्वं निर्धार्य, 'व्रीहीणामलाभे नीवारा एव प्रतिनिधेयाः' इति निश्चिनोति। 'व्रीहीनवहन्ति'—इत्यादिशास्त्राणां च अपेक्षानुसारेण पुरोडाशादिहविस्सम्पादनद्वाराऽपूर्वजनकपदार्थोद्देशेन संस्कारविधायकतया यववत् नीवाराणामपि व्रीहिभिः साधर्म्यम्। परं तु यवेषु 'व्रीहीणां मेध सुमनस्यमानः' इति मन्त्रो न प्रवर्तते। मुख्यया वृत्त्या तत्प्रकाशनसामर्थ्याभावात्। उद्भूतसादृश्याभावेन गौण्यारोपयोरप्यसम्भवात्। नीवाराणां तु सम्भवति व्रीहित्वारोपेण प्रकाशनम्। लोके हि 'यो यस्य स्थाने प्रतिनिधीयते स तेन शब्देन व्यवह्रियते, यथा विष्णुस्थाने प्रतिनिहिता प्रतिमा विष्णुशब्देन' इति प्रतिनिधेः मुख्यशब्दभाक्त्वस्य व्युत्पत्तिसिद्धत्वात्। अतो न पूर्वमीमांसकव्यवहारपर्यालोचनया शुक्तौ रजतं तात्त्विकमस्तीति।

अस्तु वा यथाकथञ्चित्तत्र रजतावयवसमावेशः तावन्मात्रेण च रजतमिति प्रतीतेः प्रमात्वम्, रजतत्वजातेरवयवावयविसाधारण्यात् दधित्वादिवत्। वल्मीकनीवारादिषु घटत्वव्रीहित्वाद्यवगाहिषु भ्रमेषु का गतिः। घटत्वव्रीहित्वादिजातेरवयविविशेषमात्रोपरक्तत्वात्। तत्राख्यातिस्वीकारे च सैव सर्वत्रास्तु, किमनया कुसृष्ट्या अव्यापिकया। अख्यातिरपि न सम्भवतीत्यनुपदमेव वक्ष्यते।

'निरधिष्ठाना असत्ख्यातिः' इति शून्यवादिमतं तु तर्कपाद एव निराकरिष्यते। रजतमिदमित्यत्र अपरोक्षतया इदंपदार्थे अधिष्ठाने निस्स्वरूपमेव रजतं प्रतीयते—इति मतं तु अनुभवविरोधादेवानादरणीयम्। लब्धस्वरूपस्य रजतस्य अनुभवसिद्धत्वात्।

---

1. आक्षेपेति—यत्किञ्चित्प्रकृतिद्रव्यकल्पकं यत् पुरोडाशादिहविर्निष्पत्त्यन्यथानुपपत्तिरूपं अर्थापत्तिप्रमाणं तदित्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिद्धान्ते तु दोषसहिता अविद्या शुक्तिगता रजतत्वेन परिणमत इति तस्य लब्धात्मकत्वान्नानुभवविरोधः। न च उत्पत्त्यङ्गीकारे तत्त्वज्ञानेन च नाशाङ्गीकारे शुक्तिरजतसम्बन्धितया तयोरनुभवोऽपि स्यादिति वाच्यम्। प्राक्सिद्धशुक्तितादात्म्ये-नाध्यस्ते शुक्तीदंत्वसंसर्गस्येव शुक्तिगतप्राक्सिद्धत्वसंसर्गस्यापि आरोपिततया [1]उत्पत्त्यनुभवानुपपत्तेः। बाधेन त्रैकालिकाभावप्रतियोगित्वस्य ग्रहात् तदधिकरणे नाशासम्भवेन [2]तदनुभवानुपपत्तेः। परिणाम्युपादानमेव कार्यनाशाधिकरणम्, न विवर्तोपादानम्। न चैवं तत्र नाशानङ्गीकारे तस्य नित्यतापत्तिः। बाधेन हि सहाज्ञानेन परिणामिना रजतस्य सदसद्व्यवहारायोग्यत्वापादनेन अधिष्ठानमात्र-परिशेषतासम्पादनात्।

अत एव अन्यथाख्यातिरपि निराकृता। तात्कालिकरजतमादायापि[3] प्रती-त्युपपत्तौ देशान्तरस्थरजतप्रतीतिकल्पनानुपपत्तेः। नापि देशान्तरस्थस्यासन्निकृष्टस्य भानं सम्भवति। न च रजतानुभवजन्यः संस्कारः स्मृतिर्वा तत्र प्रत्यासत्तिः। तथासति वह्न्यनुभवजन्यसंस्कारस्मृत्योः परामर्शस्य वा सत्त्वेन 'पर्वतो वह्निमान्' इति प्रत्यक्षप्रसङ्गात्। न चानुमितिसामग्र्या तत्प्रतिबन्धः। विशेषदर्शनाधीन-संशयोत्तरप्रत्यक्षानुसारेण समाने विषये प्रत्यक्षसामग्र्याः प्रबलत्वात्। न च— लौकिकप्रत्यक्षसामग्र्या एव अनुमितिसामग्रीतः प्राबल्यम्, अलौकिके तु अनुमिति-सामग्र्या एवेति पर्वतोवह्निमानित्यनुमितौ न काचिदनुपपत्तिरिति—वाच्यम्। तथात्वे स्थाणौ 'स्थाणुर्वा पुरुषो वा' इति संशयोत्तरं पुरुषत्वव्याप्यकरादिमानिति विशेषदर्शनानन्तरं पुरुष एवेति [4]प्रत्यक्षं न स्यात्। तत्र लौकिकसामग्र्या असम्भ-वात्। न च तत्र अनुमितिरूप एव भ्रमः न प्रत्यक्ष इति शङ्क्यम्। 'पुरुषं साक्षात्करोमि' इत्यनुभवात्।

---

1. उत्पत्त्यनुभवानुपपत्तेः — उत्पत्त्यननुभवोपपत्तेः।
2. तदनुभवानुपपत्तेः—तदननुभवोपपत्तेः।
   उत्पत्त्यनुभवानापत्तेः, तदनुभवानापत्तेः इति वा पाठः स्यात्।
3. मु. 'अपि' नास्ति
4. प्रत्यक्षं—भ्रमात्मकं प्रत्यक्षम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]अस्तु वा अन्यत्रोपनीतभानम्[2] । प्रकृते तु न सम्भवति । न हि [3]चाक्षुषे 'सुरभि चन्दनं' इति ज्ञाने चन्दनत्वांशे यथा प्राकट्यं तथा सौरभांशेऽपि विद्यते—इति सर्वानुभवसिद्धम् । एवं रजतांशेऽपि अलौकिकत्वेऽभ्युपगते सौरभवत् अप्राकट्यमेव स्यात् । अपि च—यत्र यदनुभवः तत्र वा, यदवच्छेदेन यस्यानुभवः तदवच्छेदकवत्तया उपस्थिते वा, संस्कारादेरुपनयत्वम् । शुक्तौ तु रजतं प्राङ्नानुभूतम्, नापि शुक्तिगतेदंत्वावच्छेदेन, इति [4]कथं तत्रोपनीयेत ।

न च—त्वया दोषस्य अक्लृप्तं रजतस्वरूपे कारणत्वं कल्पनीयम्, तदपेक्षया व्यवहितरजतसाक्षात्कार एव तस्य कारणत्वकल्पनमुचितम्, तथासति अपूर्वरजतानङ्गीकारात् लाघवं भवतीति—वाच्यम् । भवेदेवं, यदि दोषस्य अक्लृप्तं अर्थंप्रति कारणत्वं कल्प्येत । न त्वेतदस्ति । येनापि हि देशान्तरस्थं रजतं भासत इत्युच्यते तेनापि शुक्तिरजतोभयनिरूपितं तादात्म्यं अत्रैवोत्पद्यत इति अवश्यमभ्युपेयम् । तस्य अन्यत्राप्रसिद्धेः अत्राप्यनुत्पत्तौ अपरोक्षता न स्यात् । स्वप्ने च [5]अपूर्वव्यक्तिगोचरे तत्रैव विषयस्योत्पत्तिरुपेया । तस्यान्यत्राप्रसिद्धेः । किं बहुना—स्वाप्निकानां पदार्थानां मिथ्यात्वं सन्ध्याधिकरणे निरूपयिष्यते । तेषां च 'अथ रथान् रथयोगान् पथस्सृजते' [बृ. उ. ४-३-१०] इति श्रुतिपर्यालोच-

---

1. ज्ञानस्य संस्कारस्य वा प्रत्यक्षविषयताप्रयोजकसन्निकर्षत्वं अभ्युपेत्याप्याह —**अस्तुवेति** ।

2. आ. नीतस्य प्रत्यक्ष

3. मु. चक्षुषा

4. **कथं तत्रोपनीयेतेति**—न च—यस्य प्रथमं शुक्तिशकले रजतभ्रमानन्तरं बाधो नोत्पन्नः, तत्र शुक्तिसाधारणचाकचक्यावच्छेदेन रजतत्वानुभवस्यानपोदितत्वात् पुनः शुक्तिशकलान्तरे रजतभ्रमोदयेऽन्यथाख्यातिः संभवति, तत्र यदवच्छेदेनेत्याद्युक्तरूपोपनीतभानसामग्रीसत्त्वात्, पाकरक्ते घटे श्यामोऽयमिति भ्रमोदये चान्यथाख्यातिः सम्भवति; 'यत्र यदनुभवः' इत्याद्युक्तरूपोपनीतभानसामग्रीसत्त्वात्—इति शङ्क्यम् । क्वचिद्विभ्रमे दोषघटितसामग्रीबलात् आविद्यकविषयोत्पत्तिक्लृप्तौ अन्यत्रापि तदुत्पत्तेरनिवारणात् । पाकरक्ते स्मृत्युपनीतश्यामवर्णप्रत्यक्षस्य, पूर्वानुभूतसौरभे पश्चात् निखननादिना गतसौरभे चन्दनखण्डे सुरभीदंचन्दनखण्डमिति स्मृत्युपनीतसौरभविषयचाक्षुष प्रत्यक्षस्येव प्रमात्वात् । तथा च भ्रमस्थले न क्वापि ज्ञानादेः प्रत्यासत्तित्वं इति ध्येयम् ।

5. **अपूर्वव्यक्तीति** मनुष्यपशुपक्षिवृक्षाद्यनेकात्मकेत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नथा तत्रैवोत्पत्तिः। तत्र सर्वत्र दोषस्य कारणत्वं क्लृप्तमेवेति नावक्लृप्तकल्पनम्[1]।

अपि च येन दोषस्यासन्निहितरजतसाक्षात्कारजनकत्वं कल्प्यते तेन [2]ज्ञानप्रत्यासत्त्याद्यजन्यरजतचाक्षुषत्वेन रजतचक्षुस्सन्निकर्षस्य रजतालोकसंयोगस्य च कारणत्वं क्लृप्तं परित्यक्तव्यम्, दोषस्य च असन्निहितचाक्षुषजनकत्वं तत्प्राकट्यप्रयोजकत्वञ्च कल्पनीयमिति भूयसी अनुभवविरुद्धा कल्पना आपद्यते। अर्थोत्पादकत्वं तु अन्यत्र क्लृप्तमेव। उत्पन्नस्य च [3]प्रमात्रवकुण्ठिततया अपरोक्षतायां न काचिदनुपपत्तिः। सर्वत्र [4]आपरोक्ष्ये प्रमात्रवकुण्ठनस्यैव मन्मते प्रयोजकत्वात् अत्रैव लाघवम्।

न च—मैत्रे 'चैत्रोऽयं' इति भ्रमस्य प्रसिद्धचैत्रविषयकत्वं अवश्यं वक्तव्यम्, प्रातिभासिकचैत्रज्ञानात् प्रसिद्धचैत्रार्थिप्रवृत्तेरयोगात्। रजतसामान्यज्ञानाद्धि रजतसामान्यार्थिप्रवृत्तिः सम्भवति, नैवमन्यव्यक्तिज्ञानात् अन्यव्यक्त्यर्थिप्रवृत्तिः सम्भवतीति—वाच्यम्। मैत्रे चैत्रभ्रमानन्तरं 'चैत्रो मे स्यात्' [5]इतीच्छापूर्विका प्रवृत्तिः। सा तु चैत्रत्वप्रकारकज्ञानाद्भवति। ज्ञानस्य स्वसमानप्रकारकेच्छाद्वारा प्रवर्तकत्वोपपत्तेः।

न चैवं—'तदेवेदं रजतं' इति [6]प्रत्यभिज्ञा कथमुपपद्यते, प्रत्युत्पन्ने [7]पुरोवर्तिनि तत्ताया अभावात्, तत्रान्यथाख्यात्यङ्गीकारे अन्यत्रापि सैवास्त्विति—वाच्यम्। तत्तांशे परोक्षत्वेन अन्यथाख्यात्यङ्गीकारेऽपि आपरोक्ष्यस्य प्रमात्रव-

---

1. मु. कल्पनमपि। येन

2. **ज्ञानप्रत्यासत्त्याद्यजन्येति** अनुपदं 'न च त्वया' इत्यादिग्रन्थेन लौकिकालौकिकसन्निकर्षं विनैव दोषस्य साक्षात्कारकारणतायाः पूर्वपक्षिणोक्तत्वात् इदंरजतभ्रमस्य ज्ञानप्रत्यासत्त्याद्यजन्यत्वम्। ज्ञानस्य रजतांशे प्राकट्यस्य अनुभवसिद्धत्वादपि तस्य ज्ञानप्रत्यासत्त्याद्यजन्यत्वम्। रजतंसाक्षात्करोमीत्यनुभवाच्च तथा।

3. **प्रमात्रवकुण्ठिततया**—प्रमातृतादात्म्येन

4. मु. अपरोक्षे

5. आ. इत्येवमिच्छा

6. **प्रत्यभिज्ञेति** भ्रमरूपा इति शेषः।

7. **पुरोवर्तिनीति** प्रातिभासिके रजते इति शेषः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं केचित् अन्यत्रान्यधर्माध्यास इति वदन्ति ।

कुण्ठनं विनाऽसम्भवात् [1]'इदं रजतं' इत्यादावनिर्वचनीयत्वोपपत्तेः । [2]तत्रापि [3]वा संसर्गारोपाभ्युपगमात् [4]तस्मिन्नंशे अनिर्वचनीयत्वोपपत्तेः । तत्तांशे तु [5]सर्वप्रत्यभिज्ञासाधारण्येन स्मृतिरूपत्वं सिद्धान्ते इष्टमेव । 'पर्वतो वह्निमान्' इत्यनुमिति रूपभ्रमे तु दोषबलात्[6]वह्निरप्युत्पद्यत इति न कुत्राप्यन्यथाख्यातिः । शशशृङ्गमिति विकल्पस्तु असत्ख्यातिरेव, दोषाभावदशायामपि जायमानत्वात् ।

तं केचिदिति । ननु—अत्र मतान्तरोपन्यासः किमर्थः ? न तावत् सम्मत्यर्थः, विरुद्धत्वात् । नापि निराकरणार्थः, दूषणानभिधानात्—इति चेत्, न—'भ्रमस्सर्वसम्प्रतिपन्नः' इत्येतावन्मात्रे संवादार्थः । यद्यपि सोऽप्यंशोऽख्यातिवादिनोऽसम्प्रतिपन्नः, तथापि तमंशं साधयित्वा [7]सम्मत्त्यर्थः । विषयांशे तु केचिदित्यस्वरसोद्भावनात् दूषणार्थः । तत्र आत्मख्यातिमते रजतं आत्मधर्मः दोषबलादिदन्त्वेन प्रतीयते । न तु बहिरेव रजतमुत्पद्यते । तथासति 'नेदं रजतं' इति बाधो द्वयोः कल्पनीयः—भ्रमविषयस्य रजतस्य धर्मिणः तद्धर्मस्येदंत्वस्य च । अनिर्वचनीयमते उभयोरपि कल्पितत्वोपगमात् । मन्मते तु इदंत्वमात्रस्य बाधः, न रजतस्य । तस्य आत्मधर्मस्य सत्त्वाभ्युपगमात्, शून्यवादिव्यतिरिक्तानां सर्वेषां सौगतानामपि [8]आन्तरार्थेषु सत्त्वे विप्रतिपत्त्यभावात् । तत्र इदंत्वरूपे बाधिते तत् आन्तरत्वेन पर्यवस्यति । [9]तन्मतमाह—**तं केचित् अन्यत्र**—शुक्तौ बाह्यायां **अन्यधर्माध्यासः**—आत्मधर्मस्य रजतस्य योऽवभासः स एवाध्यासः **इति वदन्ति** ।

---

1. **इदंरजतमित्यादाविति** रजतस्येति शेषः ।
2. **तत्रापि**—तत्तांशेऽपि मु. अत्रापि
3. वाकारः चार्थे
4. **तस्मिन्नंशे**—संसर्गांशे
5. **सर्वप्रत्यभिज्ञेत्यादि** अन्यथा प्रमात्मकप्रत्यभिज्ञायां तत्ताभानस्य अनिर्वाहात् ।
6. मु. वह्निरुत्पद्यत
7. मु. सम्प्रतिपत्त्यर्थः
8. आ. आन्तरपदार्थेषु
9. मु. "तन्मतमाह" नास्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतदपरे न क्षमन्ते—रजतस्यान्तरत्वे प्रमाणाभावात्। नह्यान्तरत्वेन कुत्रापि भ्रमस्थले प्रमास्थले वा केचित् रजतमनुभवन्ति। तथा हि सति 'अहं रजतं' 'मयि रजतं' इति वा प्रत्ययः स्यात्। 'इदं रजतं' इत्येव तु सर्वत्र प्रत्ययः। ननु—सर्वत्र मास्तु आन्तरत्वम्, भ्रमस्थले तु तथा किं न स्यात्, इदंत्वस्य बाधात् इति चेत्, न—इदंत्वं सन्निहितत्वम्। तद्बाधे असन्निहितत्वं पर्यवस्यति। तच्च आपणादिगतस्य प्रसिद्धमेव। अतो न बाधेन आत्माकारत्वं व्यवस्थापयितुं [1]शक्यम्। न च आपणादिगतस्य प्रत्यक्षत्वानुपपत्तिः। न ह्यख्यातिवादे तस्य प्रत्यक्षत्वमभ्युपगम्यते। किं तु पूर्वानुभववशात् रजतस्य स्मृतिः। पुरोऽवस्थितस्य शुक्त्यादेः दोषबलाच्छुक्तित्वेनावभासाभावः, चक्षुस्सन्निकर्षवशादिदन्त्वेन ग्रहणम्। दोषवशादेव च विषयज्ञानयोर्विद्यमानोऽपि भेदो न गृह्यते। तावन्मात्रेण च इदंरजतमिति व्यवहारो रजतार्थिप्रवृत्तिश्च। [2]न त्वनिर्वचनीयान्यथाख्यातिमतवत् अपूर्वो विषयः विशिष्टज्ञानं वा संसर्गावगाहि किञ्चित् अभ्युपगम्यते। [3]असंसर्गाग्रहेण प्रवृत्त्युपपत्तौ अतिरिक्तकल्पने गौरवात्। अपि च तन्मते क्वचित् ज्ञानस्याप्रामाण्येऽभ्युपगते ज्ञानत्वरूपसाधारणधर्मदर्शनात् सर्वत्राप्रामाण्यशङ्काप्रसरो भवेत्। तथा च न कुत्रापि पुरुषो निष्कम्पं प्रवर्तेत। [4]निष्कम्पप्रवृत्तिमात्रे अप्रामाण्यशङ्काविरहस्य प्रामाण्यनिश्चयस्य वा प्रयोजकत्वात्। सति संशये [5]उभयोरप्यसम्भवात्। न चैवं—दोषाभावस्थलेऽपि विशिष्टज्ञानं मास्तु, असंसर्गाग्रहेण [6]सर्वत्रोपपत्तेरिति—वाच्यम्। तत्र संवादिप्रवृत्त्यात्मककार्यवैलक्षण्यस्य साधारणेनासंसर्गाग्रहेणासम्भवात्। असाधारणकारणापेक्षायां संसर्गोपस्थितिः विलक्षणं कारणं कल्प्यते, न च तत्कल्पने किञ्चित् अनाश्वासादिरूपं

---

1. मु. युक्तम्।

2. नत्वित्यादि अनिर्वचनीयख्यातिमत इव अपूर्वः—पूर्वाननुभूतः विषयः, उक्तमते अन्यथाख्यातिमत इव च संसर्गविषयकं विशिष्टज्ञानं वा नाभ्युपगम्यते इत्यर्थः।

3. असंसर्गाग्रहेणेति संसर्गः-तादात्म्यं, असंसर्गः-भेदः, भेदाग्रहेणेत्यर्थः।

4. निष्कम्पप्रवृत्तीत्यादि निष्कम्पत्वं-विसंवादित्वधीशून्यत्वम्, विषयिताविशेषो वा। अप्रामाण्यशङ्काविरहस्येति नैयायिकमताभिप्रायेण। प्रामाण्यनिश्चयस्येति स्वमताभिप्रायेण।

5. मु. उभयोरसम्भवात्

6. मु. सर्वोपपत्तेः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केचित्तु यत्र यदध्यासः तद्विवेकाग्रहनिबन्धनो भ्रम इति ।

बाधकमस्ति, इत्यतो भ्रमो नाम न ज्ञानान्तरमस्ति । भ्रमत्वप्रसिद्धिस्तु विसंवादिप्रवृत्तिजनकत्वमात्रेण [1]द्वयोरेव ज्ञानयोः उपपद्यते । भेदग्रहश्च भेदाग्रहाभावः । तस्मिन् सति प्रवृत्तिः न जायते । भेदाग्रहस्य कारणस्याभावे प्रवृत्त्यनुपपत्तेः । प्रवृत्त्यभाव एव च बाध इत्युच्यते । तदिदमाह—केचिन्त्विति । यत्र यदध्यास इति अन्येषां वादिनां प्रसिद्धिः, तद्विवेकाग्रहनिबन्धनः—तयोः—इदंरजतयोः विवेकस्य—भेदस्य अग्रहः निबन्धनं—स्वरूपं यस्य भेदाग्रहस्य [2]स एव भ्रमः इत्यर्थः ।

अत्रायमस्वरसः—भेदाग्रहात् प्रवृत्तिः इतिमतमसङ्गतम् । प्रवृत्तौ प्रवृत्तिविषयज्ञानं इष्टोपस्थितिश्च कारणं न भेदाग्रहमात्रं इति परस्यापि संप्रतिपन्नम् । तत्र भेदाग्रहोऽप्यधिकं कारणं किमर्थमिति पृष्टे परेणेत्थं वक्तव्यम्—यत्र 'इदं यत्किञ्चित्, रजतं तत्' इति पुरोवर्तिनो देशात् भिन्नदेशे रजतं गृह्यते तत्र इष्टोपस्थितौ सत्यामपि पुरोदेशे न प्रवर्तते, पुरोवर्तिनो रजतस्य च असंसर्गग्रहात् । अतोऽसंसर्गग्रहस्य प्रतिबन्धकत्वात् तदभावः कारणं—इति । तथासति इष्टाभेदग्रहस्य निवृत्तिप्रतिबन्धकतया [3]तदग्रहो निवृत्तौ कारणमिति [4]इदं रजतमित्यत्र तव मते [5]उभयोस्समावेशात् [6]प्रवृत्तिनिवृत्त्योः तटस्थ एव पुरुषो भवेत् । यदि तु

---

1. **द्वयोरेव ज्ञानयोरिति** स्वरूपतो विषयतश्च भिन्नं अगृहीतभेदकं नैरन्तर्येणोत्पन्नं ज्ञानद्वयं भ्रमइति व्यवह्रियते इत्यर्थः । पक्षान्तरं तु वक्ष्यते ।

2. **स एव भ्रम इति** निरन्तरोत्पन्नयोः ज्ञानयोः स्वरूपतो विषयतश्च भिन्नयोः भेदाग्रहः भ्रमइतिव्यवहारविषयः इत्यर्थः ।

3. **तदग्रह इति** इष्टाभेदः तच्छब्दार्थः । तदभाव इत्येव पाठः स्यात्, अत्र इष्टाभेदग्रहः तच्छब्दार्थः ।

4. **इदंरजतमित्यत्रेति** भ्रमात्मके इत्यादिः ।

5. **उभयोस्समावेशादिति** भ्रमस्थले दोषात् पुरोवर्तीष्टभेदाग्रहः तव सम्प्रतिपन्नः । अन्यथा तत्र प्रवृत्त्यभावप्रसङ्गः । पुरोवर्तीष्टाभेदाग्रहोऽपि तत्र त्वया अङ्गीकार्यः । अन्यथा भ्रमात्मकविशिष्टज्ञानाङ्गीकारापत्तेः । एवञ्च पुरोवर्तीष्टभेदाग्रहः पुरोवर्तीष्टाभेदाग्रहश्चेत्युभयोः प्रवृत्तिनिवृत्तिहेत्वोः तत्रैकत्र सत्त्वादित्यर्थः ।

6. **प्रवृत्तिनिवृत्त्योस्तटस्थः**—उदासीनः—प्रवृत्तिनिवृत्त्यन्यतरशून्य इति यावत् । विरुद्धयोः प्रवृत्तिनिवृत्त्योः युगपत् एकत्रासम्भवात् इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावाभावयोर्मध्ये भावस्य लघुत्वात् इष्टभेदग्रह एव निवृत्तौ कारणं, तदा प्रवृत्तावपि इष्टाभेदग्रह एव कारणमस्तु । यदि तु [1]भ्रमस्थले [2]पुरोवर्तीष्टाभेदग्रहस्याप्रसिद्ध-तया तदभावो न सम्भवतीत्युच्येत, तदा [3]प्रमास्थले [4]पुरोवर्तीष्टभेदग्रहस्याप्रसिद्ध-तया तदभावोऽपि न सम्भवतीति तुल्यम् । यदि [5]तु—पुरोवर्त्तिनि इष्टभेदग्रहविषय-त्वाभाव एव[6] प्रयोजकः,[7] तत्र च नानुपपत्तिः, घटादौ इष्टभेदग्रहविषयत्वस्य प्रसिद्धतया रजते तदभावस्य सुलभत्वात्—इत्युच्येत, तदा, इष्टाभेदग्रहविषयत्वस्य रजते प्रसिद्धतया पुरोवर्तिनि शुक्त्यादौ तदभाव [8]एव [9]कारणमिति अख्यातिवादिना प्रवृत्तिनिवृत्त्योस्ताटस्थ्यं वा स्वीकर्तव्यं, प्रवृत्तौ पक्षपाते [10]विशिष्टज्ञानस्य निवृत्तौ कारणत्वं वदता प्रवृत्तावपि वा तथैव स्वीकर्तव्यम् । [11]लाघवयुक्तेरुभयत्रापि तुल्यत्वात् ।

अपि च येन विशिष्टज्ञानस्य कारणत्वमुच्यते तन्मते [12]एकमेव [13]कारणं, संसर्गविषयत्वकल्पनेनैवासंसर्गग्रहस्थरुव्यावृत्तिसिद्धेः। परेण तु प्रतिबन्धकाभावतया असंसर्गाग्रहः [14]कारणान्तरं कल्पनीयमिति महत् गौरवम् ।

---

1. **भ्रमस्थले इति** मन्मते इत्यादिः । इष्टभिन्ने पुरोवर्तिनि इत्यर्थः ।

2. मु. 'पुरोवर्ति' नास्ति

3. **प्रमास्थले इति** त्वन्मते इत्यादिः । इष्टे पुरोवर्तिनि इत्यर्थः । इदंरजत-मिति प्रमास्थले रजतभेदग्रहाङ्गीकारे भ्रमज्ञानस्वीकारापत्तिः । न च प्रमास्थले विशिष्टज्ञानं प्रवृत्तौ कारणं भ्रमस्थले भेदाग्रहः इति नोक्तदोष इति शङ्क्यम् । अननुगमापत्तेः । कार्यवैलक्षण्यस्य अर्थसमाजसिद्धत्वसम्भवात् इति भावः ।

4. मु. 'पुरोवर्ति' नास्ति

5. मु. 'तु' नास्ति

6. आ. 'तत्र' इत्यधिकम्

7. **प्रयोजक इति** प्रवृत्तौ इत्यादिः

8. मु. 'एव' नास्ति ।

9. **कारणमिति** निवृत्तौ इत्यादिः

10. **विशिष्टज्ञानस्य**—इष्टभेदविशिष्टज्ञानस्य ।

11. **लाघवयुक्ते** — भावाभावयोर्मध्ये भावस्यैव लघुत्वं इति पूर्वोक्तयुक्तेः ।

12. **एकमेवेति**—भ्रमप्रमास्थलद्वयेऽपि इत्यादिः । प्रवृत्तौ इति शेषः ।

13. आ. 'तत्' इत्यधिकम् ।

14. **कारणान्तरं**—भ्रमस्थले प्रमास्थलीयकारणात् अन्यत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च रङ्गरजतयो: 'इमे रजते' इत्यत्र अंशद्वये तुल्यतयोल्लेखेऽपि 'रङ्गांशे असंसर्गाग्रह: रजतांशे संसर्गग्रह:' इति वदता अनुभवानुसार:[1] परित्यक्त:। तत् 'अस्तु रजतांशेऽप्यसंसर्गाग्रह:, मास्तु च कुत्रापि विशिष्टज्ञानम्, अर्धजरतीयस्यान्याय्यत्वात्' इत्येव स्वीकर्तुं युक्तम्। अथ–न तथा युक्तम्, तथात्वे संवादिप्रवृत्तिरूपकार्यवैलक्षण्यं न स्यात्–इत्युच्यते, तदा प्राप्तं अपरमपि गौरवम्। विशिष्टज्ञानजन्यतायां प्रवृत्तित्वस्यैवावच्छेदकत्वसम्भवे[2] तत् परित्यज्य [3]संवादिप्रवृत्तित्वस्य तथात्वकल्पनात्, प्रवृत्तिमात्रे इष्टासंसर्गाग्रह: कारणं संवादिप्रवृत्तौ विशिष्टज्ञानं कारणमिति प्रकारद्वयकल्पनाच्च। मन्मते तु सर्वत्र प्रवृत्तित्वेन लघुना विशिष्टज्ञानत्वेन एकेनैव कार्यकारणभावग्रहात् नास्ति गौरवमिति स्पष्टमेव। प्रवृत्तौ संवादित्वं हि [4]इष्टफलसमर्थवस्तुविषयत्वम्, तच्च [5]अर्थसमाजग्रस्तमिति[6] न कार्यतावच्छेदककोटौ निवेशनीयम्। न चैवंसति भ्रमरूपं विशिष्टज्ञानं किञ्चित् कल्पनीयमिति तवापि गौरवमिति वाच्यम्। तस्य लाघवतर्कनिष्पन्नकार्यकारणभावग्रहमूलकतया [7]फलमुखत्वेनादोषत्वात्।

अपि च–निर्धूमे वह्निमति पर्वते जायमानायां वह्निविषयकसदनुमितौ यत्र 'वह्निव्याप्यधूमवान्' इति परामर्श:, तत्र परेण पक्षे धूमासंसर्गाग्रहविषयत्वाभाव एव

1. आ. 'तावत्' इत्यधिकम्।
2. आ. सम्भवेऽपि।
3. मु. संवादिविषयप्रवृत्तित्वस्य
4. आ. उद्दिष्टफल।
5. मु. अर्थसत्तासमाज

6. **अर्थसमाजग्रस्तं**—सामग्रीद्वयादिसमावेशप्रयुक्तम्। प्रवृत्तिसामग्री विशिष्टज्ञानम्। संवादित्वसामग्री प्रवृत्तिविषयनिष्ठ इष्टफलजनकतावच्छेदकधर्मवत्त्वादिकम्। तथा च नीलघटत्वादिवत् संवादिप्रवृत्तित्वं न कस्यचित्कार्यतावच्छेदकं इत्यर्थ:।

7. **फलमुखत्वेन**—फलं प्रकृतकार्यकारणभावग्रह:, तदनन्तरभावित्वेन। **अदोषत्वात्**—प्रथमोत्पन्नकार्यकारणभावग्रहाप्रतिबन्धकत्वात्। न हि पश्चादुत्पद्यमानं गौरवज्ञानं प्रथमस्योत्पत्तौ प्रतिबन्धकं भवति। प्रथमस्योत्पत्तिसमये तस्य अलब्धस्वरूपत्वात् इत्यर्थ:। न च गौरवज्ञानानन्तरं प्रथमोत्पन्नेऽप्रमात्वनिश्चयात् तत् त्यज्यते इति वाच्यम्। तथासति प्रथमगृहीताया: कार्यान्विते शक्ते: पश्चात् सिद्धार्थे दर्शनात् त्यागापत्ते:, न चैतत्तवेष्टं इति भाव:।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारणं वाच्यमिति अनुमितिमात्रे हेतोः पक्षासंसर्गाग्रह एव कारणत्वेन स्वीकर्तव्यः। वैरूप्यकल्पनाया अनुचितत्वात्। तथा च 'इदं रजतं' इति भ्रमस्थले इष्टसाधनताव्याप्यरजतत्वासंसर्गाग्रहस्य इदमंशे सम्पन्नतया कारणानुसारेण 'इदमिष्टसाधनं' इति भ्रमरूपानुमितिः केन वारयितुं शक्या। प्रत्यक्ष इव अनुमितावर्थसत्ताया अनपेक्षितत्वात्, अन्यथा भूतभविष्यतोरनुमितिर्न स्यात्। एवं रजतत्वांशे असंसर्गाग्रहवादिनोऽपि इष्टसाधनतांशे भ्रमरूपविशिष्टज्ञानं [1]गलग्रहन्यायेन प्राप्नोत्येव, तत् किमादावेवपलायनेनेति रजतत्वांशेऽपि तदस्तु।

अपि[2] च सत्यरजतस्थले 'नेदं रजतं' इति ज्ञानस्य न रजतासंसर्गविषयत्वं वक्तुं शक्यत इति तत्रापीष्टासंसर्गाग्रहस्य सत्त्वात् प्रवर्तेत।

अथ स्वातन्त्र्यं तत्र नास्ति, तच्च भेदप्रतियोगित्वेनानुपस्थितत्वम्; तत्र वक्तव्यम्—[3]किं तत् पृथग्भूतं कारणं उत इष्टविशेषणतया असंसर्गाग्रहे स्वीक्रियते? तत्र न तावद्द्वितीयः। 'नेदं रजतं' इति भ्रमस्थले भेदप्रतियोगित्वेनानुपस्थितेष्टभेदाग्रहस्य द्वितीयपक्षेपर्यवसितस्य कारणस्य [4]विद्यमानत्वात्। अयं हि विशिष्टाभावो 'नेदं रजतं' इति भ्रमस्थले इष्टभेदग्रहरूपस्य विशेष्यस्य अभावमादाय, इष्टस्य भेदप्रतियोगित्वेन उपस्थिततया भेदप्रतियोगित्वेनानुपस्थितत्वरूपविशेषणाभावमादाय च सिद्ध्यतीति, यदर्थं विवक्षितं तत् न सिद्ध्यति। अपि च [5]एतद्विवक्षाभावे नेदंरजतमिति प्रमास्थले प्रवृत्तिर्न प्रसज्यते। भेदग्रहस्य सत्त्वेन तदभावस्याभावात्। विवक्षायां तु तत्र विशेष्यसत्त्वेऽपि भेदप्रतियोगित्वेनोपस्थिततया विशेषणाभावमादाय विशिष्टाभावः सिद्ध्यतीति तत्रापि प्रवृत्तिः प्रसज्यत एव। किं बहुना, भेदप्रतियोगित्वेनानुपस्थितेष्टभेदग्रहस्य प्रतियोगिनोऽप्रसिद्ध्या तदभाव एव न प्रसिद्ध्यति। इष्ट-

---

1. **गलग्रहन्यायेन**—अनिच्छतोऽपि बलात्कारेण।

2. **अपि चेत्यादि** रजते 'नेदं रजतं' इति भ्रमस्थले अन्यथाख्यातिस्वीकारापत्तिभिया 'इदं' इति 'न रजतं' इति ज्ञानद्वयस्य त्वया स्वीकर्तव्यत्वेन पुरोवर्तिनि इष्टभेदाग्रहसत्त्वं इति भावः।

3. मू. 'किं' नास्ति

4. **विद्यमानत्वादिति** पुरोवर्तिनि प्रवृत्त्यापत्तिरूपस्य पूर्वोक्तदोषस्य तादवस्थ्यात् इति शेषः। दोषतादवस्थ्यमुपपादयति—**अयंहि** इत्यादिना।

5. **एतद्विवक्षाभावे इति** पूर्वोक्तं स्वातन्त्र्यं एतच्छब्दार्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भेदग्रहस्थले इष्टस्य भेदप्रतियोगित्वेन उपस्थितिनियमात् तथानुपस्थितेष्टभेदग्रहस्य[1] दुस्सम्पादत्वात् प्रतियोग्यप्रसिद्ध्या तदभावाप्रसिद्धौ तादृशविशिष्टाभावस्य कारणत्वं दूरोत्सारितमिति न द्वितीयकल्पः सङ्गच्छते ।

अथ इष्टभेदाग्रह एकं कारणं इष्टस्य भेदप्रतियोगित्वेनानुपस्थितत्वमपरं कारणं इत्याद्यः पक्षः स्वीक्रियते, तदा गौरवं तावत् स्पष्टमेव । 'इदं रजतं घटनिष्ठभेदप्रतियोगि' इति ज्ञाने च प्रवृत्तिर्न स्यात् । भेदप्रतियोगित्वेनोपस्थित-तया तदभावस्याभावात् ।

अथ—[2]पुरोवर्ति[3]गृह्यमाणसंसर्गकभेदप्रतियोगित्वेनानुपस्थितत्वम् । 'इदं रजतं घटनिष्ठभेदप्रतियोगि' इत्यत्र तु [4]घटगृह्यमाणसंसर्गकभेदप्रतियोगित्वेन उपस्थितावपि पुरोवर्तिगृह्यमाणसंसर्गकभेदप्रतियोगित्वेन [5]अनुपस्थितत्वमस्ति । अतो नानुपपत्तिरिति चेत्, न—तथा सति 'नेदं रजतं' इति भ्रमस्थले अख्यातिवादिना[6] भेदे पुरोवर्तिगृह्यमाणसंसर्गकत्वस्य [7]वक्तुमशक्यतया, भेदप्रतियोगित्वेनोपस्थिति-रूपस्य विशेष्यस्य[8]सत्त्वेन केवलाभावस्य वक्तुं अशक्यत्वेपि पुरोवर्तिगृह्यमाण-संसर्गकत्वरूपविशेषणाभावमादाय विशिष्टाभावः प्राप्नोतीति तत्र प्रसज्यत एव प्रवृत्तिः ।

[9]अथ—[10]पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनानुपस्थितत्वम् । तच्च

---

1. मु. भेदाग्रहस्य

2. **पुरोवर्तिगृह्यमाणसंसर्गकेति** स्वातन्त्र्यं इत्यादिः, गृह्यमाणपुरोवर्तिसंसर्गके-त्यर्थः । एवं घटगृह्यमाणसंसर्गकेत्यस्याप्यर्थः । एवं उत्तरत्राप्यर्थो बोध्यः ।

3. आ. पुरोवर्तिनिगृह्य° । एवमुत्तरत्रापि ।

4. आ. घटे गृह्य

5. मु. नोपस्थित

6. मु. वादिनो

7. **वक्तुमशक्यतयेति** अयथार्थज्ञानस्वीकारापत्तिभिया इत्यादिः ।

8. मु. सत्त्वे

9. **अथेति** स्वातन्त्र्यमितिशेषः ।

10. आ. पुरोवर्तिन्यगृही

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'नेदं रजतं इति भ्रमेऽपि न सम्भवत्येव । [1]तत्र हि यथा पुरोवर्तिगृहीतसंसर्गको न भवति भेदः, तथा पुरोवर्तिगृहीतासंसर्गकोऽपि न भवति । ततश्च [2]पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनोपस्थितत्वात् रजतस्य [3]अनुपस्थितत्वरूपस्वातन्त्र्यं तत्र नास्तीति न प्रवृत्तिः । [4]'इदं रजतं[5] घटनिष्ठभेदप्रतियोगि' इत्यत्र तु रजतभेदसंसर्गाभावरूपस्य रजताभेदस्य पुरोवर्तिनि गृहीततया पुरोवर्तिन्यगृहीतासंसर्गको न भवति रजतभेद इति, भेदप्रतियोगित्वेनोपस्थितिरूपविशेष्यस्य सत्त्वेन केवलाभावस्य वक्तुमशक्यत्वेऽपि पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनोपस्थितिरूपस्य विशिष्टस्य प्रतियोगिनोऽभावःसंभवतीति न तत्र प्रवृत्त्यनुपपत्तिरिति चेत्–न–[6]परमते यथा 'इदं' 'न रजतं' इति अधिकरणसंसर्गग्रहं विना सप्रतियोगिकभेदग्रहरूपो ऽसंसर्गाग्रहः, एवं 'इदं न' 'रजतं' इति प्रतियोगिसंसर्गग्रहं विना साधिकरणकभेदग्रहरूपोऽसंसर्गाग्रहस्संभवतीति तत्र प्रवृत्तिः स्यात् । स्वातन्त्र्यस्य तत्रापि सम्भवात् । तत्र हि पुरोवर्तिन्यधिकरणे गृहीतसंसर्गत्वेन [7]पुरोवर्त्यगृहीतासंसर्गको भवति भेदः । रजते च तत्प्रतियोगित्वस्याग्रहात् पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनानुपस्थितत्वमस्तीति ।

अथ - भेदप्रतियोगित्वेनानुपस्थितत्वमित्यनेन भेदप्रतियोगित्वासंसर्गाग्रहाभावो विवक्षितः । एवं च निष्प्रतियोगिकोपस्थितिस्थले यथा रजते भेदप्रतियोगित्वसंसर्गग्रहो नास्ति एवं भेदप्रतियोगित्वासंसर्गग्रहोऽपि नास्तीति तत्र भेदप्रतियोगित्वा-

---

1. **तत्रहियथेति** अख्यातिवादे हि अयथार्थज्ञानाङ्गीकारापत्तिभिया 'नेदंरजतं' इति भ्रमस्थले 'इदं' इति 'न रजतं' इति ज्ञानद्वयाङ्गीकारात् तेन पुरोवर्तिनि रजतभेदसंसर्गस्य रजतभेदासंसर्गस्य वा न ग्रहणं इति भावः ।

2. आ. पुरोवर्तिन्यगृही

3. **अनुपस्थितत्वरूपेति** पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनानुपस्थितत्वरूपेत्यर्थः ।

4. मु. 'इदं' नास्ति

5. **इदं रजतमिति** रजतं इदमर्थः । 'इदं रजतं घटनिष्ठभेदप्रतियोगि' इति विशिष्टज्ञानमिदं अख्यातिवादेऽपि ।

6. **परमते यथेति** नेदं रजतमिति भ्रमस्थले इति शेषः । अख्यातिवादे चात्र ज्ञानद्वयमिति न विस्मर्तव्यम् ।

7. मु. पुरोवर्तिन्यगृही॰

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संसर्गाग्रहस्य विद्यमानतया तदभावो नास्तीति न तत्र स्वातन्त्र्यम् । 'इदं रजतं घटनिष्ठभेदप्रतियोगि'[1]इत्यत्र भेदप्रतियोगित्वसंसर्गग्रहसत्त्वेन[2] तदसंसर्गाग्रहाभावो यद्यपि न विद्यते, तथापि भेदे पुरोवर्त्यगृहीतासंसर्गकत्वं नास्तीति पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वासंसर्गाग्रहाभावरूपं स्वातन्त्र्यं तत्र संभवतीति न काचिदनुपपत्तिरिति चेत्, न—एवमपि '[3]इदं रजतं घटनिष्ठभेदप्रतियोगि' इति भ्रमस्थले अभेदग्रहस्य[4] वक्तुमशक्यतया पुरोवर्त्यगृहीतासंसर्गको भवति भेदः, तत्प्रतियोगित्वेनोपस्थिते रजते प्रतियोगित्वासंसर्गाग्रहोऽपि[5] विद्यत इति विशेषणविशेष्ययोरुभयोरपि सत्त्वात् न विशिष्टाभावरूपं स्वातन्त्र्यं सम्भवतीति तत्र प्रवृत्तिर्न स्यात् ।

अपि च रङ्गरजतयोः 'इदं रजतं नेदं' इति विपरीतभ्रमस्थले रङ्गे प्रवृत्तिर्नस्यात् । [6]तत्र पुरोवर्तिनि रङ्गे अगृहीतासंसर्गको भवति रजतभेदः, तत्प्रतियोगित्वेन च रजतस्योपस्थितत्वात् पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वासंसर्गाग्रह एव विद्यत इति न तदभावरूपं स्वातन्त्र्यं सम्भवतीति ।

किं बहुना, 'इदं रजतं' इति प्रसिद्धभ्रमस्थलेऽपि नोक्तस्वातन्त्र्यसम्भवः । तत्र पुरोवर्तिन्यां शुक्तौ अगृहीतासंसर्गकभेदस्य[7] रजते प्रतियोगित्वं यथा न गृह्यते तथा प्रतियोगित्वासंसर्गोऽपि न गृह्यत इति पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वासंसर्गाग्रहसत्त्वात् न तदभावरूपं स्वातन्त्र्यं सम्भवतीति तत्रापि प्रवृत्तिर्न स्यात् ।

यच्चोक्तं क्वचित् ज्ञानस्याप्रामाण्ये सर्वत्रापि प्रामाण्यसंशयापत्त्या निष्कम्प-

---

1. **इत्यत्रेति**—प्रमास्थले रजते इति शेषः ।

2. मु. ०त्वेनासंसर्गा०

3. **'इदं रजतं घटनिष्ठभेदप्रयोगि' इतिभ्रमस्थले इति** अत्र इदमर्थो वस्तुतः शुक्तिः । अत्र च ज्ञानद्वयमख्यातिवादे 'इदं' इति ग्रहणं 'घटनिष्ठभेदप्रतियोगि रजतं' इति स्मरणं घटनिष्ठभेदप्रतियोगित्वविशिष्टरजतविषयकम् ।

4 **अभेदग्रहस्य**—पुरोवर्तिनि रजतभेदसंसर्गाभावरूपाभेदग्रहस्य । मिथ्याज्ञानस्वीकारप्रसङ्गेनेत्यादिः ।

5. मु. 'अपि' नास्ति ।

6. आ. तत्र हि

7. आ. रजतभेदस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रवृत्तिर्न स्यादिति, तन्न—परस्यापि [1]हि क्वचिद्विद्यमानासंसर्गाग्रहाङ्गीकारे सर्वत्रापि तत्संशयापत्त्या निष्कम्पप्रवृत्तिर्न स्यादिति तुल्यम् । अतः परेणापि निष्कम्पप्रवृत्तिरित्थमुपपादनीया ।

तत्र यदि परतस्त्ववाद आश्रीयते, तदा तदनुसारेण ।

स च वाद इत्थं—तद्वति तत्प्रकारकज्ञानत्वं[2] प्रामाण्यम्[3] । इदं च सर्वेषामपि सम्प्रतिपन्नम् । यद्यपि सिद्धान्ते इदं शुक्तिरजतज्ञानसाधारणम्, तदप्रामाण्यं[4] चाभ्युपगम्यते; तथाप्यनेनोपाधिना सिद्धान्ते तत् प्रमाणमेव उपगम्यते । प्रवृत्तावपि [5]तावदेवोपयुज्यते । तज्ज्ञानेनैव[6] तदभाववत्ताज्ञानप्रतिबन्धसम्भवात् । अप्रामाण्याभ्युपगमस्तु बाध्यत्वाभिप्रायेण । परतस्त्वमते च न प्रामाण्यज्ञानं प्रवृत्तौ कारणं शक्यते वक्तुम् । अनवस्थापातात् । तथा हि-प्राथमिकानुव्यवसायेन प्रामाण्यघटकीभूतस्तद्वत्तांशो न गृह्यते [7]अनभ्यासदशापन्नजलादिज्ञाने प्रामाण्यसंशयानुसारात् । घटकाज्ञाने तद्घटितं प्रामाण्यमपि न गृह्यते । किन्तु समीपोपसर्पणानन्तरं वह्नित्वप्रकारकज्ञानविषयीभूते दाहादिसामर्थ्योपलम्भे 'इदं ज्ञानं दाहसमर्थे वह्नित्वप्रकारकं' इति प्रतीते तेन विशिष्टेन धर्मेणानुमीयते[8] । एवं यथासम्भवं तत्रतत्रान्येऽप्युपायास्सम्भवन्तीति अभ्युपगमः । तत्र यदि प्रवृत्तिप्रतिबन्धकीभूताप्रामाण्यप्रतीतिविघट-

---

1. मु. 'हि' नास्ति

2. आ. ज्ञानं

3. आ. प्रमाणम्

4. आ. तदप्रमाणं

5. **तावदेवेति**—एवेन अबाध्यत्वव्यावृत्तिः ।

6. **तज्ज्ञानेनैवेति** तद्वत्त्वं तच्छब्दार्थः ।

7. **अनभ्यासदशापन्नेति** प्राथमिकेत्यर्थः । अभ्यासो हि नाम पुनः पुनः प्रयोगः क्रियाभ्यावृत्तिः, विषयस्य चाभ्यस्तता भूयोभूयः प्रवृत्तिः, तद्दशायां न प्रमात्वसंशयः, यथा स्वशरीरग्रहे निजगृहकुड्यस्तम्भादिप्रतिभासे वा सहस्रकृत्वः प्रवृत्तिसंवादज्ञानबलात् न प्रमात्वसंशयः-इति जयन्तभट्टः । तथा च, अभ्यासः—घटवत्तादिज्ञानानन्तरं सफलप्रवृत्तेः पौनःपुन्यम्, तस्मिन् सति या दशा—पूर्वजातज्ञाने प्रामाण्यव्याप्यसफलप्रवृत्तिजनकत्वज्ञानसाहित्यं, तद्विशिष्टभिन्नेत्यर्थः ।

8. **अनुमीयते इति** प्रामाण्यमिति शेषः । इदं वह्निज्ञानं प्रमा, दाहसमर्थविशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वात्, यन्नैवं तन्नैवं यथा अप्रमा-इत्यनुमानाकारः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कतया[1] प्रामाण्यज्ञानस्य कारणत्वमभ्युपगम्येत, तदा प्रामाण्यग्रहकारणीभूतलिङ्ग-ज्ञानेऽपि अप्रामाण्यज्ञानस्य प्रामाण्यानुमितिप्रतिबन्धकत्वात् तदनुमितौ लिङ्गज्ञान-प्रामाण्यज्ञानमपि कारणं भवेत् । एवं [2]तत्तत्प्रामाण्यानुमितौ तत्तल्लिङ्गज्ञानप्रामाण्य-[3]ज्ञानं इत्यनवस्था । अतोऽप्रामाण्यज्ञानाभाव एव प्रवृत्तौ कारणम् । स च क्वचि-त्स्वारसिकः[4] । यत्र त्वप्रामाण्यज्ञानं केनचित्कारणेनावतरति तत्र प्रामाण्यज्ञाने यत्नानुसरणमिति सर्वत्र प्रामाण्यज्ञानानपेक्षणात् नानवस्था । एवं यदि—त्वयाप्युत्पन्ने ज्ञाने यत्र स्वारसिकः असंसर्गाग्रहत्वज्ञानाभावः, तत्र तावतैव प्रवृत्तिः, यत्र तु दोष-सहकृतसामग्रीजन्यत्वज्ञानेनासंसर्गाग्रहत्वज्ञानं तत्र [5]यत्नान्तरानुसरणमिति [6]प्रवृत्तौ प्रामाण्यज्ञानस्य कारणत्वं परित्यज्य उच्यते ; तदन्यस्यापि[7] तुल्यम् ।

यदि च भावाभावयोर्मध्ये भावस्यैव लघुत्वात् अप्रामाण्यज्ञानविघटकतया प्रामाण्यज्ञानस्यैव प्रवृत्तौ कारणत्वमुच्यते, तदा तु प्रामाण्यस्य स्वतस्त्वं अनवस्था-परिहारायाभ्युपेयम् ।

तदित्थं—ज्ञानस्य स्वप्रकाशत्वे अस्वप्रकाशत्वे वा यत्र सविषयकं ज्ञानं भासते तत्र सर्वत्र तद्गतं प्रामाण्यं [8]भासत एवेति उत्सर्गः । परतस्त्ववादिनाऽपि हि वह्निज्ञाने भासमाने वह्नित्वप्रकारकत्वं तज्ज्ञाने यद्विशेष्यं तद्विशेष्यकत्वं च भासत इति अभ्युपगतमेव, प्रकारविशेष्ययोः परं वैशिष्ट्यमात्रं न भासत इत्युच्यते । तन्निर्बन्धमात्रम् । योग्यस्य[9] अभानकल्पनाया विरुद्धत्वात् । अयोग्यत्वे च कदापि

---

1. **अप्रामाण्यप्रतीतिविघटकतयेति** प्रामाण्यज्ञानस्य कारणत्वसंभावनायां युक्तिमात्रमिदम्, न तु अप्रामाण्यप्रतीतिविघटनद्वारा प्रामाण्यज्ञानस्य कारणत्ववर्णने तात्पर्यम् । तथा सति अप्रामाण्यप्रतीतिविरहस्थले प्रामाण्यज्ञानस्य अनपेक्षाप्रसङ्गात् । तथा च अप्रामाण्यप्रतीत्यभावप्रयोजकतयेति तदर्थः ।

2. मु. तत्र तत्र प्रामा०

3. मु. ज्ञानमपि

4. **स्वारसिकः** स्वप्रतियोग्युत्पत्तिकारणाभावप्रयुक्तः ।

5. मु. यत्नान्तरमनुसरणीयम्

6. **प्रवृत्तौ प्रामाण्यज्ञानस्य कारणत्वं परित्यज्येति** उक्तपरित्याग एव पूर्वोक्तं प्रामाण्यपरतस्त्ववादानुसरणम् ।

7. **अन्यस्यापि**—भ्रमस्थले विशिष्टज्ञानाङ्गीकर्तुरपि

8. मु. गृह्यत एव

9. **योग्यस्येति** ज्ञानत्वमिव प्रमात्वमपि योग्यमिति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न भासेतेति प्रामाण्यग्रह एव लुप्तो भवेत्। न चैवं जलादिज्ञाने प्रामाण्यसंशयो न स्यादिति वाच्यम्। यथा दोषवशात् योग्यत्वेऽपि स्थाणुत्वांशे निश्चयो न भवति एवं प्रामाण्यांशेऽपि सम्भवात्। एवं च सति चक्षुरुन्मीलनानन्तरं 'इदं जलं जलत्वेन जानामि' इति व्यवहारोऽपि सङ्गच्छते। अत्र हि जले जलत्ववैशिष्ट्यं ज्ञाने च जलविशेष्यकत्वे सति जलत्वप्रकारकत्वं च व्यवह्रियते। इदमेव च जलज्ञानस्य प्रामाण्यम्। स्वतःप्रामाण्यानभ्युपगमे च अयं व्यवहारो न स्यात्।

अपि च तदनभ्युपगमे अनुमानेनापि तत् ग्रहीतुं न शक्यते। तत्र लिङ्गानिरूपणात्। न च 'इदं वह्निज्ञानं प्रमाणं, दाहसमर्थे वह्न्यर्थिप्रवृत्तिजनकत्वात्' इत्येवंरूपं अनुमानं सम्भवतीति वाच्यम्। एवमपि ज्योतिष्टोमादिवाक्यजन्यज्ञाने प्रामाण्यानुमितौ तादृशं लिङ्गं न सम्भवति। एतादृशलिङ्गज्ञानं हि प्रवृत्त्यनन्तरं यत्र फलजननसामर्थ्योपलम्भः तत्रैव। ज्योतिष्टोमादिवाक्ये तु प्रवृत्तेः प्रागेव प्रामाण्यनिर्धारणमपेक्षितम्, अन्यथा निष्कम्पप्रवृत्त्यनुपपत्तेः।

नापि गुणजन्यत्वलिङ्गकानुमानं सम्भवति, प्रमाया गुणजन्यत्वस्यैवासम्प्रतिपत्तेः। तत्र गुणशब्देन किं चक्षुर्गतं रूपं विवक्षितं, उत भूयोऽवयवेन्द्रियसन्निकर्षः, [1]स्थूलवयवसन्निकर्षो वा, यावद्विषयेन्द्रियसन्निकर्षो वा, विशेषणवद्विशेष्येन्द्रियसन्निकर्षो वा, अर्थयथार्थज्ञानं[2] वा।

तत्र न तावच्चक्षूरूपं तथा सम्भवति। तस्य हि चाक्षुषप्रमायां गुणत्वं वक्तव्यम्। तत्तु न सम्भवति, तस्यास्तज्जन्यत्वे प्रमाणाभावात्। न च व्यञ्जकतेजोरूपत्वेन आलोकरूपवत् तस्य जनकत्वमिति वाच्यम्। उद्भूतस्यैव तथाविधस्य जनकत्वात्। चक्षूरूपस्य चानुद्भूतत्वात्। उद्भूतानुद्भूतसाधारण्येन लाघवाद्व्यञ्जकरूपत्वेनैव जनकत्वेऽपि तादृशगुणजन्यत्वस्य सर्वप्रमासाधारण्यं[3] न सम्भवति।

---

1. मु. स्थूलावयवि

2. मु. याथार्थ्यज्ञानं

3. **सर्वप्रमासाधारण्यं न सम्भवतीति** चाक्षुषप्रमाभिन्न-प्रमासु कारणत्वाभावात् इति भावः। 'प्रमाऽसाधारण्यं न सम्भवति' इति पाठे चक्षुषेव चक्षुरूपेणापिजन्यताया भ्रमसाधारणत्वादिति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत एव भूयोऽवयवेन्द्रियसन्निकर्षोपि[1] न गुणः। तस्य स्थूलावयविप्रत्यक्षप्रमायां कारणत्वेऽपि सर्वत्र तज्जन्यत्वस्य प्रामाण्यानुमितिलिङ्गत्वासम्भवात्। न च तस्यामपि तस्य कारणत्वम्। भूयोऽवयवेन्द्रियसन्निकर्षाभावेऽपि यत्किञ्चित्प्रदेशे सन्निकर्षमात्रेण तदवच्छेदेन स्थूलावयविप्रत्यक्षदर्शनात्। न च सर्वावयवावच्छेदेन स्थूलावयविप्रत्यक्षप्रमायां स कारणमिति वाच्यम्। यदवयवावच्छेदेन यत्र सन्निकर्षः तदवयवावच्छेदेन तस्य प्रत्यक्षत्वमिति [2]विशेषकारणादेवोपपत्तौ पृथक्कारणकल्पनायाः[3] अयोगात्।

नापि स्थूलावयवावच्छेदेन सन्निकर्षः स्थूलावयविप्रत्यक्षप्रमायां गुणः। [4]द्व्यणुकाद्यवच्छेदेन सन्निकर्षे भ्रमस्याप्यनुदयेन[5] तस्य प्रमायां असाधारणकारणरूपगुणत्वानुपपत्तेः।

नापि यावद्विषयेन्द्रियसन्निकर्षो गुणः। तस्यापि भ्रमसाधारणत्वेन प्रमां प्रत्यसाधारणकारणगुणत्वानुपपत्तेः। [6]न हि यावद्विषयेन्द्रियसन्निकर्षं विना परमते भ्रमोऽपि सम्भवति। यदि तु दोषवशात् असन्निकृष्टस्यैव रजतादेर्भानं सम्भवतीत्युच्यते, तदा निधिशास्त्रोक्ताञ्जनादिवशात् असन्निकृष्टस्यैव निधेर्भानं सम्भवतीति यावद्विषयसन्निकर्षः प्रमायामपि गुणो न स्यात्।

न च विशेषणवद्विशेष्येन्द्रियसन्निकर्षो गुणः। 'लोहितःस्फटिकः' इति भ्रमेऽपि हि परम्परासम्बन्धेन विशेषणवतो विशेष्यस्य सन्निकर्षोऽस्तीति [8]अस्यापि

---

1. मु. 'अपि' नास्ति

2. **विशेषकारणादेवेति** तत्तत्प्रदेशप्रत्यक्षमात्रार्थं उक्तविशेषकारणस्य आवश्यकत्वात् इति भावः।

3. मु. कारणत्वकल्पनायाः

4. **द्व्यणुकाद्यवच्छेदेनेति** स्थूलावयविनि इत्यादिः। द्व्यणुकस्य सूक्ष्मावयवत्वात् इति भावः। परमाणुः आदिशब्दार्थः।

5. **भ्रमस्याप्यनुदयेनेति** भ्रमं प्रत्यपि स्थूलावयवावच्छेदेन सन्निकर्षस्य कारणतया इति शेषः।

6. **नहीति** असन्निकृष्टभाने अतिप्रसङ्गेन शुक्तिरजतादिष्वपि संस्कारस्य स्मृतेर्वा सन्निकर्षत्वस्य परैः अभ्युपेयत्वात् इति भावः।

7. **भ्रमेऽपीति** लौहित्यस्य साक्षात्सम्बन्धावगाहिनि इत्यादिः।

8. मु. तस्यापि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न प्रमां प्रति असाधारण्यम् । न च येन सम्बन्धेन विशेषणवत्तावगाहि ज्ञानं तेन सम्बन्धेन विशेषणवद्विशेष्येन्द्रियसन्निकर्षो न भ्रमसाधारण इति वाच्यम् । यत्तत्पद-घटितत्वेनाननुगतस्य [1]अनुगतधर्मावच्छिन्नकार्यप्रयोजकत्वासम्भवात्, परेण यावद्विष-येन्द्रियसन्निकर्षस्य विशेषणवद्विशेष्यसन्निकर्षस्य च प्रत्यक्षप्रमायामेव गुणत्वाङ्गीकारेण [2]असार्वत्रिकत्वाच्च ।

नापि प्रमामात्रे अर्थयथार्थज्ञानं कारणम् । घटादिप्रमायां व्यभिचारेण[3] तस्य कारणत्वानुपपत्तेः । यदि तु—वक्तृवाक्यार्थयथार्थज्ञानस्य शाब्दप्रमायां कारण-त्वात् 'यद्विशेषयोः कार्यकारणभावः बाधकं विना तत्सामान्ययोरपि'[4] इति न्यायेन प्रमामात्रेऽर्थयथार्थज्ञानस्य कारणत्वं कल्प्यते, यत्र चास्मदीयं तादृशं ज्ञानं न सम्भवति तत्रेश्वरीयं तत् स्वीक्रियते—इत्युच्यते तदा शाब्दभ्रमे वक्तृवाक्यार्थ-भ्रमस्यापि [5]कारणत्वदर्शनात् यद्विशेषयोरिति न्यायात् भ्रममात्रं प्रति भ्रमस्य कारणत्वं प्रकल्प्य यत्रास्मदीयभ्रमो न सम्भवति तत्रेश्वरभ्रमस्य कारणत्वं कल्प्यत इति ईश्वरे भ्रमोऽपि सिध्येत् । ननु—तदभाववति तत्प्रकारकं ज्ञानं भ्रमः, तद-पेक्षया तदभाववज्ज्ञानं लघु । तदेव भ्रमे [6]कारणमस्तु । तदाश्रयतायां चेश्वरस्य न कोऽपि विरोधः । एवं च सति प्रमायामपि तद्वत्ताज्ञानमेव कारणमस्त्विति आपाद-नन्तु नानिष्टम् । तावताऽपि प्रमाया गुणजन्यत्वसिद्धेः [7]तदाश्रयतया ईश्वरसिद्धेश्च—

---

1. **अनुगतधर्मः**—प्रमात्वम् । न च कार्यतावच्छेदकं तद्वति तत्प्रकारकत्वरूपं प्रमात्वमपि अननुगतसम्बन्धघटिततद्वत्त्वघटितत्वात् अननुगतमेवेति शङ्क्यम् । सम-वायेन घटत्ववति समवायेन घटत्वप्रकारकत्वस्य सर्वघटप्रमाऽनुगतत्वात्, उक्तसन्नि-कर्षरूपगुणस्य विशेष्यव्यक्तिभेदेन भिन्नत्वात् इति भावः । मु. धर्मावच्छेदेन

2. आ. तस्यासार्व०

3. **व्यभिचारेणेति**—घटादिप्रत्यक्षप्रमातः पूर्वं घटप्रमायाः सत्त्वनियमादर्श-नादिति भावः ।

4. मु. 'अपि' नास्ति

5. मु. कारणत्वकल्पनात्

6. **कारणमस्त्विति**—धर्मिज्ञानरूपस्य तस्य सर्वत्र भ्रमात्पूर्वं सुलभत्वात् इति भावः ।

7. **तदाश्रयतयेति**—तद्वत्ताज्ञानरूपो गुणः तच्छब्दार्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति चेत्, न--तदभाववज्ज्ञानस्य[1] विशेषणविषयस्य[2] प्रमायामपि कारणतया तदभाववज्ज्ञानत्वेन भ्रमासाधारणकारणत्वानुपपत्तेः। न च तदभाववद्विशेष्यकज्ञानं भ्रमे कारणम्। विशेषणज्ञानस्यापि प्रमाप्राचीनस्य रजतमित्येवंरूपस्य रजताभाववद्विशेष्यकत्वात्। नापि [3]तदभाववद्भ्रमविशेष्यविशेष्यकज्ञानं कारणम्। तदपेक्षया भ्रमत्वस्यैव लघुतया[4] कारणतावच्छेदकत्वसम्भवे न तद्घटितं गुरु कारणतावच्छेदकमुपेयम्। अतो यद्विशेषयोरितिन्यायेन प्रमामात्रे यथार्थज्ञानं कारणं वक्तुं न शक्यत इति न गुणजन्यत्वलिङ्गकानुमानं सम्भवति।

ननु---पित्तादिदोषे न श्वैत्यादिप्रमा तदभावे तत्प्रमा इत्यन्वयतिरेकाभ्यां पित्तदोषस्य तत्प्रमाप्रतिबन्धकत्वं तदभावस्य कारणत्वं च तस्यामुपेयम्। एवमन्यत्रापि यथायथं दोषतदभावयोः [5]प्रमाप्रतिबन्धकत्वं कारणत्वं चाभ्युपेयमिति दोषाभावजन्यत्वलिङ्गकमनुमानं सम्भवतीति चेत्--न--दोषस्य प्रतिबन्धकत्वेऽपि तदभावस्य कारणत्वासम्भवात्। न हि कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम्। किं तु सत्यां सामग्र्यां कार्यानुत्पादप्रयोजकत्वम्। इतरथा व्यभिचारादिज्ञानानां [6]अनुमितिप्रतिबन्धकत्वाभावप्रसङ्गात्। अव्यभिचारज्ञानस्यैव तद्विरोधिनः अनुमितौ कारणत्वाभ्युपगमेन व्यभिचारज्ञानाभावस्य प्रतिबन्धकाभावत्वेऽपि कारणत्वानङ्गीकारात्।

अत एव उत्पत्तावपि परतस्त्वं परास्तम्। भ्रमप्रमासाधारणज्ञानसामग्रीतोऽधिकसामग्रीजन्यत्वमेव प्रमायाः परतस्त्वम्। सा चाधिका सामग्री गुणो वा दोषाभावो

---

1. **तदभाववज्ज्ञानस्येति**---वस्तुतो यः तदभाववान् तज्ज्ञानस्येत्यर्थः। तदभाववत्त्वेन ज्ञानन्तु भ्रमविरोधित्वात् न भ्रमकारणं इति भावः।

2. **विशेषणविषयस्य**---'घटवद्भूतलं' इत्यत्र विशेणीभूतघटादिविषयकस्य।

3. **तदभाववद्भ्रमविशेष्येति**---तदभाववत् यत् भ्रमविशेष्यं तदित्यर्थः।

4. **लघुतयेति**---भ्रमविशेष्यस्य आरोप्याभाववत्त्वनियमात् तदभाववत्त्वविशेषणं व्यर्थम्, भ्रमविशेष्यविशेष्यकज्ञानत्वन्तु भ्रमत्वापेक्षया गुरु इति भावः।

5. मु. तत्तत्प्रमाप्रति०

6. **अनुमितिप्रतिबन्धकत्वाभावप्रसङ्गादिति**---'विरोध्यविषयकज्ञानस्य प्रतिबन्धकत्वं जनकज्ञानविघटकत्वेनैव' इति वदतां नैयायिकानां कारणीभूताभावप्रतियोगित्वेनानभ्युपगतस्यापि प्रतिबन्धकत्वव्यवहारस्येष्टत्वेन न इष्टापत्तिसम्भव इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्ये तु यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते -इति। सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथाच लोकेऽनुभवः—शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवत्-इति।

वेति ते वदन्ति, तच्चोक्तगत्या न सम्भवतीति। न चैवं जन्यप्रमात्वमाकस्मिकं स्यादिति शङ्कनीयम्। जन्यज्ञानत्वं भ्रमप्रमासाधारणज्ञानसामग्रीमात्रप्रयोज्यम्, नाकस्मिकम्। प्रमात्वं तु तद्वति तत्प्रकारकत्वरूपं यत्तच्छब्दार्थघटितत्वात् अननुगतं न अनुगतं किञ्चित् कारणमपेक्षते। ततश्च भ्रमप्रमासाधारणज्ञानसामग्र्यतिरिक्तकारणानपेक्षत्वरूपं उत्पत्तावपि प्रमायाः स्वतस्त्वं सिध्यति।

ननु—ज्ञप्तिस्वतस्त्ववादिनाऽपि यत्र दोषवशादप्रामाण्यसंशयः तत्र ज्ञानग्राहकसामग्र्यैव प्रामाण्यं गृह्यत इति नाभ्युपगतम्, तत्र च तन्निश्चयार्थं दोषासहकृतसामग्रीजन्यत्वलिङ्गकानुमानं अन्यद्वा प्रामाण्यनिश्चायकं किञ्चिदुपेयमिति तदेव सर्वत्र [1]प्रामाण्यज्ञाने परतस्त्ववादिनोऽपि भविष्यतीति चेत्, न—योग्यधर्मस्य प्रामाण्यस्य सर्वत्र धर्मिग्राहकेण ग्रहणं इत्युत्सर्गेण इदंजलंजलत्वेनजानामीति व्यवहारानुसारिणा प्रथमप्रामाण्यज्ञानस्यापि धर्मिग्राहकसामग्रीजन्यत्वसिद्धौ सर्वत्र यत्नान्तरानुसरणस्यानुचितत्वात्। ततश्च प्रामाण्यस्वतस्त्वसिद्धौ न अख्यातिवादिना सर्वत्रानाश्वासदोष आपादयितुं शक्यते।

ननु—ज्ञानस्वप्रकाशत्वमते स्वतस्त्वं नोपगन्तुं युक्तम्। घटज्ञाने हि स्वगतं घटत्वप्रकारकत्वे सति घटत्ववद्विशेष्यकत्वरूपं प्रामाण्यं[2] स्वस्वरूपञ्च अवभासत इत्युपगमे [3]तत्र प्रामाण्यप्रकारकत्वे सति प्रामाण्यवद्विशेष्यकत्वं [4]प्रामाण्यान्तरमपि भासत इत्यापन्नम्[5]। न चैतद्युज्यते। तथा सति तत्र [6]अनन्तप्रामाण्यसमावेशेन

---

1. मु. प्रथमप्रामाण्यज्ञाने
2. **प्रामाण्यम्**—घटत्वघटितं घटत्वांशे प्रामाण्यम्।
3. **तत्र**—घटज्ञाने।
4. **प्रामाण्यान्तरम्**—प्रथमप्रामाण्यांशे तद्घटितं प्रामाण्यम्।
5. **इत्यापन्नमिति**—प्रामाण्यान्तरं सम्पन्नम्, प्रामाण्यघटकसर्वोपाधिस्फुरणाभ्युपमाच्च भासत इत्यापन्नम्, न्यायतौल्यात् इति भावः।
6. **अनन्तप्रामाण्येति**—द्वितीयप्रामाण्यघटितप्रामाण्यान्तरं तत्प्रामाण्यघटितप्रामाण्यान्तरं इत्येवंरीत्या अनन्तप्रामाण्येत्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेषां सर्वेषामपि भानकल्पनमनुभवविरुद्धं आपद्यते—इति चेत् न। स्वप्रकाशत्व-वादिना प्रामाण्यस्वतस्त्वं हि 'घटं घटत्वेन जानामि' इति व्यवहारानुसारेण कल्प्यते। अयं च व्यवहारः आद्यं यत् घटत्वांशे प्रामाण्यं तत्रैव। नैवं प्रामाण्यांशेऽपि ज्ञानस्य यत् प्रामाण्यं तत्रापि 'इदं प्रमाणज्ञानं प्रमाणत्वेन जानामि' इति व्यवहारोऽस्ति। अतो घटत्वांशे प्रामाण्यग्रहे तज्ज्ञाने यत् प्रामाण्य-प्रकारकत्वप्रामाण्यवद्विशेष्यकत्वं प्रामाण्यांशे ज्ञानप्रामाण्यघटकं [1]तदयोग्यमिति कल्प्यते। अतो नानन्तप्रामाण्यग्रहापादनं सम्भवतीति।

एवं मतान्तरेष्वस्वरसं सूचयित्वा स्वमतमुपसंहरति—**अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति।** अधिष्ठानस्य शुक्त्यादेः विषमसत्ताकरजताद्यात्मकतां [2]अनिर्वचनीयतां आचक्षत इत्यर्थः। न च अन्येत्वि-त्युक्त्या मतान्तरोपन्यासोऽयमिति शङ्कनीयम्। स्वमतोपन्यासेऽपि हि भाष्ये तथा व्यवहारो दृश्यते 'आत्मा स भोक्तुरित्यपरे' इत्यादौ। [3]रजतादिमिथ्यात्वं लोक-प्रसिद्ध्यापि द्रढयति—**तथा च लोक इति।** अत्र वियदादेर्ब्रह्मण्यारोपं सम्भावयितुं आद्यो दृष्टान्तः। एकस्यैव ब्रह्मणो जीवेश्वररूपेण भेदे अपरो दृष्टान्तः।

ननु—नायं व्यवहारः रजतादेर्मिथ्यात्वं प्रतिपादयति, किं तु शुक्तिभानस्य रजतभानतुल्यताम्, [4]क्रियासादृश्यप्रतिपादकत्वात् वतिप्रत्ययस्य—इति चेत्, न—अयं हि व्यवहारो 'नात्र रजतं मिथ्यैव रजतम्' इति तात्पर्येणेति सर्वलोकप्रसिद्धम्। अतः प्रयोगानुसारेण [5]यथा सादृश्यार्थयोरपि वतिप्रत्ययेवशब्दयोः दूरादागच्छन्

---

1. **तदयोग्यमितीति**—'योग्यत्वेऽपि तदस्फुरणं' इत्यपि वक्तुं युक्तम्। न च स्वप्रकाशज्ञानगतत्वेन तत्स्फुरणावश्यम्भावः। तद्गतगुणत्वद्रव्यत्वादिवत् अस्फुरण-सम्भवात्। एतेन 'योग्यधर्मस्य प्रामाण्यस्य' इति पूर्वग्रन्थविरोधः परिहृतो भवति। न च प्रामाण्यस्य स्वाश्रयसहभाननियमरूपस्वतस्त्वाभ्युपगमात् स्फुरणावश्यम्भाव इति शङ्क्यम्। उक्तनियमस्य औत्सर्गिकत्वेन क्वचिदपवादे बाधकाभावात् इति ध्येयम्।

2. **अनिर्वचनीयतामिति**—रजतादेरित्यादिः। इदं 'अन्ये तु' इत्यादि-भाष्यवाक्यं विशिष्टज्ञानसमर्थनपरतया **भामत्या** व्याख्यातम्, शून्यख्यातिनिराकरण-परतया **पञ्चपादिकया** व्याख्यातम्, अत्रतु स्वमतप्रदर्शनपरतया व्याख्यातम्।

3. मु. रजतमिथ्यात्वं

4. तेन तुल्यं क्रिया चेद् वतिः' [पा. सू. ५. १. ११५] इति पाणिन्यनुशासनात्।

5. मु. 'यथा' नास्ति

9

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम् ? सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि ।

देवदत्त इव देवदत्तवत् इत्यादौ [1]उत्कटकोटिकसंशयरूपसम्भावनार्थत्वमुपेयते, एवं प्रयोगानुसारेण अत्रापि वतिप्रत्ययस्य मिथ्यात्वमर्थो भविष्यतीति न काचिदनुपपत्तिः । अत्र शुक्तिग्रहणं वस्तुगतिमनुरुध्य, भ्रमदशायां शुक्तिकोल्लेखस्यासम्भवात् ।

एवं प्रत्यक्षप्राबल्यानुसारेण भासमानस्यानृतत्वानुपपत्त्या च कृतयोरध्यासाक्षेपयोः प्रत्यक्षस्य दौर्बल्यव्युत्पादनेन अरोपितस्य भानसमर्थनेन च परिहारो दर्शितः । इदानीं स्वप्रकाशस्य निरंशस्य ब्रह्मणोऽधिष्ठानत्वं न सम्भवतीति आक्षेपः क्रियते—**कथ पुनरिति** ।

अयमाशयः—अपरोक्षाध्यासे आरोप्यवस्तुविनिर्मुक्ततया [2]अधिष्ठानस्य सामान्यांशगोचरं अपरोक्षज्ञानं विशेषांशाज्ञानं च अपेक्षितम् । 'इदं रजतं' इत्याद्यध्यासेषु तथादर्शनात् । न सर्वात्मनैव भासमानत्वम्, न वा सर्वात्मनैवाभासमानत्वम् । इदं च प्रत्यगात्मनि अन्तःकरणाध्यासे न सम्भवति । यस्य हि सांशस्य ज्ञानान्तरेण जन्येन भानं तस्य अंशभेदसम्भवात् करणदोषेण विशेषांशज्ञानप्रतिबन्धे सति सामान्यांशगोचरं इन्द्रियेण ज्ञानं जायत इति युक्तम् । प्रत्यगात्मा तु निरंशः नापि जन्यं ज्ञानं तद्विषयम् । तव मते तस्य स्वप्रकाशतया स्वरूपभूतेन नित्यज्ञानेनैव भानाभ्युपगमात् । अतो नित्यज्ञानस्य करणदोषवशात् सामान्यांशमात्रावगाहित्वं विशेषांशानवगाहित्वमिति तावद्वक्तुं न शक्यते । तदिदमाह—**प्रत्यगात्मन्यविषय इति** । बुद्ध्यादिभ्यस्सांशेभ्यः प्रातिलोम्येन निरंशत्वरूपेण अञ्चति - वर्तते इति प्रत्यगात्मा, निरंश इति यावत् । अविषय इत्यनेन अध्यासोपयुक्तसामान्यांशमात्रग्रहणराहित्यमुक्तम् । ततश्च नाध्यास इत्यर्थः । उक्तमर्थं लोकदृष्ट्या साधयति —**सर्वो हीति** । पुरोऽवस्थिते - अपरोक्षे, विषये - सामान्यात्मना गृहीते । ननु— सिद्धान्ते आत्मनः स्वरूपज्ञानविषयत्वमेव न स्वीक्रियते । वृत्तिज्ञानविषयत्वं तु स्वीक्रियते । परमार्थतस्सांशत्वाभावेऽपि काल्पनिकं सांशत्वमप्यस्ति । बुद्ध्यादि-

---

1. उत्कटत्वं कोटित्वं च विषयताविशेषः
2. मु. अधिष्ठानसामा॰

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उच्यते—न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात् ,

सहितत्वमेकोंऽशः, तद्विनिर्मुक्तत्वमपरोंऽशः । उभयानुस्यूतं स्वरूपमात्रं सामान्यांशः। ततश्च पूर्वपूर्वाध्यासविषयीकृते अहमित्येवंरूपेण भासमाने आत्मनि बुद्ध्यादिविनिर्मुक्तत्वांशाग्रहणादुत्तरोत्तराध्यास उपपद्यत इति, अत आह—**युष्मत्प्रत्ययापेतस्येति**। युष्मत्प्रत्ययः-युष्मच्छब्दोल्लेखी प्रत्ययः, इदमित्येवंरूप इति यावत्। तदपेतः—इदमित्येवमप्रतीयमानः। ततश्च यदि वृत्तिविषयत्वं स्वीक्रियेत इदमित्येवं प्रतीतिः स्यात्। घटादीनां वृत्तिविषयाणां तथा दर्शनात्। नापि बुद्ध्यादिव्यतिरिक्तत्वांशाग्रह इति वक्तुं शक्यते। तव मते अरोपिताभावस्याधिष्ठानमात्रतया आत्मस्वरूपे गृह्यमाणे तदग्रहासम्भवात्। अपि च वृत्तिविषयत्वेऽभ्युपगम्यमाने आत्मनोऽविषयत्वमितिसिद्धान्तविरोधः। न च स्वरूपज्ञानाभिप्रायेणाविषयत्वमिति न विरोध इति वाच्यम्। वृत्तिज्ञानाभ्युपगमे तावन्मात्रेणैवात्मव्यवहारोपपत्तौ तदतिरिक्तं स्वरूपभूतं स्वप्रकाशं ज्ञानं इत्यभ्युपगमस्यैव निर्मूलत्वापत्तेः। अपि च [1]आत्मनस्स्वाश्रितवृत्तिविषयत्वाभ्युपगमे कर्तृकर्मत्वविरोधस्स्यात्। अतो नात्मन्यध्याससम्भवतीति भावः।

परिहरति—**उच्यत इति**। यत्तावदुक्तं आत्मनो विषयत्वे अविषयत्वं न स्यात् कर्तृकर्मत्वविरोधश्च स्यादिति, तन्नेत्याह—**न तावदिति**। यथा घटवति भूतले नीलघटो नास्तीत्युक्त्या न [2]एकान्तेन घटाभावो विवक्ष्यते, एवं अहंप्रत्ययविषयत्वेनाभ्युपगते आत्मनि स्वरूपज्ञानविषयत्वाभावोक्त्या न एकान्तेन विषयत्वाभावो विवक्षितः। नापि कर्तृकर्मत्वविरोधः। स्वरूपज्ञानं प्रति हि न मुख्यविषयत्वरूपं कर्मत्वं विवक्ष्यते। [3]स्वविषयत्वेनस्वप्रकाशत्वानभ्युपगमात्। एकस्मिन् विषयविषयिभावविरोधात्। किं तु स्वरूपज्ञानजन्यव्यवहारविषयत्वरूपं अमुख्यं विषयत्वम्। वृत्तिविषयत्वं तु मुख्यमुपेयते। येन हि ज्ञानं निरूप्यते स एव ज्ञानस्य विषय इत्युच्यते, अहमितिज्ञानं च आत्मना निरूप्यत इति यथा घटज्ञाननिरूपकतया

---

1. **आत्मनः**—अहमितिभासमानस्यात्मनः।

2. **एकान्तेन घटाभावः**—घटाधिकरणत्वविरोध्यभावः—घटसामान्याभाव इति यावत्।

3. **स्वविषयत्वेनेति**—अभेदे तृतीया। अहमनुप्रविष्टस्यानिदमंशस्येत्यादिः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घटो विषयो भवति स्वज्ञानस्य एवमात्मापि अहमितिज्ञानस्य । आत्मनो वृत्तिविषयत्वमपि नास्ति इति तत्र तत्र ग्रन्थकृतां व्यवहारस्तु 'तदप्यात्मनि न पारमार्थिकं' इति कृत्वा । व्यावहारिकं तदिष्यत एव । न चेदमप्यनुपपन्नं एकस्मिन्नेव ज्ञाने तस्यैव विषयत्वं तस्यैवाश्रयत्वमिति । दृश्यते हि 'अहं सुखी' इत्यादिप्रत्यये तस्यैव विषयत्वं तस्यैवाश्रयत्वमिति । न च दृष्टेऽनुपपत्तिः । [1]यदि तत्र रूपभेदेन[2] परिहारः [3]अहंत्वेनाश्रयत्वं सुखित्वेन विषयत्वमिति, प्रकृतेऽपि तर्हि अहंत्वेन विषयत्वं वृत्तिपरिणामित्वेनाश्रयत्वमिति न काचिदनुपपत्तिः । न च—वृत्तिविषयत्वे इदमित्येव प्रत्ययस्स्यात् न अहमिति । न च चैतन्यविषयकत्वमहमित्याकारे प्रयोजकम् । 'घटोऽयं स्फुरति' इत्यादिप्रत्ययानां [4]चैतन्यविषयकत्वेऽपि अहमित्युल्लेखाभावात् । अतो वृत्तिविषयत्वे कथं अहमित्युल्लेखः—इति वाच्यम् । वृत्तिविषयत्वं हि न इदमित्युल्लेखे प्रयोजकम् । किं तु अन्तःकरणशबलितात्मभिन्नत्वमेव । तच्छबलितत्वं तु अहमित्युल्लेखे प्रयोजकम् । [5]श्रीकृष्णाद्यवतारेषु तु भगवतः [6]तथा व्यवहारः, यथा शरीरित्वप्रयोजकपुण्यपापाद्यसंसर्गेऽपि शरीरित्वम्, एवं 'अहं सर्वस्य प्रभवः' [भ.गी. १०.८] इत्युपपद्यते । अस्मदादिव्यवहार एव ह्येतत् प्रयोजकमिति न काचिदनुपपत्तिः । न च तथाव्यवस्थायां प्रमाणाभावः । 'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते'

---

1. मु. न च

2. **रूपभेदेनेति**—पञ्चाग्निविद्यायां उपासनकर्मत्वप्रयुक्तविरोधस्येवेति भावः ।

3. **अहन्त्वेन**—अन्तःकरणविशिष्टरूपेण ।

4. **चैतन्यविषयकत्व इति** स्फुरणस्य चैतन्यरूपत्वात् इति भावः ।

5. ननु श्रीकृष्णादेः 'अहं सर्वस्य प्रभवः' 'अत्मानं मानुषं मन्ये' 'योऽहं यस्य यतश्चाहम्' इत्यादिः अहमिति व्यवहारः श्रूयते । न तस्य अन्तःकरणात्मकाहङ्कारसम्बन्धः सम्भवति । श्रुतिस्मृतिपुराणैः तस्य ईश्वरत्वनिश्चयात् । न हीश्वरे अहङ्कारसम्भवः । 'अहमिहैव' इत्यनुभवेन अहङ्कारस्य परिच्छिन्नत्वात्, ईश्वरस्य च सर्वात्मकत्वात् । न च व्यापकाहङ्कारे प्रमाणमस्ति । शरीरयोगस्य शुद्धसत्त्वमाययोपपत्तेः न तस्य तत्र अहङ्कारगमकत्वम् । किञ्च स्वरूपावरणरहितस्य तस्य परिच्छिन्नाहङ्काराभिमानाख्यं तच्छबलितत्वं न सम्भवति । दुःखादिधर्मिणश्चाहङ्कारस्य ईश्वरे न हि सम्भवः । प्रसिद्धाहङ्कारविलक्षणस्य अहङ्कारत्वासम्भवश्च । ततश्च अहमित्युल्लेखे उक्तं प्रयोजकं न सम्भवति—इत्याशङ्क्याह—**श्रीकृष्णेत्यादि** ।

6. मु. तथाविधव्य०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः ।

[भ.गी ३.२७] इति स्मृत्या 'अहङ्कारश्चाहङ्कर्तव्यं च' [प्र.उ.३.८] इति वाक्येन अन्तःकरणचतुष्टयान्तर्गततयाप्रतिपादिताहङ्कारतादात्म्यभ्रमरूपमोहस्यैव अहमित्यभिमानप्रयोजकत्वाम्नानात् ।

नन्वहमितिवृत्तिविषयत्वाङ्गीकारे तावतैव [1]आत्मव्यवहारोपपत्तौ किमिति स्वप्रकाशस्वरूपत्वमात्मन इष्यत इत्यत आह—**अपरोक्षत्वाच्चेति**। प्रत्यगात्मस्वरूपायाः [2]प्रसिद्धेः अपरोक्षत्वादित्यर्थः। अयमाशयः—[3]आत्मा हि जन्तुमात्रस्य सन्देहविपर्ययपरोक्षापरोक्षप्रमास्थले तदभावदशायां च एकरूपतया [4]आत्मत्वेनापरोक्षो निर्णीतः प्रथते। आन्तराश्च ज्ञानादयः सहोत्पत्तिविनाशाभ्यां अव्यभिचरितप्रकाशाः। तदेतत्सर्वं स्वप्रकाशं ज्ञानादिसाक्षिणं[5] विहाय प्रकारान्तरेणोपपादयितुं न शक्यते। तथा हि—तार्किकमते तावदनुव्यवसायगम्यं ज्ञानम्। न चोत्पन्ने ज्ञाने नियमेन तदनुव्यवसायोऽस्तीति शक्यते वक्तुम्। तथा सति आन्तरज्ञानधाराणामविच्छेदप्रसङ्गेन [6]बाह्यव्यवहार एव लुप्तः स्यात्। एवं [7]ज्ञानोत्पत्त्यादिकमपि [8]कदाचिदेव प्रकाशमानं स्यात्। न च तन्मते ज्ञानोत्पत्तिः प्रत्यक्षीकर्तुं शक्यते।

---

1. मु. आत्मत्वव्यव०

2. **प्रसिद्धेः**—ज्ञप्तेः, **अपरोक्षत्वात्**—स्वयम्प्रकाशत्वात्।

3. **आत्मा**—अहंरूपो जीवः **प्रथते**—अहमिति प्रतीयते। सुषुप्तिप्रलयनिरोधसमाध्यन्यकाले इत्यादिः।

4. मु. 'आत्मत्वेन' नास्ति

5. **ज्ञानादिसाक्षिणं विहायेति** ज्ञानादयः—योग्यात्मविशेषगुणत्वेन पराभिमताः, तदीयोत्पत्तिविनाशौ, अहमर्थश्च। तेषां **साक्षी**—तदीयविकारशून्यत्वे सति तद्बोद्धा—तत्प्रकाशकः—तत्प्रकाशस्वरूपः, तदभावे इत्यर्थः।

6. **बाह्यव्यवहारः**—बाह्यपदार्थज्ञानम्। तैः युगपज्ज्ञानद्वयोत्पत्त्यनङ्गीकारात् इति भावः।

7. **ज्ञानोत्पत्त्यादिकमिति**—आदिशब्देन ज्ञानादीनां ध्वंसः परस्परं भेदश्च गृह्यते।

8. **कदाचिदेवेति**—ज्ञानोत्पत्तिस्तु वक्ष्यमाणप्रकारेण सर्वदा न प्रकाशेत इत्येव वक्तुं युक्तम्। **प्रकाशमानं**—अपरोक्षम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यक्षे हि विषयस्य कारणत्वं वक्तव्यम्। ततश्च ज्ञानोत्पत्त्यनन्तरक्षणे तद्विषयेण प्रत्यक्षेण भवितव्यमित्यापन्नम्। तस्यां च दशायां उत्पत्तेरभावः, तस्याः [1]क्षणिकत्वात्। विषयाभावकालं च ज्ञानं न तत्र प्राकट्यप्रयोजकम्। एवं आत्मनोऽपि नाव्यभिचरितप्रकाशत्वं शक्यं तन्मते वक्तुम्। न हि स्वगतविशेषगुणानवगाहिद्रव्यप्रत्यक्षं तन्मते सम्भवति। तथा च आत्मनः अव्यभिचरितप्रकाशत्वाय [2]आन्तरपदार्थज्ञानधाराभ्युपगमे बाह्यपदार्थज्ञानलोप एव स्यात्। न चानुभवानुसारिणा आत्मादीनामव्यभिचरितप्रकाशत्वं नास्तीति शक्यते वक्तुम्। अनुभवापलापे च शून्यवादिमतमेवास्थेयम्, किमर्धजरतीयेन। अपि च देवतादिध्यानकाले नानुव्यवसायः शक्यते वक्तुम्। ध्यानसामग्र्या इच्छाघटितत्वेन ध्येयव्यतिरिक्तध्यानान्तर्गतवृत्तिविषयानुव्यवसायप्रतिबन्धकत्वात्[3]। ततश्च 'एतावन्तं कालं ध्यायन्नेवासम्' इति अनुसन्धानं अनुपपन्नं स्यात्। अतः साक्षिरूपः प्रकाशः सर्वदा आत्मतद्धर्मावभासकोऽनुस्यूतोऽस्तीति स्वीकर्तव्यम्।

ननु—प्राभाकरमते ज्ञानं स्वप्रकाशम्। तत्र चात्मा आश्रयतया भासते घटादिकं च विषयतया। तन्मते ज्ञानाकारश्च 'घटमहं जानामि' इत्येवंरूपः। तथाच आत्मनि किञ्चिज्ज्ञानं सदा वर्तत एवेति ज्ञानात्मनोरव्यभिचरितप्रकाशत्वमुपपद्यत इति न नित्यसाक्ष्यभ्युपगन्तव्य इति चेत्—

न—तन्मतेऽपि सुखादीनामव्यभिचरितप्रकाशता न स्यात्। ज्ञानोत्पत्तिश्च न प्रत्यक्षा स्यात्। अपि च तन्मते भासमानतायां बहूनि प्रयोजकानि कल्पनीयानि। आत्मनि ज्ञानाश्रयत्वं, ज्ञाने ज्ञानाभिन्नत्वं, घटादौ ज्ञानविषयत्वम्। तदपेक्षया वरं ज्ञाने क्लृप्तं ज्ञानाभिन्नत्वमेव सर्वत्र भासमानतायां प्रयोजकमाश्रयितुम्। तच्च वेदान्तिन एवोपपद्यते। आत्मनो ज्ञानरूपत्वाङ्गीकारात्, विषयाणां च ज्ञानरूपब्रह्माध्यस्तत्वाङ्गीकारात्। न चैतत् नित्यज्ञानाभ्युपगमं विना वक्तुं शक्यते। अनित्यज्ञानस्यात्माभेदासम्भवात्, विषयाणां च जन्यज्ञानाध्यस्तत्वायोगात्। अध्यासे

---

1. **क्षणिकत्वादिति**—कार्यस्य आद्यक्षणसम्बन्धरूपत्वादुत्पत्तेः, आद्यक्षणस्य च द्वितीयक्षणेऽसत्त्वात् इत्यर्थः।

2. **आन्तरपदार्थेति** योग्यात्मविशेषगुणात्मकेत्यादिः।

3. **प्रतिबन्धकत्वादिति** इच्छायाः सर्वतो बलवत्त्वात् इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हि अधिष्ठानं प्रागेवाध्यासात् [1]भासमानतया लब्धसत्ताकमपेक्षितम् । न चैतत् जन्यस्य घटप्रत्यक्षस्य सम्भवति । तस्य घटजन्यस्य घटात्प्रागेव [2]लब्धसत्ताकतया भासमानत्वानुपपत्तेः । एवं च सति सर्वत्र 'घटः स्फुरति' 'ज्ञानं स्फुरति' 'आत्मा स्फुरति' इति व्यवहारः स्फुरणतादात्म्यविषयकः उपपन्नो भवति । परमते च आत्मनि ज्ञानाश्रयताविषयकः, ज्ञाने तदभेदविषयकः, घटादौ ज्ञानविषयताविषयक इति वैरूप्यं भवेत् ।

ननु वेदान्तिनोऽपि भासमानतायां नैकरूपं प्रयोजकं सम्भवति । न हि यथा आत्मनः स्वरूपैक्यं ज्ञानेन स्वीक्रियते एवं विषयाणामप्यध्यस्तानाम् पारमार्थिकेन स्वरूपैक्यासम्भवात् । अतः क्वचित् स्वरूपैक्यं क्वचिदाध्यासिकं तादात्म्यं भासमानतायां प्रयोजकमिति नैकरूपं प्रयोजकं सम्भवति । एवं स्फुरतीतिव्यवहारोऽपि आत्मांशे स्वरूपैक्यं विषयांशे आध्यासिकं तादात्म्यमवगाहत इति नैकरूप इति चेत्—

न—अभेदो हि द्विरूपः । स्वरूपैक्यरूपः, सत्तावच्छेदकभेदाभावरूपः तादात्म्यापरपर्यायश्च । तत्र यद्यपि स्वरूपैक्यं ज्ञानविषययोर्न संभवति, तथापि तादात्म्यं सम्भवत्येव । यो हि भेद [3]इदमिदमिति स्पष्टसामानाधिकरण्यव्यवहारप्रयोजको न भवति स [4]सत्तावच्छेदक इत्युच्यते । विषयज्ञानयोर्भेदस्तु 'इदं सर्वं यदयमात्मा' [बृ. उ. २ - ४ - ६] इति ज्ञानस्वरूपात्मना सामानाधिकरण्यव्यवहारप्रयोजक इति न सत्ताया अवच्छेदकः । तादृशतादात्म्यं च ज्ञानं [5]प्रति आत्मविषययोस्समानमिति न वैरूप्यम् । न चैवं ज्ञानतादात्म्यस्य सार्वकालिकत्वात् विषयाणां सदैव भासमानता स्यादिति वाच्यम् । भासमानतायां ज्ञानाभेदो हि साधारणं कारणं तद्विषयेषु चाक्षुषवृत्त्यादिकं विशेषकारणमपेक्षते ।

---

1. **भासमानतयेति** ज्ञापकहेतौ तृतीया ।

2. **लब्धसत्ताकतयेति** प्रयोज्यत्वं तृतीयार्थः ।

3. मु. इदमितिस्पष्ट

4. **सत्तावच्छेदक इति** दण्डघटयोर्भेदः सत्तावच्छेदकः, दण्डघटयोः सत्ताभेदात् । मृद्घटयोर्भेदः सत्तानवच्छेदकः तयोः सत्तैक्यात् ।

5. मु. प्रत्यगात्म

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नित्यसाक्ष्यभ्युपगम एव च सुषुप्तिनिरोधसमाधिकालयोः [1]आत्मा अव्यभिचरितप्रकाश इति वक्तुं शक्यते। न हि सुषुप्तौ जन्यज्ञानं सम्भवति। तस्यां दशायां 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' [बृ. उ. २ - १ - १७] इति बाह्यान्तःकरणलयाम्नानात्। इन्द्रियाणां प्राणशब्दोदितानां विज्ञानं—ज्ञानजननानुकूलां शक्तिं विज्ञानेन—स्वरूपभूतेन आदाय—निरुध्य शेते—इति हि तदर्थः। न च—तस्यां दशायां इन्द्रियाणां लयेऽपि अहंवृत्तिस्सम्भवति अविद्यावृत्तिरूपा। अन्यथा 'सुखमहमस्वाप्सं' इति परामर्शो[2] न स्यात्, अहंवृत्त्यभावे अहन्तायाः प्रागननुभूतायाः परामर्शविषयत्वायोगात्। तवापि हि सुषुप्तौ आत्मा अव्यभिचरितप्रकाश इत्यत्र अयमेव [3]परामर्शो लिङ्गमिति - वाच्यम्। 'तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं एवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं' इति तस्यां दशायां बाह्याभ्यन्तरविषयस्य जन्यज्ञानस्य [4]निषेधात्। विशिष्य च अहमितिज्ञानं निषिद्धम्। 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानाति अयमहमस्मीति नो एवेमानि भूतानि' [छा. उ. ८ - ११ - १] इति। न च—अयमहमस्मीत्यनेन ब्राह्मणोऽहमित्येवंरूपेण निषेधः, न त्वहमितिज्ञानसामान्यरूपेणेति—शङ्कनीयम्। एवं ह्यनेन ब्राह्मणादिशरीरज्ञानं नास्तीत्युक्तं भवेत्। तथासति तस्य शरीरस्य भूतान्तर्गततया नो एवेमानि भूतानीत्येव तज्ज्ञाननिषेधे सिद्धे पृथङ्निषेधो व्यर्थ एव स्यात्। तस्मादहन्त्वज्ञाननिषेध एव तत्र क्रियते। न चैवं तज्ज्ञानाभावे तस्य परामर्शविषयता न स्यादिति वाच्यम्। न हि सुखमहमस्वाप्समिति ज्ञानं अहन्तांशे परामर्शरूपम्। अपि तु तद्व्यतिरिक्तांश एव। सुषुप्तौ हि [5]तज्ज्ञानं नास्तीत्युक्तम्। नापि तत्स्वरूपमस्ति। अन्तःकरणतादात्म्यापन्नो ह्यात्मा तदाश्रयः। न च तस्यां दशायामन्तःकरणमस्ति। इन्द्रियसामान्यस्य लयाम्नानात्। 'गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः'

---

1. **आत्मा**—अविद्योपाधिकं जीवस्वरूपम्, न तु प्रमातृरूपम्।
2. **परामर्शः**—स्मृतिः
3. मु. व्यवहारो०
4. मु. प्रतिषेधात्
5. **तज्ज्ञानम्**—अहन्त्वज्ञानम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[बृ. उ. २-१-१७] इत्यत्र हि केषां चिदिन्द्रियाणां ग्रहणं सर्वोपलक्षणार्थम्। तदेषां प्राणानामिति सामान्योपक्रमात्। '[1]एवमेवास्मादात्मनःसर्वे प्राणा व्युच्चरन्ति' [बृ. उ. २-१-२०] इति जीवाधीनाया उत्पत्तेराम्नानाच्च। अहन्तायास्तु तत्कालसञ्जातायाः अनुभव एव सुखमहमस्वाप्समिति। न चैकस्य ज्ञानस्य क्वचिदंशे परामर्शरूपत्वं क्वचिदंशेऽनुभवरूपत्वं च विरुद्धमिति शङ्कनीयम्। प्रत्यभिज्ञायाः तत्तांशे स्मृतिरूपत्वस्य अंशान्तरेऽनुभवरूपत्वस्य च इष्टत्वात्। एवं निरोधसमाधावपि सर्ववृत्तिनिरोधस्य श्रुतिस्मृतियोगशास्त्रप्रसिद्धतया तस्यामपि जन्यज्ञानासम्भवेन 'एतावन्तं कालं निरुद्धचित्त एवासं' इतिपरामर्शानुसारेण निरोधसाक्ष्यभ्युपगन्तव्यः।

ततश्च नित्यज्ञानसिद्धौ 'ज्ञानमुत्पन्नं, ज्ञानं विनष्टं, अहं ज्ञानवान्' इत्यादिव्यवहारो वृत्तिज्ञानोपाधिक इत्यवगन्तव्यम्।

नन्वेवमात्मनो नित्यं प्रकाशमानत्वे तस्मिन्नज्ञानविषयत्वासम्भवात् कथमध्यासः। न च स्वरूपेण भासमानत्वेऽपि निरतिशयानन्दत्वप्रपञ्चविनिर्मुक्तत्वाद्याकारेणाभासमानत्वात् तेनरूपेणाज्ञानविषयत्वमस्तीति वाच्यम्। न हि तव मते निरतिशयानन्दत्वादिकं स्वरूपात् व्यतिरिच्यते। तथा च स्वरूपे भासमाने कथं तेषामभासमानता। अपि च तेषां स्वरूपाद्व्यतिरेके अखण्डाकारवृत्तावपि तेषां न भानं स्यात्, तस्याः स्वरूपमात्रविषयत्वात्। एवं च अखण्डाकारवृत्तिदशायां यावत् स्वरूपं भासते, तावदेवाधुनापि भासत इति आधुनिकस्य स्वरूपप्रकाशस्य अज्ञानानिवर्तकत्वे अखण्डाकारवृत्तिरप्यज्ञानानिवर्तिका स्यात्। अपि च अधुना यावदेव स्वरूपं भासते तावदेव मोक्षदशायामपि। अतश्च आधुनिकस्य [2]स्वरूपभानस्य अपुरुषार्थत्वे मोक्षस्यापि पुरुषार्थता न स्यात्। तस्मात् अद्वैतवादिनः स्वप्रकाशात्माभ्युपगमो विरुद्ध इति चेत्—

न—भासत एवाधुनाप्यात्मस्वरूपम्। तच्च भानं नाज्ञानविरोधि। न ह्यधिष्ठानस्वरूपभानमात्र[मज्ञान](मारोप)विरोधीति शक्यमुपगन्तुम्। तथा सति 'इदं

1. मु. 'एतस्मादात्मनः सर्वे प्राणा यथाऽयतनं विप्रतिष्ठन्ते' इति स्वस्वायतनरूपेषु गोलकेषु पुनर्जाग्रदारम्भे जीवाधीनाया विशेषेणप्रतिष्ठारूपाया उत्पत्तेराम्नानाच्च'। अयं पाठोऽर्थश्च कौषीतकिब्राह्मणानुसारी।

2. **स्वरूपभानस्येति** निरतिशयानन्दाभिन्नेत्यादिः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रजतं ' इति भ्रमो न स्यात् । तत्रापीदन्ताया अधिष्ठानस्वरूपभूताया भानात् । नापि–[1]अधिष्ठानासाधारणस्वरूपभानम्, इदन्ता च न तथा–इति । 'शङ्खः श्वेतः' इत्यधिष्ठानासाधारणस्वरूपभानेऽप्यज्ञानानिवर्तनात् । नाप्यधिष्ठानासाधारणस्वरूपापरोक्षज्ञानं तथेति । तथासति इयं शुक्तिरित्याप्तोपदेशात् अज्ञाननिवृत्तिर्न स्यात् । न च–सोपाधिकभ्रमेष्वपरोक्षज्ञानं अन्यत्र तु परोक्षमपरोक्षं वा अज्ञाननिवर्तकमिति, शुक्तिरजतादिभ्रमाणां परोक्षापरोक्षसाधारण्येन ज्ञानमात्रमज्ञाननिवर्तकं पीतशङ्खादिविभ्रमेषु तु अपरोक्षज्ञानमेवाज्ञाननिवर्तकमिति–शक्यते वक्तुम् । न हि शुक्तिरजतादिभ्रमव्यावृत्तं पीतशङ्खादिभ्रमेष्वनुगतं सोपाधिकभ्रमत्वं निरूपयितुं शक्यते । शुक्तिरजतादिभ्रमेऽपि सादृश्यादिदोषस्यैव उपाधित्वसम्भवात् । न हि पित्तादिदोष एवोपाधिः न सादृश्यादिदोष इत्यत्र किंचिद्व्यवस्थापकमस्ति । तस्मात् प्रमाणानुसारेण यादृशभ्रमे यत् ज्ञानं प्राप्नोति निवर्तकतया, तत्तथैव स्वीकर्तव्यम् । आत्मविषयाज्ञाननिवर्तकतया च शास्त्रबलात् वेदान्तवाक्यजन्यज्ञानमेव प्राप्तमिति तदेव निवर्तकमास्थीयते । तदपि ह्यधिष्ठानतत्त्वावगाह्येवेति । लोकेऽपि ह्यधिष्ठानतत्त्वावगाह्येव ज्ञानं अज्ञाननिवर्तकमिति तावता लोकदृष्टनिवर्त्यनिवर्तकभावानुसारात्[2] न स्वर्गयागादिसाध्यसाधनभाववदत्यन्तमदृष्टरूपता । लोके च न सर्वं ज्ञानं अधिष्ठानतत्त्वावगाहि आरोपनिवर्तकम्, शङ्खश्वैत्यानुमितौ व्यभिचारात् । ततस्तत्रापरोक्षज्ञानमेव पैत्यभ्रमनिवर्तकमिति लोकादेवावगम्यते । प्रपञ्चविभ्रमे तु स्वरूपप्रकाशस्य प्रपञ्चविभ्रमेण सहानुवर्तमानतया तस्य विभ्रमानिवर्तकत्वे विशेषकारणापेक्षायां स विशेषः वेदान्तवाक्यजन्य [3]आत्मसत्तानिश्चयरूपो वृत्तिविशेषः प्रपञ्चविभ्रमविरोधीति शास्त्रबलादवधार्यते ।

ननु च–विभ्रमे यावदेव स्वरूपं भासते तदनधिकविषयकस्य अखण्डाकारज्ञानस्य कथं निवर्तकता? भ्रमाधिकविषयस्यैव तस्य तन्निवर्तकताया लोके दर्शनात् इति

---

1. **अधिष्ठानासाधारणस्वरूपेति** व्यावर्तकधर्मविशिष्टं व्यावर्तकधर्मोपलक्षितं वा यत् संशयविपर्ययविरोधिस्वरूपं तदित्यर्थः

2. मु. ०सारः । न स्वर्ग

3. श्रवणादेःप्राक्तननिश्चयव्यावृत्त्यर्थं **सत्तानिश्चयेति** । सत्तानिश्चयो नाम भासमानप्रमात्वकनिश्चयः । श्रवणादिभ्यः प्राचीनस्तु आवृतप्रमात्वकः । अत एव तदा वादिविप्रतिपत्तिप्रयुक्ततात्पर्यसंशयरूपदोषाधीनः प्रमात्वसंशयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चेत्, न—भ्रमानधिकविषयाणामपि तन्निवर्तकत्वदर्शनात् । यथा 'तटाकतीरे घोषः' इति 'येन केन चित् कपालेन तुषोपवापः कर्तव्यः' इति च भ्रमवतः पुरुषानुद्दिश्य तीरत्वमात्रप्रकारकेण तात्पर्येण प्रयुक्तात् 'गङ्गायां घोषः' इति वाक्यात् कपालत्वमात्रप्रकारकेण तात्पर्येण प्रयुक्तात् 'पुरोडाशकपालेन तुषानुपवपति' इति वाक्याच्च 'तीरे घोषः' 'कपालेन तुषोपवापः कर्तव्यः' इत्येव बोधो दृश्यते । न हि तत्र भ्रमे भासमानयोः तीरकपालयोःशाब्दबोधे कोऽपि विशेषो गृह्यते भ्रमाधिकविषयः । तत्र चेत् सामग्रीविशेषजन्यत्वेन शाब्दबोधस्य [1]भ्रमनिवर्तकत्वम्, स च सामग्रीविशेषः शाब्दबोधात् प्राक् तीरस्य गङ्गासम्बन्धित्वेनोपस्थितिः, कपालस्य पुरोडाशसम्बन्धित्वेनोपस्थितिः, [2]दृश्यते ह्यन्यत्रापि सामग्रीवैचित्र्यादेव विषयवैलक्षण्याभावेऽपि किञ्चिज्ज्ञानं कार्यविशेषप्रयोजकं किंचिन्नेति, तद्यथा—अयं प्रशस्त इत्युक्ते न तथा [3]प्रीतिर्भवति, यथा सदसदनेकगुणकीर्तनपूर्वकं लक्षणया प्राशस्त्योक्तौ, अत एव वेदे न कण्ठत एव 'प्रशस्तः' इत्येवंरूपेण कर्म स्तूयते, किं तु सदसदनेकगुणकीर्तनपूर्वकं लक्षणयैव; तर्हि प्रकृतेऽपि तुल्यम् । वेदान्तवाक्यजन्यज्ञानेऽपि हि निष्प्रपञ्चत्वोल्लेखिनी प्राचीना वाच्यार्थविषयिणी उपस्थितिरस्त्येव ।

अपि च—लोके भ्रमाधिकविषयस्यैव भ्रमनिवर्तकत्वं दृष्टं अस्तु नाम । तस्मिन् भ्रमनिवर्तके [4]सामग्रीविशेषजन्यत्वमपि दृष्टमेव । एवं च वक्ष्यमाणया रीत्या वेदान्तानामखण्डार्थत्वसिद्धौ तस्य च ज्ञानस्य प्रपञ्चविरोधित्वे शास्त्रबलात्सिद्धे [5]तदनुसारेणापि सामग्रीविशेषजन्यत्वमेव निवर्तकतायां प्रयोजकमाश्रयणीयम् । लोके उभयथाऽपि सम्भवात् । न तु तद्विरोधेन भ्रमाधिकविषयत्वम् ।

---

1. **भ्रमनिवर्तकत्वमिति** 'तर्हि प्रकृतेऽपि तुल्यं' इत्यनेन सम्बद्ध्यते । सचेत्यादिग्रन्थः सामग्रीविशेषाद्युपपादकः ।

2. **दृश्यतेहीति** 'अङ्गीकृतश्च नैयायिकैः' इत्यपि बोध्यम् । उक्तं हि प्रत्यक्षचिन्तामणौ—'समूहालम्बनात्तु विशिष्टज्ञानस्य विशेषः कारणकृतः' इति प्रमालक्षणवादे ।

3. मु. प्रतीति

4. **सामग्रीविशेषः**—दोषाभावादिघटिता सामग्री ।

5. **तदनुसारेणापीति** अपिना पूर्वोक्तव्यभिचारो गृह्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततः साक्षिणि स्वतो भासमानेऽपि नाविद्यासम्बन्धविरोध इति नाध्यासानुपपत्तिः। एवञ्च यत् पूर्वपक्षिणोक्तं निरंशे स्वप्रकाशे कथमध्यास इति, तदपाकृतम्। स्वप्रकाशस्यापि अविद्यासम्बन्धाविरोधितया अध्यासाधिष्ठानत्वोपपत्तेः।

[1]यद्यपि साक्षिस्वरूपभूतानन्दः सदा भासत एव, अत एव निरतिशयितः आत्मनि प्रेमा। तथापि तत्र अनाद्यविद्यावशात् दुःखाद्यपुरुषार्थसम्बन्धोऽपि आरोपितः। तथा तारतम्यापन्नतत्तद्विषयसम्पर्कजनितवृत्तितादात्म्याध्यासात् साक्षिण्यपि तारतम्यमध्यस्तम्। ततश्च आनन्दे अनुभूयमानेऽपि अन्य इतोऽधिक आनन्दोऽस्तीति भ्रमः, स मया अनवाप्त इत्येवं भ्रमान्तरम्, [2]ततश्चाकृतार्थतेति। तत्त्वज्ञानेन तु अविद्यायां निवर्तितायां उक्तभ्रमविनाकृतं केवलं स्वरूपं भासत इति संसारमोक्षयोर्वैलक्षण्यम्—संसारदशायां हि दुःखं अनवाप्तत्वभ्रमरूपानन्दानवाप्तिश्च, मोक्षदशायां तु दुःखाभावः अनवाप्तत्वभ्रमनिवृत्तिरूपानन्दावाप्तिश्च।

न च मोक्षदशायामविद्यानिवृत्त्यभ्युपगमे ब्रह्मातिरिक्ताया निवृत्तेः विद्यमानतया द्वैतापत्तिरिति वाच्यम्। अधिष्ठानपरिशेषाभ्युपगमेन ब्रह्मातिरिक्तपदार्थानभ्युपगमात्। एतदुक्तं भवति—[3]आरोपितपदार्थानां हि, यथा घटादीनां स्वोपादाने परिणामवादरीत्या उपादानस्यैवावस्थान्तरापत्तिरूपः आरम्भवादे ध्वंसात्मकः नाशः, तदभिव्यञ्जकं च कपालतच्छकलादिकम्; नैवंविधः शुक्त्यादौ रजतादीनाम्। न हि तत्र रजतस्य तत्त्वज्ञानबाधितस्य किंचिच्छकलादिकमुपलभ्यते, येन घटादिनाशतुल्यता स्यात्। किं तु यथा कालत्रयेऽपि शशशृङ्गस्य सदसद्व्यवहारायोग्यत्वरूपं निस्स्वरूपत्वम्, नापि तेन निस्स्वरूपेण शशशृङ्गेण कस्यचिद्वस्तुनः सद्वितीयत्वम्, एवं तत्त्वज्ञानेन, प्राग्लब्धस्वरूपस्य रजतस्य निस्स्वरूपत्वमापाद्यते। न च तत्र तत्त्वज्ञानापादितनिस्स्वरूपत्वेन रजतेन भावाभावव्यवहारायोग्येन शुक्तेः सद्वितीयता।

---

1. 'निरतिशयानन्दस्वरूपस्यात्मनः स्वप्रकाशत्वे सर्वदाभासमानत्वावश्यम्भावात् संसारमोक्षयोरविशेषप्रसङ्गः' इति पूर्वपक्षावसरोक्तं आशङ्क्य परिहरति—**यद्यपीत्यादिना**।

2. **ततश्च**—तादृशानन्दाभिलाषरूपपिशाचीग्रस्तत्वात् **अकृतार्थता**—अप्राप्तप्राप्त्यता।

3. **आरोपितपदार्थानां हीति** 'रजतादीनां' इत्युत्तरेण सम्बद्ध्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नचायमस्ति नियमः—पुरोऽवस्थिते एव विषये विषयान्तरमध्यसितव्य-मिति । अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति । एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः । तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति

तदेतत् सर्वानुभवसिद्धम् । एवमात्मतत्त्वज्ञानेनापि अविद्यादेः कृत्स्नस्य निस्स्वरूप-तापादनात् तत्त्वज्ञानोत्तरमधिष्ठानपरिशेषेण न द्वैतापत्तिः । तथा च श्रुतिः— 'अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थम्मन्यते स आत्मा स विज्ञेयः' [मा. उ. ७] 'यत्र त्वस्य सर्व-मात्मैवाभूत्तत् केन कं पश्येत्' [बृ. उ. ४ - ५ - १५] इत्याद्या अधिष्ठानपरिशेषतां दर्शयति ।

अतः स्वप्रकाशत्वे न काचिदनुपपत्तिः । एवं च—यत् पूर्वपक्षिणोक्तं विषय त्वाभावे अध्यासो न स्यादिति, तदप्यपाकृतम् । न ह्यारोपे अधिष्ठानस्य विषयतया भानमपेक्षितम् , गौरवात् । किं तु [1]भानमात्रम् । तच्च स्वप्रकाशस्य स्वत एव , जडस्य तु ज्ञानविषयतयेत्यन्यदेतत् । भाष्ये आत्मनोऽपि विषयत्वप्रतिपादनं तु वस्तुगतिमनुरुध्य तदपि वक्तुं शक्यत इत्यभिप्रायेण ।

[2]यच्चोक्तं आरोप्यविनिर्मुक्ततया आरोपात् पूर्वमधिष्ठानज्ञानमपेक्षितमिति, तन्न-नीलिमारोपात् पूर्वं आरोप्यविनिर्मुक्ततया आकाशभानाभावेऽपि नीलिमारोपदर्श-नात्—इत्यभिप्रेत्याह—**अप्रत्यक्षेऽपीति** । यद्यप्युपरि नीलिमारोपेण मध्ये चालोक-गत[3]वैशाल्यारोपेणाकाशः प्रत्यक्षः, तथापि तद्विनिर्मुक्ततया केवलः प्रत्यक्षो न भवतीत्यर्थः । तलं—अवाङ्मुखकटाहाकारत्वम् । अहम्ममेतिप्रतीतेरध्यासत्वं अविद्या-

---

1. **भानमात्रमिति**—विवरणानुसारिणी व्याख्येयम् । तदुक्तं विवरणे 'न ताव-दयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्' इति भाष्याभिप्रायवर्णनावसरे—एक-स्मिन् विज्ञाने द्वयोः सम्भिन्नतया अवभास एव अपेक्ष्यते, विषयतया अवभास इति विशेषणायोगात्—इति । 'तथाविशेषणे गौरवात्' इत्याश्रमस्वामिभिर्व्याख्यातम् ।

2. प्रस्थानान्तरवैलक्षण्येन 'अप्रत्यक्षेऽपि' इत्यादिभाष्यं व्याख्यातुं पूर्वपक्षनि-रूपणावसरोक्तामाशङ्कामनुवदति—**यच्चोक्तमिति** । उक्तशङ्कानिरासस्य भाष्यवाक्यादेव लाभः वैलक्षण्येन व्याख्यायां बीजम् ।

3. आ. वैशद्या०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्यन्ते। तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः।

तत्रैवं सति यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते।

तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि।

त्वप्रसिद्ध्या द्रढयति—तमेतमिति। तथा च स्मृतिः—'अहम्ममेत्यविद्येयं व्यवहारस्तथाऽनयोः' [वि. पु. ६-७-१००] इति। ननु—साक्षिस्वरूपभूतं ज्ञानं न अज्ञानविरोधि, एवं वृत्तिरपि नाज्ञानविरोधिनी, तस्या अन्तःकरणपरिणामरूपाया जडत्वात्। अतः कथं अविद्यानिवृत्तिः—इत्याशङ्क्य, केवलसाक्षिणो विरोधित्वाभावेऽपि, यथा केवलानां सौरकिरणानां तृणादिदाहकत्वाभावेऽपि सूर्यकान्तमणि-[1]निविष्टानां तद्दाहकत्वं एवं वेदान्तजन्यवृत्तिनिविष्टस्य साक्षिणोऽविद्यानिवर्तकता भविष्यतीत्यभिप्रेत्याह—तद्विवेकेन चेति। तयोः—आत्मानात्मनोः 'आत्मा सत्यः अनृतोऽनात्मा' इत्येवंरूपेण विवेकेन सम्पन्नं यत्—[2]वस्तुस्वरूपं [3]आत्मरूपं अवधारणं—अवधारणात्मकवृत्त्यभिव्यक्तं, सैव विद्येत्यर्थः।

एवं च यत् शास्त्रानारम्भवादिनोक्तं—कर्तृत्वभोक्तृत्वयुक्तस्य कथं तद्राहित्यं इति, तत्तस्य मिथ्यात्वनिरूपणेन परिहृतमित्याह—तत्रैवं सतीति।

[4]पूर्वोक्तमध्यासकृतत्वं व्यवहारस्य शङ्काविशेषनिराकरणेन व्युत्पादयितुं पुनरुपक्षिपति—तमेतमविद्याख्यमिति। ननु—अविद्यायाः दोषरूपत्वात् दुष्ट-

---

1. मु. निष्ठानां

2. मु. वस्तु स्वरूपभूतं आत्मस्वरूपं अवधारणात्मक

3. वस्तुस्वरूपं च तत् अवधारणं च इति कर्मधारयमभिप्रेत्य व्याचष्टे—**आत्मरूपमिति**। अत्र 'तमेतं' इति 'तद्विवेकेन च' इति 'तत्रैवं सति' इति च भाष्यवाक्यानि प्रस्थानान्तरवैलक्षण्येन अवतार्य व्याख्यातानि। तत्रायमाशयः—शास्त्रारम्भोपयोगिविषयप्रयोजनसाक्षात्सम्बद्धशङ्काविशेषनिराकरणसिद्ध्युपयोग्यर्थपरतया व्याख्यानमुचितमिति।

4. **पूर्वोक्तम्**—'अध्यस्य नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्योक्तम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति। उच्यते— देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। न हि इन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति।

पुरुषसंयुक्तानां इन्द्रियादीनां प्रमां प्रति करणत्वासम्भवात् प्रत्यक्षादीनां प्रामाण्यप्रसिद्धिः कथं, कथं वा श्रुतिस्मृत्यादीनां शास्त्रत्वप्रसिद्धिः। अलौकिकार्थप्रमापकं हि शास्त्रमित्युच्यते—इत्यभिप्रेत्य शङ्कते—**कथमिति**। अविद्यावत्पुरुषविषयाणि—तादृशपुरुषाश्रयाणि—तत्प्रमातृकाणीत्यर्थः। ततश्च 'शुक्तिरजतादिज्ञानजनकमप्रमाणं अन्यत् प्रमाणं' इति सर्वलोकप्रसिद्धव्यवस्थानुपपत्तिरिति भावः।

प्रामाण्यम् द्विविधम्—संवादिप्रवृत्तिजननयोग्यज्ञानजनकत्वलक्षणं अबाधितवस्तुविषयकज्ञानजनकत्वलक्षणं च। आद्यं लौकिकवैदिकप्रमाणसाधारणम्। द्वितीयं तु ब्रह्मप्रमाणस्यैव। शुक्तिरजतज्ञानजनकस्य तु नोभयथापीति न तत्र प्रमाणत्वव्यवहारः। एतादृशप्रमाणप्रेरकतायामहङ्काराद्यध्यासरूपदोषोऽनुकूल एव, न प्रतिकूलः। असङ्गस्यात्मनः अहङ्काराद्यध्यासं विना प्रमाणप्रेरकत्वासम्भवात्। तादृशप्रामाण्यपरिपन्थित्वं तु बाधस्यैव। स च यावद्ब्रह्मज्ञानं नास्ति लौकिकप्रमाणानामिति व्यावहारिकं प्रामाण्यं तेषामुपपद्यते। वेदान्तानां तु न कदापि प्रमेयबाधोऽस्तीति तत्त्वावेदकत्वं तेषामुपपद्यते—इत्यभिप्रेत्य परिहरति—**उच्यत इति**। [1]प्रमातृत्वं हि प्रमाणप्रेरकत्वं प्रमां प्रत्याश्रयत्वं च। उभयमप्यध्यासाधीनम्। कूटस्थस्य स्वत एव प्रेरणारूपव्यापारासम्भवात्। प्रमा च चैतन्यप्रतिबिम्बविशिष्टोऽन्तःकरणपरिणामः। स न केवलस्यात्मनः सम्भवति, अपरिणामित्वात्। चैतन्यप्रतिबिम्बश्च न केवलेनान्तःकरणेन सम्भवति। अतः प्रमास्वरूपोपयोगितया अन्तःकरणात्मनोरध्यास एषितव्यः। प्रमा च इन्द्रियाणां प्रेरणे फलम्। ततश्च इन्द्रियप्रवृत्तौ प्रेरणा प्रमा च आत्मन्यपेक्षितेति तदुभयोपयोगितया अध्यासः प्राप्नोतीत्याह—**देहेन्द्रियादिष्विति**। आदिशब्देनान्तःकरणं गृह्यते। प्रमातृत्वं प्रत्यन्तःकरणमाश्रयकोटौ

---

1. **प्रमातृत्वं हीत्यादि** प्रमातृत्वं हि प्रमां प्रति कर्तृत्वम्, तच्च स्वातन्त्र्यम्, तच्च इतरकारकाप्रयोज्यस्य सकलकारकप्रयोक्तृत्वम्। इदमेव प्रमाणप्रेरकत्वम्। एवं सविषयकज्ञानादिकर्तृत्वं तदाश्रयत्वमपि। एवं उभयं प्रमातृत्वशब्दार्थः इति भावः।

इदंव्याख्याग्रन्थानुसारं 'न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति' इत्युपरितन वाक्यरहितो भाष्यपाठः स्यात् इति भाति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च अधिष्ठानमन्तरेण इन्द्रियाणां व्यापारः संभवति । न च अनध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते । न च एतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते । (नच प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति ।) तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ।

पश्वादिभिश्चाविशेषात् । यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते, अनुकूले च प्रवर्तन्ते—यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति

निविष्टं, इन्द्रियादि[1] उपकरणतया । प्रमाणप्रवृत्तौ प्रमातृत्वमुपयुज्यते इत्युक्तम्, प्रमाणप्रवृत्तिः[2] किमर्थेत्यपेक्षायामाह—न हीति । इन्द्रियपदं प्रमाणमात्रोपलक्षणम् । प्रत्यक्षादीत्यादिपदमनुमित्यादिसङ्ग्राहकम् । अत्र असम्भवे [3]व्यवहारः कर्ता अनुपादाने [4]प्रमातेति अनुपादायेत्यस्य नसम्भवतीत्यनेन नान्वयः । किं तु 'अनुपादाय यो व्यवहारः प्रमातुः, स न सम्भवति' इत्यन्वयो ग्राह्यः । तथासति 'समानकर्तृकयोः पूर्वकाले' इति अनुशासनानुगुण्यं भवति । नन्विद्रियाणां प्रवृत्तौ प्रमात्रोपादानं[5] किमर्थमपेक्षितमित्याशङ्क्य, जडानां प्रवृत्तिश्चेतनप्रेरणां विना न सम्भवतीत्याह—न चाधिष्ठानमन्तरेणेति । अधिष्ठानं—चेतनव्यापारविषयत्वम् । ननु शरीरमेव प्रेरकमस्त्वित्याशङ्क्य, तस्य जडतया चेतनतादात्म्यं विना प्रेरकत्वं [6]न सम्भवतीत्याह—न चानध्यस्तात्मभावेनेति । उक्तया रीत्या प्रमातृत्वोपयोगितया श्रुतिस्मृतिसिद्धासङ्गत्वनिर्वाहाय अध्यास एषितव्य इत्याह—न चैतस्मिन्निति ।

ननु—प्रत्यक्षादिव्यवहारस्याध्यासमूलत्वे विवेकिनां तद्व्यवहारो न स्यात्, शास्त्रजन्यज्ञानरूपस्य विवेकस्य अध्यासविरुद्धत्वात्—इत्याशंक्याह—पश्वादिभिश्चेति ।

1. इन्द्रियादि इत्यादिपदेन शरीरं गृह्यते ।
2. मु. प्रवृत्तिस्तर्हि किम०
3. व्यवहारः—व्यवह्रियते अनेनेति व्युत्पत्त्या प्रत्यक्षादिप्रमाणफलम् ।
4. प्रमातेतीति कर्तृभेदात् इति शेषः
5. उपादानम्—प्रेरणम् ।
6. न सम्भवतीति सम्भवे सुषुप्तावपि सम्भवेत् इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रति अभिमुखीभवन्ति, एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान् प्रति प्रवर्तन्ते, अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः । पश्वादीनां च प्रसिद्धोऽविवेकपुरस्सरः प्रत्यक्षादिव्यवहारः । तत्सामान्यदर्शनात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते ।

शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी न अविदित्वाऽऽत्मनः-परलोकसंबन्धं अधिक्रियते, तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते, अनुपयोगादधिकारविरोधाच्च । प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रं अविद्यावद्विषयत्वं नातिवर्तते । तथा हि 'ब्राह्मणो यजेत' इत्यादीनि शास्त्राणि आत्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते ।

सङ्ग्रहवाक्यं विवृणोति । यथाहीति । द्विविधा हि विवेकिनः । केचिद्देहातिरिक्तात्ममात्रपर्यवसितविवेकाः, केचिदशनायाद्यतीतात्मपर्यन्तविवेकाः । तत्र आद्यो विवेकः कर्तृत्वादिभ्रमविरोधी न भवत्येव । ततश्च न तस्य ज्योतिष्टोमादिप्रवृत्तिविरोधित्वम् । तेन च शरीरतादात्म्याध्यासस्यानपोदितत्वात् पश्वादितुल्यतया इष्टसाधनताज्ञाने प्रवृत्तिर्लौकिकी अनिष्टसाधनताज्ञाने निवृत्तिश्च मनुष्योऽहमित्याद्यभिलापश्च उपपद्यते । सति हि दोषे जातमपि देहातिरिक्तात्मज्ञानं न देहतादात्म्याध्यासविरोधि । अत एव देहातिरिक्तात्मज्ञानवन्तोऽपि अस्माकमिदमिष्टसाधनमिति वदन्तः अंगुल्या शरीरमेव निर्दिशन्ति लौकिकव्यवहारेषु । विवेककृतस्तु तेषां व्यवहारः—नाहं मनुष्यो देहपातोत्तरं परलोके फलं भविष्यतीति । अशनायाद्यतीतात्मज्ञानं तु तेषां लौकिकवैदिकप्रवृत्त्युपयोग्येव न भवति । प्रत्युत दृढस्तन्निश्चयः अविश्वासापादकतया वैदिकप्रवृत्तिविरोध्येव । येषामपि दृढोऽशनायाद्यतीतात्मनिश्चयः तेषामपि प्रारब्धदोषवशात्[1] मात्रया अध्यासोऽनुवर्तत इति तत्कृतो 'ब्राह्मणोऽहं भुञ्जे' इत्यादिव्यव-

1. मु. वशात् देहे आत्माध्यासः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हार उपपद्यते–इति घट्टार्थः । वेदस्यापि लौकिकभ्रमानुवादित्वं दृश्यत इत्याह—
[1]**तथा हि ब्राह्मणो यजेतेति ।**

[2]ननु—ब्राह्मणो यजेतेत्यादौ ब्राह्मणादिशब्दानां साक्षात्सम्बन्धेन ब्राह्मणत्वप्रकारकात्मविशेष्यकज्ञानजनकत्वे हि अध्यासजनकत्वं भवेत्, ब्राह्मणत्वादेः शरीरगततया आत्मनि साक्षात्सम्बन्धाभावात् । न त्वेतदस्ति । ब्राह्मणादिशब्दानां, साक्षात्परम्परासम्बन्धौदासीन्येन यत्र ब्राह्मणत्वं वर्तते तत्प्रतिपादकत्वस्य, शरीरप्रतिपादकत्ववत् शरीरविशिष्टप्रतिपादकत्वस्य वा, [3]व्युत्पत्तिसिद्धत्वात् । न च तथात्वे अध्यासजनकत्वम् । परम्परासम्बन्धेन ब्राह्मणत्वस्य ब्राह्मणशरीरवैशिष्ट्यस्य वा आत्मनि विद्यमानत्वात् ।

साक्षात्परम्परासाधारण्येन ब्राह्मणत्वाश्रयप्रतिपादकत्वं वा ब्राह्मणशरीरविशिष्टप्रतिपादकत्वं वा कथं व्युत्पत्तिसिद्धम् ?

इत्थं–सन्ति तावन्नीलादिशब्दाः । ते च 'नीलं रूपं' इति गुणेऽपि प्रयुज्यन्ते 'नीलो घटः' इति गुणिन्यपि । तत्र चोभयत्रापि शक्तिरेव । उभयत्रापि अनुपपत्तिप्रतिसन्धानं विना बोधकत्वस्य प्रयोगप्राचुर्यस्य च तुल्यतया 'गुणे एव शक्तिः गुणिनि तु लक्षणा' इति नियन्तुमशक्यत्वात् । यैरपि गुणिनि लक्षणेत्युच्यते तेषामपि मते गङ्गायां घोष इतिवत् नेयं लक्षणा किं तु निरूढेति तैरपि वाचोयुक्त्यन्तरेण गुणिनो मुख्यार्थत्वं स्वीकृतप्रायमेव ।

तत्र च नीलादिपदेषु यद्येकैव शक्तिरभ्युपेयते, तदा यत्र नीलत्वं वर्तते तत्र सर्वत्र नीलपदस्य शक्तिरुपेया, तच्च परम्परया घटेऽपि वर्तते इति नीलगुण इव घटेऽपि नीलत्वप्रवृत्तिनिमित्तेनैव नीलशब्दस्य शक्तिरित्येकैव शक्तिः । एवं च नीलशब्दस्य प्रकारशब्दतया प्रकारिपर्यन्तत्वदर्शनेन अन्येऽपि प्रकारशब्दाः

---

1. मु. 'तथा हि' नास्ति

2. 'मनुष्योऽहम्' 'ब्राह्मणोऽहम्' इत्यादिप्रतीतीनां प्रमात्वमेवेति वदतां विशिष्टाद्वैतिनां मतं परिशीलयितुं तन्मतं उत्थापयति—**ननु ब्राह्मण इत्यादिना ।**

3. व्युत्पत्तिसिद्धत्वात्—शक्तिग्राहकप्रमाणेन निश्चितत्वात् । तच्च प्रमाणं अनुपपत्तिप्रतिसन्धानं विना बोधकत्वस्य प्रयोगप्राचुर्यस्य च अन्यथाऽनुपपत्तिरूपं अर्थापत्तिप्रमाणं अनुमानं वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकारिपर्यन्ता इत्युपेयते। न चैवं—रूपादिशब्दानामपि प्रकारशब्दतया द्रव्यपर्यन्तता स्यात्। प्रकारो नाम अपृथक्सिद्धो धर्म इत्युच्यते। अपृथक्सिद्धत्वं च तेन सह तस्य भवति, यो यस्माद्विश्लिष्य न तिष्ठति। नीलादयश्च न द्रव्याद्विश्लिष्य तिष्ठन्ति। अतस्तद्वाचकाश्शब्दाः प्रकारशब्दा इत्युच्यन्ते। तच्च रूपादिशब्देऽपि तुल्यमिति प्रकारशब्दानां प्रकारिपर्यन्तत्वे रूपादिशब्दानामपि तत् प्राप्नोतीति—वाच्यम्। न हि सर्वेषां प्रकारशब्दानां प्रकारिपर्यन्तत्वम्। किं तु येषां प्रवृत्तिनिमित्तं प्रकारिणि वर्तते तेषामेव तत्पर्यन्तत्वम्। नीलत्वादीनां च 'नीलो घटः' इति प्रतीत्यनुसारेण परम्परासम्बन्ध आधारतानियामक इत्युपेयते। अतो नीलादिशब्दाः प्रकारिपर्यन्ताः। रूपत्वादीनां परम्परासम्बन्ध आधारतानियामको न भवति। 'रूपं घटः' इति प्रतीतेरभावात्। अतो न तेषां प्रकारिपर्यन्तत्वम्। एवं च ब्राह्मणादिशब्दानामपि प्रकारशब्दतया प्रकारिपर्यन्तत्वं एकयैव शक्त्या सिद्ध्यति। ब्राह्मणादिशरीरमपि [1]हि आत्मविश्लेषे विशीर्णं भवतीत्यात्मना अपृथक्सिद्धं [2]भवतीत्यात्मनि प्रकारः। न चैवं शरीरादिशब्दानामपि आत्मपर्यन्तत्वं शङ्कनीयम्। रूपत्वादिवत् शरीरत्वस्यापि परम्परासम्बन्धो नाधारतानियामकः, 'शरीरमहं' इति प्रतीतेरभावात्। ब्राह्मणत्वस्य तु परम्परासम्बन्धो [3]नीलत्ववत् भवत्याधारतानियामकः। 'ब्राह्मणोऽहं' इति प्रतीतेः।

यदि तु—नीलशब्दस्य द्रव्ये नीलत्वप्रवृत्तिनिमित्तकशक्त्यपेक्षया नीलगुणप्रवृत्तिनिमित्तकं शक्त्यन्तरमेवोपेयमित्युच्यते, अन्यथा नीलिमेत्यादौ नीलगुणप्रत्ययो न स्यात्, भावप्रत्ययानां [4]प्रकृतिप्रतिपाद्यप्रकारवचनत्वात्। नीलत्वप्रवृत्तिनिमित्तकशक्तिपक्षे तस्यैव प्रकृतिप्रतिपाद्यप्रकारतया नीलगुणस्य तदभावेन भावप्रत्ययार्थता न स्यात्। गुणप्रवृत्तिनिमित्तकत्वपक्षे तु न काचिदनुपपत्तिः—इति, तदापि प्रकारशब्दस्य प्रकारिपर्यन्तत्वं दृष्टमेवेति ब्राह्मणादिशब्दानामपि शक्तिद्वयकल्पनया उभयवाचकतायां न काचिदनुपपत्तिः। 'ब्राह्मणोऽहं' इति प्रयोगस्यात्रापि विद्य-

1. मु. 'हि' नास्ति

2. आ. भवत्यात्मनःप्रकारः

3. आ. नीलत्वादिवत्

4. प्रकृतिप्रतिपाद्यप्रकारेति प्रकृत्यर्थतावच्छेदकीभूतधर्मेत्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानत्वात् । एवं च 'ब्राह्मणो यजेत' इत्यादिश्रुतेः प्रमाजनकत्वे सम्भवति न भ्रमजनकत्वं कल्पयितुमुचितमिति चेत्—

[1]न—प्रकारशब्दानां प्रकारिपर्यन्तत्वमिति नियमस्तावत् न सम्भवति । शरीरादिशब्दानामपि तथात्वेन शरीरिपर्यन्तत्वस्य रूपादिशब्दानां रूपिपर्यन्तत्वस्य च प्रसङ्गात् । न च—येषां शब्दानां प्रवृत्तिनिमित्तं धर्मिपर्यन्तं तेष्वेव प्रकारशब्देष्वयं नियमः । रूपादिशब्दानां प्रवृत्तिनिमित्तं तु न धर्मिपर्यन्तम् । तत्र परम्परासम्बन्धस्याधारतानियामकत्वाभावादिति—वाच्यम् । नीलत्वादीनां परम्परासम्बन्ध आधारतानियामकः न रूपत्वादीनाम्—इत्यत्र नियामकाभावात् । न च 'नीलो घटः' इतिवत् 'रूपं घटः' इति प्रतीतिर्नास्तीत्यतः तथा व्यवस्था आश्रीयत इति युक्तम् । किमियं प्रत्यक्षप्रतीतिः उत शाब्दी नीलत्वघटयोराधाराधेयभावावगाहिनी? न तावत् प्रत्यक्षप्रतीत्या तयोराधाराधेयभावोऽवगाह्यते । अपि तु नीलगुणे नीलत्वं गुणस्य च घटे [2]समवायः, तथा रूपत्वस्य रूपे रूपस्य च घटे सम्बन्धः, इति कोऽत्र विशेषः । न च नीलत्वघटयोराधाराधेयभावानवगाहने 'नीलो घटः' इत्युल्लेखो न स्यादिति वाच्यम् । तादृशोल्लेखो हि प्रत्यक्षप्रतीतेः समानाधिकरणनीलघटरूपशब्दद्वयानुरागकृतः, न तु नीलत्वाधारताकृतः । तयोस्सामानाधिकरण्यं तु नीलशब्दस्य द्रव्ये शक्तत्वादेव । अत एव शाब्दप्रत्ययोऽपि नाधारतानियामकः । तस्यापि गुणविशिष्टद्रव्यविषयकत्वात् । प्रमाणान्तरसिद्धं सम्बन्धमादाय हि लौकिकशब्दानां बोधकत्वम् । न तु स्वत एव किञ्चिदर्थसाधकत्वम् । अतो 'नीलो घटः' इति शब्दसामानाधिकरण्यात् न नीलत्वघटयोराधाराधेयभावः । नीलशब्दस्य च द्रव्ये शक्तिः नीलत्वप्रवृत्तिनिमित्तेन एकैवास्तु, गुणप्रवृत्तिनिमित्तेन भिन्ना वा अस्तु । न तत्र निर्बन्धः । परं तु नीलिमेत्यादिप्रयोगानुसारेण गुणप्रवृत्तिनिमित्तायाश्शक्तेरावश्यकत्वे तयैव सामानाधिकरण्यव्यवहारोपपत्तौ उत्सर्गतः प्राप्तः साक्षात्सम्बन्ध एव नीलत्वप्रवृत्तिनिमित्तकशक्तिघटक इति न तस्यां परम्परासम्बन्धोऽपि घटक आश्रयितुं युक्तः । एवं च 'नीलो घटः' इत्युल्लेखिन्याः प्रत्यक्षप्रतीतेः तयोश्शब्दयोस्सामानाधिकरण्यस्य च नीलत्वघटयोरक्लृप्ताधाराधेयभावकल्पनां विनैवोपपत्तौ न तदपूर्वं कल्पनीयम् । गौरवात् ।

---

1. एवमुत्थापितं परेषांमतं निरसितुमारभते-नेत्यादिना।
2. समवाय इति अवगाह्यते इत्यनुषङ्गः । एवं 'घटे सम्बन्धः' इत्यत्रापि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च प्रकारशब्दानां प्रवृत्तिनिमित्ताश्रये सर्वत्र शक्त्यभ्युपगमे नीलिमशब्दस्यापि घटपर्यन्तता स्यात्। तत्र हि इमनिच्प्रत्ययो नीलगुणाभिधायकः। भावप्रत्यया हि सर्वनामतुल्याः [1]प्रकारतासम्बन्धेन प्रकृतिजन्यामुपस्थितिं [2]प्रयोगोपाधिं कृत्वा तं तमर्थं [3]साक्षादेवाभिदधति। ततश्चात्र इमनिच्प्रत्ययो नीलत्वं प्रवृत्तिनिमित्तीकृत्य नीलगुणाभिधायी। स च प्रकारशब्दः। तत्प्रवृत्तिनिमित्तं च [4]परोक्तरीत्यैव घटेऽपि वर्तत इति तस्यापि घटपर्यन्तता स्यात्। एवमरुणिमादिशब्देष्वपि द्रष्टव्यम्। अतो न प्रकारशब्दानां प्रकारिपर्यन्तत्वमिति नियमस्सम्भवति।

ननु—मास्त्वयं नियमः। उत्सर्ग एवायमस्तु। स च क्वचित् रूपादिशब्देषु बाधकवशात् परित्यज्यते। तावन्मात्रेणापि मनुष्यादिशब्दानां आत्मपर्यन्तता सिध्यतीति चेत्—

न—न हि क्वचित् सहचारदर्शनमात्रेण बहुषु रूपरसादिशब्देषु व्यभिचारे सत्यपि उत्सर्गः कल्पयितुं शक्यते। अन्यथा नीलादिशब्ददृष्टान्तेनैव एकसम्बन्धिवाचकस्य शब्दस्य सम्बन्ध्यन्तरपर्यन्तत्वमित्युत्सर्गं प्रकल्प्य गङ्गायां घोष इति प्रयोगेऽपि गङ्गाशब्दस्तीरं शक्त्यैव बोधयतीति वक्तुं शक्यमिति लक्षणैव दत्तजलाञ्जलिः स्यात्। तस्मात् येषां नीलारुणादिशब्दानां धर्मिपर्यन्तत्वं दृष्टं [5]तेषामेव तद्व्यवस्थितम्। न तु तद्दृष्टान्तेन असत्यनुशासने प्रकारशब्दानां प्रकारिपर्यन्तत्वं प्रकल्प्य अन्यत्रापि शक्यं सञ्चारयितुम्।

ननु—मास्तु प्रकारशब्दानां प्रकारिपर्यन्तत्वम्। तथापि यथा नीलशब्दस्य द्रव्यपदसामानाधिकरण्यात् द्रव्ये शक्तिः कल्प्यते एवं ब्राह्मणादिशब्दानामप्यात्मनि शक्तिः कल्पनीया आत्मपदसामानाधिकरण्यनिर्वाहाय—इति चेत्—

---

1. **प्रकारतासम्बन्धेन प्रकृतिजन्यामुपस्थितिम्** — प्रकृतिजन्योपस्थितिप्रकारताम्।

2. **प्रयोगोपाधिमिति**। तत्पदजन्यबोधाविषयत्वे सति तत्पदजन्यबोधविषयव्यावर्तकत्वं तत्पदप्रयोगोपाधित्वम्।

3. **साक्षादेव**—तेन तेन विशेषरूपेण, न तु प्रकृतिजन्योपस्थितिप्रकारत्वेन सामान्यरूपेण।

4. **परोक्तरीत्या**—परम्परया।

5. आ. तेष्वेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न – यथा रजतपदस्य शुक्तौ शक्त्यन्तराभावेऽपि रजताभेदभ्रममादाय रजतमिदमिति सामानाधिकरण्यं व्यवह्रियते तथा मनुष्योऽहमिति सामानाधिकरण्यस्य अभेदभ्रममादायोपपत्तौ न शक्त्यन्तरं कल्पनीयम् । विवेकिनामपि तादृशभ्रम उपपादित एवेति तेषामपि व्यवहारो न शक्त्यन्तरकल्पकः । अभेदभ्रमश्च मनुष्यत्वाकारेणैव न शरीरत्वाकारेणेति प्राक् निरूपितम् । अतो न शरीरपदसामानाधिकरण्यव्यवहारः । एवं च—'मनुष्योऽहं' इति व्यवहारवत् 'शरीरमहं' इति व्यवहाराभावात् मनुष्यत्वस्य परम्परासम्बन्ध आधारताप्रयोजको न शरीरत्वस्येति कल्पनमपि निरस्तम् । क्लृप्तेन सकलवैदिकसम्मतेन मनुष्यत्वाकारेणतादात्म्यभ्रमेण उपपत्तौ 'मनुष्योऽहं' इति सामानाधिकरण्यस्य अक्लृप्ताधाराधेयभावप्रयोजकत्वानुपपत्तेः । एवं च–शरीरवाचकानां शब्दानां शरीरिणि मनुष्यादिशब्ददृष्टान्तेन शक्तिः इत्यपि [1]कल्पनं अपास्तम् । मनुष्यशब्दस्य उक्तगत्या आत्मनि शक्तिकल्पनं विनैव 'मनुष्योऽहं' इति सामानाधिकरण्यस्योपपादिततया दृष्टान्तस्यासिद्धेः ।

न च तथासति 'ब्राह्मणो यजेत' इत्यादिश्रुतेः भ्रमजनकतया अप्रामाण्यप्रसङ्ग इति शङ्कनीयम् । बोध्यबुद्ध्यनुसारेण तत्सिद्धार्थानुवादकत्वात् । लोकसिद्धभ्रमानुवादकतामात्रेण अप्रामाण्याप्रसक्तेः । दृश्यते हि लोकसिद्धभ्रमानुवादकत्वमन्यत्रापि । 'य उदगान्महतोऽर्णवाद्विभ्राजमानः सरिरस्य मध्यात् स मा वृषभो रोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु' [तै. आ. ४-९२] इति, वस्तुगत्या मेरुं प्रदक्षिणी कुर्वन्नप्यादित्यः समुद्रतीरवासिनां समुद्रात् उद्गत इव प्रतिभातीति तद्भ्रमसिद्धं समुद्रादुद्गतत्वं श्रुत्या अनूद्यते । तथा [2]तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति' [छा. उ. ५-९-२] इति पञ्चाग्निविद्यागतवाक्यमपि लोकप्रसिद्धशरीरतादात्म्यभ्रमानुवादकम् । यो दिष्टं[3] गतः स एवाग्नौ प्रक्षेप्तुं नीयत इति हि तदर्थः । एवं 'नेक्षेतोद्यन्त-

---

1. **कल्पनमिति** जीवजगतोः ब्रह्मशरीरत्वं प्रकल्प्य जीवजगद्वाचकानां शब्दानां सर्वेषां शरीरित्वाभिमते ब्रह्मणि शक्तिः इति कल्पनम् ।

2. **तं प्रेतं दिष्टमिति** प्रेतं—मृतं, दिष्टं—परलोकं प्रति कर्मणा निर्दिष्टं इति भाष्यम् । परलोकाय कर्मभिरादिष्ट इति कल्पतरुः । मरणपर्याये दिष्टान्तपदे तु दिष्टपदं कर्मफलार्थकम् ।

3. **दिष्टं गत इति** लोकान्तरं गतो जीवात्मा, अग्नौ प्रक्षेप्तुं नीयमानं शरीरं, तयोस्तदात्म्यं विना उक्तवाक्यार्थानिर्वाह इत्यर्थः । अत्र दिष्टपदं कर्मफलभूतपरलोकपरम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम । तद्यथा–पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति, तथा देहधर्मान्–स्थूलोऽहं, कृशोऽहं, गौरोऽहं, तिष्ठामि, गच्छामि, लङ्घयामि च इति । तथेन्द्रियधर्मान्—मूकः, काणः, क्लीबः, बधिरः, अन्धोऽहम् इति । तथाऽन्तःकरणधर्मान् कामसङ्कल्पविचिकित्साध्यवसाया-

मादित्यं नास्तं यन्तं कदाचन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥' [मनु. ४-३७] इत्यादीन्यपि उदाहार्याणि । अत्र वारिस्थत्वं भ्रमसिद्धमनूद्यते ।

न च—यन्मते परम्परासम्बन्धेन शक्तिद्वयेन वा 'ब्राह्मणो यजेत' इत्यादिवाक्यं प्रवर्तते तत्र प्रमितिसिद्धार्थानुवादकत्वमित्युत्सर्गोऽनुसृतो भवति, तव तु स परित्यक्तः स्यादिति—वाच्यम् । परस्यापि हि साक्षात्सम्बन्धेनप्रवृत्तिनिमित्तप्रकारकज्ञानजनकत्वमित्युत्सर्गपरित्यागः प्राप्त एव । परं तु क्वचिदाधारतानियामकः परम्परासम्बन्धः क्वचिन्नेति कल्पनं शक्तिद्वयकल्पनं [1]बोध्यमतिक्लेशश्चेत्यधिकम् ।

ततश्च 'ब्राह्मणो यजेत' इति वाक्यं वर्णाध्यासमाश्रित्य प्रवर्तत इति सिद्धम् ।

'अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ।' [मनु. ३-२] इत्याश्रमाध्यासः । 'तं चेदेतस्मिन् वयसि किञ्चिदुपतपेत्' [छा. उ. ३-१६-२] इति वयोऽवस्थयोरध्यासः ।

अध्यासमुदाहर्तुं [2]पूर्वोक्तं लक्षणं स्मारयति—**अध्यासो नामेति** । उदाहरति—**तद्यथेति** । यद्यपि भेदग्रहस्य विद्यमानतया पुत्रादिधर्माणां शरीरधर्माणां कृशत्वादीनामिव नाध्यास आत्मनि सम्भवति, तथापि पुत्रादिकृतशरीरोपचारजनितं स्वात्मनि सुखभाक्त्वं पुत्रादिसाकल्यवैकल्यप्रयुक्तसाकल्यवैकल्ययोग्यं अध्यस्य सुखवैकल्यसाकल्याभ्यां तद्विशिष्टस्यात्मनो वैकल्यसाकल्ये अनुसन्दधानः पुत्रे

1. **बोध्यमतिक्लेशः**—बोध्यस्य–उपदेश्यस्य या मतिः—अन्तःकरणं, तस्य क्लेशः-तत्रतत्र परम्परासम्बन्धस्य आधारतानियामकत्वसदसद्भावनिर्णायकसामग्रीसम्पादनप्रयुक्तः क्लेशः । मु. बोध्यम् । अति०

2. **पूर्वोक्तमिति** 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः अध्यासः' इति अध्यासलक्षणवाक्यस्य अतस्मिंस्तदबुद्ध्यर्थकतया पूर्वं व्याख्यातत्वात् अस्य लक्षणस्य पूर्वोक्तत्वम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीन् । एवं अहंप्रत्ययिनं अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनि अध्यस्य तञ्च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिष्वध्यस्यति । एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ।

विकले 'अहमेव विकलः' सकले 'सकलः' इति व्यवहरतीति बाह्यधर्मप्रयुक्तसाकल्यवैकल्याध्यास एव बाह्यधर्माध्यासो विवक्षितः । अहंप्रत्ययिनं—अहङ्कारम् । अध्यासस्यानन्तत्वं आत्मतत्त्वज्ञानं विना नाशरहितत्वम् ।

एवं कर्तृत्वादिबन्धस्याध्यस्तत्वं[1] प्रसाध्य तत्प्रसाधनफलभूतां विषयप्रयोजनयोस्सिद्धिमाह—**अस्यानर्थहेतोः प्रहाणायेति** । अहमित्यभिमानस्य प्रवृत्तिजननद्वारा अनर्थहेतुत्वं प्रसिद्धमेव । बन्धस्य सत्यत्वे हि तत्त्वज्ञाननिवर्त्यता न स्यात् निष्प्रपञ्चात्मज्ञानं तत्त्वज्ञानं च न स्यात् । मिथ्यात्वे तु शुक्तिरजतादिवत् तत्त्वज्ञाननिवर्त्यता सिद्ध्यति, रजतसंसर्गे विद्यमानेऽपि नेदंरजतमिति तत्वज्ञानवत् निष्प्रपञ्चात्मज्ञानं[2] तत्त्वज्ञानमपि[3] भवतीति सफलं बन्धमिथ्यात्वनिरूपणम् । आरभ्यन्ते-अध्यापकैः [4]पाठ्यन्त इत्यर्थः ।

नन्वत्र वेदान्तजन्यज्ञानस्य [5]साक्षात्कारात्मकप्रतिपत्तिरूपस्यात्मैकत्वविषयकस्य अनर्थात्मकबन्धनिवृत्तिः प्रयोजनमुच्यते । नैतदुपपद्यते—वेदान्तजन्यज्ञानस्य शाब्दबोधात्मकस्य प्रमाणस्वभावपर्यालोचनया साक्षात्कारत्वानुपपत्तेः, तदनुपपत्तौ च अनर्थनिवर्तकत्वमपि न सम्भवति, अपरोक्षाध्यासरूपे अहङ्काराद्यनर्थे अपरोक्षज्ञानस्यैव निवर्तकत्वात् ।

---

1. मु. अध्यासत्वं
2. आ. ज्ञानमपि
3. आ. 'अपि' नास्ति
4. मु. पठ्यन्ते
5. **साक्षात्कारात्मकप्रतिपत्तीति** 'आत्मैकत्वविद्याप्रतिपत्तये' इति भाष्ये प्राप्त्यर्थकप्रतिपत्तिशब्दवैयर्थ्यमाशङ्क्य साक्षात्कारात्मकतालाभार्थं प्रतिपत्तिपदं इत्युक्तं पञ्चपादिकायाम्, उपपादितञ्चैतत् विवरणे, तदनुसारेणेदं व्याख्यानम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ननु च ज्ञानस्यापरोक्षत्वं न करणविशेषप्रयुक्तम्, किं तु अपरोक्षार्थसम्बन्धप्रयुक्तम्। ततश्च 'यत् साक्षात् अपरोक्षात् ब्रह्म' [बृ. उ. ३-४-१] इतिशास्त्रात् ब्रह्मणो नित्यापरोक्षतया वेदान्तजन्यमपि ज्ञानं अपरोक्षब्रह्मसम्बन्धितया अपरोक्षमेव भविष्यतीति चेत्—

न—अपरोक्षार्थसम्बन्धिज्ञानमपरोक्षमिति वदता अर्थस्यापरोक्ष्यं किंरूपं विवक्षितमिति वक्तव्यम्। न तावदपरोक्षज्ञानविषयत्वम्, इतरेतराश्रयापातात्।

नापि चैतन्याभिन्नत्वम्, व्यवहितस्यापि घटाद्यवच्छिन्नचैतन्यस्य [1]स्वाभाविकचैतन्याभेदशालितया तादृशघटस्य आध्यासिकचैतन्याभेदशालितया च अपरोक्षत्वापातात्।

नापि—अभिव्यक्तचैतन्याभिन्नत्वं तत्, अभिव्यक्तिश्चावरणनिवृत्तिः, सा व्यवहिते वृत्तिसंसर्गाभावात् न सम्भवतीति—युक्तं वक्तुम्। तादृशचैतन्येन यदि [2]वास्तविकोऽभेदो विवक्षितः तदा पूर्वोक्तदोषस्तदवस्थ एव। अन्तःकरणावच्छिन्नचैतन्यस्याभिव्यक्ततया तेन [3]व्यवहितचैतन्यघटयोः वास्तविकस्याभेदस्य[4] विद्यमानत्वात्।

नापि—तादृशचैतन्येन स्फुरदभेदो विवक्षितः, व्यवहिते विद्यमानोऽप्यभेदो न स्फुरतीति—युक्तम्। तथासति सुखादीनामपरोक्षता न स्यात्। तेषां [5]संसर्गाध्यासाभ्युपगमेन [6]अभेदस्य [7]स्फुरत्ताया अभावात्।

नापि—निवृत्तभेदोपाधिकचैतन्याभेदशालित्वम्, व्यवहितेच अन्तःकरणावच्छेदतदनवच्छेदरूपभेदोपाधेर्विद्यमानतया न निवृत्तभेदोपाधिकाभेदशालित्वमिति—

---

1. **स्वाभाविकेति** इदमभेदे विशेषणम्।

2 **वास्तविकः**—स्वरूपसन्। अभासमान इति यावत्।

3. **व्यवहितेति** व्यवहितघटाद्यवच्छिन्नेत्यर्थः।

4. **अभेदस्य**—व्यवहितघटाद्यवच्छिन्नचैतन्ये स्वाभाविकस्य तादृशघटादौ आध्यासिकस्य अभेदस्य।

5. **संसर्गाध्यासेति** 'अहं सुखी' इत्यनुभवात् 'अहं सुखं' इत्यननुभवाच्च इति भावः।

6. आ. तत्राभेदस्य

7. **स्फुरत्तायाः**—भासमानतायाः।

12

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युक्तम् । तथासति चरमसाक्षात्कारोत्पत्तिदशायां चैतन्यस्यापरोक्षता न स्यात् । तदा अविद्याया भेदोपाधेर्विद्यमानत्वात्[1] ।

नापि स्वव्यवहारानुकूलचैतन्याभेदशालित्वम् । आनुकूल्यस्य चैतन्यविशेषणत्वे व्यवहितघटादौ [2]पूर्वोक्तदोषस्तदवस्थ एव । स्वव्यवहारानुकूलेन जीवचैतन्येन वस्तुगत्या अभेदस्य विद्यमानत्वात् । स्फुरत्ताविवक्षायां च सुखादौ दोषस्तदवस्थ एव । आनुकूल्यस्य अभेदविशेषणत्वे तु असम्भवः । अनुमेयस्य वृत्तिकृतचैतन्याभेदाभावेऽपि[3] व्यवह्रियमाणतया व्यभिचारेण व्यवहारे जीवचैतन्याभेदस्यानुकूलत्वाभावात् ।

नापि निवृत्तावरणचैतन्याभेदशालित्वं तत् । निवृत्तावरणत्वस्य आपरोक्ष्यज्ञानाधीनज्ञानत्वेन आपरोक्ष्यस्य तद्धटितत्वेऽन्योन्याश्रयात् । तस्मात् न अपरोक्षार्थसम्बन्धित्वं ज्ञानस्यापरोक्षत्वम् । अर्थापरोक्ष्यस्यैव दुर्ज्ञानत्वात् ।

तस्मादेवं ज्ञानापरोक्षत्वं वक्तव्यम् । स्वाविषयविषयकज्ञानाजन्यज्ञानत्वं ज्ञाने अपरोक्षत्वम् । विशेषणज्ञानजन्यविशिष्टज्ञाने अव्याप्तिवारणाय स्वाविषयविषयकेति । विशेषणस्यापि विशिष्टज्ञानविषयत्वात् नाव्याप्तिः । न चैवमपि दण्डीति विशिष्टज्ञानात् प्राक् 'दण्डकुण्डले' इति यत्र विशेषणज्ञानं तत्र कुण्डलस्य विशिष्टज्ञानाविषयत्वादव्याप्तिरिति वाच्यम् । स्वाविषयविषयकत्वं यस्य ज्ञानस्य वस्तुगत्या[4] जनकतावच्छेदककोटिनिविष्टं तदजन्यत्वस्य विवक्षितत्वात् । उक्तज्ञानस्य च कुण्डलविषयत्वं न तथेति तादृशज्ञानजन्यत्वेऽपि न दोषः ।

---

1. **विद्यमानत्वादिति** अविद्यानिवृत्तिं प्रति चरमसाक्षात्कारस्य हेतुतया चरमसाक्षात्कारोत्पत्तिद्वितीयक्षणे एव अविद्याया निवृत्तेः इति भावः । अज्ञाननिवृत्तिः ज्ञानस्वरूपा घटप्रागभावनिवृत्तेः घटस्वरूपत्ववत्—इति मते तु नायं दोषः ।

2. **पूर्वोक्तदोषः**—जीवचैतन्येनस्वाभाविकाभेदवता व्यवहितावच्छिन्नचैतन्येन आध्यासिकाभेदवत्त्वात् व्यवहितस्यापि अपरोक्षत्वापत्तिः इति दोषः ।

3. **चैतन्याभेदाभावेऽपीति** तत्तदाकारधीवृत्तिमुल्लासमात्रादपि भवति व्यवहारे चैतन्याभेदस्य अनपेक्षितत्वात् अभाव इति भावः ।

4. **वस्तुगत्येति** स्वाविषयेत्यनेनान्वेति । वस्तुनो गतिः—स्थितिः—सत्ता । सत्तामात्रेण स्वाविषयत्वं विषयस्य विवक्षितम्, न तु तद्घटितरूपेण जनकत्वं विवक्षितम् । अन्यथा व्याप्तिज्ञानादेः व्याप्त्यादिविषयकत्वेनैव जनकतया अनुमित्य-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईश्वरज्ञानस्योपादानगोचरज्ञानत्वेन 'बहुस्याम्' [छा. उ. ६-२-३] इतिवत् 'इदं ज्ञानं अस्य स्यात्' इति सङ्कल्परूपेण वा जनकत्वेन तज्जन्यतया अव्याप्तिवारणाय [1]अनैश्वरेत्यपि विशेषणीयम् ।

तथा सगुणध्यानजन्यस्य 'मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' [छा. उ. ८-१२-५] इति श्रुतिसिद्धस्य ब्राह्मलौकिकपित्रादिकामसाक्षात्कारस्य स्वाविषयविषयकोपासनारूपज्ञानजन्यतया[2] तत्राव्याप्तिवारणाय अदृष्टाद्वारकेत्यपि विशेषणीयम् । न च सगुणोपासनाया अप्युपास्यसाक्षात्काररूपदृष्टद्वारतया पुनरपि स दोषस्तदवस्थ एव[3] इति शङ्कनीयम् । न हि तत्र तावन्मात्रमेव द्वारम्, पारलौकिकफलतया अदृष्टमपि तत्र द्वारभूतमस्त्येव ।

न चैवमपि[4] कोलाहलस्थलीयस्वपुत्रादिशब्दसाक्षात्कारस्य बुभुत्साद्वारा साक्षात्कारगतेष्टसाधनताज्ञानजन्यतया तत्र अव्याप्तिरिति शङ्कनीयम् । बुभुत्सया अन्यथासिद्धस्य तस्य साक्षात्काराजनकत्वात् । बुभुत्सापि शब्दान्तरगोचरसाक्षात्कारप्रतिबन्धिका । तस्मिन् प्रतिबद्धे [5]स्वसामग्रीवशादेव पुत्रादिशब्दसाक्षात्कार इति न तत्राव्याप्तिशङ्कापि ।

न चैवमपि 'सर्वं व्याप्तिज्ञानं अनुमितिकारणम् व्याप्तिज्ञानत्वात्' इत्येवमनुमितिस्थले अनुमितेस्सर्वव्याप्तिगोचरतया कारणीभूतव्याप्तिज्ञानविषयोऽपि व्याप्तिविशेषो विषयो भवतीति तत्रातिव्याप्तिरिति वाच्यम् । 'यत्र यत्र व्याप्तिज्ञानत्वं तत्र

विषयविषयकत्वादिना अजनकतया उक्तलक्षणस्य अनुमित्यादावतिव्याप्तिः स्यात् इत्यर्थः ।

1. **अनैश्वरेत्यपीति** ज्ञानमिति शेषः । स्वसमानाधिकरणत्वेन विशेषणेऽपि उक्तदोषवारणं सम्भवतीति ज्ञेयम् ।

2. **उपासनारूपज्ञानजन्यतयेति** ध्यानस्य ज्ञानसन्ततिरूपत्वं—इति मताभिप्रायेणेदम् । ध्यानस्य विधेयत्वं ज्ञानरूपत्वे न सम्भवति, अतो न ज्ञानरूपता, अपि तु आहार्यवृत्तिरूपता—इति मते तु अदृष्टाद्वारकेति जनकताविशेषणं न देयम् । द्वारभूतोपास्यसाक्षात्कारजन्यतामादाय अव्याप्तिवारणाय तु अदृष्टासहकृतत्वं ज्ञानविशेषणं देयम् ।

3. मु. 'एव' नास्ति

4. मु. 'अपि' नास्ति

5. **स्वसामग्रीवशादेवेति**—एवञ्च तत्र बुभुत्साया अप्यकारणत्वं इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र अनुमितिकारणत्वं' इति व्याप्तिज्ञानस्य साध्यतावच्छेदकानुमितिकारणत्वत्व-व्याप्यतावच्छेदकव्याप्तिज्ञानत्वत्वादिविषयतया अनुमितेः तदविषयतया च नातिव्याप्तिः । न चैवमपि साध्यतावच्छेदकव्याप्यतावच्छेदकविषयकव्याप्तिज्ञानमिति पक्षीकारे स दोषस्तदवस्थ इति शङ्क्यम् । तत्र साध्यतावच्छेदकव्याप्यतावच्छेदकयोस्सामान्यधर्ममात्रेण विषयीकारात् सामान्यधर्ममात्रानवच्छिन्नतया यःस्वविषयो न भवतीति विवक्षया तद्दोषवारणसम्भवात् ।

न च—एवमप्यभावज्ञानेऽतिव्याप्तिः, तस्य ज्ञानाभावजन्यतया ज्ञानाजन्यत्वात् इति—वाच्यम् । न हि तत्र अनुपलब्धिरूपज्ञानाभावमात्रं कारणम्, किं तु [1]योग्यतासहकृतम् । योग्यता च भेदसाक्षात्कारे प्रतियोगितादात्म्यज्ञानप्रसञ्जनरूपा संसर्गाभावस्थले प्रतियोगिसंसर्गज्ञानप्रसञ्जनरूपेति, तर्करूपाया योग्यतायाः स्वाविषयविषयतया तज्जन्ये अभावज्ञाने नातिव्याप्तिः । न चैवं प्रत्यभिज्ञायास्तत्तांशेऽतिव्याप्तिः । चरमज्ञानपदस्य अनुभवपरत्वात् । प्रत्यभिज्ञायाश्च तत्तांशे स्मृतिरूपतया न दोषः । इदं च नित्यानित्यज्ञानसाधारणमपरोक्षत्वमिति न कोऽपि दोषः ।

तादृशज्ञानजन्यव्यवहारयोग्यत्वं[2] च अर्थस्य अपरोक्षत्वम् । शाब्दज्ञानस्य च स्वाविषयविषयकशब्दतच्छक्त्यादिज्ञानजन्यतया नोक्तलक्षणसङ्गतिरिति नापरोक्षत्वम् । ततश्च कथं वेदान्तजन्यज्ञानस्य [3]अविद्यानिवर्तकत्वमुच्यत इति चेत्—

सत्यम् । यद्यपि शब्दादपरोक्षज्ञानं उक्तगत्या न सम्भवति, तथापि निर्विचिकित्सशाब्दज्ञानानन्तरं तत्समानविषयिण्या आदरदीर्घकालनैरन्तर्ययुक्तया भावनया संस्कृतेन चित्तेन अविद्यानिवर्तकः आत्मविषयकस्साक्षात्कारो जायते । मनसश्च कर्तृत्वादिविशिष्टात्मसाक्षात्कारकरणत्वं क्लृप्तमेव । विशुद्धात्मसाक्षात्कारे तु 'दृश्यते त्वग्र्यया बुद्ध्या' [क-उ. ३-१२-१२] इति श्रुतिप्रामाण्यात् उपासनाजनितसंस्कारो विशेषसहकारीति कल्प्यते । यद्यपि भावनाजनितस्य विधुरादिगतकामिन्यादिसाक्षात्कारस्य प्रायशो विसंवादो दृश्यत इति अत्रापि शुद्धात्मसाक्षात्कारे

---

1. **योग्यतासहकृतमिति** योग्यताविशिष्टं इत्यर्थः । योग्यानुपलब्धेरेव प्रमाणत्वात् इति भावः ।

2. मु. व्यवहारविषययोग्यत्वं

3. मु. अपरोक्षत्वमुच्यते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावनानिष्पन्नतारूपसाधारण्याद्विसंवादशङ्का भवेत्, तथापि सा शङ्का निर्णीतप्रामाण्यस्वसमानाकारौपनिषदात्मज्ञानानुसन्धानेनोन्मूलनीया। न हि समानाकारयोर्ज्ञानयोः किञ्चिज्ज्ञानं संवादि किञ्चिन्नेति प्रतिपन्नम्। एवं परैर्निराकृतं शाब्दापरोक्षं तथैवानुसरतां भामतीमतानुयायिनां पक्षे परम्परया शाब्दज्ञानस्य अनर्थनिवर्तकत्वमिति [1]भाष्यार्थो द्रष्टव्यः।

विवरणानुयायिनस्तु न शाब्दापरोक्षनिराकरणं अनुमन्यन्ते[2]। तथा हि—अपरोक्षार्थगोचरव्यवहारजनकत्वयोग्यज्ञानत्वमेव ज्ञानस्यापरोक्षत्वम्। न तु स्वाविषयविषयकज्ञानाजन्यज्ञानत्वम्। 'अयमस्मात् परः' 'अयमस्मात् अपरः' इति कालकृतपरत्वापरत्वप्रत्यक्षयोः [3]स्वाविषयविषयकबहुतरतपनपरिस्पन्दाल्पतरतपनपरिस्पन्दान्तरितजन्मत्वावगाह्यपेक्षाबुद्धिजन्ययोरव्याप्तेः, 'अयमेकः' 'अयमेकः' इत्याद्यपेक्षाबुद्धिजन्यद्वित्वादिसाक्षात्कारे अव्याप्तेश्च, विशिष्टमातापितृजन्यत्वज्ञानजन्ये ब्राह्मणत्वादिसाक्षात्कारे अव्याप्तेश्च[4]। न चोपदेशोपनीतं विशिष्टमातापितृजन्यत्वमपि ब्राह्मणत्वसाक्षात्कारविषय इति न विशिष्टमातापितृजन्यत्वज्ञानस्य स्वाविषयविषयत्वमिति वाच्यम्। न ह्युपनीतं सर्वं सर्वत्र भासत इति नियमः। तथासति परामर्शोपनीतस्य लिङ्गादेरपि[5] लैङ्गिकज्ञानविषयतापत्त्या अनुमितौ सर्वत्र अतिव्याप्त्यापत्तेः। स्वपदघटिततया अननुगतेश्च।

---

1. **भाष्येति** 'अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इति भाष्येत्यर्थः।

2. मु. संमन्यन्ते

3. आ. स्वाविषयविषयकसंयुक्तसंयोगबहुत्वाल्पत्वावगाह्यपेक्षा०

4. **अव्याप्तेश्चेति** इदमुपलक्षणम्—अनुपलब्धिरूपेण ज्ञानाभावेन जन्ये अभावज्ञाने अतिव्याप्तेश्च। स्वाविषयविषयकतर्कजन्यत्वेऽपि ज्ञानाजन्यत्वात्। सिद्धान्ते तर्कस्य ज्ञानरूपत्वाभावात्। न्यायमतानुसारेण तर्कस्य ज्ञानरूपत्वाङ्गीकारेऽपि, प्रसञ्जनाभावेऽपि घटाभावज्ञानोत्पत्त्या पूर्वोक्तप्रसञ्जनयोग्यत्वस्यैव अभावज्ञानहेतुत्वेन उक्तयोग्यत्वस्य ज्ञानरूपत्वाभावात्। न च अभावज्ञानं लक्ष्यम्। इन्द्रियाजन्यत्वेन प्रत्यक्षत्वाभावात्। शाब्दापरोक्षानङ्गीकर्तृभामतीकारमते प्रत्यक्षत्वस्य करणनिबन्धनत्वात्।

5. मु. ०नीतस्यापि लिङ्गादेः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्थापरोक्ष्यघटितमपि ज्ञानापरोक्ष्यं वक्तुं न शक्यत इत्युक्तमिति चेत्, न— भवेदेतदेवम्, यद्यर्थापरोक्ष्यं दुर्निरूपं स्यात्। [1]अभिव्यक्तचैतन्याभिन्नतयाभासमानत्वमर्थापरोक्ष्यमित्येवंरूपेण सुनिरूपमेव हि तत्। न च संसर्गाध्यासविषयेषु 'अहं सुखी, इच्छामि' इत्येवमाकारेण प्रतीयमानेषु साक्ष्यभिन्नतया भासमानत्वाभावात् अव्याप्तिरिति वाच्यम्। तेषां अहन्त्वाकारेण चैतन्यस्य [2]संसर्गाध्यासाधिष्ठानत्वेऽपि स्फुरणात्मना[3] तादात्म्याध्यासोपपत्तेः। तथा च 'सुखं स्फुरति' इत्यनुभवः। दृष्टं च आकारभेदेन अध्यासवैलक्षण्यं शरीरत्वाकारेण संसर्गाध्यासविषये मनुष्यत्वाकारेण तादात्म्याध्यासविषये च शरीरे। ततश्च स्फुरणाभिन्नतया भासमानेषु सुखादिषु नाव्याप्तिः। न चानुमेयादावतिव्याप्तिः। अभिव्यक्तचैतन्याभिन्नतया भासमानत्वाभावात्[4]

---

1. **अभिव्यक्तचैतन्येति** घटादौ प्रत्यक्षे विषये अभिव्यक्तंघटाद्यधिष्ठानचैतन्यमादाय लक्षणं सङ्गमनीयम्। संसारदशायामपि ब्रह्मणः अभिव्यक्तेन साक्षिचैतन्येन वस्तुतोऽभेदे सत्यपि ब्रह्मणो जीवं प्रत्यपरोक्षत्वाभावात् अभिव्यक्तचैतन्याभेदमात्रं न अर्थापरोक्ष्यं भवतीति भासमानत्वपर्यन्तानुधावनम्। तथा च अभिव्यक्तचैतन्याभेदाभिव्यक्तिमत्त्वं अर्थापरोक्ष्यं इति फलितम्। संसारदशायां जीवब्रह्मणोः अज्ञानकृतभेदस्य तदभेदाभिव्यक्तिप्रतिबन्धकत्वात् ब्रह्मणः नोक्तमर्थापरोक्ष्यं इति भावः।

2. मु. संसर्गाधिष्ठानत्वेऽपि

3. **स्फुरणात्मनेति** प्रत्यक्षे घटादावपि 'अहं घटः' इत्यननुभवात् 'घटः स्फुरति' इत्यनुभवमादायैव अर्थापरोक्ष्यलक्षणस्य सङ्गमनीयत्वादितिभावः। न च 'घटः स्फुरति' इत्यनुभवे घटस्य स्फुरणाश्रयत्वमेव भाति न तु स्फुरणाभेद इति वाच्यम्। 'घटः स्फुरति' इति शब्दप्रयोगे आख्यातस्य आश्रयार्थकत्वाङ्गीकारेण स्फुरणाश्रयाभेदभानेन तन्मूलभूते प्रत्यक्षेऽपि स्फुरणाश्रयाभेदभानात्, स्फुरणाश्रयाभेदभानस्यैव स्फुरणाभेदभानरूपत्वात्, स्वप्रकाशचैतन्यतत्स्फुरणयोः ऐक्येन आश्रयाश्रयिभावस्य औपचारिकत्वात्, उपचारस्य च शब्दधर्मत्वात् 'स्फुरति' इति शब्दप्रयोगे एव स्फुरणतदाश्रयभावेन भेदभानात्। तथा च 'स्फुरति' इति प्रत्यक्षे स्फुरणद्वित्वानुपलम्भात् स्फुरणाभेद एव भासते इति अर्थापरोक्ष्यलक्षणं निरवद्यम्। विवेचितमेतत् अच्युतकृष्णानन्दतीर्थैः। आख्यातस्य आश्रयत्वार्थकत्वेऽपि नानुपपत्तिः। चैतन्यरूपस्फुरणघटयोर्हि परस्पराध्यासः। तथा च तयोः परस्परतादात्म्यम्। तादात्म्येन आश्रयत्वं च तादात्म्यमेवेति स्फुरणाश्रयत्वभानस्य स्फुरणाभेदभानरूपत्वात्—इति।

4. **भासमानत्वाभावादिति** परोक्षे विषये वृत्तिसंसर्गाभावेन तदधिष्ठानचैतन्यं नाभिव्यक्तम्, अभिव्यक्तेन साक्षिचैतन्येन अधिष्ठानचैतन्यस्य वास्तवाभेदसत्त्वेऽपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न चैवमपि[1]—अभिव्यक्तिरत्रावरणनिवृत्तिः, तत्रच अपरोक्षज्ञानं प्रयोजकम् । ततश्च अपरोक्षार्थगोचरव्यवहारजननयोग्यत्वलक्षणस्य ज्ञानापरोक्ष्यस्य आवरणनिवृत्तिप्रयुक्ततया[2] अन्योन्याश्रयः—इति शङ्कनीयम् । अर्थस्याभिव्यक्तिर्हि न निरुक्तज्ञानापरोक्ष्याधीना । किं तु केषांचिदर्थानां अविद्यान्तःकरणतद्धर्मतदवच्छिन्नचैतन्यानां [3]स्वत एव । बाह्यघटादीनां तु वृत्तिसंसर्गाधीना । ततश्च बाह्ये घटादौ यत ज्ञानं स्वकारणमहिम्ना योग्यविषयसंसर्गेणोदेति तत् तत्र आवरणनिवर्तकम् । गन्धादेस्तु चाक्षुषवृत्तावयोग्यत्वादेव वृत्तिसंसर्गेऽपि न आवरणनिवृत्तिः । एवं धर्माधर्मादावपि । नचैवं—हृदयादिगोचरानुमितेः अन्तःकरणस्य हृदयस्थितिदशायां जायमानायाः तत्संसर्गेण निष्पत्तेः आवरणनिवर्तकता स्यात् । न च तस्य धर्मादिवदयोग्यत्वमेव, तथासति विशसनादिना बहिर्निर्गतस्याप्यभिव्यक्तिर्न स्यात्—इति वाच्यम् । न हि हृदयादिगोचरानुमितिः स्वकारणमहिम्ना विषयसंसृष्टा । या यत्करणजन्या यद्विषया वा जायमाना विषयेण नियततया संसृष्टैवोदेति सा खलु स्वकारणमहिम्ना [स्वविषयमहिम्ना वा] विषयसंसृष्टेत्युच्यते । चक्षुरादिकरणिका करणमाहात्म्यात् नियतविषयसंसर्गा । प्रत्यग्विषया तु विषयमहिम्ना । न हि काचिदपि वृत्तिः प्रतीचा संसर्गरहिता जायते । तस्य वृत्तिषूपादानत्वात्[4] । हृदयगोचरा त्वनुमितिः न तथा । न ह्यनुमानं वृत्तिसंसर्गे प्रयोजकम् । वह्न्याद्यनुमाने व्यभिचारात् । नापि हृदयरूपविषयमहिम्ना । हृदयाद्बहिर्निर्गतान्तःकरणावयवावच्छेदेन जायमानायाः हृदयविषयवृत्तेः हृदयसंसर्गनियमाभावात् ।

ततश्च वेदान्तजन्यज्ञानस्य प्रत्यगभिन्नब्रह्मविषयस्य विषयमहिमाधीनतत्संसर्गशालितया निरतिशयानन्दगोचरावरणनिवर्तकता, प्रतीचश्चाभिव्यक्तचैतन्यस्वरूपा-

---

नाभेदाभिव्यक्तिः, ततश्च अधिष्ठानचैतन्याभेदस्य भासमानत्वेऽपि अभिव्यक्तचैतन्याभेदस्य अभासमानत्वात् अभिव्यक्तचैतन्याभेदाभिव्यक्तिमत्त्वरूपं अर्थापरोक्ष्यं न परोक्षस्य विषयस्येति भावः ।

1. मु. 'अपि' नास्ति

2. मु. प्रयोजकतया

3. **स्वत एव**—आवरणाभावादेव । साक्षिचैतन्यरूपाभिव्यक्तचैतन्याध्यस्ततयैव सिद्धेः ।

4. **उपादानत्वात्**—विवर्तोपादानत्वात्, अधिष्ठानत्वादिति यावत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्मना [भासमानस्य] अपरोक्षार्थतया तद्विषयव्यवहारजननयोग्यस्य वेदान्तजन्य-वृत्तिरूपस्य वा स्वरूपभूतस्य वा ज्ञानस्य अपरोक्षत्वं च। ततश्च 'दशमस्त्वमसि' इतिवाक्यजन्यमपि ज्ञानं साक्षिविषयतया अपरोक्षम्। एवं पर्वताद्यंशे अनुमितेरप्य-परोक्षत्वम्।

न चैवं आवरणनिवृत्तौ ज्ञाने अपरोक्षत्वातिरिक्तस्य विषयसंसर्गस्य प्रयोजक-तायाः स्वीकारात् किमर्थं वेदान्तजन्यज्ञानस्यापरोक्षत्वप्रसाधनमिति शङ्कनीयम्। यद्यदावरणनिवर्तकं तत् सर्वं अपरोक्षमिति नियमः प्रकृते बाधितो माभूदिति। 'नेदं रजतं, किं तु शुक्तिः' इतिपरोक्षज्ञानं तु विक्षेपांशाज्ञानमात्रनिवर्तकम् [1]न त्वावरण-मपि निवर्तयति।

न चैवं—अध्ययनगृहीतवेदान्तजन्यज्ञानस्यापि साक्षिगोचरस्य श्रवणादेः पूर्वं अज्ञाननिवर्तकता स्यात् अपरोक्षत्वात्—इति वाच्यम्। निदिध्यासनपर्यन्तं तत्तद्दोषप्रतिबद्धस्य अज्ञानानिवर्तकत्वात्। तत्र च श्रवणनिवर्तनीयो दोषः 'इदं वाक्यं प्रत्यगभिन्नब्रह्मपरं न सम्भवति' इति प्रमाणासम्भावनारूपः। मनननिवर्तनीयश्च 'विरुद्धतया भासमाने प्रतीचि कथं ब्रह्माभेदः' इति प्रमेयासम्भावनारूपः। निदिध्यासननिवर्तनीयस्तु [2]कर्तृत्वाद्यध्यासस्य स्वरसवाहितारूपो विपरीतभावनात्मकः। अतो निदिध्यासनान्तैः साधनैः प्रतिबन्धकेष्वपनीतेषु जायमानं वेदान्तवाक्यजन्यं ज्ञानं अविद्यां नाशयत्येव।

न च—यन्मते मानसं ज्ञानं अविद्यानिवर्तकं तस्य निदिध्यासनानन्तरं वेदा-न्तवाक्यानुसन्धानं नापेक्षितम्, शाब्दापरोक्षवादिनस्तु तत्कल्पनं निर्मूलमिति-शङ्कनीयम्। 'ओमित्यात्मानं युञ्जीत' [म. ना. १७-१५] इत्यादिभिः शास्त्रैः, तापनीयश्रुत्यादिपर्यालोचनया [3]महावाक्यसमानार्थस्य प्रणवस्य ध्यानकालेऽप्यनुसन्धान

1. **न त्वावरणमपीति** विषयगताज्ञानातिरेकेण प्रमातृगताज्ञाने प्रमाणाभाव इति भावः।

2. **कर्तृत्वाद्यध्यासस्य स्वरसवाहितारूप इति** पूर्वजन्मस्वसकृदनुभवजन्यो वासनासङ्घः स्वरसः, तेन प्रवहनशीलः स्वरसवाही। अतिनिरूढवासनाप्रयुक्तः कर्तृत्वाद्य-ध्यासप्रवाह इति समुदितार्थः। मु. कर्तृत्वाध्यासस्य

3. प्रणवस्य महावाक्यसमानार्थत्वमुपपादितं नृसिंहोत्तरतापनीये प्रथमखण्डे, विवृतं द्वितीयादिखण्डेषु, व्याख्यातश्च श्रीविद्यारण्यस्वामिभिः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिपादनेन अखण्डाकारचरमवृत्तिकालेऽपि [1]तदनुस्मरणस्य श्रुतिसम्मतत्वात् । अस्मिंश्च पक्षे भाष्यं[2] न परम्पराभिप्रायं व्याख्येयम् ।

एवं 'तं त्वौपनिषदं पुरुषं पृच्छामि' [बृ. उ. ३-९-२६] इति श्रुति-प्रतिपन्नमुपनिषदेकगम्यत्वं 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरम्' [छा.उ. ६-१४-२] इति आचार्याधीनस्य शाब्दज्ञानस्य जन्मान्तरनिवृत्तप्रायसकलदोषपुरुष-विशेषे प्रारब्धमात्रावशेषरूपजीवन्मुक्तिसाधनत्वं 'तस्मै मृदितकषायाय तमसः पारं दर्शयति' [छा. उ. ७-२६-२] इति दृशिधातूपात्तसाक्षात्काररूपत्वं, 'तद्धास्य [3]विजज्ञौ' [छा. उ. ६-१६] इति विशिष्टज्ञानरूपत्वं च उपपद्यते । [4]तथा 'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम् । ज्ञाने त्वनाहते[5] तस्मिन् सर्वं ब्रह्ममयं भवेत् ॥' इति बृहन्नारदीयवचनं 'तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमा-त्मनोः । तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥' इति वाक्यवृत्तौ भगवत्पाद-वचनं च सङ्गच्छते ।

ब्रह्मणश्च मनोगम्यत्वं 'यन्मनसा न मनुते' [के. उ-१-५] इति श्रुत्या निषिद्धम् । न च सा श्रुतिः 'दृश्यते त्वग्र्यया बुद्ध्या' [क. उ-३-१२] इति श्रुत्यनुसारेण अशुद्धमनोविषयेति वाच्यम् । 'येनाहुर्मनो मतं' इति वाक्यशेषस्य मनोमात्रपरतया तदैकरूप्याय पूर्वत्रापि मनोमात्रग्रहणस्योचितत्वात् । 'दृश्यते' इति श्रुतिस्तु मनसः उपादानतया कारणत्वाभिप्राया भविष्यति । दृश्यते च तावन्मात्राभिप्राया अन्यत्रापि तृतीया 'मनसा ह्येव पश्यति मनसा शृणोति' [बृ. उ. १-५-३] इत्यादौ । न हि चाक्षुषादिज्ञाने मनसः करणत्वं सम्भवति । एवं [6]वेदान्तप्रमाणकेऽपि ब्रह्मसाक्षात्कारे भविष्यति । न च शब्दगम्यत्वमपि निषिद्धं 'यतो वाचो निवर्तन्ते' [तै. उ. २-९] इति । तत्र हि प्रवृत्त्यभावरूपा निवृत्तिः प्रतिपाद्यते । वाचश्चार्थेप्रवृत्तिशक्तिरूपेति तन्निषेधेऽपि लक्षणया औपनिषदत्वे न काचिदनुपपत्तिः ।

---

1. **तदनुस्मरणस्य**—महावाक्यानुसन्धानस्य

2. **भाष्यम्**—शाब्दज्ञानस्य अनर्थनिवर्तकत्वप्रतिपादकं 'अनर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इत्यादि भाष्यम् ।

3. मु. विजज्ञाविति विजज्ञावितीति

4. मु. 'तथा' नास्ति

5. **अनाहते**—अप्रतिबद्धे

6. **वेदान्तप्रमाणके**—वेदान्तकरणके

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः ।

वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्य इदमादिमं सूत्रम्—

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

तत्र अथशब्दः आनन्तर्यार्थः परिगृह्यते न अधिकारार्थः, ब्रह्मजिज्ञासाया

ननु—वेदान्तानामात्मैकत्वप्रतिपत्तिः प्रयोजनमिति कथमुच्यते । प्रपञ्च-सृष्ट्यादीनां, तदनुगुणतया ब्रह्मणि सर्वज्ञत्वादिगुणबृन्दस्य च तत्र तत्र प्रतिपादन-दर्शनात्—इत्याशङ्क्य, अध्यारोपप्रक्रियया अपवादशेषभूतानां तद्वाक्यानां प्रत्यग-भिन्नब्रह्मण्येव तात्पर्यमिति वक्ष्यमाणैर्न्यायैः स्पष्टं भविष्यतीत्याह—**यथा चायमर्थ इति** ।

ननु—वेदान्तानामेव ब्रह्म प्रतिपाद्यम्, तत् कथमस्य शास्त्रस्य विषयः—इत्याशङ्क्य—'साक्षाद्विषयत्वासम्भवेऽपि वेदान्तद्वारा विषयो भविष्यति । सूत्ररूपस्य शास्त्रस्य तात्पर्यनिर्णयानुकूलयुक्तिज्ञानं साक्षात्प्रयोजनम् । युक्तयो विषयः । युक्ति-ज्ञानमेव मीमांसेत्युच्यते । मीमांसाया वेदान्तवाक्यं[1] विषयः । तात्पर्यनिर्णयः प्रयोजनम् । वाक्यस्य च ब्रह्म विषयः तज्ज्ञानं प्रयोजनमिति परम्परया सूत्राणां ब्रह्म विषयः'—इत्यभिप्रेत्याह—**वेदान्तमीमांसाशास्त्रस्येति** । व्याचिख्यासितस्येत्यनेन स्वग्रन्थस्य सूत्रार्थज्ञानं साक्षात्प्रयोजनमिति दर्शितम् । आदिमं सूत्रं इत्यनेन विषयादिप्रतिपादनद्वारा[2] [3]कृत्स्नशास्त्रोपोद्घातसङ्गतिर्दर्शिता ।

सूत्रपदानि व्याचष्टे—**तत्रेति** । ननु 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' [अमर—नाना] इति बहुष्वर्थेष्वनुशिष्टस्य कथं सहसा आनन्तर्यार्थत्वनिश्चयः—

---

1. **वेदान्तवाक्यं विषय इति** मीमांसायाः वेदान्तवाक्येषु तात्पर्यनिर्णायक-तात्पर्यलिङ्गात्मकयुक्तिज्ञानरूपत्वात् वेदान्तविषयकत्वम् । इत्थञ्च वेदान्तविषयकमीमांसा-जनकशास्त्रं वेदान्तमीमांसाशास्त्रशब्दार्थः पर्यवसितः ।

2. मु. प्रतिपत्तिद्वारा

3. आ. द्वारा उपोद्घात

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्याशङ्क्य, अर्थान्तराणामनुपपन्नत्वं प्रकृते दर्शयति—**नाधिकारार्थ इत्यादिना**। जिज्ञासा हि ज्ञानेच्छा, शास्त्रेण च तत्प्रतिपादने क्रियमाणे [1]तदारम्भार्थकत्वं सूत्रस्थाथशब्दस्य भविष्यति, न च तदस्ति—इत्यभिप्रायेणाह—**ब्रह्मजिज्ञासाया इति**।

ननु[2]—जिज्ञासाशब्दस्य विचारेऽपि प्रचुरः प्रयोगो दृश्यते 'तद्विजिज्ञासस्व [तै. उ. ३-१] स विजिज्ञासितव्यः' [छा. उ. ८ - ७] इत्यादिश्रुतौ। न च तत्रेच्छा प्रतिपाद्या। तस्या विध्यनन्वयित्वात्। 'तस्मात् ब्रह्म जिज्ञासितव्यं' इति च भाष्यकारप्रयोगः। ततश्च जिज्ञासापदस्य विचारार्थकत्वपक्षे तस्य सूत्रैः क्रियमाणतया तदारम्भार्थकत्वमथशब्दस्योपपद्यते। न च—आरभ्यत इत्यनुक्त्वाऽपि विचारे क्रियमाणे तदारम्भस्य ज्ञातुं शक्यतया तत्प्रतिपादनवैयर्थ्यमिति वाच्यम्। तथा सति 'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः' [भ. गी. ७ - २]। 'व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्व' [बृ. उ. २ - ४ - ४] इत्यादावपि 'वक्ष्यामि' 'व्याख्यास्यामि' इत्यादिप्रतिज्ञाकरणं व्यर्थं स्यात्। तत्र यदि '[3]त्वामस्मि

1. **तदारम्भार्थकत्वम्**—इच्छाप्रतिपादनारम्भार्थकत्वम्—प्रतिपाद्यतया इच्छारम्भार्थकत्वमिति यावत्। इच्छायाः विषयसौन्दर्यज्ञानमात्राधीनतया पुरुषकृत्यसाध्यायाः कर्तव्यत्वेनप्रारम्भासम्भवात्।

2. 'अवयवशक्त्या ज्ञानेच्छाबोधकमिदं जिज्ञासापदं' इति भामत्यनुसारेण अथशब्दस्य आरम्भार्थकत्वासम्भवो निरूपितः। 'लक्षणया विचारबोधकमिदं जिज्ञासापदं' इति विवरणपक्षे आरम्भार्थकत्वसम्भवमाशङ्क्य निराकरोति—**नन्वित्यादिना** अनुचितत्वादित्यन्तेन। यद्यपि आरम्भशक्तत्वरूपं आरम्भार्थकत्वं अस्याप्यथशब्दस्य अस्त्येव, तथाऽपि आरम्भबोधकत्वं अत्र नास्तीति भाष्यार्थः। नानार्थकशब्दानां तात्पर्यवशात् अर्थविशेषस्यैव बोधकतायाः सर्वसम्प्रतिपन्नत्वात्।

3. **त्वामस्मि वच्मीत्यादि** 'अस्मि' इति पदं अहमर्थे। अत्र 'वच्मि' इत्यनुपयुक्तार्थम्, तदनुपादानेऽपि वचनक्रियाप्रतीतेः। 'त्वां' 'अस्मि' इति पदे अपि अनुपयुक्तार्थे। सम्बोध्यतयैव वचनकर्मतावगतेः, 'वच्मि' इत्युत्तमपुरुषेणैव अस्मदर्थस्य तत्कर्तृत्वप्रत्ययात्। 'आत्मीयां' इति पदमपि अनुपयुक्तार्थम्। आत्मीयाया एव मतेः सर्वैरास्थानात्। अतः एतावानर्थोऽत्र द्योत्यते—यतोऽत्र विदुषां—असाधारणज्ञानवतां समवायः—एकवाक्यतापन्नः समुदायः तिष्ठति, तस्मात् आत्मीयां—अप्रतार्यां प्रमाणपरिगृहीतां मतिं आस्थाय—अवलम्ब्य अत्र स्थितिं—सावधानस्थितिं विधेहि, इति त्वां—उपदेशार्हं अहं—आप्तः वच्मि—उपदिशामि—इति। स्पष्टश्चैतत् काव्य-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनधिकार्यत्वात् । मङ्गलस्य च वाक्यार्थे समन्वयाभावात् । अर्थान्तर

वच्मि विदुषां समवायोऽत्र तिष्ठति[1] आत्मीयां मतिमास्थाय[2]स्थितिमत्र विधेहि तत् ॥' इति [3]नटीं प्रति सूत्रधारवचने अहंवच्मीत्यस्य वैयर्थ्यं माभूदिति वचनसामान्यप्रतिपादकस्य वच्मीत्यस्य उपदेशात्मकवचनविशेषे लक्षणां स्वीकृत्य तदर्थस्य [4]अवश्यकर्तव्यताद्योतनफलकत्वमुपेयते, तथा 'अहं—सखा[5] भर्ता वा गुरुसमीपत आज्ञारूपोपदेशग्राह्यमपि अर्थं ललित्येन प्रतिपादयामि' इति विशेषपरं सत् अधुनैवावश्यं सावधानतया ग्राह्यमिति द्योतयतीति न वैयर्थ्यम्, तर्हि प्रकृतेऽपि [6]अधिकारमात्रपरस्याथशब्दस्य अधिकारिविशिष्टारम्भविशेषलक्षणामुपेत्य अधिकार्यभावादनारम्भणीयमितिशङ्कानिवृत्तिद्योतनफलकत्वमुपेयम्—इति चेत्

न—आनन्तर्यार्थत्वे तत्प्रतियोगिविवेकादिप्रतिपादनद्वारा अधिकारिविशेषलाभफलकत्वे सम्भवति अधिकारिसामान्यलभफलकस्यारम्भार्थकत्वस्यानुचितत्वात् ।

ननु—मङ्गलार्थता तर्ह्यस्तु । न च तस्यानन्वयः । 'ब्रह्मजिज्ञासा मङ्गलं' इति स्तुतिपरत्वोपपत्तेः—इत्याशङ्क्य, शास्त्रारम्भे तदुपयोगितया अधिकारिबोधनसम्भवे न व्यर्थप्रायस्तुतिपरत्वं कल्पनीयमित्याह—**मङ्गलस्य चेति** । ननु—[7]शास्त्रादौ मङ्गलमाचरितव्यम्, ततो मङ्गलार्थत्वे न व्यर्थता—इत्याशङ्क्य, सत्यं मङ्गलमाचरितव्यम् । तदर्थं न मङ्गलप्रतिपादनमपेक्षितम् । न हि मङ्गलप्रतिपादनमात्रेण मङ्गलाचारस्सिद्धो भवति । अपि तु तदनुष्ठानेन । तच्च अथशब्दोच्चारणं

प्रकाशप्रदीपोद्योतेषु । इदंदृष्टान्तेन 'नच आरभ्यते' इत्यादिशङ्कासमाधानं **शिवार्कमणिदीपिकायामुक्तम्** ।

1. मु. वर्तते आ. विद्यते

2. मु. आ. ०मादाय

3. **नटीं प्रति सूत्रधारवचने इति** विद्वत्सभां गच्छन्तं आप्तं प्रति कस्यचिदुक्तिरियं इति तु नागेशः ।

4. मु. अवश्यवक्तव्यता

5. 'ज्ञानं तेऽहं' इत्यत्र सखा [कृष्णः] 'व्याख्यास्यामि ते' इत्यत्र भर्ता [याज्ञवल्क्यः] ।

6. **अधिकारेति** आरम्भेत्यर्थः ।

7. **शास्त्रादाविति** सूत्रकृतेति शेषः । नन्वित्यादिशङ्कातत्समाधाने **शिवार्कमणिदीपिकायां** उपपादिते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]तदनुसन्धानं वा । तथा च स्मृतिः 'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ।' इति । अत्र हि माङ्गलिकाविति (तदस्य) 'प्रयोजनं' [पा. सू. ५-१-१०९] इत्यधिकारविहितठञ्प्रत्ययान्तम् । ततश्च [2]तदनुसन्धानस्य तदुच्चारणस्य वा मङ्गलत्वे, विषयतया तत्राथशब्दस्य कारकत्वात् मङ्गलप्रयोजनकत्वमुपपद्यते । तच्च आनन्तर्याद्यर्थान्तरपरत्वेऽपि सिध्यतीत्याह— [3]**अर्थान्तरप्रयुक्त एव ह्यथशब्द इति ।**

[4]एतेन–भाष्यकृता मङ्गलं कुतो न कृतम्, न च निबद्धं ग्रन्थादौ–इति शङ्का निरस्ता । नित्यसन्ततात्मतत्त्वानुसन्धानेन हि भगवता भाष्यकृता मङ्गलं न कृतमिति न शङ्कनीयम् । ग्रन्थतो निबन्धनं च शिष्याणामाचारप्रदर्शनार्थम् ।

---

1. आ. तदनुध्यानं

2. आ. तदनुध्यानस्य

3. **अर्थान्तरप्रयुक्त एव हीति** एवकारोऽवधारणार्थः । सर्वत्र अथशब्दः मङ्गलप्रयोजनक एव, न तु मङ्गलवाचको वा तल्लक्षको वा । अतो मङ्गलस्य अशब्दार्थस्य वाक्यार्थे विशेष्ये विशेषणतया समन्वयो न सम्भवति । तथा च अर्थान्तरबोधक एव सन् मङ्गलप्रयोजनकः—इति **भामती** ।

अथशब्दो मङ्गलवाचकः । अथापि अत्रत्याथशब्दः न मङ्गलबोधकः । मङ्गलस्य कर्त्रादिकारकान्यतमभावे प्रमाणाभावात् कारकान्तराणां विद्यमानत्वाच्च ब्रह्मजिज्ञासायां न भेदसम्बन्धेनान्वयः । प्रशंसापरतया अर्थवादत्वप्रसङ्गात् न अभेदेनान्वयः । अतश्च वाक्यार्थे समन्वयाभावात् नात्र मङ्गलबोधकः । अर्थान्तरबोधक एव सन् मङ्गलप्रयोजनकः—इति **विवरणम्** । **इदञ्च व्याख्यानं** विवरणानुसारेण अत्र प्रवृत्तम् । एवकारोऽवधारणार्थक एव । 'आनन्तर्याद्यर्थान्तरपरत्वेऽपि' इति अपिशब्दः अर्थान्तरबोधकत्वस्य मङ्गलप्रयोजनकत्वस्य च अविरोधप्रदर्शनाय ।

4. श्रुतप्रकाशिकातत्त्वटीकयोः विशिष्टाद्वैतिभिरुक्तं दूषणं आभासीकरोति—**एतेनेत्यादिना** एतेन—अर्थान्तरपरत्वेऽपि मङ्गलफलकत्वसमर्थनेन । श्रुतप्रकाशिकायां हि—शाबरशाङ्करयोस्तु ईश्वरानभ्युपगमात् जीवब्रह्मभेदानभ्युपगमाच्च नमस्यानादरः इत्युक्तम्, तदसङ्गतम्—जीवब्रह्मभेदाभ्युपगन्तृभिरपि श्रीमध्वाचार्यैः तत्त्वसङ्ख्यानाख्य प्रकरणारम्भे नमस्याया अकरणात् नमस्यानादरे प्रयोजकोक्तेरसङ्गतेः । तत्र जयतीर्थीयटीकायां मानसादेरपि मङ्गलत्वमुक्तम् । "मङ्गलाचारः केषुचित् ग्रन्थेषु अदृष्टोऽपि निमित्तफलाभ्यामुन्नेयः" इति तत्त्वटीकायां तदीयैरेवोक्तम् । यत्तु तत्त्वटीकायां—युष्मदर्थानुसन्धानस्यैव प्राथम्यात्, मध्यलघुत्वेन वह्निदैवत्यस्य रगणस्य निवेशाच्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति । पूर्वप्रकृतापेक्षायाश्च

[1]तच्च[2]अथशब्दव्याख्यानेनैव आचारप्रदर्शनं स्फुटं भविष्यतीति न तदर्थं निबन्धनं कृतम् ।

ननु—पूर्वप्रकृतापेक्षार्थत्वं अथशब्दस्य दृष्टम् । यथा 'आत्मा नित्यः, अथानित्यः?' इति विप्रतिपत्तिवाक्ये । नन्वत्र प्रकृतापेक्षां किं तेनैव रूपेणाथशब्दः प्रतिपादयति, उत तां प्रयोगोपाधिं कृत्वा प्रकृतं अनित्यशब्देन विशेष्यतयाऽपेक्ष्यमाणमात्मानमेव प्रतिपादयति । नाद्यः । तथा सत्यनन्वयात् । आत्मा नित्यः [3]प्रकृतापेक्षा अनित्य [4]इति किं केन सङ्गतं स्यात् । [5]न द्वितीयः । तथा सति 'आत्मा नित्यः, आत्मा अनित्यः' इति एकस्मिन्वाक्ये विशेष्यस्य द्विरुपादानं व्यर्थं स्यात् इति चेत्, न—द्वे एते वाक्ये। एकेन आत्मा नित्य इत्युक्ते अन्येन अथ अनित्य इति हि प्रयुज्यते । ततश्च विप्रतिपत्तिरूपत्वमप्युपपद्यते । तत्राथशब्दस्य प्रकृतापेक्षां प्रयोगोपाधिं कृत्वा आत्मप्रतिपादकत्वं दृष्टम् । तद्वत् प्रकृते किं न

न मङ्गलाचरणमिदमिति । तन्न युक्तम्—अध्यासाक्षेपाय अनात्मविविक्तात्मतत्त्वानुसन्धानस्यैव तत्र कृतत्वात् । स्पष्टश्चैतत् पञ्चपादिकाविवरणयोः । शब्दोच्चारणानुसन्धानयोः तत्र मङ्गलत्वाविवक्षणात् रगणनिवेशस्य न दोषत्वम् । ईश्वरानभ्युपगमोक्तिश्च अद्वैतभाष्यादर्शनमूला । ईश्वराभ्युपगमस्य आत्मगृहीत्यधिकरणे स्पष्टमुक्तत्वात् । जीवब्रह्मभेदानभ्युपगमोक्तिश्च तथैव । सूत्रभाष्ये बहुत्र तदभ्युपगमस्य उपपादितत्वात् । न चैवमद्वैतहानिः । स्वरूपैक्यस्य विशिष्टयोर्भेदस्य च अविरोधात् । परैरपि विरुद्धविशेषणानां भेदकत्वस्य जन्माद्यधिकरणे उक्तत्वात् । परन्तु विशेषणमिथ्यात्वात् भेदमिथ्यात्वं इति विशेषः । काठकमाण्डूक्यतैत्तिरीयोपनिषद्भाष्यप्रारम्भे अद्वैताचार्याणां नमस्यायां आदरदर्शनात् नमस्यानादरे हेतूक्तिश्चासङ्गता—इत्यलं परकीयसिद्धान्तापरिज्ञानमूलकदूषणविमर्शनेन ।

1. मु. ततश्च

2. **अथशब्दव्याख्यानेनैवेति** सावतरणेन 'अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति' इति भाष्यवाक्यरूपेणेत्यर्थः ।

3. मु. पूर्वप्रकृतापेक्षा

4. आ. इत्युक्ते

5. मु. नापि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फलत आनन्तर्याव्यतिरेकात् ।

सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते एवं ब्रह्मजिज्ञासाऽपि यत् पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यम् । स्वाध्यायानन्तर्यं तु समानम् । नन्विह कर्मावबोधानन्तर्यं विशेषः ।

स्यात्—इत्याशङ्क्य, तथा सति अत्र जिज्ञासयाऽपेक्ष्यमाणं स्वहेतुतयाऽऽक्षिप्तत्वात् प्रकृतं च विवेकादिकमेव पर्यवस्यति, ततश्चानन्तर्यार्थत्वपक्षे योऽर्थस्सिध्यति सोऽस्मिन् पक्षेऽपि सिध्यतीति प्रतिपादयति—**पूर्वप्रकृतापेक्षायाश्चेति** । परं तु विप्रतिपत्त्यारम्भ एव तदर्थकाथशब्दप्रयोगस्साधुः वृद्धव्यवहारानुसारादिति–फलत–इतिशब्दगतेन काक्वा सूच्यते ।

एवं कस्यचित् प्रष्टुः अप्रस्तुतत्वात्, ब्रह्मजिज्ञासा कृत्स्नेति प्रतिपादनस्यानर्थक्यात् तथा सति अधिकार्यलाभाच्च, प्रश्नकारस्न्यार्थयोरप्यनुपपन्नत्वं द्रष्टव्यम् ।

ननु—आनन्तर्यार्थत्वपक्षेऽपि वेदाध्ययनमेव तत्प्रतियोगिभूतमस्तु । 'स्वाध्यायोऽध्येतव्यः' [तै. आ. २. १९] इति विधिना हि स्वाध्यायस्य यद्यत् प्रयोजनं तत्सर्वमधीतेनैव संपादनीयमिति नियमिततया, वेदान्तवाक्यानुसन्धानजन्यस्य तत्तात्पर्यनिर्णयद्वारा तदर्थावबोधफलकस्य च वेदान्तविचारस्य वेदान्तविषयकदृढसंस्कारापेक्षतया स्वाध्यायप्रयोज्यस्य अध्ययननियमापेक्षत्वात्, धर्मविचारवत् ब्रह्मविचारेऽपि अध्ययनानन्तर्यस्यावश्यकत्वात्–इत्याशङ्क्य, तथापि तत् न पुष्कलकारणम्, विचारद्वयसाधारणत्वात्, अतो विशेषकारणमन्यदपि वक्तव्यमित्याशयवानाह—**स्वाध्यायेति** । स्वाध्यायपदं तदध्ययनपरम् ।

नन्विति । [1]अत्र किं कर्मावबोधस्य [2]पुष्कलकारणत्वं शङ्क्यते, किं वा

---

1. 'नन्विह कर्मावबोधानन्तर्यं विशेषः' इति भाष्येण पूर्वपक्षत्वेनोक्तमर्थं सिद्धान्तत्वेन स्वीचक्रुः अर्वाचीनाः श्रीभास्कररामानुजादयो भाष्यकृतः । एतत्पूर्वपक्षे निराकृते अर्वाचीनसिद्धान्तानां अनवकाशो भविष्यतीत्याशयेन विवरण–परिमल–वादनक्षत्रमालाद्युक्ताभिः पराभिमताभिश्च उपपत्तिभिः इमं पूर्वपक्षं परिपोषयति निराकर्तुं—**अत्रेत्यादिना** 'तत् सिद्धं कर्मविचारानन्तरमेव ब्रह्मविचारः' इत्यन्तेन ग्रन्थेन ।

2. **पुष्कलकारणेति** सामग्रीत्यर्थः, अव्यवहितोत्तरत्वसम्बन्धेन फलविशिष्टेति यावत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदन्तर्गतिमात्रम्। नाद्यः। विवेकादीनामन्येषामपि श्रुतिस्मृतिसिद्धानां विद्यमानत्वात् न कर्मावबोध एव सामग्री वेदान्तविचारे। न द्वितीयः। तत्रापि किं विविदिषाद्वारा ब्रह्मविचारोपयुक्ततया तदानन्तर्यं अथशब्दार्थतया विवक्षितम्, उत ब्रह्मविचारकालेऽपि कर्मणां करणीयतया तदानन्तर्यं अथशब्दार्थ इति। नाद्यः—आनन्तर्योक्तिद्वारा अधिकारिविशेषणसमर्पको ह्यथशब्दः। ततश्च कर्मावबोधानन्तर्ये तद्बोधस्य कर्मविचारं विना असिद्धेः विचारितकर्मत्वमधिकारिविशेषणं लभ्यते। न च विविदिषोपयुक्तस्य विचारितकर्मत्वस्य अधिकारिविशेषणत्वमत्र वक्तव्यम्। 'अधिकारं विना कृतमकृतं' इति शङ्कानिराकरणद्वारा यन्निर्णय उपयुज्यते, तदेवाधिकारिविशेषणम्। वेदान्तविचारे च उत्कटविविदिषादिनिर्णयेनैव तादृशशङ्काया निराससम्भवात् न विविदिषाप्राचीनस्य विचारितकर्मत्वस्य पृथङ्निर्णयोऽपेक्षितः, तस्य विविदिषाद्वारैव विचारोपयुक्तत्वात्। द्वितीये तु कर्मसहितवेदान्तविचारस्य ततः प्राक् कर्मविचारं विना कर्तुमशक्यतया वेदान्तविचारारम्भे कर्मसमानकाले विचारितकर्मत्वनिर्णय उपयुक्तो भवेत्। न तु [1]तदस्ति, कर्मानुष्ठानसहित एव ब्रह्मविचारः स्वकार्योपयुक्तः—इत्यत्र प्रमाणाभावात्।

ननु विविदिषावाक्येन कर्मणां [2]मोक्षार्थत्वविधानात् ज्ञानैकसाध्ये मोक्षे तद्द्वारा कर्मोपयोगस्य वक्तव्यतया ज्ञानसाधनैश्श्रवणादिभिस्समुच्चितानि कर्माणि भविष्यन्तीति चेन्न। विविदिषावाक्यं विविदिषार्थमेव कर्माणि विधत्त इति 'अत एव चाग्नीन्धनाद्यनपेक्षा' [ब्र. सू. ३. ४. २५] इत्यादिभिस्सूत्रैर्हि निरूपयिष्यते।

तस्मात् कथं कर्मविचारतदवबोधानन्तर्यं ब्रह्मविचारस्येति चेत्—

उच्यते—अत्र हि 'येनास्मिन् जन्मनि कर्मविचारः कृतः तेनैव वेदान्तविचारः कर्तुं शक्यते नान्येन' इति शङ्को मन्यते। [3]तथाहि अस्मिन् शास्त्रे

---

1. **तत्**—ब्रह्मविचारकाले कर्मणां करणीयत्वम्।

2. **मोक्षार्थेति**—विषयसौन्दर्यज्ञानजन्यायां इच्छायां कर्मणामनुपयोगात् ज्ञानेन मोक्षे जनयितव्ये कर्माणि सहकारीणि सम्पद्यन्ते, 'विविदिषन्ति' इत्यत्र प्रकृतिः मोक्षलाक्षणिकी इति भावः।

3. ब्रह्मविचारस्य कर्मविचारानन्तर्यसमर्थनाय कर्मब्रह्मविचारयोः एककर्तृकत्वं निरूपयति—**तथाहीत्यादिना**।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निर्विशेषब्रह्मविद्याया निरूपणं सविशेषब्रह्मविद्याया दहरोपासनादिरूपायाः कर्मानवबद्धायाः तदवबद्धायाश्चान्तरादित्यादिविद्याया भविष्यति । [1]तन्निरूपणं च तदनुष्ठानार्थम् । तत्र कर्मावबद्धोपासनस्य कर्मसमुच्चयः स्पष्ट एव । दहराद्युपासनानामपि 'अग्निहोत्रादि तु तत्कार्यायैव' [ब्र - सू. ४ - १ - १६] इत्यधिकरणे कर्मसमुच्चयो निरूपयिष्यते । निर्विशेषविद्यानुष्ठानकालेऽपि, 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' [भ. गी. ३ - २०] इति निर्विशेषब्रह्मवित्त्वेन श्रुतिस्मृतिप्रसिद्धानां जनकादीनां कर्मदर्शनात् कर्मकर्तव्यता अवगम्यते । न च— कर्मणैवहिसंसिद्धिमिति वाक्यं विद्यानुष्ठानकाले न जनकादिषु कर्म प्रतिपादयति, किंतु तेषु विविदिषोपयुक्तं कर्म प्रतिपादयतीति–समञ्जसम् । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' [बृ. उ. ४ - ४ - २२] इति वाक्ये ब्राह्मणग्रहणेन विविदिषोपयुक्ते कर्मणि ब्राह्मणानामेवाधिकारात् । न च विविदिषाकामस्याधिकारिणोऽर्थसिद्धस्य उद्देश्यतया[2] न ब्राह्मण्येन विशेषणं युक्तमिति वाच्यम् । 'राजा स्वाराज्यकामो राजसूयेन यजेत' इत्यत्र राजकर्तृकप्रयोगविधिपक्षे राजकर्तृके प्रयोगे तदन्यस्यासामर्थ्येनाधिकारासम्भवात् यथा राजत्वस्यार्थादधिकारिकोटिप्रवेशः, [3]फलयागसम्बन्धविधिपक्षे प्राप्तयागोद्देशेन फलसम्बन्धस्य राजत्वजातेश्च कर्त्रवच्छेदद्वारा विधानासम्भवेऽपि फलसम्बन्धमात्रविधिं स्वीकृत्य कर्तृविशेषापेक्षायां स्वाराज्यकामपदं राजानुवादकपदसमभिव्याहारेण वस्तुगत्या [4]तत्परमेव पर्यवस्यतीति स एवार्थात् कर्ता [5]अधिकारी च भविष्यतीति वा स्वीक्रियते, तद्वत् प्रकृतेऽपि भविष्यतीत्यतो विविदि-

---

1. मु. निरूपणं

2. **उद्देश्यतयेत्यादि** यज्ञादीनां विद्यालक्षणफले विनियोगपरे विधौ विद्याकामस्याधिकारः सिद्ध एव । तथा च ब्राह्मण्यविशिष्टस्य विद्याकामस्याधिकारो विवक्षित इति स्वीकृत्य ब्राह्मणपदस्य अधिकारिविशेषणसमर्पकत्वं वक्तुं न शक्यते । विधेययज्ञादिनिरूपितोद्देश्यताया विद्याकाममात्रे पर्यवसानसम्भवेन ब्राह्मण्यरूपविशेषणस्य अनाकाङ्क्षिततया विद्याकामं प्रति विशेषणत्वेनान्वयायोगात्, विशिष्टस्योद्देश्यत्वकल्पने गौरवाच्च, विद्याकामब्राह्मणयोः प्रत्येकमुद्देश्यत्वे च वाक्यभेदप्रसङ्गात्—विद्याकामो यज्ञादीननुतिष्ठेत्, ब्राह्मणो यज्ञादीननुतिष्ठेत् इति—इति भावः ।

3. मु. फलयागविधिसम्बन्ध

4. **तत्परमेवेति** अन्यथा राजपदवैयर्थ्यप्रसङ्ग इति भावः ।

5. **अधिकारी**—फलस्वामी भोक्ता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षार्थे कर्मणि ब्राह्मणानामेवाधिकारात् जनकादिषु दृश्यमानं कर्म मोक्षार्थमेव भविष्यतीति ज्ञानैकसाध्ये मोक्षे ज्ञानाङ्गतया तस्य निवेशो वक्तव्य इति निष्प्रपञ्चब्रह्मसाक्षात्कारोपयुक्तायां तदुपासनायां कर्मसाहित्यं सिद्धं भवति।

अपि च प्रत्यवायपरिहारार्थमपि उपासनाकाले नित्यनैमित्तिकानि कर्माणि कर्तव्यानि। ततश्च वेदान्तशास्त्रनिरूपणीया सर्वाप्युपासना कर्मसमुच्चितैवेति तत्तदुपासनाफलकामेनाधिकारिणा वेदान्तविचारमात्रेण कर्मसमुच्चिततत्तदुपासनायाः कर्तुमशक्यतया कर्मविचारोऽपि कर्तव्यः प्राप्नोतीत्युभयोरेकः कर्ता सिध्यति।

[1]अपि च पूर्वोत्तरमीमांसयोरेकपुरुषाध्येतव्यताप्रयोजकं एकग्रन्थत्वमपि शक्यं व्युत्पादयितुम्। [2]अथातो धर्मजिज्ञासेत्यत्र हि अथशब्देन कृत्स्नवेदाध्ययनानन्तर्यमुच्यते। अतश्शब्देन कृत्स्नस्य वेदस्य[3] विवक्षितार्थत्वमुच्यते। तदनुसारेण धर्मशब्दः [4]कृत्स्नवेदार्थपर इत्येव वक्तुमुचितम्। कृत्स्नवेदाध्ययनस्य हि कृत्स्नवेदार्थविचारे एवानन्तर्योक्तिरुचिता। तदेकदेशाध्ययनमेव धर्मशब्दस्य यथाश्रुतार्थत्वे आनन्तर्यप्रतियोगितया वक्तुमुचितम्। उपनिषदध्ययनानन्तर्यस्य धर्मविचारेऽनुपयोगात्। एवं कृत्स्नवेदविवक्षितार्थत्वहेतुरपि धर्मशब्दस्य वेदार्थपरतां न्यायतौल्यादुपदर्शयति। धर्मस्य हि वेदविवक्षितत्वाद्विचारणीयत्वे उच्यमाने यो यो वेदविवक्षितः स विचारणीय इति प्राप्नोति। ततश्च उपनिषदर्थस्यापि विचारणीयता प्राप्नोति, वेदविवक्षितत्वाविशेषात्।

अथवा धर्मशब्दः अलौकिकश्रेयस्साधनताप्रवृत्तिनिमित्तकः सन् ज्योतिष्टोमादिवत् ब्रह्मणोऽपि शक्त्यैवाभिधायकः। 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते' [कौ. उ. ३-८] इति श्रुत्या ब्रह्मणोऽपि श्रेयस्साधनताबोधनात्। ननु—श्रेयस्साधन(ता)मात्रार्थत्वे श्येनादीनामपि तथात्वात् धर्मता स्यात्। तद्व्यावृत्त्यर्थं [5]बलवदनिष्टाननुबन्धित्वमपि वक्तव्यम्। ततश्च न ब्रह्म-

1. कर्मब्रह्मविचारयोः नियतपौर्वापर्योपयोगिनि एककर्तृकत्वे परोक्तं पूर्वोत्तरमीमांसयोरैकशास्त्र्यं हेतुमुपपादयितुमारभते—**अपि चेत्यादिना**।

2. तत्र एकप्रतिज्ञाक्रोडीकृतत्वात् ऐकशास्त्र्यं निरूपयति—**अथात इत्यादिना**।

3. मु. 'वेदस्य' नास्ति

4. **कृत्स्नवेदार्थपर इति** तथा च अजहल्लाक्षणिको धर्मशब्द इत्यर्थः।

5. **बलवदनिष्टाननुबन्धित्वम्**—बलवदनिष्टाप्रयोजकत्वम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साधारण्यम्, एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' [कौ. उ. ३-८] इति वचनेन ब्रह्मणोऽपि बलवदनिष्टानुबन्धित्वावगमात्[1]—इति चेत्, न—बलवदनिष्टाननुबन्धित्वं किं साधनविशेषणं उत श्रेयोविशेषणम्। आद्येऽपि, किं [2]तदविनाभूतत्वं बलवदनिष्टानुबन्धित्वं उत तज्जननयोग्यत्वम्। नाद्यः। श्येनादीनामपि प्रायश्चित्ते सति नरकाजनकतया तद्विनाभूतत्वात् ध र्मता स्यात्। द्वितीये तु 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इति वचनानुसारेणाभिचारफलकत्वस्यापि सिद्धौ नित्यप्रयोगेऽपि सत्यामभिचारकामनायां वैरिविपत्तिफलकत्वस्यापि सम्भवात् बलवदनिष्टजननयोग्यत्वमस्तीति धर्मता न स्यात्। नापि श्रेयोविशेषणं तदिति द्वितीयः पक्षः। तथा सति श्येनादीनां धर्मता स्यात्। तज्जन्यश्रेयसोऽनिष्टानुबन्धित्वाभावात्[3]। [4]तस्मादेवं बलवदनिष्टाननुबन्धित्वं वक्तव्यम्। बलवदनिष्टप्रयोजकश्रेयोगतोद्दे[5]श्यताप्रतियोग्यनुष्ठाननिष्पन्नभिन्नताविशिष्टत्वम्। तच्च श्रेयस्साधनविशेषणम्। उद्देश्यताया अनिष्टप्रयोजकत्वं [6]स्वजन्ययागानुष्ठानद्वारकं बोध्यम्। ततश्च यदा वैरिविपत्तिकामनां

---

1. मु. बन्धित्वात्

2. **तदविनेति** बलवदनिष्टं तच्छब्दार्थः। **अविनाभूतत्वं**—व्याप्यत्वम्, तदुपधायकत्वमिति यावत्।

3. मु. ०नुबन्धनाभावात्

4. शिवार्कमणिदीपिकायां, यथाश्रुते प्रसज्ज्यमानानां अत्र अनुपदमुक्तानां दूषणानां परिहाराय बलवदनिष्टाननुबन्धित्वं द्वेधा परिष्कृतम्—फलजननापेक्षितसर्वसहिते **यस्मिन्ननुष्ठिते** फलान्यतज्जन्यापूर्वनाशकाभावे च सति बलवदनिष्टजननार्थं प्रयोगान्तरं नापेक्ष्यते **तत्** बलवदनिष्टानुबन्धि, तद्भिन्नत्वं बलवदनिष्टाननुबन्धित्वम्। इदं श्रेयस्साधनविशेषणम्। यद्वा—**यत्फलोद्देशः** अनुष्ठाने बलवदनिष्टप्रयोजको न भवति **तत्त्वं** बलवदनिष्टाननुबन्धित्वम्। इदन्तु श्रेयसो विशेषणम्। तत्र आद्यं परिष्कारं वर्णयति—**तस्मादेवमित्यादिना**। अतिप्रसङ्गान्तरवारणार्थं दलद्वयं तत्र प्रविष्टम्। ब्रह्मणि बलवदनिष्टाननुबन्धित्वोपपादनाय तन्नापेक्षितमित्यभिप्रेत्य तदघटितं अत्र निरुक्तम्।

5. **उद्देश्यताप्रतियोग्यनुष्ठानेति** उद्देश्यतानिरूपककृतीत्यर्थः।

6. **स्वजन्येति** स्वं—उद्देश्यता, तज्जन्यं—तत्प्रयुक्तं यागानुष्ठानम्। श्रेयोनिष्ठायां यागानुष्ठानजनकतायां इच्छाविषयत्वरूपाया उद्देश्यताया अवच्छेदकत्वात् यागानुष्ठानप्रयोजकत्वम्। यद्वा **उद्देश्यता** विषयतासम्बन्धेनेच्छा। सा च यागानुष्ठाने जनिकेति स्वजन्येति यथाश्रुतमस्तु।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विना दर्शपूर्णमासावनुष्ठीयेते, तया [1]तत्फलपापक्षयगतोद्देश्यताया नरकप्रयोजकत्वाभावेन तत्प्रतियोग्यनुष्ठाननिष्पन्नस्य कर्मणो निरुक्तं बलवदनिष्टाननुबन्धित्वमस्त्येवेति न दोषः। वैरिविपत्त्यर्थप्रयोगे तु निरुक्तं नास्तीति श्येनादिवत् तस्याधर्मत्वमेव। निरुक्तं बलवदनिष्टाननुबन्धित्वं ब्रह्मणोऽप्यस्ति। तस्यानुष्ठेयत्वाभावेन अनुष्ठाननिष्पन्नभिन्नतायास्सत्त्वात्। ततश्च निरुक्तेन प्रवृत्तिनिमित्तेन धर्मशब्दः कर्मब्रह्मसाधारणो भविष्यति। ततश्च 'अथातो धर्मजिज्ञासा' इति प्रतिज्ञा कर्मब्रह्म[2]विचारसाधारणीति सिद्धम्।

एवमेकप्रतिज्ञाक्रोडीकृतत्वात् अथातोधर्मजिज्ञासेत्यारभ्य अनावृत्तिश्शब्दादित्यन्तं अन्तर्गतेन सङ्कर्षकाण्डेन सह विंशतिलक्षणीरूपमेकं शास्त्र [3]इति सिध्यति।

ननु—सङ्कर्षेण सह[4] षोडशलक्षणी कर्ममीमांसा जैमिनिकृता, चतुर्लक्षणी ब्रह्ममीमांसा बादरायणकृता, जैमिनिबादरायणयोश्च विरुद्धसिद्धान्ताभिनिवेशोऽवगम्यते। 'शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः।' [ब्र सू. ३-४-२] 'परामर्शं जैमिनिरचोदना चापवदति हि' [ब्र. सू. ३-४-१८] इति सूत्राभ्यां ब्रह्मसन्न्यासापलापं जैमिनिमतत्वेनानूद्य 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' [ब्र. सू. ३-४-८] 'अनुष्ठेयं बादरायणःसाम्यश्रुतेः' [ब्र. सू. ३-४-१९] इति सूत्राभ्यां ब्रह्मसन्न्यासयोः स्वीकारः बादरायणमतत्वेन दर्शितः। ननु 'परं जैमिनिर्मुख्यत्वात्' [ब्र. सू. ४-३-१२] 'तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः' [ब्र. सू. ३-४-४०] इति सूत्राभ्यां ब्रह्मसंन्न्यासयोरुपगमो जैमिनिमतत्वेनापि दर्शित इति चेन्न—'विप्रतिषेधाच्चासमञ्जसम्' [ब्र. सू. २-२-१०] इति न्यायेन सांख्यमतवत् जैमिनिमतमपि पूर्वोत्तरवचनविरोधेनानादेयमिति सूचनाय [5]तत्प्रदर्शनोपपत्तेः। ततश्च विरुद्धसिद्धान्ताभिनिविष्टकविकृत ग्रन्थयोः कथमेकत्वम्।

---

1. मु. तत्प्रयोगफल
2. मु. 'विचार' नास्ति
3. मु. 'इति' नास्ति
4. मु. 'सह' नास्ति
5. मु. तद्दर्शं०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च ग्रन्थयोरप्यस्ति विरोधः। [1]'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' [जै. सू. १-२-१] इत्यक्रियार्थानामप्रामाण्यमाशंक्य, [2]'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः [जै. सू. १-२-७] इति तेषामेव विधिस्तावकत्वेन प्रामाण्यं व्यवस्थापितं जैमिनिना। इदं वेदान्तवाक्यसाधारणमपि प्रतीयते, आम्नायशब्दस्य वेदमात्रपरत्वात्। बादरायणेन तु 'शास्त्रयोनित्वात्' [ब्र. सू. १-१-३] इति वेदान्तानां ब्रह्मणि प्रामाण्यं उपक्षिप्य 'तत्तु समन्वयात्' [ब्र. सू. १-१-४] इति सूत्रेण अर्थवादाधिकरणोक्तं वेदान्तानां क्रियाशेषत्वं पूर्वपक्षीकृत्य स्वातन्त्र्येण ब्रह्मणि प्रामाण्यं प्रतिष्ठापितम्। तथा [3]नवमे देवतानिराकरणं जैमिनितन्त्रे दृश्यते। बादरायणेन तु देवताविग्रहादिकं मन्त्रार्थवादादिप्रामाण्याभ्युपगमेन 'तदुपर्यपि बादरायणः सम्भवात्' [ब्र. सू. १-३-२६] इत्यत्र व्यवस्थापयिष्यते।

तत् कथं एवंसत्येकप्रबन्धत्वमिति चेत्।

न तावत् विरुद्धमताभिनिविष्टकविकृतत्वमेकग्रन्थत्वविरोधि। विरुद्धाभिप्रायशालिनोरपि कञ्चिदर्थविशेषं[4] उद्दिश्य [5]समयबन्धपूर्वकमेकप्रबन्धनिर्मातृत्वोपपत्तेः।

---

1. **आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते** इति। **आम्नायस्य**—वेदस्य **क्रियार्थत्वात्**—'तद्भूतानां क्रियार्थेन समाम्नायः' इति क्रियार्थत्वावगमात्, **अतदर्थानां**—अक्रियार्थानां अर्थवादादीनां आनर्थक्यं—प्रयोजनवदर्थशून्यत्वं, **तस्मात् अनित्यं उच्यते** अक्रियार्थकं सर्वम्। अनित्यशब्दोऽयं अनित्यलौकिकवाक्यसादृश्यपरस्सन् अप्रामाण्यमाह। तस्मादप्रामाण्यमुच्यते। इति सूत्रार्थः।

2. **विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः** इति। **विधीनां**—विधेयार्थानां **स्तुत्यर्थेन**—स्तुतिरूपार्थप्रतिपादकत्वेन **विधिना**—विधिवाक्येन सह एकवाक्यत्वात् **स्युः**—प्रयोजनवदर्थवन्तः स्युः।

3. **नवमे**—नवमप्रथमचतुर्थाधिकरणे **देवतानिराकरणं** देवताविग्रहादिपञ्चकनिराकरणम्। विग्रहो हविषां भोगः ऐश्वर्यञ्च प्रसन्नता। फलप्रदानमित्येतत् पञ्चकं विग्रहादिकम्, तन्निराकरणं 'अतिथौ तत्प्रधानत्वं अभावः कर्मणि स्यात् तस्य प्रीतिप्रधानत्वात्' इति यजनस्य आतिथ्यवैषम्यप्रदर्शनेन प्रदर्शितम्।

4. **अर्थविशेषम्**—प्रयोजनविशेषम्

5. **समयबन्धः**—कर्तव्यनियमः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यते हि विरुद्धमताभिनिविष्टयोः वामनजयादित्ययोः काशिकाख्यैकप्रबन्धनिर्मातृत्वम् ।

ग्रन्थतस्तु विरोधो नास्त्येव । 'अथातो धर्मजिज्ञासा' [जै. सू. १-१-१] इति हि द्वे प्रतिज्ञे । एका विंशतिलक्षणीसाधारणी । तस्यां धर्मशब्दः कर्मब्रह्मसाधारणः । द्वितीया तु कर्मकाण्डमात्रविषया । तस्यां धर्मशब्दः कर्ममात्रपरः । प्रतिज्ञाद्वयं च आवृत्त्या एकेन सूत्रेण सुसम्पादमेव । सूत्राणामावृत्त्या अनेकार्थत्वस्यालङ्कारत्वात् । अत एव [1]'अथातश्शेषलक्षणम्' [जै. सू. ३-१-१] इति सूत्रं 'द्विलक्षण्याः परं शिष्टं यावत् किञ्चन लक्षणम् । तत्सर्वं वक्तुमारब्धमथातश्शेषलक्षणम् ।' इति अवशिष्टदशाध्यायीप्रतिज्ञापरत्वेन [2]व्याख्याय तृतीयाध्यायप्रतिज्ञापरत्वेनापि [3]व्याख्यातम् । [4]'शेषः परार्थत्वात्' [जै. सू. ३-१-२] इति सूत्रं तु द्वितीयप्रतिज्ञायां [5]लक्षणप्रतिपादकतया[6] सङ्गतम् । तद्वत् 'चोदनालक्षणोऽर्थो धर्मः' [जै. सू. १-१-२] इति सूत्रं द्वितीयप्रतिज्ञायां लक्षणप्रतिपादकतया समनुगतं भविष्यति । तत्र च कर्मणि चोदनायाः प्रामाण्ये प्रतिज्ञाते तत्प्रामाण्यनिरूपणं प्रथमाध्यायार्थत्वेन प्रतिज्ञायते [7]'तस्य निमित्तपरीष्टिः' [जै. सू. १-१-३] इति । तदनुसारेण आम्नायस्येति सूत्रे चोदनासमभिव्याहृतानामेव सिद्धार्थपरत्वेन प्रतीयमानानां अप्रामाण्यमाशङ्क्य विधिनात्वेकवाक्यत्वादिति सूत्रेण तेष्वेव विधेयस्तावकत्वमुच्यत इति न वेदान्तविषयकशास्त्रयोनित्वात्तत्तुसमन्वयादितिसूत्रयोर्विरोधः ।

---

1. **अथाऽतश्शेषलक्षणम्** इति । **अथ**—कर्मभेदनिरूपणानन्तरं, **अतः**—शेषशेषिभावस्य तद्भेदाधीनत्वात्, **शेषलक्षणं**—शेषाध्यायः प्रारभ्यते इत्यर्थः ।

2. **व्याख्यायेति** 'अथवाऽस्तु इदमेवैकं तृतीयं शेषलक्षणम् । तदेव सूत्रितं वक्तुं अथातः शेषलक्षणम् ।' इतीति शेषः ।

3. **व्याख्यातमिति** तन्त्रवार्तिककृद्भिः इत्यादिः

4. **शेषः परार्थत्वात्** इति । **परार्थत्वात्**-परः अन्यः अर्थः—प्रवृत्त्युद्देश्यः यस्य तत्त्वात् **शेषः**—शेषपदवाच्यः [भवति]

5. **लक्षणेति** शेषशब्दार्थेत्यादिः । प्रतिज्ञायामिति सप्तम्यर्थो घटकत्वं शेषशब्देऽन्वेति ।

6. मु. प्रतिपादनपरतया

7. **तस्य निमित्तपरीष्टिः** इति । **तस्य**-धर्मस्य **निमित्तं**-ज्ञाने हेतुः, प्रमाणमिति यावत्, तस्य **परीष्टिः**-परीक्षा, कर्तव्येति शेषः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]'न देवता[नां]देवतान्तराभावात्' [शा. बा. ६-१-५] इति सूत्रेण 'न देवानां कर्मण्यधिकारः स्वोद्देश्यदेवतान्तराभावात्' इति प्रतिपादयता मन्त्रार्थवादप्रामाण्यानुसारेण देवतादिकं जैमिनिना स्वीकृतमेवेति तदीयतन्त्रगतं नावमिकाधिकरणं 'अपूर्वमेव [2]धर्माणां प्रयोजकम्, न देवता, तस्यास्तत्र गुणत्वात्' इत्येवमर्थपरम्, न तु देवतास्वरूपादिनिराकरणपरम्। देवतायाश्च गुणत्वं देवतोद्देश्यकत्यागरूपे यागे उद्देश्यकारकत्वेनेति, तत्[3] सत्यपि फलदातृत्वेन प्राधान्ये न तेन[4] विरुध्यते। अतो न ग्रन्थतो विरोध इति सिद्धमेकग्रन्थत्वं विंशतिलक्षण्याः।

एकश्च ग्रन्थः कृत्स्नः [5]एकेनैवाध्येतव्यः। ततश्च पूर्वोत्तरमीमांसाध्ययनस्यैककर्तृकत्वे सिद्धे युगपदध्येतुमशक्यत्वात् क्रमापेक्षायां यथा [6]अग्निहोत्रहोमयवागूपाकयोः [7]आर्थक्रम आश्रीयते—पूर्वं यवागूपाकः ततोऽग्निहोत्रहोमः, यवागूपाकं विना यवागूरूपद्रव्यासिद्धौ होमस्यैवानिष्पत्तेः, तथा पूर्वमीमांसाया उत्तरमीमांसापेक्षणात् सैव पूर्वं कर्तव्या आर्थक्रमानुसारेण। पूर्वमीमांसागतः प्रामाण्यविचारः श्रुत्यादिविषयकः सर्वत्रापि वेदान्तविचारे अपेक्षितः। शब्दान्तरादिभिः कृतो धर्मभेदविचारो विद्याभेदविचारे अपेक्षितः। श्रुतिलिङ्गादितत्प्राबल्यविचारः प्रायशोऽपेक्षितः। सर्वत्र श्रुत्यादिभिः कृतः क्रमविचारः सृष्ट्यादिक्रमे अर्चिरादि[8]मार्गपर्वक्रमे च अपेक्षितः। [9]अतिदेशविचारोऽपि 'तस्यैतस्य तदेव रूपं यदमुष्य रूपम्' [छा. उ. १-६] इत्यादिवाक्यार्थनिर्णये अपेक्षितः। 'प्रदानवदेव तदुक्तम्' [ब्र. सू. ३-३-४३]

---

1. 'न देवता[नां]देवतान्तराभावात्' इत्येतत् जैमिनिसूत्रत्वेनैवोक्तं परिमलेवादनक्षत्रमालायाञ्च। परन्तु इदानीन्तने सूत्रपाठे नोपलभ्यते। शाबरभाष्ये तु उपलभ्यते। सूत्रत्वमेव तु प्रकृतोपयोगि। अतः सूत्रपाठे प्रामादिकः त्यागः स्यात्।

2. **धर्माणां** अवघातादीनाम्

3. **तत्**—गुणत्वम्

4. **तेन**—प्राधान्येन

5. **एकेनैवेति** अन्यथा भागभेदेन द्वाभ्यामधीते 'कृत्स्नोऽधीतः' इति व्यवहारापत्तिः इति भावः।

6. मु. अग्निहोत्रयवा०

7. मु. अर्थात् क्रम

8. मु. मार्गक्रमे

9. मु. अतिदेशादिवि०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम्' [ब्र. सू. ३-३-२६] इत्यादौ सम्मतित्वेन पूर्वमीमांसागतन्यायानां उदाहृतत्वात् तदर्थज्ञानार्थमप्यपेक्षा अस्त्येव ।

तथा पाठानुसारेण क्रमस्सिध्यति । स्वाध्यायोऽध्येतव्य इति विधिना, क्रमविशेषविशिष्टमक्षरराशिं स्वाध्यायशब्दोदितं अधीयीतेति विधाने, व्युत्क्रमेणाध्ययने क्रियमाणे स्वाध्यायाध्ययनत्वासम्भवात् स्वाध्यायाक्षराणां यः क्रमः तदनुसारी अध्ययनक्रम इति पर्यवसिते वर्णानां स्वतः क्रमासम्भवात् पाठोपाधिकः क्रमः प्राप्नोति । स च पाठोऽध्ययनविधिना विधीयमानोऽध्येतृगतः अक्षरक्रमकल्पको न भवति । [1]तस्यैवाद्यापि क्रमविशेषाज्ञानात् । किं तु अनादिसम्प्रदायागतः पूर्वपूर्वाध्यापकपाठः । ततश्च यथा पूर्वपूर्वाध्यापकपाठानुसारेणाध्ययनक्रमः कल्प्यते, तथा तदनुसारेण विचारक्रमोऽपि कल्पनीयः । तथा च कर्मकाण्डस्य पूर्वं पाठात् ज्ञानकाण्डस्य अनन्तरं पाठात् तद्विचारयोरपि तथैव क्रमः प्राप्नोति ।

मुख्यक्रमानुसारेणापि विचारयोः क्रमः । [2]यथा हि आग्नेयैन्द्रहविषोः पुरोडाशसान्नाय्ययोः प्रयाजशेषाभिघारणे आग्नेयस्य प्रथममनुष्ठेयतया तदङ्गस्य प्रयाजशेषाभिघारणस्य प्रथममनुष्ठानम्, एवं स्वाध्यायाध्ययनेन अर्थज्ञानं भावयेदिति [3]वचनव्यक्तिपक्षे अध्ययनस्य अर्थज्ञानरूपफलं प्रति करणतया प्राधान्यात् पूर्वकाण्डाध्ययनस्य च प्रथमं कृतत्वात् [4]तदङ्गभूतः प्रथमकाण्डविचारोऽपि प्रथमं कर्तव्यः।

एवं प्रवृत्तिक्रमानुसारेणापि क्रमः। यथा 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इति विहितानां एकस्मिन् काले प्राजापत्यानां साङ्गानां साहित्येनानुष्ठाने प्राप्ते, पङ्क्तिपरिवेषणन्यायेन तदङ्गभूतानां उपाकरणादीनां एकमङ्गं प्रथमं सर्वेष्वनुष्ठाय द्वितीयं तदनन्तरं अनुष्ठेयमिति स्थिते, अङ्गसाहित्याय प्रथमाङ्गानुष्ठानावसरे यः पशुः

---

1. **तस्यैव**—अध्येतुरेव ।

2. मु. तथा

3. **वचनव्यक्तीति** [अध्ययनविधि] वाक्यविपरिणामेत्यर्थः। पक्षोऽयं प्राभाकराणाम् ।

4. 'धर्मे प्रमीयमाणे तु वेदेन करणात्मना । इतिकर्तव्यताभागं मीमांसा पूरयिष्यति' इति भट्टवचनेन अर्थज्ञानकरणभूतं स्वाध्यायं तदध्ययनं वा प्रति मीमांसायाः उपकरणतया अङ्गत्वं इति **तदङ्गभूत** इत्युक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न – धर्मजिज्ञासायाःप्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः ।

प्रथमं संस्कृतः द्वितीयाङ्गानुष्ठानमपि तमारभ्यैव कर्तव्यमिति, तथा [1]अधीतेन वेदेन अर्थज्ञानं भावयेदिति वचनव्यक्तिपक्षे अध्ययनस्य वेदं प्रत्यङ्गत्वात् यस्य भागस्य अध्ययनरूपमेकमङ्गं प्रथममनुष्ठितं तमारभ्य विचाररूपं द्वितीयमप्यङ्गमनुष्ठेयमिति प्राप्नोति ।

तत् सिद्धं कर्मविचारानन्तरमेव ब्रह्मविचार इति ।

एतत्सर्वमभिप्रेत्योक्तं—**नन्विह कर्मावबोधानन्तर्यं विशेष इति ।** कर्माव-बोधानन्तर्योक्त्या तत्कारणीभूतकर्मविचारानन्तर्यमपि अर्थादुक्तं भवति ।

न—धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्येति । अयमाशयः—विचारयोरेककर्तृकत्वे सिद्धे क्रमसामान्यापेक्षायां क्रमविशेषनियामकान्यर्थादीनि वक्तुं शक्यन्ते । तत्र एककर्तृकत्वमेव नास्ति—इति ।

[2]यत्तावदुक्तं विविदिषावाक्ये ब्राह्मणग्रहणस्य विवक्षितत्वात् जनकादिषु दृश्यमानं कर्म मोक्षार्थमेवेति, तन्न—विविदिषावाक्येन, यादृशा नित्यनैमित्तिककर्मप्रयोगाः पापक्षयार्थत्वेन प्रसिद्धाः तेषां विविदिषासंयोगमात्रं क्रियते—इति 'सर्वथापि त एवोभयलिङ्गात्' [ब्र. सू. ३-४-३४] इत्यत्र निरूपयिष्यते । ततश्च प्राप्तकर्मोद्देशेन फलसम्बन्धविधौ ब्राह्मणत्वस्य कर्तृविशेषणतया विधाने वाक्यभेदः स्यात् । न च—तदनुवादमात्रेण आख्याताक्षिप्तः कर्ता वस्तुगत्या स एव पर्यवसितो भवति राजास्वाराज्यकामोराजसूयेनयजेतेतिवाक्यइवेति—युक्तम् । राजसूयस्यानिर्ज्ञातकर्तृविशेषतया कर्त्राकांक्षायां तथाऽभ्युपगमेऽपि त्रैवर्णिकतयानिर्ज्ञातकर्तृकाणां भावनानां विविदिषावाक्ये विविदिषार्थत्वेन विधीयमानानां कर्तृविशेषानपेक्षतया अनुवादमात्रेण विशेषपर्यवसानासम्भवात् । तस्मात् तत्र ब्राह्मणपदं त्रैवर्णिकोपलक्षणमेव[3] । ततश्च जनकादिषु दृश्यमानस्य कर्मणो विविदिषार्थत्वे न कोऽपि विरोधः ।

---

1. **अधीतेनेत्यादि** पक्षोऽयं भाट्टानाम् ।

2. कर्मब्रह्मविचारयोरेककर्तृकत्वे पूर्वपक्षोक्ता युक्तीरनूद्य निराकर्तुमारभते—**यत्तावदित्यादिना** ।

3. **त्रैवर्णिकोपलक्षणमेवेति** न चैवं ब्राह्मणपदवैयर्थ्यम् । ब्राह्मणस्य मुख्यांधिकारज्ञापनार्थतया सार्थक्योपपत्तेः । विवेचितमिदं **सिद्धान्तलेशसङ्ग्रहतट्टीकयोः** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च प्रत्यवायपरिहारार्थान्यग्निहोत्रादीनि निर्विशेषविद्यानुष्ठानकाले सम्भवन्ति । निर्विशेषविद्यानुष्ठाने श्रवणमनननिदिध्यासनरूपे हि [1]परिव्राज एवाधिकारोऽवगम्यते 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति[बृ. उ. ४-४-२२] इति वचनेन । तत्र हि मोक्षार्थतया पारिव्राज्यविधानात् ज्ञानैकसाध्ये मोक्षे साक्षात्कारणत्वासम्भवेन द्वारापेक्षायां, 'तस्माज्ज्ञानं [2]पुरस्कृत्य सन्यसेदिह बुद्धिमान् [ना. प. उ. ३-१६] इति श्रुतिवचनेन 'निस्सारमेव संसारं दृष्ट्वा सारदिदृक्षया । प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः ॥' [3]इति स्मृत्या च द्वारतया ज्ञानस्य प्रतिपादनात्, तत्रापि प्रमाणसाध्ये द्वारापेक्षायां 'सन्नयस्य श्रवणं कुर्यात्' इति वचनेन श्रवणस्य द्वारताप्रतिपादनात्, श्रवणे च दृष्टेन चित्तविक्षेपाभावेन उपयोगसम्भवे नादृष्टं कल्पनीयमिति अवघातविधिवत् प्रकारान्तरेण चित्तविक्षेपाभावसम्पादनं [4]वारयत् नियमविधिः पर्यवस्यति । न चैवं 'ब्राह्मणो निर्वेदमायात्' [मु. उ. १-२-१२] 'ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' [बृ. उ. ३. ५] इति श्रुत्या 'मुखजानामयं धर्मो वैष्णवं लिङ्गधारणम् । बाहुजातोरुजातानां नायं धर्मः प्रशस्यते ॥' इति स्मृत्या च ब्राह्मणानामेव [5]सन्नयासविधानात् जनकादिष्वात्मविद्यादर्शनमनुपपन्नं[6] स्यादिति—वाच्यम् । तेषां 'दिने दिने च वेदान्तश्रवणात् भक्तिसंयुतात् । गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत् ॥' इति पापक्षयार्थस्य,[7] प्रतिषेधाभावेन शूद्रादिवत् करणे प्रत्यवायाभावेन वेदान्तार्थनिर्णयरूपदृष्टप्रयोजनार्थस्य च सम्भवात् । तच्च जन्मान्तरे [8]विद्यापरिपाकोपयुक्तं

---

1. परिव्राजएवाधिकार इति विवरणानुसरणेनैतत् ।

2. आ. समुद्दिश्य

3. इति स्मृत्येति इदमपिपद्यं यद्यपि नारदपरिव्राजकोपनिषदि वर्तते, तथाऽपि अङ्गिरःप्रोक्तत्वेन पराशरमाधवीयोक्तेः स्मृतिमपि उक्तार्थे प्रमाणतया वक्तुं स्मृत्येत्युक्तम् ।

4. वारयदिति 'सन्नयस्य श्रवणं कुर्यात्' इति वचनं इति शेषः ।

5. आ. सन्नयासनियमात्

6. आत्मविद्यादर्शनमनुपपन्नमिति जनकादीनां सन्नयासाभावेन वेदान्तश्रवणासम्भवात् आत्मविद्याया असम्भव इति भावः ।

7. पापक्षयार्थस्येति अदृष्टार्थत्वस्याप्युपलक्षणमेतत् । तेन श्रवणस्य जन्मान्तरीयविद्योपयोगित्वस्य नानुपपत्तिः ।

8. विद्यायाः परिपाकः—अप्रतिबन्धः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भविष्यति । सन्न्यासिनस्तु तत्त्वसाक्षात्कारोपयुक्तसकल[1]वैदिकाङ्गसहितश्रवणाधिकारसम्भवात् असति [2]प्रतिबन्धे अस्मिन्नेव जन्मनि विद्या परिपच्यते । दहराद्युपासनया देवत्वं गतानां तु वैदिककर्मकृतचित्तविक्षेपनिवृत्तेः [3]स्वत एव विद्यमानतया [4]स्वयन्दिने बर्हिषि लवननियम इव सन्न्यासनियमो न प्रवर्तत इति प्रैषाद्युच्चारणपूर्वकवैदिकलौकिककर्मपरित्यागात्मकसन्न्यासनियमाभावेऽपि ब्रह्मलोक एव विद्यापरिपाकसम्भवात् , क्रममुक्तिफलकसगुणविद्याविधानान्यथानुपपत्त्या सन्न्यासं विनाऽपि विद्यापरिपाक इति कल्पनोपपत्तेश्च अपुनरावृत्तिश्रवणे न काचिदनुपपत्तिः । अतो विवेकादिसम्पन्नस्य मोक्षपर्यन्तश्रवणाधिकारिणः परिव्राजः अग्निहोत्रादिकर्मसु अधिकाराभावेन तदकरणे प्रत्यवायाभावात् न निर्विशेषविद्यानुष्ठानकाले कर्माणि कर्तव्यानि । अतो न निर्विशेषविद्याधिकारिणि विचारितकर्मत्वस्योपयोगोऽस्ति ।

न च अत्र सविशेषविद्यानां कर्मसमुच्चितानां निरूपणमस्तीत्येतावता विचारितकर्मत्वस्याधिकारे निवेशः सम्भवति । निर्विशेषविद्याधिकारिणि हि न तस्योपयोग इत्युक्तम् । अतः पृथगधिकारं निरूप्य तेनाधिकारिणा सविशेषाधिकरणानां सङ्गतिर्वक्तव्या[5] । [6]न चैतत् वक्ष्यमाणाभिः तत्तदधिकरणप्रस्तावे सङ्गतिभिः सविशेषविचाराणां विवेकादिसाधनसम्पन्नाधिकारिकर्तव्यप्रधाननिर्विशेषविचारान्तर्गतिसम्भवे कल्पयितुं युक्तम् ।

---

1. **वैदिकाङ्गम्**—सन्न्यासादि

2. **प्रतिबन्धे इति** जन्मान्तरप्रापकप्रारब्धकर्मणा इत्यादिः

3. **स्वत एव विद्यमानतयेति** देवानां वैदिककर्मानुष्ठानाप्रसक्त्या तत्त्यागरूपस्य सन्न्यासस्य तेष्वसम्भवाच्च–इत्यपि बोध्यम् ।

4. **स्वयं दिने इति** स्वयंछिन्ने इत्यर्थः । चातुर्मास्ये, स्वयं-पूर्वमेव छिन्नं बर्हिः विनियुज्यते, न तु चातुर्मास्यार्थं बर्हिर्लवनं अपेक्षितं इत्यर्थः । तथा च श्रुतिः—'स्वयं दिनं बर्हिः' इति । दितमिति वक्तव्ये दिनमितिछान्दसम् ।

5. **वक्तव्येति** स्यात् इति शेषः ।

6. **नचैतदिति** एतत्—पृथगधिकारिनिरूपणादि । नन्वेवं सगुणविद्यानुष्ठानं कस्यापि न सिद्ध्येत् । एतच्छास्त्रविचारमन्तरेण हि तदनुष्ठानं न सम्भवति । एतच्छास्त्रविचारे च ब्रह्मलोकान्तसकलफलविरक्तस्य त्यक्तसमस्तकर्मणः निर्विशेषप्रेप्सया तज्जिज्ञासोरेवाधिकार इष्यते-इति चेत्, उच्यते-सगुणविद्यापेक्षिणां, अङ्गावबद्धोपासनापेक्षिणां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथा च हृदयाद्यवदानानामानन्तर्यनियमः, क्रमस्य विवक्षितत्वात्, न तथेह क्रमो विवक्षितः, शेषशेषित्वे अधिकृताधिकारे वा प्रमाणाभावात् धर्मब्रह्मजिज्ञासयोः ।

ततश्च विचारद्वयस्य एककर्तृकत्वे प्रमाणाभावेन क्रमसामान्यापेक्षाया एवाभावात् अनियमेन क्रमविशेषाप्रसक्तेः न पाठादीनां क्रमनियामकानां प्रकृतयोर्विचारयोर्निवेशस्सम्भवतीत्याह—**यथा चेति** । 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इत्यादिवाक्यविहितानां हृदयाद्यवदानानां एकस्मिन् पशौ शेषिणि शेषभूतानां, 'चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्य' इति वाक्येन पश्वर्थतया विहितस्य गोदोहनस्य च दर्शपूर्णमासाङ्गभूताप्प्रणयनाश्रितस्य दर्शपूर्णमासाधिकृताधिकारतया, समानकर्तृकत्वे प्राप्ते क्रमसामान्यस्य विवक्षितत्वात्, पाठादिभिः पश्वङ्गैरवदानानां दर्शपूर्णमासाङ्गैर्गोदोहनस्य आनन्तर्यनियमाख्यः क्रमविशेषः स्वीक्रियते; नैवं कर्मब्रह्मविचारयोः शेषशेषित्वमधिकृताधिकारत्वं वा अन्यदपि पूर्वतन्त्रप्रसिद्धं समानकर्तृकताप्रयोजकं किञ्चिदस्ति, प्रमाणाभावादित्यर्थः ।

अपि च पाठादिभिः विचारक्रमःसम्पादयितुमपि न शक्यते । एकस्मिन् हि न्याये व्युत्पादिते व्यवहितविप्रकृष्टानि पूर्वोत्तरवाक्यानि [1]बहूनि निर्णीतानि भवन्ति । तत्र कथं यद्वाक्यं पूर्वमधीतं [2]तद्वाक्यं पूर्वं[3] विचारणीयं अनन्तरमधीतमनन्तरं विचारणीयमिति नियन्तुं शक्यम् । अत एव हि जैमिनिबादरायणाभ्यां न पाठक्रमेणैव सूत्राणि प्रणीतानि । अन्यथा हि, यथा वेदभाष्यादिषु श्रुतिक्रमेणैव व्याख्यानमारच्यते, तथा अधिकरणक्रमोऽपि स्यात् ।

कर्मठानां च तदनुष्ठानप्रकाराद्यवगतिः विचारिततच्छास्त्रेभ्योऽन्वेषणीया, गत्यन्तराभावात् । अभ्युपगम्यते हि कर्मविचारप्राचीनसन्ध्यावन्दनाध्ययननियमाद्यनुष्ठानार्थं निषादरथकारकर्तृकस्थपतीष्ट्याद्यनुष्ठानार्थञ्च तत्तदवगतिः स्वयमविचारिततत्तद्वाक्यानामेव हितैषिवचनमात्रादिति । एतेन—सगुणोपासनासहकारिकर्मानुष्ठानापेक्षितः कर्मावबोध इति तदानन्तर्यमथशब्दार्थं इति **विशिष्टाद्वैतिनां** व्याख्या निरस्ता वेदितव्या ।

1. मु. 'बहूनि' नास्ति
2. मु. तद्वाक्यमेव
3. आ. पूर्वमेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फलजिज्ञास्यभेदाच्च ।

यच्चोक्तं वेदप्रामाण्यादिनिरूपणे पूर्वतन्त्रापेक्षाऽस्तीति, तन्न—इहापि हि 'अत एव च नित्यत्वं' [ब्र. सू. १-३-२१] इति वेदप्रामाण्यं, 'प्रत्यक्षानुमानाभ्यां' [ब्र. सू. १-३-२८] इति प्रत्यक्षानुमानशब्दाभ्यां श्रुतिस्मृति व्यवहारात् श्रुतेर्निरपेक्षत्वं स्मृतेः [1]वेदानुमापकत्वं स्वमूलतया इत्यपि प्रतिपादनात् स्मृतिप्रामाण्यं तस्याः श्रुतितो दौर्बल्यं, 'नानाशब्दादिभेदात्' [ब्र. सू. ३-३-५८] इति शब्दान्तरादिकं, 'द्युभ्वाद्यायतनं स्वशब्दात्' [ब्र. सू. १-३-१] आकाशस्तल्लिङ्गात्' [ब्र. सू. १-१-२२] 'तथा चैकवाक्यतोपबन्धात्' [ब्र.सू. ३-४-२४] 'प्रकरणात्' [ब्र सू. १-३-६] इत्यादिभिः श्रुतिलिङ्गादीनां 'श्रुत्यादिबलीयस्त्वाच्च न बाधः' [ब्र. सू. ३-३-४९] इति तेषां यथायथं प्राबल्यस्य 'विपर्ययेण तु क्रमोऽत उपपद्यते च' [ब्र. सू. २-३-१४] 'वायुमब्दादविशेषविशेषाभ्यां' [ब्र. सू. ४-३-२] इति क्रमप्रमाणस्य 'अतिदेशाच्च' [ब्र. सू. ३-३-४६] इत्यतिदेशस्य च स्वरूपं, सूत्रकृतैव निरूपयिष्यते । व्याख्यानेन स्पष्टीकरणं तु पूर्वोत्तरमीमांसासाधारणम् । तदुक्तमित्यादौ सम्मतित्वेनोपक्षिप्तानां न्यायानां त्ववगमः इहैव व्याख्यातॄणां वचनैः स्पष्टीभविष्यति । अन्यथा बौद्धाद्यधिकरणेषु तत्प्रक्रियासंग्राहकसूत्रार्थावबोधे का गतिः । न हि तदर्थं बौद्धादिशास्त्राध्ययनानन्तर्यमपि सूत्रगतार्थशब्दार्थो वर्णनीयः ।

[2]यच्च पूर्वोत्तरमीमांसयोः शास्त्रैकत्वमुक्तं, तत् न सम्भवतीत्याह—**फलजिज्ञास्यभेदाच्चेति** । शास्त्रं हि वाक्यविशेषः । तस्य एकत्वे प्रयोजकमेतत्—'अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्' [जै. सू. २-१-४६] इति सूत्रे यद्यर्थशब्दः प्रयोजनपरः तदा एकफलत्वमेकवाक्यतायां प्रयोजकम्, यदा प्रधानविशेष्यपरः तदा तदेकत्वमिति यथायथम् । प्रकृते द्वयमपि नास्तीति दर्शयितुं उभयग्रहणम् । पूर्वोत्तरमीमांसयोरर्थभेदः तद्ग्रन्थपर्यालोचनया अवगम्यते ।

---

1. मु. वेदानुमानापेक्षत्वं स्व०

2. पूर्वोत्तरमीमांसयोरेककर्तृकत्वे हेतुत्वेनोक्तं यत् तयोरैकशास्त्र्यं तस्य भाष्यवाक्येनैव निराकरणं लम्भयितुं अवतारयति—**यच्च पूर्वेति** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च—अवान्तरार्थभेदेन अवान्तरवाक्यभेदे सत्यपि महावाक्यैक्यवत् धर्मब्रह्मरूपावान्तरार्थभेदे सत्यपि वेदार्थरूपो वा अलौकिकश्रेयस्साधनरूपो वा एको महावाक्यार्थो भविष्यतीति प्रकृते महावाक्यमेकमित्युच्यत इति—वाच्यम् । तादृशैकवाक्यताग्राहकप्रमाणाभावात् ।

यत्तावदुक्तं प्रतिज्ञासाधारण्यं, तन्न सम्भवति—धर्मशब्दस्य प्रथमसूत्रस्थस्य चोदनासूत्रानुसारेण ज्योतिष्टोमादिमात्रपरत्वावगमात् । चोदनासूत्रं हि 'चोदना चोपदेशश्च विधिश्चैकार्थवाचकाः ।' इत्यभियुक्तव्यवहारानुसारेण निर्णीतविधिपदैकार्थ्यचोदनाशब्दसहितं अलौकिकविधिगम्यश्रेयस्साधनत्वमेव[1] धर्मशब्दप्रवृत्तिनिमित्तं दर्शयति । न च 'एतत् प्रथमसूत्रस्य प्रतिज्ञाद्वयपरत्वमभ्युपेत्य द्वितीयप्रतिज्ञान्तर्गतधर्मशब्दव्याख्यानपरं' इति क्लिष्टकल्पनायां किञ्चिन्नियामकमस्ति । न च प्रथमसूत्रान्तर्गतधर्मशब्दस्य धर्मब्रह्मोभयसाधारण्ये कृत्स्नवेदाध्ययनानन्तर्यप्रतिपादकेनाथशब्देन कृत्स्नवेदविवक्षितार्थत्वरूपहेतुप्रतिपादकेनातश्शब्देन चावगते तन्निर्वाहाय तथा [2]कल्पनमिति वाच्यम् । वेदविवक्षितार्थत्वहेतुर्हि यदि व्याप्त्यभिप्रायेण प्रयुक्तस्स्यात्, तदा खलु वेदविवक्षितत्वाद्धर्मस्य विचारणीयत्वे उच्यमाने तत्सामान्याद्ब्रह्मणोऽपि विचारणीयत्वं प्राप्नोतीति धर्मशब्दः उभयपरःस्यात् । तत्र यदि यो यो वेदविवक्षितः स विचारणीय इति व्याप्तिः प्रतिपाद्यते, तदा दृष्टान्तालाभः । यदि तु यो यो विवक्षितार्थः सोऽधीतवेदविचारणीय इति व्याप्तिर्विवक्षिता, तदा असच्छास्त्रविवक्षितोऽप्यर्थोऽधीतवेदविचारणीय इत्यपि दूषणं प्राप्नोति । तस्मान्नायं व्याप्त्यभिप्रायेण प्रयुज्यते । किं तु 'विषनिर्हरणादिमन्त्रवत् प्रतीयमानेऽर्थे वेदस्य तात्पर्याभावात् तद्विचारो व्यर्थः प्रमाफलपर्यवसानासम्भवात्' इति शङ्कायां 'अविवक्षाकारणाभावात् वेदस्य स्वार्थे विवक्षाऽस्त्येवेति धर्मविचारः कर्तव्यः' इत्येतावन्मात्रमुच्यते । न तु तत्र वेदस्य कृत्स्नत्वमपि [3]आहत्योच्यते । किं तु पूर्वकाण्डस्येति विशिष्य नोच्यते । तथोक्तौ हि तद्व्यावर्त्यो वेदान्तभाग इति सोऽविवक्षितार्थ इति शङ्का प्रसरेत्, तत्सामान्यात् पूर्वकाण्डार्थोऽप्यविवक्षितो-

1. आ. साधनताकत्वमेव

2. मु. कल्पनीयमिति

3. **आहत्य**—अशब्ददतार्थे अन्तर्भाव्य मु. आहत्यैवोच्यते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽस्त्विति पुनः शङ्का प्रसरेदिति । अथशब्देनापि धर्मविचारस्य वेदाध्ययनानन्तर्योक्तौ न वेदः पूर्वभागेन विशेषयितुं शक्यते । पूर्वभागमात्राध्ययनस्य स्वाध्यायविधिविहितत्वाभावेन तदानन्तर्योक्तिर्निर्मूला स्यादिति । ततश्च–शङ्काविशेषोन्मेषोमाभूदिति अथातश्शब्दार्थयोः पूर्वभागानिवेशमात्रेण, लक्षणसूत्रपर्यालोचनया प्रतीयमानं सूत्रार्थं परित्यज्य अर्थान्तरकल्पनमनुचितम् । न च–धर्मशब्दस्य धर्मब्रह्मोभयसाधारण्याभावे 'ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते सर्वेऽपि वदन्त्येनं कृष्णं धर्मं सनातनम् ॥' [महाभार] इति धर्मशब्दस्य परमेश्वरसाधारण्येन व्यवहारोऽनुपपन्नस्स्यादिति–वाच्यम् । यथा 'प्रणम्रेषु महीपेषु प्रसादो मूर्तिमानयम्' इति मूर्तप्रसादरूपत्वेन स्तुतिपरं तथा सनातनधर्मत्वेन [1]स्तुतिपरमेतत् न शक्तिनिर्णायकम् । अत एव बादरायणेनापि 'फलमत उपपत्तेः' [ब्र. सू. ३-२-३८] इति अतश्शब्देन प्रकृतं ब्रह्म फलदातृत्वेन[2]उपक्षिप्य तत्प्रतिद्वन्द्वितया जैमिनीयमतोपन्यासे ज्योतिष्टोमादिमात्रपरो धर्मशब्दः 'धर्मं जैमिनिरत एव' [ब्र. सू. ३-२-४०] इति प्रयुक्तः । 'यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्' इति सृष्ट्यारम्भे देवैः क्रियमाणे धर्मे प्रथमत्वव्यवहारोऽपि धर्मशब्दस्योभयसाधारणत्वं व्यावर्तयति । अन्यथा ततःपूर्वं ब्रह्मरूपधर्मस्य विद्यमानतया देवानुष्ठीयमानयज्ञस्य प्रथमधर्मत्वं न स्यात् । अतो न धर्मपदशक्तिपर्यालोचनायामपि साधारणी प्रतिज्ञा लभ्यते ।

'आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' इति पूर्वपक्षसूत्रपर्यालोचनया वेदान्तर्गतसिद्धवस्तुप्रतिपादककृत्स्नवाक्यसाधारणः पूर्वपक्षः प्रतीयते । तदनुसारेण सिद्धान्तोऽपि [3]सर्वसाधारण इत्येव प्रतीयते । न च तत् क्लेशेन व्याख्याय शास्त्रैकत्वसमर्थने किञ्चन प्रमाणमस्ति । न च यथाश्रुतजैमिनिसूत्रपर्या-

---

1. मु. स्तुतिपरमेव। तत्

2. आ. उपस्थाप्य

3. **सर्वसाधारण इति** अत एव **अर्थवादाधिकरणे वार्तिककारैः** 'वायुर्वै क्षेपिष्ठा' इत्याद्यर्थवादानां विधिशेषत्वसमर्थनानन्तरमुक्तम्—एतेन उपनिषदामपि नैराकाङ्क्ष्यं व्याख्यातम्-इति । यत्तु व्याकरणाधिकरणे वार्तिककारैः उपनिषदां स्वातन्त्र्येण अभ्युदयनिश्श्रेयससाधनत्वमुक्तम्—तत् ब्रह्मापलापभीरूणां तेषां स्वमनीषिकयैव, न तु सूत्रकाराभिमततया । जैमिनीयवैयासिकसूत्राणां स्फुटविरोधस्य दर्शनात् । **अनुपदं** उदाहृतमेतत् । विस्तरस्तु **वादनक्षत्रमालायां** द्रष्टव्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोचनया विरोधेऽवगम्यमानेऽपि बादरायणेन तेषां स्वाविरुद्धमर्थान्तरं प्रकल्प्य तदेकग्रन्थतया सूत्राणि प्रणीतानीति कल्पनायां किंचित् नियामकमस्ति । तन्मतोपमर्दकतयैव सूत्रप्रणयनस्य स्वरसतः प्रतीयमानत्वात् ।

[1]न च–'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥' [या. स्मृ. आ. ३] इति मीमांसाया एकत्वेन व्यवहारोऽस्ति, तयोर्द्वित्वे पञ्चदशसङ्ख्याकत्वं विद्यास्थानानां स्यादिति–वाच्यम् । तथात्वे पुराणानामप्येकग्रन्थता स्यात् । एवं न्याययोरप्येकग्रन्थता स्यात् । न चैकवेदार्थोपयोगितया तदिष्टमेवेति वाच्यम् । तथात्वे [2]चतुर्दशत्वमपि विद्यास्थानानां न स्यात् । तस्मात् एकेन मीमांसात्वेन धर्मेण भिन्नग्रन्थयोरपि[3] क्रोडीकारमभिप्रेत्य चतुर्दशत्वेन परिगणनमिति न तावता एकग्रन्थत्वसिद्धिः ।

[4]अस्तुवा एकग्रन्थत्वसिद्धिः । तथापि कथं कृत्स्नमेकेनाध्येयमिति सिध्यति । न हि 'एको ग्रन्थः कृत्स्न एकेनाध्येयः' इत्यत्र किञ्चिन्नियामकमस्ति । अपि तु यस्य यावानंश उपयुक्तः तेन तावदध्येयम् । न हि ज्वरनिवृत्तिकामेन तन्निवर्तकौषधपरिज्ञानाय ज्वरचिकित्सामारभ्य वाजीकरणान्तं [5]कृत्स्नं वैद्यशास्त्रं पठनीयम् । तत्र 'तथा निर्बन्धकशास्त्राभावात् अधिकारिभेदाच्च न कृत्स्नचिकित्साशास्त्राध्ययनमेकेन' इति यद्युच्येत, तत् प्रकृतेऽपि तुल्यम् । अधिकारिभेदस्य दर्शितत्वात्–कर्मावबोधकामस्तत्राधिकारी ब्रह्मावबोधकामो वेदान्तविचारे इति । न च विचारशास्त्रद्वयमेकेनपठनीयमित्यत्र किञ्चिद्वचनमस्ति । स्वाध्यायविधिस्त्वक्षरावाप्तिपर्यन्तो न विचारद्वयस्यैककर्तृकत्वं प्रयोजयतीति 'अध्ययनमात्रवतः' [ब्र. सू ३-४-१२] इति सूत्रे स्पष्टं भविष्यति । अतो व्यर्थमैकशास्त्र्यप्रसाधनं नचोपपद्यते–इति सिद्धम् ।

---

1. शतदूषण्युक्तमाशङ्क्य, निराकरोति—**न चेत्यादिना**

2. **चतुर्दशत्वमपीति** चतुर्वेदातिरिक्तानां सर्वेषां पुराणादीनां एकवेदार्थोपयोगित्वात् तेषामेकत्वं स्यात्, ततश्च विद्यास्थानपञ्चकमेव स्यात् इति भावः ।

3. मु. 'अपि' नास्ति

4. प्रौढ्या ऐकशास्त्र्यमभ्युपेत्यापि कर्मविचारानन्तर्यस्य अथशब्दार्थत्वं निरस्यति **—अस्तुवेति**

5. मु. 'कृत्स्नं' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभ्युदयफलं धर्मज्ञानं, तच्च अनुष्ठानापेक्षम् । निःश्रेयसफलं तु ब्रह्मज्ञानं, न चानुष्ठानान्तरापेक्षम् । भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात् । इह तु भूतं ब्रह्म जिज्ञास्यं नित्यनिर्वृत्तत्वान्न पुरुष-

सङ्ग्रहवाक्यं विवृण्वन् फलभेदं विवृणोति—**अभ्युदयेति** । कारणमभिलक्ष्य उदेतीत्यभ्युदयः—उत्पद्यमानं स्वर्गादिकं, तत्फलकं धर्मज्ञानम् । ननु यागादेरेव स्वर्गादिफलकत्वम्, तत्कथं धर्मज्ञानस्य ? इत्याशङ्क्य, स्वजन्ययागानुष्ठानद्वारा इत्याह—**तच्चेति** । ततश्च कर्मविचारस्यापि ज्ञानद्वारा स्वर्गादिकं फलम्, तच्चोत्पद्यमानतया अनित्यमिति अनित्यफलाद्विरक्तस्य न कर्मविचाराधिकार इति भावः । न च दृढविविदिषार्थं तत्राधिकार इत्यपि शङ्कनीयम् । जन्मान्तरकृतैः कर्मभिरपि तत्सिद्धिसम्भवात् । **निःश्रेयसेति** । नितरां श्रेयो निःश्रेयसं, ब्रह्मस्वरूपभूतं नित्यं सुखम् । तत्फलकं ब्रह्मज्ञानम् । तच्च कर्मज्ञानवत् न स्वोत्पत्त्यनन्तरं फलात्प्राचीनं [1]आन्तरमनुष्ठानमपेक्षते । ततश्च मोक्षस्य न ज्ञानोत्पाद्यतया ज्ञानफलत्वम्, अपि तु कण्ठचामीकरवत् ज्ञानाभिव्यङ्ग्यतया । ततश्च ज्ञानफलस्य न कर्मफलवदनित्यत्वमिति भावः । मोक्षजनकब्रह्मज्ञानफलकत्वं विचारस्य चित्तदोषनिवृत्तिद्वारकं द्रष्टव्यम् । ततश्च विचारयोः फलभेदात् भेदः ।

जिज्ञास्यभेदमाह—**भव्यश्चेति** । उत्पद्यमानो भव्यः । भव्यत्वं विशदयति—**न ज्ञानकाल इति** । ततश्च ज्ञानजन्यचिकीर्षया यत्ने सति यागादिर्धर्मो भवति । ततश्च धर्मजिज्ञासासूत्रगतधर्मशब्दो वस्तुगत्या जन्यं यच्छ्रेयस्साधनं तदेव प्रतिपादयतीति प्रथमसूत्रपर्यालोचनयैव विषयवैलक्षण्यं सिद्धं कर्मविचारे । एवं ब्रह्मविचारेऽपि कर्मविचारवैलक्षण्येन प्रथमसूत्रपर्यालोचनयैव विषयस्सिध्यतीत्याह—**इहेति** । भूतं—निर्विकारम् । तदेव व्युत्पादयति—**नित्येति** । नित्यनिर्वृत्तत्वं—सदा सिद्धस्वभावत्वम्, विकारायोग्यत्वादित्यर्थः । निर्विकारत्वात् न पुरुषव्यापारापेक्षा । पुरुषव्यापारजन्यधर्माश्रयस्यैव पुरुषव्यापारापेक्षा भवति ।

ननु—वेदान्तानामुपासनापरत्वात् उपासनायाश्च विधिबोधितश्रेयस्साधनताकरूपतया धर्मशब्दार्थत्वात् वेदान्तविचारोऽपि धर्मजिज्ञासासूत्रेण प्रतिज्ञातः, ब्रह्म-

---

1. **आन्तरमिति** अनुष्ठानान्तरापेक्षमितिभाष्ये अनुष्ठानञ्च तत् आन्तरञ्चेति कर्मधारय इति भावः । आन्तरं अनुष्ठानं चिकीर्षा यत्नश्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यापारतन्त्रम् । चोदनाप्रवृत्तिभेदाच्च । या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति । ब्रह्मचोदना तु पुरुषमवबोधयत्येव । केवलं अवबोधस्य चोदनाजन्यत्वात् न पुरुषोऽवबोधे नियुज्यते । यथा अक्षार्थसन्निकर्षेणार्थावबोधे तद्वत् ।

तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति । उच्यते—नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादि-साधनसंपत्, मुमुक्षुत्वं च ।

जिज्ञासासूत्रं तु अथातश्शेषलक्षणमितिवत् उपासनारूपावान्तरधर्मविचारप्रतिज्ञापरं भविष्यति—इत्याशङ्क्याह—**चोदनाप्रवृत्तिभेदाच्चेति** । चोदना–कर्मब्रह्मकाण्ड-साधारण्येन अज्ञातज्ञापकं वाक्यम्, तस्य प्रवृत्तिः–तात्पर्येण बोधजननशक्तिः, तस्याः विषयवैलक्षण्येन विलक्षणत्वादित्यर्थः । उक्तशङ्कानिरासद्वारा[1] समुच्चयद्योत-नार्थश्चकारः । वेदान्तानां निर्विशेषप्रकरणगतानामखण्डवस्तुमात्रपरत्वं प्राधान्येन न तूपासनापरत्वमिति समन्वयसूत्रे व्युत्पादयिष्यते । अतो वेदान्तार्थो धर्मजिज्ञासा-सूत्रे न संगृहीत इति भावः । सङ्ग्रहवाक्यं विवृणोति—**याहीति** । लक्षणं-प्रमाणम् । नियुञ्जाना-प्रवृत्तिजनकं यागादिगतेष्टसाधनताज्ञानं आदधाना । [2]अवबोध-यत्येवेत्येवकारेण [3]पर्यवसानगत्या निर्विशेषवाक्यजन्यबोधस्य प्रवृत्तिजनकत्वं व्यावर्त्यते । ननु निर्विशेषवाक्यानां शाब्दबोधविधिपरत्वमस्तु—इत्याशङ्क्य, योऽर्थः प्रमाणजन्यज्ञानानन्तरं पुरुषयत्नमपेक्ष्य सिध्यति तत्रैव प्रमाणानां प्रवर्तकत्वम्, न तु स्वजन्यज्ञान एव, यत्नं विनैव [4]प्रमाणव्यापारमात्रेण सिद्धत्वादित्याह—**अवबोधस्येति** ।

---

1. **शङ्कानिरासद्वारेति** तथा च न साधकान्तरसमुच्चयः, किन्तु बाधकाभाव-समुच्चयः इति भावः । भामत्यान्तु जिज्ञास्यभेदे साधकान्तरसमुच्चय इत्युक्तम् । अत्र तु शङ्काविशेषनिराकरणपरतया अवतारितत्वात् एवं व्याख्यातम् । उक्तशङ्कानिरा-करणस्य भाष्यवाक्येन लाभः प्रयोजनम् ।

2. मु. अवबोधयत्येवकेवलमित्येवकारेण

3. मु. ‘पर्यवसानगत्या’ नास्ति

4. **प्रमाणव्यापारमात्रेणेति** भाष्ये ‘केवलं’ इति पदं चोदनेत्यनेन सम्बद्ध्यते इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नित्यानित्यवस्तुविवेक इति । [1]नन्वत्र नित्यानित्यवस्तुविवेकस्य वैराग्यं तस्य शमादिसम्पत् तस्या मोक्षेच्छा तस्या ब्रह्मजिज्ञासा फलत्वेनावगम्यते क्रमानुसारेण । तत्र नित्यानित्यवस्तुविवेकस्य नित्यवस्तुभूतमोक्षेच्छां विनैव अनित्ये वस्तुनि वैराग्यहेतुत्वं न सम्भवति । अनित्यपदार्थासक्तो हि यदि नित्यं स्वानुकूलं कंचित्पदार्थमवगम्य तमिच्छन् तदुपायं स्वकृतिसाध्यमवगच्छति तदैवानित्याद्वस्तुनो विरक्तो भवति, नान्यथा ।

अस्तु तर्हि[2] सत्यासत्यविवेको वैराग्यहेतुः—अनृतासक्तो हि सत्यवस्तुप्राप्तिमननुसन्धायैव भोग्यस्यानृतत्वज्ञानमात्रात् ततो विरज्यतीति, नैतदपि सम्भवति —अनृततया स्वाप्नपदार्थानवगच्छन्नपि कामुकः तेषां सुखसाधनतां अवगम्य तदुपयोगिमन्त्रौषधसेवादौ प्रवर्तमानो दृश्यते ।

अपि च वैराग्यं नाम तस्मिन् तस्मिन् विषये तत्तद्विषयानुरागासमानकालीना तत्तद्विषयानुरागप्रागवस्थैव । तस्याश्च स्वतोऽसाध्यत्वेऽपि परिपाल्यतया साध्यत्वम् । तत्र च इच्छाप्रतिबन्धकस्यैवोपयोगः । इच्छाप्रतिबन्धकं च तत्तद्वस्तुनो बलवद्दुःखसाधनताज्ञानमेव । अतः कथं [3]नित्यानित्यवस्तुविवेकस्य वैराग्यहेतुत्वमिति चेत्—

उच्यते—[4]'सांसारिकफलं सर्वमनित्यं' इति ज्ञानवतः 'सांसारिकभोगवियोगावश्यम्भावेन अवश्यमेतस्माच्छोकाख्यं दुःखं भविष्यति' इति अनित्यवस्तुविवेको दुःखसाधनताज्ञानद्वारा वैराग्यहेतुः । तत्र च दुःखसाधनताज्ञानमपि न सर्वदा रागप्रतिबन्धकम् । आस्तिककामुकस्य तस्मिन् सत्यपि [5]निषिद्धे प्रवृत्तिदर्शनात् । किं तु तस्मिन् दुःखे असहिष्णुताख्यद्वेषदशायाम् । तत्र च यस्य स्थिर-

---

1. **विवरणोक्तं** नित्यानित्यवस्तुविवेकशब्दार्थं आक्षिपति—**नन्वत्र** इत्यादिना ।

2. उक्ताक्षेपसमाधानपरतया परिमले उपपादितं **भामत्युक्तं** आशङ्क्य निराकरोति—**अस्तु तर्हीत्यादिना** ।

3. **नित्यानित्यवस्तुविवेकस्य**—नित्यानित्यवस्तुविवेकशब्दार्थस्य

4. **विवरणाभिमतमर्थं** समर्थयति—**सांसारिकेत्यादिना** ।

5. मु. निषेधे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भोगसम्भावनायामेव [1]अस्थिरभोगसम्पर्कजनितदु:खे तादृशो द्वेष: स तदा ततो विरक्तो भवति। यस्य तु तदाऽपि न स द्वेष: नासौ स्थिरभोगसम्भावनायामपि ततो विरज्यति। पुमिच्छाया नियन्तुमशक्यत्वात्। एवं च यस्य जन्मान्तरसुकृतवशात् दु:खमात्रे सदा तादृशो द्वेष:, तस्य कृतं स्थिरभोगसम्भावनया वैराग्यं प्रति। तादृशपुरुषधौरेयाभिप्रायेण भाष्ये अयं क्रम:।

[2]एवं पदार्थानां असत्यतानिश्चयोऽपि वैराग्यहेतु:। यस्य हि कृम्यादिसादृश्ये-नानुसन्धीयमानान्नादिभोजनं जुगुप्साबीभत्सावैरस्याद्यपरपर्यायचेतोविकारात्मकदु:ख-जनकम्, यस्य वा गर्दभयानादिकं सङ्कोचाख्यदु:खजनकम्, तादृश: पुरुष: ततो निवर्तत इति सर्वलोकप्रसिद्धम्। एवमसत्यत्वेनानुसन्धीयमानवस्तुभोगो यस्य 'बुध्वाऽप्यत्यन्तवैरस्यं य: पदार्थेषु दुर्मति:। बध्नाति वासनां भूयो नरो नासौ स गर्दभ:।' इति अभियुक्तकृतमुपालम्भमनुसन्दधानस्य तादृशदु:खजनक: [3]स ततो विरक्तो भवत्येव। न हि कस्यचित् निर्लज्जस्य स्वाप्नभोगेष्वपि कामना वर्तत इति ईश्वरानुग्रहलब्धसत्वशुद्धेरपि [4]तया भाव्यम्। [5]एवं 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' [छा. उ. ७-२३] इति श्रुतौ सत्यभूमप्रतिद्वंद्वित्वेन निर्दिष्टं अल्पं असत्यं दु:खविनिर्मुक्तसुखयुक्तं न भवतीति प्रतिपादनात्, तद्वाक्यं [6]अनुसन्दधानस्य पदार्थेष्वसत्यत्वबुद्धौ दु:खसाधनताज्ञानं भवतीति पुरुषविशेषस्य विवेको वैराग्यं प्रति हेतुर्भवति।

[7]एवं पुरुषभेदेन वैराग्यहेतु: सांसारिकेषु विषयेषु यादृशो विवेक: सम्भावित:

---

1. मु. अस्मिन् भोग
2. **भाष्यस्याभिमतमर्थं** समर्थयति—**एवं पदार्थानां** इत्यादिना
3. मु. 'स' नास्ति
4. मु. तथा
5. **एवं यो वै भूमेति** भाष्ये 'इत्यादि:' इति आदिशब्देन भूमवाक्यं सङ्गृहीतम्। अतश्च सत्यासत्यविवेकस्यापि नित्यानित्यवस्तुविवेकशब्दार्थत्वं भाष्याभिप्रेतम्। सिद्धान्ते अनित्यत्वस्य असत्यत्वव्याप्यत्वात् 'अनित्यफलतां दर्शयति' इति भाष्यमप्यविरुद्धं इति भाव:।
6. आ. अधीयानस्य
7. उभयविधविवेकविवक्षाया: प्रयोजनं दर्शयति—**एवं पुरुषेति**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च, न विपर्यये । तस्मात् अथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते ।

स सर्वोऽपि इह विवक्षितः । तादृशविवेकश्च ईश्वरार्पणबुद्ध्या [1]अनुष्ठितैः कर्मभिः ईश्वरानुगृहीतस्य स्वत एव भवति अध्ययनात्प्रागपि कस्यचित् । अधीतसाङ्गस्वाध्यायस्य कस्यचित्तु कर्मविचारलब्धमतिकौशलेन । न तत्र आग्रहः । तदभिप्रायेणोक्तं—**प्रागूर्ध्वं च धर्मजिज्ञासाया इति ।**

[2]अयं च विवेकः अधीतसाङ्गस्वाध्यायस्य 'अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति' इत्येवमादिवाक्यं पश्यतः शङ्काकलङ्कित (इव) [एव] भवति ।

---

1. **अनुष्ठितैरिति** जन्मान्तरेषु इत्यादिः । **स्वत एव**—कर्मविचारं विनाऽपि ।

2. उक्तस्य नित्यानित्यवस्तुविवेकस्य वेदान्तमीमांसाध्ययनात् प्राक् सम्भवोपपादनेन विशिष्टाद्वैतिनामाक्षेपाणां अनवसरं दर्शयति—'**अयञ्च**' इत्यादिना' निर्णयो दृढो भवेत्' इत्यन्तेन ।

मध्वचन्द्रिकाकृद्भिरपि विशिष्टाद्वैतिनामाक्षेपोऽयं निराकृतः—'...नास्त्यकृतः कृतेन' इत्यादिश्रुतित आपाततो वा, श्रुतिमूलहितैषिपित्रादिवाक्येन वा... श्रद्धामात्रेण नित्यानित्यविवेकसिद्धेः । अन्यथा त्वन्मतेऽपि अपशूद्रमधिकारे ज्ञाते अशूद्रस्यैतच्छास्त्रविचारे प्रवृत्तिः, प्रवृत्तौ च एतच्छास्त्रेण अपशूद्रमधिकारज्ञानं इत्यन्योन्याश्रयस्स्यात् । तथा अध्ययनविधावपि, अधीते स्वाध्याये 'अष्टवर्षं ब्राह्मणमुपनयीत' इत्यादिवाक्येन अष्टवर्षत्वादेरधिकारिविशेषणत्वज्ञापनं तज्ज्ञाने च अध्ययने प्रवृत्तिरिति अन्योन्याश्रयस्स्यात् । तथा ब्रह्मज्ञानस्य अनन्तस्थिरफलत्वनिश्चये तदर्थिनो ब्रह्मविचारे निःशङ्कप्रवृत्तिः विचारेण च तन्निश्चयः इत्यन्योन्याश्रयः स्यात् । फलज्ञानं सम्भावनात्मकं चेत्, विवेकोऽपि तथाऽस्तु । यद्यपि त्वन्मते पूर्ववृत्तेन कर्मविचारेण कर्मणामल्पास्थिरफलत्वं निश्चितम्, तथाऽपि न तन्निश्चय एव नित्यफलार्थिनो ब्रह्मविचारे प्रवृत्तिहेतुः, भिन्नविषयत्वात् अतिप्रसङ्गाच्च । नापि कर्मणामल्पास्थिरफलत्वनिश्चयसहितो ब्रह्मज्ञानस्यापाततोऽनन्तस्थिरफलत्वसन्देहः तद्धेतुः, अन्यस्यानुपायत्वनिश्चयेन ततो निवृत्तिमात्रसिद्धावपि तस्योपायत्वानिश्चये तदुपेयार्थिनः तत्र निरशङ्कमप्रवृत्तेः । 'परीक्ष्य लोकान् ......निर्वेदमायात्......गुरुमेवाभिगच्छेत्' इत्यादौ विवेकादीनां श्रवणाङ्गोपसत्तेः पूर्वभावश्रुतेः कथं श्रवणानन्तरभावित्वम् । न च नित्यानित्यविवेकमात्रं विचारफलं, येन तद्वैयर्थ्यं स्यात्' इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथापि तद्वाक्यमन्यथाव्याख्येयमित्येतावन्मात्रम् अनित्यताप्रतिपादकवाक्यार्थे ईश्वरानुग्रहलब्धदृढविश्वासबलात् स्वत एव [1]सम्भावयति कश्चित्, कश्चित्तु तावन्मात्रोपयोगिनं न्यायं स्वत एवानुसन्धत्ते, कश्चित् पुनः प्रथमसूत्राध्ययनेन सा शङ्का अपोदिता भविष्यतीत्याप्तोपदेशं लब्ध्वा तदध्ययनेन तां शङ्कां निवर्तयतीति न[2] काचिदनुपपत्तिः ।

एतेन—आत्मा नित्यः सत्य इति वा विवेके शास्त्राध्ययनात् प्रागेव सञ्जाते तदध्ययनं व्यर्थं स्यादिति शङ्का–निरस्ता । तादृशोऽप्यात्मा किमेकः उत बहवः, सगुणो वा निर्गुणो वा, ईश्वरभिन्नो वा अभिन्नो वा—इत्येवमादिविचारणीयांशसद्भावात् ।

अत एव च—संसारानित्यत्वे वा तदसत्यत्वे वा प्रागेव निर्णीते तदनित्यत्वप्रतिपादकानि तदसत्यत्वप्रतिपादकानि च उत्तराधिकरणानि व्यर्थानि स्युः । यदि तु तत्तदधिकरणनिवर्तनीयशङ्काविशेषनिराकरणपूर्वकं उत्पन्नस्यैव विवेकस्य दृढतासम्पादकानि [3]तानि, तर्हि तासु शङ्कासु अनिवर्तितासु अदृढो विवेकः कथं वैराग्यं सम्पादयेत्—इति शङ्का निरस्ता । अवशिष्टाश्शङ्काः उत्तरत्र निराकरिष्यन्त इति अध्यापकवचनेनैव तद्दार्ढ्योपपत्तेः । कथमन्यथा, स्वर्गकामाधिकरणनिवर्तनीयकर्मनिष्फलत्वशङ्कासञ्जातकर्मविचारनिष्फलत्वशङ्कायां 'कर्मविचारः परम्परया स्वर्गादिफलोपयोगी' इति विचारशास्त्राध्ययनप्रवर्तको निर्णयो दृढो भवेत् ।

ततश्च उक्तरूपाद्विवेकात् सांसारिकभोगाद्विरक्तस्य शमादिसम्पत् । आदिपदेन 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति' [बृ. उ. ४-४-२३] इत्यादिश्रुत्युक्तानि गृह्यन्ते । ततो मुमुक्षुत्वम् ।

ननु मुमुक्षायामधिकारिविशेषणत्वेन गृहीतायां ततः प्राचीनान्यर्थाल्लभ्यन्त इति पृथगुपादानं व्यर्थमिति चेत्, न–मुमुक्षा हि निर्दुःखसुखाभिलाष एव । स च सर्वसाधारणो नाधिकारिविशेषणं अपि तु उत्कटः इति वक्तव्यम् । तदुत्कटत्वं

---

1. मु. सम्भवति कस्यचित्
2. मु. ०न कदाचिदनु०
3. मु. 'तानि' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चाधिकारिणा अवश्यं निर्णेतव्यम् । अन्यथा 'सर्वकर्मसन्न्यासपूर्वकं श्रवणारम्भे उत्कटमुमुक्षाया अभावे च फलपर्यवसायिश्रवणासम्भवात् व्यर्थः प्रयासःस्यात्' इति शङ्काकुलस्य श्रवणे प्रवृत्त्यसम्भवात् । उत्कटमुमुक्षा च सैवोच्यते, या विवेकादि-परम्परया सञ्जाता । अतः तदुत्कटत्वाभिव्यञ्जकतया विवेकाद्युपन्यासोऽपि आवश्यकः ।

[1]न च शमादीनां प्राक्सिद्धत्वे 'शमदमाद्युपेतस्स्यात्' इति विद्यानुष्ठानकाले तेषामनुष्ठेयत्वप्रतिपादनं व्यर्थं स्यादिति वाच्यम् । प्राक्सिद्धानां तेषां विद्यास्वरूपोपयोगितया परिपालनावश्यम्भावेन तत्परिपालनोपयोगियत्नविशेषापेक्षणात् । स च यत्नो दोषदर्शनप्रसङ्ख्यानादिरूप इति ।

तत्सिद्धं अथशब्देन विवेकाद्यानन्तर्यमेवोच्यत इति ।

अत्रेयमाशङ्का भवति—आत्मैव नित्यः तद्व्यतिरिक्तं ब्रह्मलोकान्तं सकल-लौकिकवैदिककर्मसाध्यं फलमनित्यम्, 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' [छा. उ. ८-१-६] इत्यादिश्रुतेः—इत्येवंरूपेण नित्यानित्यवस्तुविवेकाद्वैराग्यं भवतीत्युक्तम् । तन्न सम्भवति—'अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति' 'अपाम सोमममृता अभूम' 'स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति । उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके' [कठ. उ. १-१२] इत्यादिवाक्यैः कर्मफलानामपि नित्यत्व-शोकादिरहितत्वप्रतिपादनात् । न च 'यत्कृतकं तदनित्यं' इति न्यायेन चिरकाल-स्थायित्वमात्रप्रतिपादनपराणि तानीति शङ्कनीयम् । वचनविरोधे [2]न्यायस्याभास-त्वात्—इति ।

---

1. विशिष्टाद्वैतिभिरुद्भावितं दूषणमाशङ्क्य निराकरोति—**न च शमादीना-मिति ।** मध्वचन्द्रिकाकृद्भिरपि इदं दूषणं आभासीकृतम्—"शमादीनां निदिध्यास-नाङ्गत्वेऽपि 'प्रशान्तचित्ताय शमान्विताय...प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' इत्यादि-वाक्यावगतं श्रवणाङ्गत्वं च न विरुद्धम्" इति ।

2. **न्यायस्याभासत्वादिति** 'अक्षय्यं ह वै' इत्यादेः विशेषशास्त्रत्वेन 'तद्यथेह' इत्यादिसामान्यशास्त्रापेक्षया प्रबलत्वाच्च इत्यपि बोध्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतःशब्दो हेत्वर्थः। यस्माद्वेद एव अग्निहोत्रादीनां श्रेयःसाधनानां अनित्यफलतां दर्शयति 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र

न केवलेन न्यायेन तस्यान्यथानयनम्, अपि तु न्यायोपोद्बलितश्रुत्यनुसारेण। तद्यथेहेत्यादिश्रुतिः यत्कृतकंतदनित्यमितिन्यायं 'तद्यथेह कर्मचितो लोकः क्षीयते' इत्यंशेनानूद्य कर्मफलस्यानित्यत्वं प्रतिपादयति। अतः सा उपपत्तिरूपतात्पर्यलिङ्गोपोद्बलिता तद्रहितात् 'अक्षय्यं ह वै चातुर्मास्ययाजिनः' इत्यादि वाक्यात् विशेषरूपादपि बलवती। एवम् 'आत्तो वै सशरीरः प्रियाप्रियाभ्याम्' [छा. उ. ८-१२-१] इत्यपि वचनं 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' [छा. उ. ८-१-२१] इति अन्वयव्यतिरेकरूपोपपत्त्यात्मकतात्पर्यलिङ्गोपोद्बलितं 'स्वर्गे लोके' इति वाक्याद्बलीयः। विशिष्य च हिरण्यगर्भस्यैव भयादिकमाम्नायते 'सोऽबिभेत्, स वै नैव रेमे' [बृ. उ. १-४-२] इत्यादि। तत्र का कथा अन्येषां तल्लोकं गतानां भयादौ। तस्मादक्षय्यवाक्यं आपेक्षिकामृतत्वाभिप्रायेण व्याख्येयम्। तथा चोपबृंहितं 'आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते' इति। 'स्वर्गे लोके' इति वाक्यञ्च नतत्रत्वमितिवाक्यशेषानुसारेण मृत्यु[1]जराशनायादिकृतं दुःखं वारयदपि पारतन्त्र्यादिकृतं न वारयतीति परिहारः।

अमुमर्थं द्योतयितुं अतश्शब्दः। तत्र—यद्यतश्शब्देन अथशब्दोक्तं साधनचतुष्टयं परामृश्यते, तदा अथशब्दोक्तस्यैव पुनरतश्शब्देन परामर्शं कृत्वा तस्य जिज्ञासां प्रति हेतुत्वं प्रतिपाद्यत इति वक्तुमयुक्तं, आनन्तर्यप्रतिपादकेनैवाथशब्देन एतदर्थसिद्धेः—इति शङ्का स्यात्। तन्निराकरणमेवम्—अतश्शब्देन मुख्यया वृत्त्या साधनचतुष्टयसंपत्ति[2]मात्रपरामर्शेऽपि लक्षणया लब्धात्मकत्वेन तत् परामृश्यते। तेन च अलब्धात्मकत्वशङ्का तदुपोद्बलकतया च अक्षय्यमित्यादिवाक्यं सूच्यते। तत्परिहारश्च लक्षितेन लब्धात्मकत्वेन लभ्यते। तदुपपत्तितया तद्यथेत्यादिवाक्यं सूच्यते। एतत्सर्वमभिप्रेत्याह—अतश्शब्दो हेत्वर्थ इति। 'यस्माद्वेद एव' इत्यादिवाक्यं आभिप्रायिकार्थकथनपरम्।

---

1. मु. 'जरा' नास्ति।
2. सम्पत्तिः—परिपाकः—फलजननौन्मुख्यमितियावत्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुण्यचितो लोकः क्षीयते' (८-१-६) इत्यादिः, तथा ब्रह्मज्ञानादपि परं पुरुषार्थं दर्शयति 'ब्रह्मविदाप्नोति परम्' (तैत्ति २-१) इत्यादिः, तस्माद्यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा।

ननु सांसारिकफलस्यानित्यत्वावधारणं वैराग्यद्वारा शमादिसम्पत्त्युपयुक्तमस्तु, आत्मनित्यत्वावधारणं तु क्वोपयुज्यते—इत्याशङ्क्याह—**तथा ब्रह्मज्ञानादिति**। अयं भावः—आत्मनित्यतामवगत्य तस्य 'विज्ञानमानन्दं ब्रह्म' [बृ. उ. ३-१] इति आनन्दरूपतामवगच्छन् तं कामयते, तदुपायं च ज्ञानं 'ब्रह्मविदाप्नोति परम्' [तै. उ. २-१] इति निर्धार्य तं जिज्ञासते। ततश्च मुमुक्षाद्वारा ब्रह्मजिज्ञासायामात्मनित्यत्वावधारणमुपयुज्यते—इति।

ब्रह्मजिज्ञासेत्यत्र ब्रह्मणे जिज्ञासा इति [1]केचिद्विगृह्णन्ति। तेषामयमाशयः—ब्रह्मणो हि निवृत्तावरणत्वेन फलरूपत्वम्। [2]तज्ज्ञानोपयोगितया चतुर्थीसमास [3]एषितव्यः। ननु—'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः [पा. सू. २-१-३६] इति सूत्रेण किल चतुर्थीसमासो वक्तव्यः। तस्य चायमर्थः—चतुर्थ्यन्तं पदं चतुर्थीप्रकृतिप्रतिपाद्यसाधनवाचिना अर्थादिभिश्च शब्दैः समस्यत इति। 'यूपदारु, द्विजार्थः सूपः, कुबेरबलिः' इत्यादीनि चतुर्थीगर्भविग्रहाण्युदाहरणानि। तदर्थेत्यंशस्य चेदं ब्रह्मजिज्ञासेत्युदाहरणं वक्तव्यम्। तन्न सम्भवति। 'विकृतिः प्रकृत्या' इति वार्तिकेन तस्य प्रकृतिविकारभाव एव [4]नियमात्—इति चेत्, न—तेनैव 'अश्वघासादिषु उपसङ्ख्यानम्' इति प्रकृतिविकारभावाभावेऽपि अश्वघासादिशब्देषु चतुर्थीसमासस्य प्रतिप्रसूतत्वात्। अश्वघासादेश्चाकृतिगणत्वात् ब्रह्मजिज्ञासाशब्दोऽपि तदन्तर्गतो भविष्यति। अत एव 'शास्त्रेण धर्मनियमः' [पस्पशा] इति वार्तिकव्याख्यानावसरे 'धर्माय नियमः' इति विग्रहो महाभाष्ये दर्शितः—इति। तान्निराकर्तुं स्वाभिमतं विग्रहं दर्शयति—**ब्रह्मणो जिज्ञासेति**। अयमाशयः—

---

1. **केचित्**—पूर्वेषु वृत्तिकारेषु केचित्

2. आ. तज्ज्ञापनोप०

3. **एषितव्य इति** अत एव 'धर्माय जिज्ञासा धर्मजिज्ञासा' इति चतुर्थीसमासः शबरस्वामिभिः समाश्रित इति भावः।

4. **नियमादिति** अन्यथा 'रन्धनाय स्थाली' 'अवहननाय उलूखलं' इत्यादावपि समासप्रसङ्ग इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'विकृतिः प्रकृत्या' इति वचनं 'ब्राह्मणसूपः' इत्यादौ चतुर्थीसमासव्यावृत्त्यर्थं पृथक् न कर्तव्यम्। सूत्रकृतैव प्रकृतिविकारभावस्य ज्ञापितत्वात्। तदर्थेत्युक्त्वा पुनः अर्थादीन् पृथङ्निर्दिशति। तन्निर्देशो व्यर्थः प्राप्नोति। 'द्विजार्थः' 'कुबेरबलिः' इत्यादीनामपि तादर्थ्यप्रतिपादकत्वेन तदर्थेत्येव समाससिद्धेः। [1]अतः पृथगर्थादीन्निर्दिशन्[2] तदर्थेत्यत्र विवक्षाविशेषं गमयति। तत्र प्रकृतिविकृतिभावे तादर्थ्यस्य स्पष्टत्वात् स एव तेन विवक्ष्यते। अतोऽतिप्रसङ्गाभावात् तद्वचनं न कर्तव्यमिति तद्वार्तिकं महाभाष्ये प्रत्याख्यातम्। कथं तर्ह्यश्वघासादौ[3] इत्याशङ्क्य, तत्रापि चतुर्थीसमाससिध्यर्थं पृथग्वचनं न कर्तव्यम्, षष्ठीसमासेनैव तादृशरूपसिद्धेः, स्वरे विशेषाभावाच्च[4]। ततश्च महाभाष्यपर्यालोचनया अश्वघासादिषु [5]षष्ठीसमास एवेति ब्रह्मजिज्ञासापदेऽपि स एवैषितव्यः। अत एव 'धर्माय नियमः—इति न विग्रहकथनम्, किं तु षष्ठीगर्भविग्रहेणैव व्युत्पादने क्रियमाणे सम्बन्धसामान्यप्रतिपादिकायाः षष्ठ्याः तादर्थ्ये पर्यवसानाभिप्रायम्' इति [6]तद्व्याख्यातृभिरुक्तम्।

ननु—ब्रह्मशब्दस्य 'इदं ब्रह्म इदं क्षत्रम्' [बृ. उ. २-२] इति ब्राह्मणजातौ 'इदं ब्रह्मायाति, इदमागच्छति' [बृ. उ. ४-३] इति जीवे 'तस्मादेतत् ब्रह्म नाम रूपमन्नं च जायते' [मु. उ. १. १. ९] इति हिरण्यगर्भे प्रयोगो दृश्यते। 'सत्यं

1. मु. 'अतः' नास्ति

2. मु. अर्थादिनिर्देशात्

3. घास इत्या०

4. **विशेषाभावाच्चेति** इति समाहितं इति शेषः।

5. **षष्ठीसमास एवेति** न चैवं रन्धनस्थालीत्यादिः षष्ठीसमासः स्यादिति वाच्यम्। इष्टापत्तेः। न चैवं प्रकृतिविकारभावनियमवैयर्थ्यम्। चतुर्थीसमासवारणेन साफल्यात्। न च चतुर्थीषष्ठीसमासयोरविशेषः। शाब्दबोधे सम्बन्धस्य सम्बन्धत्वेन तादर्थ्यत्वेन च भानेन विशेषात्।

6. **तद्व्याख्यातृभिरुक्तमिति** अत एव–धर्माय जिज्ञासा इति शबरस्वामिवचनं षष्ठीसमासलब्धार्थिकार्थप्रदर्शनपरम्, न तु विग्रहप्रदर्शनपरम्, 'तस्य ज्ञातुं इच्छा' इति निगमनवाक्येन षष्ठीसमासविभावनात्—इति कुमारिलभट्टपादैर्व्याख्यातमित्यपि बोध्यम्। आत्मनेपदपरस्मैपदशब्दयोः प्रकृतिविकारभावाभावेऽपि तादर्थ्यसमासस्तु 'वैय्याकरणाख्यायां चतुर्थ्याः' इत्यलुग्विधानसामर्थ्यात्। न च तस्मादेव ज्ञापकात् सर्वत्रापि तादर्थ्यसमासः शङ्कनीयः। तथा सति बलिरक्षितग्रहणवैयर्थ्यापत्तेः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्म च वक्ष्यमाणलक्षणं 'जन्माद्यस्य यतः' इति। अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम्।

ब्रह्मण इति कर्मणि षष्ठी न शेषे, जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च।

ज्ञानमनन्तं ब्रह्म' [तै. उ २-१] इति परमात्मनि च। अतः सूत्रगतो [4]ब्रह्मशब्दः किंपरः– इत्यत आह—**ब्रह्म चेति**। 'जन्माद्यस्य यतः' इत्यत्र त्रिविधपरिच्छेदशून्यं मायिकसकलजगत्कर्तृत्वोपादानत्वलक्षितं सत्यत्वादिधर्मिमात्रस्वरूपं श्रुतिप्रमाणकं व्यवस्थापयिष्यते, तदेवात्र ब्रह्मशब्देन ग्राह्यमिति भावः।

ननु—षष्ठीगर्भसमासेऽपि शेषषष्ठ्येव प्रकृते ग्राह्या, न कर्मषष्ठी। तथा हि सति ब्रह्मकर्मक एव विचारः प्रतिज्ञातः स्यात्। तथा च समन्वयादिविचारस्याप्रतिज्ञाततया शास्त्रे तद्ग्रथनमसङ्गतं स्यात्। शेषषष्ठीपक्षे तु ब्रह्मसम्बन्धिविचारस्य प्रतिज्ञालाभात् समन्वयादिविचारस्यापि परम्परया ब्रह्मसम्बन्धित्वात् न तद्ग्रथनमसङ्गतं भविष्यति—इति यो मन्यते तं प्रत्याह—**ब्रह्मण इति कर्मणीति** अयमाशयः—येनापि शेषषष्ठीगर्भःसमासः स्वीक्रियते, तस्यापि न साक्षात्प्रमाणादिविचारो ब्रह्मजिज्ञासेतिप्रतिज्ञया संगृहीतः। अपि तु सम्बन्धसामान्यस्य विशेषपर्यवसानावश्यंभावात् वक्ष्यमाणसूत्रपर्यालोचनया ब्रह्मस्वरूपतत्प्रमाणादिपर्यवसानं वक्तव्यमिति क्लेश एव। तथापर्यालोचनायां कर्मषष्ठीगर्भसमासपक्षेऽपि ब्रह्मकर्मकविचारप्रतिज्ञया प्रमाणादिविचारोऽपि प्रतिज्ञातो भवत्येव। प्रमाणादिविचारं विना ब्रह्मविचारस्य फलपर्यवसायित्वासम्भवात्। फलपर्यवसायिब्रह्मविचारस्यैव प्रतिज्ञाविषयत्वात्। अपि च–प्रमाणादिविचारोऽपि 'इदं ब्रह्मणि प्रमाणम्, इदं ब्रह्मप्राप्तिसाधनम्, इदं ब्रह्मज्ञानफलम्' इत्येवंरूपेण क्रियमाणो ब्रह्मविषयो भवत्येवेति न तेषामसङ्गतत्वम्। परं तु सविषयाया जिज्ञासायाः कर्मांशे उत्थिताकांक्षत्वात् तत्परित्यज्य सम्बन्धांशे आकांक्षामुत्थाप्य ब्रह्मजिज्ञासापदस्य सम्बन्धसामान्यपरत्वकल्पनमनुचितमिति।

ननु कर्मषष्ठीपक्षे कर्तृकर्मणोःकृतीति षष्ठी वक्तव्या। तस्याश्च समासो निषिद्धः 'प्रतिपदविधाना च षष्ठी न समस्यते' [पा. सू. वा. २-२-१०] इति। या हि पदविशेषं निमित्तीकृत्य षष्ठी विधीयते, यथा—'ज्ञोऽविदर्थस्य करणे' [पा. सू. २-३-५१] इत्येतेन अविदर्थस्य-अज्ञानार्थस्य प्रवृत्त्याद्यर्थस्य जानातेः करणे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते, संबन्धसामान्यस्य विशेषनिष्ठत्वात्। एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्। न व्यर्थः, ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वात्–इति चेत्—

न—प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानम्। तस्मिन् प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि। यथा राजाऽसौगच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत्।

श्रुत्यनुगमाच्च। 'यतो वा इमानि भूतानि जायन्ते' (तैत्ति० ३।१) इत्याद्याः श्रुतयः 'तद्विजिज्ञासस्व तद्ब्रह्म' इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति। तच्च कर्मणिषष्ठीपरिग्रहे सूत्रेणानुगतं भवति।

तस्मात् ब्रह्मण इति कर्मणि षष्ठी।

षष्ठी 'सर्पिषो ज्ञानं—सर्पिषा कारणेन प्रवृत्तिः' इत्येवं करणार्थे जानातियोगं निमित्तीकृत्य विहिता, तादृशी प्रतिपदविधानेत्युच्यते। ततश्च कृद्योगं निमित्तीकृत्य कर्तृकर्मणोर्विधीयमाना प्रतिपदविधाना भवत्येवेति कथं समासः। ननु 'कृद्यो[गा]-(गलक्षणा) च षष्ठी समस्यते' [पा. सू. वा. २-२-९] इति प्रतिप्रसवबलात् समासो भविष्यतीति चेत्, न—कृद्योगलक्षणाया अपि कर्मषष्ठ्याः 'कर्मणि च' [पा. सू. वा. २-२-१४] इत्यनेन सूत्रेण निषेधात्। तस्मात् कर्मषष्ठीपक्षे समासो नोपपद्यत इति चेत्—

उच्यते—'कर्मणि च' इति सूत्रं न कर्मषष्ठीमात्रस्य [1]समासप्रतिषेधकम्। तथासति 'तृजकाभ्यां कर्तरि' [पा. सू. २-२-१५] इत्यनेन कर्त्रर्थतृजकाभ्यां षष्ठ्या न समास इत्येवमर्थकेन 'ओदनस्य पाचकः[2]' 'ओदनस्य भोक्ता'

1. मु. 'समास' नास्ति।

2. मु. भोजकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्युदाहरणसिध्यर्थं पृथङ्निषेधो व्यर्थः स्यात् । ओदनस्य कर्मतया कर्मणिचेत्यनेनैव रूपसिद्धेः । अतः कर्मणिचेतिसूत्रे चशब्द इतिशब्दसमानार्थकः । ततश्च कर्मणीतिशब्दमुच्चार्य कर्तृनिषेधपूर्वकं या षष्ठी कर्मणि परिशेषिता सा न समस्यते—इति तदर्थो ग्राह्यः । ततश्च 'उभयप्राप्तौ कर्मणि' [पा. सू. २-३-६६] इति सूत्रस्य विषये षष्ठीसमासो न भवतीति पर्यवसितोऽर्थः ।

नन्वयमपि तस्य विषयो भवत्येव । तस्य ह्ययमर्थः—उभयोः—कर्तृकर्मणोः यत्र प्राप्तिः [1]कृत्प्रत्यययोगे, तत्र 'कर्तृकर्मणोः कृति' [पा. सू. २-३-६५] इत्यनेन उभयत्र षष्ठीप्राप्तौ, कर्मण्येव भवति न कर्तरीति परिसङ्ख्यारूपः[2] । ततश्चात्रापि साधनचतुष्टयसम्पन्नस्य कर्तुः स्वशब्देनोपादाने सति उभयप्राप्तेस्सम्भवात् उभयत्र षष्ठीप्राप्तौ उभयप्राप्तौकर्मणीति परिसङ्ख्या प्राप्नोत्येवेति चेत्—

न—उभयप्राप्तौकर्मणीतिसूत्रे 'कृत्वोऽर्थप्रयोगे' [पा. सू. २-३-६४] इति व्यवहितसूत्रात् प्रयोग इत्यनुवर्तते । ततश्च कर्तृकर्मगतविशेषप्रतिपादनतात्पर्यकप्रयोगे कर्मण्येव—इति तदर्थः । [3]यथा—आश्चर्यो गवां दोहोऽगोपेन—इति । अत्र हि आश्चर्यत्वसम्पादनाय अजादिवैलक्षण्येन दुर्दोहत्वं कर्मणः प्रतिपादयितुं गोरूपेण निर्देशोऽपेक्षितः । तथा दोग्धुरकुशलत्वप्रतिपादनाय गोपालभिन्नत्वेन निर्देशोऽपेक्षितः । प्रकृते तु न कर्तृकर्मोभयगतविशेषप्रतिपादनपरं सूत्रम् । किं तु विचारे पुष्कलकारणविषयप्रयोजनानि दर्शयितुम् । अतो नायमुभयप्राप्तिसूत्रविषयः ।

ननु—तथासति 'अन्तर्धौ येनादर्शनमिच्छति' [पा. सू. १-४-२८] इत्यत्र येनेति तृतीया न स्यात् । [4]अन्तरङ्गप्रत्यासत्त्या गम्यमानस्यात्मनः यत्कर्तृकं अन्तर्धाननिमित्तं दर्शनाभावमिच्छति तस्य कर्तुः अपादानसंज्ञा भवति, यथा उपाध्यायादन्तर्धत्ते—इत्येवमपादानसंज्ञापरत्वेन कर्तृकर्मगतविशेषप्रतिपादनातात्पर्यकत्वात्

---

1. मु. कृत्प्रयोगे

2. मु. रूपा

3. मु. 'यथा' नास्ति

4. **अन्तरङ्गप्रत्यासत्त्या** अविनाभावसंबन्धेन । अन्तर्धानस्य अदर्शनकर्मणश्च व्याप्यव्यापकभावः संप्रतिपन्न इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म, फलविषयत्वादिच्छायाः। ज्ञानेन हि प्रमाणेन अवगन्तुमिष्टं ब्रह्म। ब्रह्मावगतिर्हि पुरुषार्थः, निश्शेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्।

तस्मात् ब्रह्म जिज्ञासितव्यम्।

—इति चेत्, न—तत्राप्यपादानसंज्ञां प्रति निमित्ततया अदर्शनकर्तृत्वेनादर्शनकर्मत्वेन चान्तर्धानसम्बन्धितया[1] कर्तृकर्मप्रतिपादनतात्पर्यकत्वसम्भवात्।

अथवा (कर्मणि प्रतिषेधे) 'अकाकारयोरप्रतिषेधः [पा. सू. वा. २-३-६६] इति वार्तिकवचनेन—'अप्रत्ययात्' [पा. सू. ३-३-१०२] इति सूत्रेण प्रत्ययान्तेभ्यः अकारप्रत्ययो भवतीति विहिते अकारप्रत्यये 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' [पा. सू. वा. ३-३-१०८] इति ण्वुल्प्रत्ययादेशे अके च '[2]बिभित्सा भेदिका वा रुद्रस्य जगतः' इत्युदाहरणयोः 'उभयप्राप्तौ कर्मणि' इति प्रतिषेधो न प्रवर्तते—इति प्रतिपादितम्। ततश्च ब्रह्मजिज्ञासापदस्य अकारप्रत्ययान्तत्वात् उभयप्राप्तौकर्मणीति प्रतिषेधो न प्रवर्तते। अतः कर्तृकर्मणोःकृतीत्येव प्रकृते षष्ठी। तस्याश्च न समासनिषेधः।

ननु—सुखं दुखाभावो वा साक्षादिच्छाविषयः, तत्साधनतया अन्यः, तत् कथं ज्ञानस्य इच्छाविषयत्वम्, तत्राह—[3]**अवगतिपर्यन्तमिति**। अवगतिः—अविद्यानिवर्तको वृत्तिरूपः साक्षात्कारः, तत्साधनं विचारजनितं तात्पर्यावधारणरूपं जिज्ञासेत्यत्र प्रकृतिप्रतिपाद्यं इत्यर्थः। तत्र हेतुमाह—**फलविषयत्वादिति**। सुखदुःखाभावविषया साक्षादेव फलविषया। तत्साधनविषया तु [4]विशेषणविधया। तात्पर्यावधारणं च सत्तानिश्चयरूपशाब्दज्ञानद्वारा साक्षात्कारोपयोगि। तदिदमाह—**ज्ञानेन हीति**। अवगतेश्च अविद्यानिवर्तकतया पुरुषाभिलषितत्वमित्याह—**ब्रह्मावगतिर्हीति**।

---

1. **अन्तर्धानसंबन्धितयेति** संबन्धोऽत्र अविनाभावः। तृतीयार्थो ज्ञाप्यत्वं अदर्शनकर्तृत्वे अदर्शनकर्मत्वे चान्वेति।

2. आ. बीभत्सा

3. **अवगतिपर्यन्तमिति** बहुव्रीहिः। पर्यन्तं—फलम्

4. **विशेषणविधयेति** फलविषयेति शेषः। इच्छाविशेष्ये इष्टसाधने इष्टस्य विशेषणत्वात् इत्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात् । यदि प्रसिद्धं न जिज्ञासितव्यम्, अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति ।

[1]ततश्चायं सूत्रार्थः—साधनचतुष्टयसम्पत्त्यनन्तरं तद्धेतुका ब्रह्मजिज्ञासा भवतीति । जिज्ञासापदान्तर्गतज्ञाधातूपात्तं ब्रह्मणि वेदान्ततात्पर्यावधारणमपि ब्रह्मकर्मकं भवत्येवेति तद्द्वारा जिज्ञासाया ब्रह्म विषयः । यद्यपि ब्रह्मणि वेदान्ततात्पर्यावधारणेच्छारूपा ब्रह्मजिज्ञासा उक्तप्रणाडिकया तात्पर्यनिर्धारणस्येष्टसाधनतामवगच्छतः साधनचतुष्टयसम्पत्त्यभावेऽपि भवत्येव, तथापि न सा साक्षात्कारपर्यन्तविचारप्रयोजिका । किं तु साधनचतुष्टयसम्पत्त्यनन्तरं उत्कटजिज्ञासैव । कामुको हि सांसारिकफलासक्तः तज्जनितंदुःखमङ्गीकृत्यैव वैषयिकं सुखं बहुमन्यमानः तदुपयोगिनं इहामुत्रगमनरूपं संसारं न निविवृत्सति । विरक्तस्य तु संसारकृतोपभोगाभावात्[2] तत्कृते दुःखे आत्यन्तिकद्वेषो भवति । ततः तन्निवृत्तिं कामयते । ततश्च विरक्तस्य निरतिशयानन्दप्रेप्सारूपा मुमुक्षा संसारनिविवृत्सासहिता भवति । एषैव उत्कटमुमुक्षेत्युच्यते । तादृशमुमुक्षाप्रयुक्ता च जिज्ञासा सूत्रोपात्तेति न विवेकाद्यानन्तर्यानुपपत्तिः । [3]तया च जिज्ञासया स्वविषयप्रयोजकतया विचार आक्षिप्यते । तदभिप्रायेण जिज्ञासितव्यमिति उपसंहारवाक्ये तव्यप्रत्ययप्रयोगः । अत्र आक्षिप्तविचारं प्रति जिज्ञासापदोपात्तं ज्ञानं साध्यम् । ज्ञानस्य च उक्तपरम्परया अधिकारिविशेषणीभूतमुमुक्षाविषयो मोक्षः फलम् । तथा च [4]श्रुत्यर्थाभ्यां अयं सूत्रार्थः पर्यवसितः—विवेकादिदार्ढ्यानन्तरं तद्दार्ढ्यस्य च तद्यथेहेत्यादिवचनपर्यालोचनया उपपत्तेः परम्परया मोक्षसाधनीभूतवेदान्ततात्पर्यनिर्धारणाय वेदान्तवाक्यानि विचारयेदिति ।

तत्पुनरिति । ब्रह्मज्ञानेच्छा हि 'ब्रह्मज्ञानमिष्टसाधनम्' इति ज्ञानं विना न सम्भवति । तज्ज्ञानं च विशेषणीभूतब्रह्मज्ञानं विना न सम्भवति । ब्रह्मज्ञानं च

---

1. भामत्यनुसारं सूत्रार्थं वर्णयितुमारभते—**ततश्चायमिति**
2. मु. ०पयोगाभावात्
3. मु. तथा
4. आ. शक्त्याक्षेपाभ्यां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उच्यते—अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम्।

वेदान्तेभ्य एव वक्तव्यम्। तेषां च यदि निर्णयजनकत्वमिष्यते, तदा विचारं विनैव निर्णयस्य सिद्धत्वात् व्यर्थो विचारः। यदि तु तेभ्यः ब्रह्मनिर्णयो न भवति, तदा तदज्ञाने जिज्ञासैव न भवेत्। न च संशयरूपां प्रसिद्धिमादाय ब्रह्मजिज्ञासा समर्थयितुं शक्यते, वेदान्तानां संशयजनकत्वानुपपत्तेः। ततः कथं जिज्ञासापूर्वको विचारः कर्तव्यः? इति शङ्काभिप्रायः।

उच्यत इति। अस्मिन् हि शास्त्रे 'तत्त्वमसि' 'अयमात्मा ब्रह्म' इति जीवब्रह्माभेदबोधकवाक्यानि, 'सत्यं ज्ञानमनन्तं ब्रह्म' 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' 'यस्सर्वज्ञस्सर्ववित्' (यस्य ज्ञानमयं) इत्यादीनि तत्पदार्थप्रतिपादकानि, 'असङ्गो ह्ययं पुरुषः' 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' 'स समानस्सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव' इत्यादीनि त्वम्पदार्थप्रतिपादकानि च वाक्यानि विचारयिष्यन्ते सपरिकरं कृत्स्नेन शास्त्रेण। तानि च विचारात्प्रागेव अधीतसाङ्गस्वाध्यायं प्रति अर्थावबोधकान्येव। ततश्च ब्रह्मप्रसिद्धिः। [1]एवं ब्रह्मशब्दादपि तत्पदार्थप्रसिद्धिः। तस्य हि [2]बृहत्त्वं प्रवृत्तिनिमित्तम्। तच्च त्रिविधपरिच्छेदशून्यत्वम्। ततश्च यद्यन्यो जगत्कर्ता स्यात् जगदुपादानं वा, ततः तमादाय वस्तुपरिच्छेदप्राप्तेः [3]बृहत्त्वं न स्यात्। अतो ब्रह्मैव जगत्कर्त्रुपादानरूपं सिध्यत् तदुपयोगितया[4] सर्वज्ञं सर्वशक्ति-

---

1. विवक्षितस्वरूपस्य ब्रह्मणो भाष्योक्ता वेदान्तेभ्यः प्रसिद्धिः उपपादिता। अथ भाष्योक्तामेव ब्रह्मशब्दव्युत्पत्त्या नित्यशुद्धत्वादिसर्वशक्तिमत्त्वान्तार्थप्रतीतिं समर्थयति —**एवं ब्रह्मशब्दादपीत्यादिना**। एतेन—ब्रह्मशब्दात् सविशेषस्यैव प्रतीतेः न निर्विशेषं ब्रह्मशब्दात् सिद्ध्यतीति **विशिष्टाद्वैतिनां** आक्षेपो निरस्तः।

2. मु. ब्रह्मत्वं

3. मु. ब्रह्मत्वं

4. **तदुपयोगितयेति** सर्वज्ञत्वं कर्तृत्वोपयोगि सर्वशक्तिसमन्वितत्वं उपादानत्वोपयोगीति भावः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समन्वितं सिध्यति । [1]तत्रापि जगतः पारमार्थिकत्वे वस्तुपरिच्छेदराहित्यं न सिध्यतीति तस्य मिथ्यात्वमुपक्षिप्य परमार्थतस्तद्राहित्यरूपं नित्यशुद्धत्वादिकं उपक्षिपति । तथा अहमितिप्रत्ययेऽपि त्वम्पदार्थः प्रसिध्यति ।

[2]न चैतावता विचारानारम्भः । यद्यपि विचारात्प्रागेव 'अशनायाद्यतीतो जीवः सकलवेदान्तप्रतिपाद्यं परं ब्रह्म' इति स्वरसतः अधीतसाङ्गस्वाध्यायस्य बोधो भवति, तथाऽपि अनभ्यासदशापन्नजलादिज्ञानवत् स बोधः चित्तदोषवशात् आपातरूप इत्युच्यते । तत्र यथा जलज्ञाने अप्रामाण्यशङ्का एवं प्रकृतेऽपि नानाविधाश्शङ्काः भवन्ति । तत्र अहमितिप्रतीतिविषयः शरीरमेवेति **चार्वाकाः** । इन्द्रियाण्येवेति **तदेकदेशिनः** । मन एवेति[3] **तादृशाः** । क्षणिकविज्ञानमिति **सौगताः** । शून्यमिति[4] **तदेकदेशिनः** । एते च सर्वे वेदाप्रामाण्यवादिनः सर्वामेव वैदिक-प्रतीतिं अप्रमामेव वदन्ति । अस्ति देहादिविलक्षणः स्थिरः कर्तृत्वादिविशिष्टः इति **नैयायिका मीमांसकाश्च** । ते तु अविनाशितया जीवप्रतिपादकानि वाक्यानि यथाश्रुतान्येव व्याचक्षते । असङ्गत्वादिप्रतिपादकस्त्वागमो न यथाश्रुतो ग्राह्यः इति वदन्ति । **साङ्ख्यास्तु**—भोक्तैवात्मा न कर्ता भोक्तृत्वं च स्वप्रकाशचिद्रूपत्वमेव इति वदन्तः, असङ्गत्वादिप्रतिपादक आगमो यथाश्रुतार्थ एव, परं तु जीवानां भिन्नत्वात् तदैक्यप्रतिपादक आगमो न यथाश्रुतो ग्राह्यः—इति वदन्ति । एवं त्वम्पदार्थशोधक-[5]वाक्येषु वैदिकानामेव विप्रतिपत्तयः । **मीमांसकास्साङ्ख्याश्च** ईश्वरं नेच्छन्ति । ते सर्वज्ञत्वादिप्रतिपादकमागमं अन्यथा व्याचक्षते । **तार्किकादयोऽपि** ईश्वरमभ्यु-पगम्य तस्य निर्विशेषतां जीवाभिन्नतां चानिच्छन्तः अस्थूलादिवाक्यानि तत्त्व-मस्यादिवाक्यानि च अन्यथा व्याचक्षते । सिद्धान्ते तु तानि यथाश्रुतान्येव । तत्र

---

1. मु. तस्यापि

2. **न चैतावतेत्यादि** एतेन—वेदान्तशब्दजन्यज्ञानस्य मोक्षसाधनत्वे ब्रह्म-शब्दात् निर्विशेषप्रतीतिसम्भवे च विचारशास्त्रवैयर्थ्यमिति **शतदूषण्युक्तं** दूषणं अपास्तम् ।

3. आ. एवेत्यपि

4. आ. ०मित्यपि

5. आ. बोधकवाक्येषु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, [बृं] (बृ)हतेर्धातोरर्थानुगमात् ।

सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः । सर्वो ह्यात्मास्तित्वं प्रत्येति, न न अहमस्मीति । यदि हि न आत्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको न अहमस्मीति प्रतीयात् । आत्मा च ब्रह्म ।

यदि तर्हि लोके ब्रह्म आत्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेति अजिज्ञास्यत्वं पुनरापन्नम् ।

न—तद्विशेषं प्रति विप्रतिपत्तेः । देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लौकायतिकाश्च प्रतिपन्नाः । इन्द्रियाण्येव चेतनान्यात्मेत्यपरे । मन इत्यन्ये । विज्ञानमात्रं क्षणिकमित्येके । शून्यमित्यपरे । अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे । भोक्तैव केवलं न कर्तेत्येके । अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा स भोक्तुरित्यपरे ।

एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः । तत्र अविचार्य यत्किंचित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येत, अनर्थं च इयात् ।

तस्मात् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते ।

सिद्धान्तव्यतिरिक्तेषु पक्षेषु यानियानि तत्तन्मतोपष्टम्भकतया वचनानि उदाह्रियन्ते याश्च युक्तयः, तासामाभासत्वं प्रतिपादनीयम्, सिद्धान्तोदाहृतवचनानां युक्तीनां च तत्तदाशङ्कानिराकरणपूर्वकं व्यवस्थितत्वं च व्युत्पादनीयम् । तदभावे तत्तद्वादिवाक्यश्रवणक्षुब्धचित्तस्य स्वोद्भावितशङ्काभिश्च क्षुब्धचित्तस्य उत्पन्नमपि साङ्गाधीतवेदवाक्यजनितं ज्ञानं नानाविधशङ्कारूपचित्तदोषकलुषितं [1]आपातरूपमेव स्यादिति तात्पर्यार्थः ।

---

1. आपातरूपमिति आपातत्वं–प्रतिबद्धत्वं अप्रमात्वेन सन्दिग्धत्वं आवृतप्रमात्वकत्वं वा । अविद्यानिवृत्तिरूपफलानुपधायकत्वं इति यावत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वशक्तिसमन्वितमित्येतदनन्तरं वेदान्तेभ्यः प्रसिद्धमिति शेषः। **ब्रह्मशब्दस्य हीति**। अयं हिशब्दः चार्थे द्रष्टव्यः। तथासति उपपत्त्यन्तरोपन्यासपरता स्पष्टा भवति। **सर्वस्यात्मत्वाच्चेति**। सङ्ग्रहवाक्यमेतत्। तत्र ब्रह्मास्तित्वप्रसिद्धिरित्यमुमंशं अन्वयेन व्यतिरेकेण च व्याचष्टे—**सर्वो हीति**। अङ्गनस्मीति न प्रत्येतीति न, किं तु प्रत्येत्येव—इति योजना। ततश्च [1]विवक्षितार्थलाभः। **नाहमिति**। न प्रतीयादित्यन्वयः। **आत्मा स भोक्तुरिति**। भोक्तुस्स्वरूपमीश्वरः इति सिद्धान्तिन इत्यर्थः।

वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणेति। यद्यपि 'सदेवेत्यादिवाक्यं [2]प्राधान्येन ब्रह्मप्रतिपादकम्, ब्रह्मविषयकोपक्रमोपसंहारैकरूप्याद्यात्मकब्रह्मविषयपरमतात्पर्यग्राहकलिङ्गसमन्वयात्'[3] इत्येवंरूपेण युक्त्यनुसन्धानात्मिका वेदान्तमीमांसाऽपि तर्क एव, तथाऽपि तत्र शङ्काविशेषनिराकरणाय गुणसूत्रैः प्रदर्श्यमाना युक्तयः उपकरणत्वेन विवक्षिताः। अथवा सूत्रकृता संगृहीतानां श्रुत्यादीनां तद्बलाबलस्य च संगृहीतस्य विशदीकरणाय अध्वरमीमांसाव्याख्यातृभिरुक्तं प्रमेयं इह भाष्यकारादिभिरुद्गृह्यते, तत् उपकरणभूतं द्रष्टव्यम्। एवं 'स्मरन्ति च' 'अपि च सप्त' 'तत्रापि च तद्व्यापारादविरोधः' 'आचारदर्शनात्' 'बहिस्तूभयथाऽपि स्मृतेराचाराच्च' इति नरकादिप्रतिपादकतया कर्मसमुच्चयप्रतिपादकतया आरूढपतितबहिष्कारप्रतिपादकतया च स्मृत्याचारा उपन्यस्ताः। स्मृतिषु च अनुमानशब्दप्रयोगात् वेदानुमापकत्वं दर्शितम्। श्रुतौ च प्रत्यक्षशब्दप्रयोगात् स्वातन्त्र्येण प्रामाण्यं दर्शितम्। तत्र च सर्वत्र तर्कशास्त्रोक्तमनुमानादिलक्षणमुपयुक्तम्। तदिह व्याख्यातृभिरुपन्यस्यते। एवं अपशूद्राधिकरणे, संवर्गविद्यायां जानश्रुतौ प्रयुक्तः शूद्रशब्दः न जातिवचनः किं तु व्यक्तिवचनः—इत्युक्तम्। 'समाननामरूपत्वात्' [ब्र. सू. १-३-३०] इति सूत्रेण इन्द्रादिशब्दानां

---

1. **विवक्षितार्थलाभ इति** ब्रह्मास्तित्वप्रसिद्धिः विवक्षितोऽर्थः। तल्लाभश्च प्रतीत्यभावनिषेधे एव। न तु 'नाहमस्मि' इति प्रतीतेः निषेधे। अतः उक्तयोजनैव विवक्षिता इति भावः।

2. **प्राधान्येन**—अनन्यशेषतया

3. **समन्वयादिति** समन्वयः-वैशिष्ट्यम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२ जन्माद्यधिकरणम्

ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद्ब्रह्म इत्यत आह भगवान् सूत्रकारः—जन्माद्यस्य यत इति।

जातिवचनत्वमाश्रितम्। तत्र तर्कशास्त्रोक्तं जातिव्यक्त्यादिलक्षणनिरूपणं उपयुक्तम्। तत्सर्वमत्र व्याख्यातृभिर्विशदीक्रियते। तदिह उपकरणतया विवक्षितम्॥ १॥

इति जिज्ञासाधिकरणम्॥ १॥

विषयादिसम्भवात् ब्रह्मजिज्ञासा आरम्भणीयेत्युक्तम्। तामारभते भगवान् सूत्रकारः—जन्माद्यस्ययत इति।

पूर्वोत्तराधिकरणयोस्सङ्गतिं वक्तुं वृत्ताधिकरणप्रमेयानुवादपूर्वकं उत्तराधिकरणमवतारयति—**ब्रह्म जिज्ञासितव्यमित्युक्तमिति**। स्वाभिमतं किञ्चिद्वस्तु असाधारण्येन निर्दिश्य तत्र प्रमाणोपन्यासः कर्तव्यः। अत एव च उत्तरत्र 'इदं ब्रह्मणि प्रमाणं' इत्येवं व्यवहारः। अतः प्रमाणोपन्यासात् प्रागेव असाधारण्याय लक्षणमुखेन ब्रह्म निर्देष्टव्यम्। अन्यथा हि प्रमाणोपन्यासोऽनाकाङ्क्षिताभिधानमेव स्यात्। अतः प्रथमसूत्रेण ब्रह्मस्वरूपतत्प्रमाणादिविचारेषु सर्वेषु प्रतिज्ञातेष्वपि लक्षणमुखेन ब्रह्मस्वरूपं प्रथमं निरूप्यते।

[1]तत्र च यत्र सर्वं विशेषजातं कल्पितं यच्च सत्यज्ञानानन्दादिपदार्थेषु धर्मिभूतमखण्डं वस्तुगत्या स एव ब्रह्मशब्दविशेष्यभूतोऽर्थः जन्मादिसूत्रेण प्रतिज्ञायते। तत्र 'शास्त्रयोनित्वात्' 'तत्तु समन्वयात्' इति सूत्राभ्यां प्रमाणं सर्वे वेदान्ता इत्युपन्यस्यते। ईक्षत्याद्यधिकरणमारभ्य अवान्तरकिञ्चिद्वाक्यपर्यालोचनया अन्यपरत्वमाशङ्क्य कृत्स्नेनाध्यायेन तत्रैवोपनिषदां प्रामाण्यं उत्सर्गापवादाभ्यां दृढीक्रियते।

---

1. व्याख्यानव्याख्येयभावेन भामतीकल्पतरुपरिमलेषु प्रतिपादितं न्यायरक्षामणौ पूर्वोत्तरपक्षाभ्यां रचितं अर्थजातं भाष्यव्याख्याव्याजेन निरूपयितुं आरभते—**तत्र च यत्रेत्यादिना**। आदित आरभ्य इयमेव शैली अस्य व्याख्याग्रन्थस्य - इत्येतत् उपक्रम एव टिप्पण्यामुक्तम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्रायं विशयः—जगज्जन्मादिकारणत्वं सत्यादिष्वभिन्नमखण्डं धर्मिमात्रं च ब्रह्मलक्षणं सम्भवति वा न वेति। तत्र आद्यं तटस्थलक्षणमित्युच्यते। यो हि धर्मोऽसाधारणः सन्नेव कदाचिद्धर्मिणा सम्बध्यते स तटस्थलक्षणमित्युच्यते। यथा छत्रचामरादिकं राज्ञः। आद्यलक्षणे चायं तदर्थसंशयः—किं तत् विरुद्धं अविरुद्धं वेति। द्वितीये तु तत् अखण्डं स्वरूपं प्रसिद्धं अप्रसिद्धं वेति। ततश्च पूर्वाधिकरणेन आक्षेपिकी सङ्गतिः। ब्रह्म विचारणीयमित्युक्तम्। तत् न सम्भवति। विरोधाप्रसिद्धिभ्यां ब्रह्मलक्षणस्यैवासम्भवात्। लक्षणं विना प्रधानादिव्यावृत्ततया तन्निर्णयासम्भवात् तद्विचारस्य व्यर्थतापत्तेः—इति।

तत्र पूर्वः पक्षः—जगत्कारणत्वं ब्रह्मलक्षणं न सम्भवति। निर्विशेषस्य तस्य जगत्कारणत्वासम्भवात्। न हि कृतकत्वं नित्यस्य वस्तुनो लक्षणं भवति। एवं, सत्याद्यात्मत्वं स्वरूपलक्षणमित्युच्यते यथा चन्द्रस्य प्रकृप्रकाशत्वाभिव्यङ्ग्यं चन्द्रत्वम्, तदपि न सम्भवति। तत्र किं सत्यत्वादिधर्म एव लक्षणं, उत तद्धर्मी। नाद्यः। विरोधादेव। न द्वितीयः। सत्यज्ञानानन्दादिष्वभिन्नस्य सर्वधर्मविनिर्मुक्तस्य धर्मिणोऽप्रसिद्धत्वात्। न च श्रुत्यैव तादृशधर्मिमात्रप्रसिद्धिः। यज्जगज्जन्मादिकारणं ब्रह्म तत् सत्यज्ञानानन्दात्मकमित्येवंरूपेण प्रवृत्तायाः श्रुतेः कारणत्वसत्यत्वादिरूपोद्देश्यताविधेयतावच्छेदकानेकधर्मसंसृष्टतया ब्रह्मबोधिकायाः सकलधर्मविनिर्मुक्तधर्मिमात्रबोधकत्वासम्भवात्। अपि च सर्वत्र धर्म एव लक्षणं [1]भवति, तत्कथं धर्म्येव स्वरूपलक्षणमिति। एतदभिप्रायेणाह—**किं लक्षणं पुनरिति।**

सूत्रे यच्छब्देन [2]सत्यादिलक्षणं संगृहीतम्। यतः—सत्यादिरूपादित्यर्थः।

---

1. मु. 'भवति' नास्ति

2. **सत्यादिलक्षणं सङ्गृहीतमिति** 'तस्य च निर्णयवाक्यं' इति भाष्यभावलभ्योऽयमर्थः। एतेन स्वरूपलक्षणस्य सूत्रानारूढत्वशङ्का परास्ता वेदितव्या।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]अयमत्र परिहाराभिप्रायः–यथा ह्यर्थवादवाक्येषु [2]मुख्येऽर्थे उद्देश्यविधेयसंसर्गबोधे सत्यपि [3]लक्षणीये स्तुतिरूपे न तत्संसर्गो भासते, तद्वत् सत्यादिवाक्येषु द्वारभूते वाच्यार्थे तद्भानेऽपि लक्षिते धर्मिमात्रे तन्न भासत इति लक्षणया धर्मिमात्रबोधकत्वमुपपद्यते । एवं च [4]यथा पुरोडाशकपालेनेत्यत्र धर्मिमात्रलक्षणा तद्वत् प्रकृतेऽपि स्वीक्रियत इति श्रुतितस्तत्प्रसिद्धिरुपपद्यते ।

नन्वेवमपि यथा लक्षितेन प्राशस्त्येन विधिपदोपात्तानां यागदेवतादीनां संसर्गो भासते, एवमत्रापि पर्यवसिते बोधे पदान्तरार्थसंसर्गभानं नियतमिति कथमेतस्य सकलधर्मातीतवस्तुमात्रबोधकता । यत्किञ्चिद्धर्मसंसृष्टतया बोधे तु न त्वदभिमतब्रह्मस्वरूपसिद्धिः ।

उच्यते—पर्यवसिते बोधे पदान्तरार्थसंसर्गभानमावश्यकमिति नियमोऽप्रयोजको नानुत्रियते । न च–तथा ज्योतिष्टोमादिवाक्ये दृष्टमिति तावन्मात्रेण तथा स्वीकर्तुं युक्तम् । तथासति लौकिकवाक्यानां प्रमाणान्तरप्रसिद्धार्थे एव प्रामाण्यं न तु कविप्रतिभामात्रसिद्धे प्रमाणान्तररहिते दृष्टमिति ज्योतिष्टोमादिवाक्येष्वप्यलौकिकोऽर्थो न सिध्येत् । यदि तु तत्र वेदवाक्यानां तात्पर्यस्य गृहीतत्वात् लोकदृष्टनियमानादरेण तथाभूतोऽर्थस्स्वीक्रियते तर्हि [5]प्रकृतेऽपि तुल्यम् ।

अपि च प्रकृष्टप्रकाशश्चन्द्र [6]इत्यादिलक्षणवाक्येषु पदान्तरार्थसंसर्गगोचर-

---

1. **अयमत्र परिहारेति** अत्र शङ्कापरिहारग्रन्थे 'वाक्यात् सविकल्पकबोध एव जायते न तु कदाचिदपि निर्विकल्पकबोधः' इति वदतां विशिष्टाद्वैतिनां आक्षेपस्य निरासो लभ्यते इत्यवधेयम् ।

2. **मुख्येऽर्थे उद्देश्यविधेयसंसर्गबोधे इति** शक्यार्थविषयकबोधे उद्देश्यविधेय संसर्गभानेऽपीत्यर्थः ।

3. **लक्षणीये स्तुतिरूपे न तत्संसर्गो भासत इति** आर्थवादिकपदशक्यार्थसंसर्गः तत्संसर्गपदार्थः । स्तुतिरूपलक्ष्यार्थविषयकबोधे स न भासते इत्यर्थः ।

4. **यथा पुरोडाशकपालेनेत्यादि** उपपादितमेतत् आत्मस्वप्रकाशत्वविचारे भ्रमानधिकविषयस्यापि ज्ञानस्य अज्ञानभ्रमादिनिवर्तकत्वसमर्थनावसरे ।

5. **प्रकृतेऽपि तुल्यमिति** । ब्रह्मप्रातिपदिकार्थमात्रस्य बुभुत्सितत्वात् तन्मात्रे तात्पर्यग्रहात् तन्मात्रस्य वाक्यार्थत्वमित्यर्थः । तदेतत् उदाहरणेन स्पष्टयति—**अपि चेति** ।

6. मु. इतिलक्षण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]प्रमितिजनकत्वाभावो दृष्टः । न च—लक्षणवाक्येऽस्मिन् प्रकृष्टप्रकाशपदं हेतुगर्भं विशेषणम्, चन्द्रपदं च चन्द्रेतरव्यावृत्ततया वा चन्द्रपदवाच्यतया वा चन्द्रपरम्, ततश्च प्रकृष्टप्रकाशः अचन्द्रव्यावृत्त इति वा चन्द्रपदवाच्य इति वा तत्र बोधः । तत् कथं तस्य पदान्तरार्थसंसर्गागोचरतयाचन्द्रस्वरूपमात्रबोधकतेति—वाच्यम् । तस्य हि वाक्यस्य न प्रकृष्टप्रकाशवैशिष्ट्यपरत्वम्, न वा चन्द्रेतरतारकादिव्यावृत्तिपरत्वम् । उभयोरपि प्रत्यक्षेण गृहीतत्वात् । नापि चन्द्रपदवाच्यत्वपरत्वम् । 'चन्द्रत्वमिति जातिविशेषः, तं प्रवृत्तिनिमित्तीकृत्य तदाश्रये चन्द्रपदं प्रवर्तते' इति [2]प्रागेव आप्तोपदेशाल्लाभात् । न च तथापि व्यक्तिविशेषे तद्वाच्यत्वं न गृहीतमिति वाच्यम् । वस्तुतःप्रकृष्टप्रकाशाश्रयव्यक्तिविशेषस्यैव [3]तदुपदेशविषयत्वात् । तस्मात् अज्ञातं[4] चन्द्रत्वमेव वाक्यतात्पर्यविषय इति तदेव वाक्येन बोध्यते ।

ननु—चन्द्रत्वजातिरपि प्रत्यक्षेण गृहीता । प्रकृष्टप्रकाशत्वस्य तदभिव्यञ्जकस्य ग्रहणे सति तदग्रहणस्य वक्तुमनुचितत्वात् । अभिव्यञ्जकसमानवित्तिवेद्यत्वाज्जातेः । अथ—गृहीताऽपि चन्द्रत्वजातिः नाज्ञातताविनिर्मुक्ता भवति, उपदेशं विना जातस्य ज्ञानस्य [5]प्रत्यक्षरूपस्याप्यापातत्वोपपत्तेः । अत एव 'अयं चन्द्रो न वा' इति संशयो दृश्यते । अथ वा अभिव्यञ्जकतया यदभिव्यञ्जकं गृहीतं तत्समानवित्तिवेद्यत्वमेव जातेः । न त्वभिव्यञ्जकत्वाग्रहणदशायामपि । अत एव भास्वररूपत्वेन सुवर्णे गृहीते शीतस्पर्शवत्तया च करकायां गृह्यमाणायामपि भास्वररूपशीतस्पर्शयोस्तेजस्त्वजलत्वाभिव्यञ्जकताज्ञानाभावदशायां न तत्र तदुभयग्रहणम् । ततश्च उपदेशात्प्राक् प्रकृष्टप्रकाशे गृह्यमाणेऽपि न चन्द्रत्वजातिसाक्षात्कारः । उपदेशेन तु प्रकृष्टप्रकाशानुवादेन चन्द्रस्वरूपे बोधिते वाच्यार्थबोधदशायामुपस्थितं प्रकृष्ट-

---

1. आ. प्रमितिपरत्वा०

2. **प्रागेव**—'प्रकृष्टप्रकाशश्चन्द्रः' इत्युपदेशात् पूर्वमेव ।

3. **तदुपदेशेति** कर्मधारयः, 'प्रकृष्टप्रकाशश्चन्द्रः' इत्युपदेशात् प्राक्तनवाक्यस्थार्थः ।

4. **अज्ञातमिति** प्रकृष्टप्रकाशाश्रये इत्यादिः । न चैवं चन्द्रत्वसंसर्गावगाहिप्रमाजनकत्वापत्त्या चन्द्रलक्षणवाक्यस्य अखण्डार्थत्वं न स्यादिति वाच्यम् । पदान्तरार्थसंसर्गानवगाहित्वस्यैव अखण्डार्थलक्षणघटकत्वेन अदोषात् । वक्ष्यते चैतत् ।

5. मु. प्रत्यक्षस्याप्या०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]प्रकाशत्वमेव चन्द्रत्वाभिव्यञ्जकं कल्पयतीति अर्थादभिव्यङ्ग्याभिव्यञ्जकभावग्रहः, शाब्दस्तु चन्द्रस्वरूपग्रह एव—इति चेत्, तर्हि प्राचीनोपदेशजनितं वाच्यत्वज्ञानमपि आपातरूपमेवेति शक्यं वक्तुम्। तत्रापि हि 'प्रकृष्टप्रकाशः चन्द्रपदवाच्यो वा न वा' इति प्रकृष्टप्रकाशश्चन्द्र इत्युपदेशात् प्राक् संशयोऽनुवर्तत एव। अभिव्यञ्जकताग्रहात् प्राक् प्रकृष्टप्रकाशे गृह्यमाणेऽपि चन्द्रत्वं न गृहीतं—इति कल्पने तु, अभिव्यञ्जकतापरमेव वाक्यमस्तु। स्वरूपमेव शाब्दं अभिव्यञ्जकता तु आर्थीत्यत्र नियामकाभावात्—इति चेत्—

उच्यते—तात्पर्यानुसारेण वाक्यार्थो वर्णनीयः। तत्र यदि वाच्यवाचकभावाभिप्रायेण यदि वा व्यङ्ग्यव्यञ्जकभावाभिप्रायेण प्रश्नः तदा तत्परत्वमेवास्तु, न तत्राग्रहः। यदा तु चन्द्रशब्दवाच्यत्वाश्रयो यो व्यक्तिविशेषः स क इति प्रष्टुरभिप्रायः, तदा तन्मात्रपरतैव प्रकृष्टप्रकाशवाक्यस्य।

ननु—तदाऽपि व्यक्तिविशेषबोधनार्थं प्रकृष्टप्रकाशत्ववैशिष्ट्यं बोधनीयमेव, अन्यथा व्यावर्तकोपस्थितिं विना व्यक्तिविशेषालाभात्। अपि च—प्रष्टुः [2]यावत् बुभुत्सितं [3]तावत् अवश्यंवक्तव्यमित्येव नियमः, न तु तदबुभुत्सितमवक्तव्यमित्यपि। अन्यथा, काश्याः को मार्ग इति [4]मार्गप्रश्ने तद्व्यतिरिक्तानां मार्गचिह्नानां गिरिनद्यादीनां निरूपणं न स्यात्। यदि तु मार्गप्रतिपत्त्युपयोगितया तदपि प्रष्टुर्बुभुत्सितमेव, तदा प्रकृष्टप्रकाशत्वमपि तथाऽस्तु—इति चेत्—

उच्यते—यत्र हि बुभुत्सितवस्तुप्रतिपत्त्युपयोगि अज्ञातं भवति तत्र प्रष्टुः, जिज्ञासा भवत्येवेति तादृशमार्गचिह्नादिषु वाक्यतात्पर्यस्य प्रश्नं विना स्वीकारेऽपि, प्रकृते सम्बोधनीयेन प्रकृष्टप्रकाशसम्बन्धस्य जिज्ञासिते व्यक्तिविशेषे अवगतत्वेन तदभिधाने न वक्तुस्तात्पर्यम्। परं तु तदनुवादं विना व्यक्तिविशेषस्य बोधयितुमशक्यतया तदर्थं द्वारतया अभिधानमात्रं तत्र प्रकृष्टप्रकाशस्य। यथा च 'तीरत्व-

1. मु. प्रकाशमेव
2. मु. यद्यत्
3. मु. तत्तावद॰
4. मु. 'मार्ग' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकारेणैव तीरविशेषोपस्थितिर्भवतु' इत्यभिप्रायेण प्रयुक्तस्य गङ्गायांघोषइति वाक्यस्य गङ्गासम्बन्धित्वेनतीरबोधाजनकत्वेऽपि गङ्गापदवाच्यस्य प्रवाहविशेषस्य तीरान्तरे सम्बन्धाभावेन तदुपस्थापनशक्त्यभावात् तीरविशेष एव स्वरूपेण बोध्यते, तद्वत् प्रकृष्टप्रकाशसंसर्गतात्पर्यरहितस्यापि व्यक्त्यन्तरबोधकतायां सामर्थ्याभावादेव व्यक्तिविशेषोपस्थापकत्वमुपपद्यते ।

एवं चन्द्रत्वमात्रतात्पर्येण प्रयुक्तस्य 'प्रकृष्टप्रकाशश्चन्द्रः' इति वाक्यस्य पदान्तरार्थसंसर्गागोचरप्रमितिजनकत्वेनाखण्डार्थत्वेऽभ्युपगम्यमाने तज्जन्यज्ञानस्य 'अयमसौ वा चन्द्रः' इति संशयनिवर्तकत्वेन चन्द्रोऽस्तीतिवाक्यजन्यस्य[1] तदनिवर्तकत्वेन च सामग्रीविशेषजन्यत्वमेव संशयादिनिवर्तकतायां फलबलात् प्रयोजकमास्थेयम् ।

न च वाक्यस्य पदान्तरार्थसंसर्गागोचरप्रमितिजनकत्वमेव न सम्भवतीति शङ्कनीयम् । आकाङ्क्षादिसामग्र्यां सत्यां तदजनकत्वस्य वक्तुमशक्यत्वात् । दृष्टं च अर्थवादवाक्यानां अवान्तरवाक्यविधया प्राशस्त्यरूपार्थबोधकतायां पदान्तरार्थसंसर्गागोचरप्रमितिजनकत्वम् । इयांस्तु विशेषः—प्रकृष्टप्रकाशवाक्ये चन्द्रप्रातिपदिकोपात्तस्य लक्ष्यतावच्छेदकस्य चन्द्रत्वस्य चन्द्रे संसर्गो भासते, इह तु सत्यादिवाक्ये ब्रह्मणि ब्रह्मपदोपात्तस्य ब्रह्मत्वस्य संसर्गोऽपि न भासते। सर्वत्र ब्रह्मप्रकरणे आम्नातैः 'अथात आदेशो नेति नेति' [बृ. उ. २-३-६] 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' [छा. उ. ७-२४] 'नान्तःप्रज्ञं नबहिःप्रज्ञं नोभयतःप्रज्ञं नप्रज्ञानघनं न प्रज्ञं नाप्रज्ञं अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते' [मा. उ. ७] 'आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत्' [ऐ. उ. १-१] 'सदेव सोम्येदमग्र आसीत्' [छा. उ. ६-२-१] इत्यादिवाक्यैः ब्रह्मस्वरूपस्य सकलधर्मातीतत्वप्रतिपादनात् । न च—मिथ्यात्वं तावता धर्माणां सिध्यति, मिथ्याभूतानामपि वाक्यार्थकोटौ निवेशे को दोष इति—वाच्यम् । 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' [बृ. उ. ४-४-१९] 'अथ यत्रान्यत् पश्यति अन्यच्छृणोत्यन्यद्विजानाति तदल्पम्' 'उदरमन्तरं कुरुते अथ तस्य भयं भवति'

---

1. मु. जन्यभानस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[तै. उ. २-६] इत्यादिवाक्यैःभेददर्शनस्य निन्दितत्वात्, 'ब्रह्मविदाप्नोति परम्। सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन्' इति अनन्तपदेन मोक्षजनकज्ञानविषयतया सर्वधर्मातीत(त्व)स्य प्रतिपादनाच्च ।

अयं च मन्त्रः 'प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्। वचसां आत्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्। [वि. पु. ६-७-५३] इति पराशरेण वस्तुमात्रबोधनपरतया व्याख्यातः । अत्र प्रत्यस्तमितभेदमित्यनन्तपदं, सत्तामात्रमिति सत्यपदं, अगोचरंवचसामिति 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। नबिभेति कुतश्चन' इत्युपसंहारैक[1]रूप्यमुपक्रमस्य, आत्मसंवेद्यंतज्ज्ञानमिति स्वप्रकाशनित्यज्ञानपरतया ज्ञानपदं, ब्रह्मसंज्ञितमिति ब्रह्मविदाप्नोतिपरमितिसङ्ग्रहवाक्येन लक्षणवाक्यस्यैकवाक्यत्वं च व्याख्यातम् । [2]अत्र संज्ञितमिति संज्ञापदोपादानं वस्तुमात्रबोधकत्वेऽप्यार्थिकार्थपरतया नेयम् ।

ननु सत्यत्वादिधर्माणां मिथ्यात्वे ब्रह्मणः सत्यादिरूपता न सिध्येदिति चेत्— किं सत्यत्वादिवैशिष्ट्यं न सिध्येदित्युच्यते, सत्यत्वादीनां मिथ्यात्वे बाध्यत्वादिरूपधर्मान्तरं सम्भवेदिति वा ? आद्ये इष्टापत्तिः । व्यावहारिकसत्यत्वादिवैशिष्ट्याङ्गीकारेऽपि परमार्थतस्तदनङ्गीकारात् । न द्वितीयः । न हि बाध्यत्वरूपं धर्मान्तरं ब्रह्मणि स्वीकृत्य शुक्तिरजतादिवत् सत्यत्वं निषिध्यते । किं तु 'अथात आदेशो नेति नेति' इत्यादिश्रुतिप्रतिपादितनिर्धर्मकवस्तुस्वरूपपर्यालोचनया । [3]तत्र कथं बाध्यत्वरूप[4]धर्मान्तरसम्भवः ।

न च सत्यज्ञानानन्द[5]पदार्थानां परस्परं [6]प्रत्येकं च भिन्नतयाऽवगतानां

---

1. मु. ०रूप्यमुक्तम्। अस्य

2. ब्रह्मसंज्ञितं इत्युक्त्या ब्रह्मलक्षणवाक्यस्य ब्रह्मपदवाच्यत्वेनब्रह्मपरत्वमुक्तं इतिशङ्कावारणार्थमाह—अत्रेति।

3. तत्र कथं धर्मान्तरसम्भव इति अयमर्थः—विरुद्धत्वेनाभिमतयोरेकनिषेधे अपरसत्त्वं तत्रैव, यत्र तयोः एकबाधकबाध्यत्वं नास्ति, यथा शुक्तिरजते सत्यत्वमिथ्यात्वयोः। ब्रह्मणि तु 'नेति नेति' इति सर्वधर्मनिषेधेन सत्यत्वमिथ्यात्वयोः एकबाधकबाध्यत्वात् न एकनिषेधे अपरसत्त्वम्—इति।

4. मु. धर्मसम्भवः

5. मु. ०नन्दादिप०

6. प्रत्येकमिति परमते सत्यं ज्ञानं आनन्दश्च प्रत्येकं अनेक इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथमेकब्रह्मासाधारणरूपत्वसिद्धिरिति शङ्कनीयम् । अत एव ब्रह्मासाधारणस्वरूपप्रतिपादकवाक्यात् अभेदे त्रयाणां सिद्धे, घटाद्युपाधिकस्सत्यभेदः वृत्त्युपाधिको [1]ज्ञानानन्दभेद इति, धर्मी तु [2]सर्वानुस्यूत एक इति च सिध्यति ।

यच्च धर्मिमात्रपरत्वे लक्षणवाक्यता न स्यादिति, तदिष्टमेव । न हि सत्यज्ञानानन्दाभिन्नं धर्मिमात्रं मुख्यं लक्षणमिति[3] वदामः । अपि तु तदवगम इतरव्यावृत्ति[4]बुद्धावुपयुज्यत इति तस्य लक्षणत्वोपचारः ।

न चैकवस्तुमात्रबोधकत्वे 'चन्द्रश्चन्द्रः' इतिवत् 'ब्रह्म ब्रह्म' इतिवच्च असाङ्गत्यमिति युक्तम् । पर्यायपदानां हि शक्तिग्राहकवाक्यादन्यत्र सहप्रयोगस्याव्युत्पन्नतया तादृशसमभिव्याहारस्यासाङ्गत्यम् । इह तु सत्यादिपदानां भिन्नप्रवृत्तिनिमित्तकतया न सहप्रयोगानुपपत्तिः । सत्यशब्दे अबाध्यत्वं, ज्ञानानन्दपदयोस्तु ज्ञानत्वानन्दत्वरूपो जातिविशेषः । स च तार्किकमते पदार्थविशेषः सामान्यात्मकः, अस्मन्मते तत्तदुपाध्युपहितं ब्रह्मैव इत्यन्यदेतत् ।

न चैकधर्मिमात्रपर्यवसाने पदान्तरवैयर्थ्यम् । [5]वाच्यार्थोपस्थितिदशायामनेकधर्मविशिष्टैकधर्मिबोधकतया बाध्यत्वादिभ्रमव्युदासपूर्वकं[6] व्यक्तिविशेषोपस्थापनोपयोगित्वात् ।

तत् सिद्धं सत्यादिवाक्यस्याखण्डार्थत्वम् । तत्त्वं च पदान्तरार्थसंसर्गागोचरप्रमितिपरवाक्यत्वम् । संसर्गागोचरेत्युक्ते प्रकृष्टप्रकाशवाक्ये अव्याप्तिः, तज्जन्यज्ञानस्य चन्द्रे [7]चन्द्रत्वसंसर्गावगाहित्वात्, अतः पदान्तरेति । न च प्रकृष्टप्रकाश-

---

1. **ज्ञानानन्दभेद इति** सत्यादीनां परस्परं भेदोऽपि औपाधिकः । अनुपदमेतद्वक्ष्यति ।

2. मु. सर्वत्रानु०

3. आ. ०मिति च संप्रदायः

4. आ. बुद्ध्योप०

5. मु. पदार्थोपस्थिति

6. **भ्रमव्युदासपूर्वकमिति** तथा चायं क्रमः-प्रथमं व्यावर्तकधर्मविशिष्टबुद्धिः, ततो व्यावृत्तत्वबुद्धिः, ततो व्यावृत्त्युपलक्षितस्वरूपमात्रबोधः—इति ।

7. मु. चन्द्रत्वावगाहि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शब्दलक्षितधर्मिणः अभेदस्य चन्द्रपदार्थे भानात् तद्दोषतादवस्थ्यमिति शङ्कनीयम्। अभेदस्य स्वरूपमात्रतया उभयगतत्वाभावेन संसर्गरूपत्वाभावात्। अखण्डवाक्यतात्पर्यविषयीभूतज्ञानविषयत्वं च अर्थस्य अखण्डत्वम्।

तथा च उक्तरीत्या सत्यादिवाक्यस्य सर्वधर्मविनिर्मुक्तवस्तुमात्रबोधकतोपपत्तौ श्रुतिप्रसिद्धं स्वरूपलक्षणमिति सिद्धम्।

एवं जगज्जन्मादिकारणत्वं यतोवेत्यादिवाक्यप्रसिद्धं ब्रह्मलक्षणं नोक्तस्वरूपेण विरुध्यते। मायिकस्य जगत्कारणत्वस्य अनृततया परमार्थतो निर्धर्मस्वरूपेण विरोधानुपपत्तेः। एवं च यथा 'यद्रजतमभात् सा शुक्तिः' इति आरोपितेन रजतेन शुक्तिर्लक्ष्यते, एवं आरोपितेन जगज्जन्मादिकारणत्वेन ब्रह्म लक्ष्यते। [1]आरोपितत्वेऽपि तस्य ब्रह्मण्येवासाधारणत्वात्।

ननु लक्षणद्वयोपन्यासस्य किं प्रयोजनम्? इदम्—यथा चन्द्रं दिदर्शयिषुराप्तः प्रथमं दिगन्तरगतनक्षत्रादिभ्यो दृष्टिं वारयितुं 'शाखायां चन्द्रः' इति अधिकरणतया सम्बन्धविशेषेण शाखामुपलक्षणमुपादत्ते, ततश्च दिगन्तरव्यावृत्तचक्षुषः चन्द्रसमीपवर्तितारकादिषु चन्द्रभ्रमो मा भूदिति तत्स्वरूपं प्रकृष्टप्रकाशात्मकं बोधयति, एवं हि बोध्यबुद्धिः सुखेन चन्द्रेऽवतारिता भवति; एवं 'ब्रह्मविदाप्नोति परं' इत्युपश्रुत्य ब्रह्मशब्दस्य अनेकत्र प्रयोगदर्शनात् मुमुक्षुभिर्ज्ञेयो ब्रह्मशब्दार्थः क इति बुभुत्सोः जगत्कारणत्वोपन्यासेन येषु जीवादिषु जगत्कारणत्वं न सम्भवति तेषां सृज्यकोटौ निविष्टतया स्रष्टृत्वासम्भवात् तेभ्यो व्यावृत्तबुद्धेरपि सम्भवज्जगत्कारणभावेषु प्रधानादिषु [2]ब्रह्मत्वभ्रममपनेतुं स्वरूपलक्षणं उपन्यस्यते। न हि जडानां प्रधानादीनां ज्ञानादिस्वरूपतोपपद्यते। ततश्च आद्यं लक्षणं केभ्यश्चिद्व्यावृत्तिनिश्चयपूर्वकं बुद्धिस्थिरीकरणार्थम्, द्वितीयं तु सकलभ्रमनिवृत्तिपूर्वकं वस्तुस्वरूपसत्तानिश्चयार्थम्।

---

1. आरोपितत्वेऽपीति एतेन-आरोपितस्य लक्षणत्वे प्रधानादिष्वपि आरोपसंभवेन तत्रातिव्याप्तिरिति परोक्तदूषणं निरस्तम्। वक्ष्यमाणरीत्यानिमित्तत्वघटितस्य तस्य जडे आरोपासंभवात्।

2. ब्रह्मभ्रम॰

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]अपि च—ब्रह्मण एव जगत्कारणत्वानुपन्यासे, 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इतिश्रुतिसहकृतेन[2] ब्रह्मशब्देन त्रिविधपरिच्छेदशून्यं वस्तु लक्ष्यत्वेन निर्दिष्टम्, [3]तत्र स्वरूपलक्षणमात्रोक्तावेवंशङ्का भवेत्—उक्तस्वरूपमपि ब्रह्म कथं त्रिविधपरिच्छेदशून्यम्, जगतः तदुपादानस्य तन्निमित्तस्य चान्यस्य वस्तुनो विद्यमानत्वात्। अतः तन्निवृत्तये यज्जगज्जन्मादिकारणं तद्ब्रह्मेति बोधनीयम्। ततश्च जगत्कारणमन्यदिति भ्रमः ब्रह्मण एव कारणताबोधादपगतो भवति। जगतश्चोपादानं ब्रह्म इत्यवगते जगदधिष्ठानं ब्रह्मेति पर्यवस्यति। तत्र [4]ब्रह्मशब्दोपात्ते सर्ववस्त्वभावे बोधिते स्वाधिष्ठानगताभावप्रतियोगिस्वरूपं मिथ्यात्वं जगतः सिध्यतीति 'जगतोऽन्यस्य वस्तुनो विद्यमानतया कथं त्रिविधपरिच्छेदशून्यता[5]' इति शङ्कानिवारणं लभ्यते।

अत एव जगदुत्पत्तिस्थितिलयकारणत्वं ब्रह्मलक्षणत्वेन निर्दिश्यते। उत्पत्तिमात्रकारणत्वादिकमपि हि [6]ब्रह्मासाधारणमेव। परं तु एकैकमात्रकारणत्वोक्तौ, ततोऽन्यत्र अन्यदेव कारणमस्त्विति तेन च वस्तुपरिच्छेदप्राप्तिरिति शङ्का नापगता स्यात्। उत्पत्तिस्थितिलयानां त्रयाणामपि ब्रह्म कारणमिति प्रतिपादने तु न काचिदाशङ्का प्रसरति।

---

1. ननु विशिष्यावगत्यर्थं अवश्यापेक्षितेन स्वरूपलक्षणेनैव सर्वतो व्यावृत्तलक्ष्यस्वरूपावगतिः सम्भवतीति तटस्थलक्षणवैयर्थ्यमेव—इति **विशिष्टाद्वैतिनां** शङ्कां निरस्यति—**अपिचेत्यादिना**।

2. **श्रुतिसहकृतेनेति** न च-किमर्थं श्रुतिसहकारोक्तिः, ब्रह्मशब्देनैव तल्लाभात्-इति शङ्क्यम्। ब्रह्मशब्दस्य निरतिशयबृहत्त्ववाचित्वाभावात् बृहत्त्वमात्रवाचित्वात्, तेन देशकालपरिच्छेदशून्यतामात्रं ब्रह्मशब्दात् लभ्यते—इति **विशिष्टाद्वैतिशङ्कानिराकरणार्थं** तदुक्तेः। किंरूपं बृहत्त्वं इति जिज्ञासानिवृत्त्यर्थं तदुपपादकश्रुत्यन्तरापेक्षाया युक्तत्वात्। न च तटस्थलक्षणोक्तिः परिभाषामात्रमिति **विशिष्टाद्वैतिदूषणं** युक्तम्। सनत्सुजातीये 'यामांशभागस्य……'[२-४४] इति पद्ये प्रसिद्धत्वात्।

3. मु. 'तत्र' नास्ति

4. **ब्रह्मशब्दोपात्ते सर्ववस्त्वभावे** इति व्यधिकरणे सप्तम्यौ।

5. मु. 'शून्यता' नास्ति।

6. **ब्रह्मासाधारणमेवेति** अत एव जगद्वाचित्वाधिकरणे जगदुत्पत्तिकारणत्वमात्रं ब्रह्मलिङ्गत्वेनोक्तमितिभावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जन्माद्यस्य यतः ॥ २ ॥

जन्म–उत्पत्तिः आदिः अस्येति तद्गुणसंविज्ञानो बहुव्रीहिः ।

अपि च 'असंसारि चेतनं किमपि नास्ति' इति मन्यमानस्य, सर्वधर्मातीतमसंसारि ब्रह्म जीवस्य पारमार्थिकं स्वरूपमिति सहसा बोधयितुं न शक्यम् । अतः, कार्यस्यांकुरादेः केनचित् कर्त्रा भवितव्यमिति लोकसिद्धार्थानुवादपूर्वकं असंसारिवस्तु लोकदृष्ट्या सम्भावनीयम् । तत्सम्भावनायां तस्य पारमार्थिकं स्वरूपं श्रुत्या सुबोधं भवतीति तटस्थतया स्वरूपेण च लक्षणतो ब्रह्मबोधनप्रयोजनम् ।

अमुं सूत्रार्थं मनसि निधाय सौत्रपदानि व्याचष्टे—**जन्म उत्पत्तिरिति ।** सूत्रे 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति' इति श्रुत्यनुसारेण जन्मादीनां त्रयाणां ग्रहणं विवक्षितम् । तत्र यदि अतद्गुणसंविज्ञानबहुव्रीहिर्विवक्षितस्स्यात्, तदा स्थितिलययोरेव ग्रहणं प्राप्नुयात्, न त्रयाणाम् । अतस्त्रितयलाभाय [1]तद्गुणसंविज्ञानबहुव्रीहिः[2] विवक्षितः । तत्रापि, यदि जन्म आदिः येषां ते जन्मस्थितिभङ्गाः इति विग्रहे इतरेतरयोगद्वन्द्वघटितं विशेष्यं गृह्येत, तदा 'जन्मादयोऽस्य यतः' इति सूत्रापत्त्या यथाश्रुतसूत्रमसमर्थितं स्यात् । तन्माभूदिति समाहारद्वन्द्वघटितं विशेष्यं विवक्षितम् । तत्र हि 'सर्वो द्वन्द्वो विभाषया एकवद्भवति' इत्यनेन एकवचनं 'स नपुंसकं' इत्यनेन 'समाहारे द्विगुर्द्वन्द्वश्च क्लीबं स्यात्' इत्येवमर्थकेन नपुंसकलिङ्गं च सिध्यति । ततश्च जन्मादीति पदम् ।

ननु—जन्मनः किं कृत्स्नप्रपञ्चापेक्षया आदित्वम्, उत स्थितिभङ्गावपेक्ष्य ? नाद्यः । जन्मनोऽपि प्रपञ्चान्तर्गततया स्वनिरूपितादित्वासम्भवात् । न द्वितीयः ।

---

1. **तद्गुणसंविज्ञानेति** तच्छब्देन बहुव्रीह्यर्थोऽन्यपदार्थ उच्यते । तस्य गुणत्वेन संविज्ञानं यस्मिन् समासे स तद्गुणसंविज्ञानः । सर्वस्य विशेषणत्वे समासासम्भवात् समासार्थैकदेशो विशेषणमिति लभ्यते ।

2. **मु. ०व्रीहिसमासो**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जन्मस्थितिभङ्गं समासार्थः। जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च। श्रुतिनिर्देशस्तावत्, 'यतो वा इमानि भूतानि जायन्ते' (तै. उ. ३।१) इत्यस्मिन् वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि, जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात्। अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः। षष्ठी जन्मादिधर्मसंबन्धार्था।

तथासति त्रितयलाभासम्भवात्—इत्याशङ्क्याह—**जन्मनश्चेति**। श्रुत्या वा तथा निर्देशे किमालम्बनमित्याशङ्क्याह—**वस्तुवृत्तापेक्षं चेति**। यद्यपि जन्मापि त्रितयान्तर्गतं, तथापि त्रितयमध्ये जन्म प्रथमभागो भवतीति तदादित्वेन त्रितयसमुदायो निर्देष्टुं शक्यत एवेति भावः। सङ्ग्रहवाक्यं विवृणोति—**श्रुतिनिर्देशस्तावदित्यादिना**।

नन्विदंशब्दस्य प्रत्यक्षसन्निहितवस्तुनिर्देशकत्वात् सूत्रे न सर्वजगत्कारणत्वलाभः—इत्याशङ्क्याह—**अस्येति**। **प्रत्यक्षादीति**। 'इदं सर्वमसृजत, यदिदं किञ्च' [तै. उ. २-६] इति [1]प्रत्यक्षादिसन्निधापितसकलजगत्कारणत्वस्य श्रुतिषु प्रतिपादनात् तदनुसारेण सूत्रेऽपि तथैव ग्रहणमिति भावः। ननु—जन्मादिशब्देन त्रितयसमुदायस्य प्रतिपादनात् तस्यैव प्रकृत्यर्थेन जगता सह षष्ठ्या सम्बन्धः प्रतिपादितो भवेत्, न तु जन्मस्थितिप्रलयैः सुमुदायिभिः—इत्याशङ्क्याह—**षष्ठीति**। यत्किञ्चिदेकोपाध्यवच्छिन्नाः पदार्था एव समुदाय इति समुदायसमुदायिनोर्भेदाभावात् नोक्तानुपपत्तिरिति भावः।

ननु—सूत्रे यत इति पञ्चम्यन्तात्तसिल्प्रत्ययो वक्तुमयुक्तः। किमियं 'यतो वा इमानि भूतानि जायन्ते' इति श्रुताविव अपादानपञ्चमी, किं वा जाड्याद्बद्ध इतिवत् हेतुपञ्चमी? नाद्यः। 'जनिकर्तुः प्रकृतिः' [पा. सू. १-४-३०] इति सूत्रेण उत्पत्त्यर्थकधातुसमभिव्याहारे एव तस्या विधानात्। इह तु जन्मादिशब्देन त्रितयसमुदायग्रहणात्। अपि च तथात्वे हेतुत्वस्याग्रहात् उपादाननिमित्तत्वयोरुभयोरपि ग्रहणं न स्यात्। नापि हेतुपञ्चमी। 'विभाषा गुणेऽस्त्रियाम्' [पा. सू.

---

1. **प्रत्यक्षादिसन्निधापितेति** इदमः सन्निहितवाचित्वं, सन्निधिश्च प्रतीतिसामान्यं, न तु प्रत्यक्षप्रतीतिमात्रं—इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत इति कारणनिर्देशः ।

२-३-२५] इति गुणवाचकेभ्य एव तद्विधानात्–इत्यत आह—यत इति । 'हेतौ' [पा. सू. २-३-२३] इति सूत्रेण हेत्वर्थे तृतीया विधीयते । '[1]इतराभ्योऽपि दृश्यन्ते' [पा. सू. ५-३-१४] इति ततोऽपि तसिल्प्रत्ययो भविष्यति । ततश्च यत इति सौत्रपदं तृतीयान्तात्तसिल्प्रत्ययेन सिद्धं कारणत्वसामान्यं प्रतिपादयति । अस्य च [2]श्रुतिपर्यालोचनया उपादानत्वे सति निमित्ततायां पर्यवसानं लभ्यते । अथवा 'विभाषा गुणेऽस्त्रियाम्' इति सूत्रे विभाषेतियोगविभागाद्वा अगुण इति प्रश्लेषाद्वा 'दण्डाद्घटः, पुत्रात्प्रमोदः, धूमाद्वह्निमान्' इत्यादिप्रयोगनिर्वाहः, तथेहापि भविष्यतीति भावः ।

ननु–'एतेन प्रतिपद्यमाना इमम्मानवमावर्तं नावर्तन्ते' [छा. उ. ८-१४-६] इत्यत्र प्रतिपद्यमाना इति पदेनोपस्थितस्य प्रतिपत्तिवर्तमानकालस्य 'मानवावर्तविशेषणत्वेनप्रयुक्तेन इममितिशब्देन स्ववैयर्थ्यपरिहारार्थं [3]मानवावर्तव्यावर्तकतया को विशेषः प्रतिपादनीयः' इति साकांक्षेण परामर्शात्, 'अर्चिरादिमार्गेण ब्रह्मलोकं गच्छन्तो यस्मिन् मानवे गताः तस्मिन्नेव मानवे नावर्तन्ते' इत्येवमर्थपर्यवसानाय 'मार्गप्रतिपत्तिसमानकालमिमंमानवमावर्तं नावर्तन्ते' इति वर्तमानार्थकत्वं इममितिशब्दस्य स्वीकृतम् । तद्वत् प्रकृतेऽपि 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतौ इमानीतिशब्दस्य सूत्रे च अस्येतिशब्दस्य वर्तमानार्थतां स्वीकृत्य वर्तमानजगदुत्पत्त्यादिप्रतिपादकत्वमेव किं न स्यात्–इत्याशङ्क्य ; श्रुतादिमानीतिशब्दो न अवर्तमानाद्वर्तमाने व्यावृत्तिबोधनार्थः । यतोवेत्यादिवाक्यं हि 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः' इति वाक्यप्रतिपन्नां सृष्टिमनुवदति । तच्च वाक्यं श्लोकान्तर्गतानन्तपदोपात्तत्रिविधपरिच्छेदशून्यत्वप्रतिपादकम्, अतोऽतीतानागतवर्तमानसकलवियदादिकारणत्वेन प्रतिपादकं ब्रह्मण इति, यतोवेत्यादिवाक्यमपि पुरोवादानुसारेण अतीतादिसाधारण्येन सर्वजगत्कारणत्वप्रतिपादनपरम् । तत्र न इमानीतिशब्दः अतीतादिभ्यो व्यावृत्तिबोधनार्थो वक्तुं शक्यते । किं तु प्रत्यक्षादिसन्निधापितं जगत्प्रकारं

---

1. सु. अन्याभ्योऽपि दृश्यते
2. श्रुतिपर्यालोचनयेत पर्यालोचनं प्रकृत्यधिकरणे करिष्यते ।
3. मानवावर्तान्तरव्यावर्तको विशेषः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य जगतो नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः ।

परामृशतीति वक्तव्यम् । तथा च सति एतादृशे जगति ब्रह्मणोऽन्यः कर्ता न सम्भवतीति कर्त्रन्तरव्यासेधेन सप्रयोजनं प्रकृतोपयोगि च इदमितिशब्दो विशेषणं भविष्यतीतितात्पर्येण श्रुतिसूत्रगतेदंशब्दोपात्तप्रकारं जगद्विशेषणैर्विशदयन् ब्रह्मजिज्ञासेत्यत्र विद्यमानस्य ब्रह्मपदस्य प्रथमान्ततया विपरिणामेन अनुषङ्गं तत्पदाध्याहारं भवतिपदाध्याहारं च कृत्वा सूत्रवाक्यार्थं कथयति—**अस्येत्यारभ्य वाक्यशेष** इत्यन्तेन ।

नामरूपाभ्यां व्याकृतस्य इति विशेषणेन, कर्तारं [1]विनाऽपि जगदुत्पद्यत इति निरीश्वरपक्षो व्यावर्तितः । घटो हि, नाम्ना घट इत्येवंरूपेण कम्बुग्रीवाद्यात्मना रूपेण च यथा भविष्यति तथा यतितव्यमिति सङ्कल्पपूर्वकं क्रियमाण एव, तादृशनामरूपाभ्यां व्यक्तो भवति, तद्वदंकुरादिकमपि नामरूपव्यवस्थितं तदनुकूलसङ्कल्पाश्रयं कर्तारमाक्षिपतीति, न निरीश्वरपक्षः समञ्जसः ।

व्याकृतस्य इत्यनेन उत्पत्तेः प्राक् अव्याकृतनामरूपसद्भावसूचनात्, उत्पत्तेः प्राक् कार्यप्रागभाव एवेति परमाणुभ्योऽसदेव द्व्यणुकादिकं जायत इति तार्किकमतवैलक्षण्यं सूचितम् ।

श्रुतौ सृज्यसमर्पक इदंशब्दो बहुवचनान्ततया प्रयुक्तः । सूत्रे एकवचनान्ततया प्रयोगेण, इदंशब्दोपात्तं सृज्यं यस्य दृष्ट्या एककार्यमिव भवतीति सूचनेन, 'अयं च लोकः परश्च लोकः सर्वाणि च भूतानि अस्यैव............निश्वसितानि' [बृ. उ. ४-६-११] इतिवचनैकवाक्यतासूचनेन इदं सर्वं एककार्यवदप्रयत्नेनैव करोतीति सूचनेन, 'एक ईश्वरः इदं सर्वं कथं कुर्यात्' इति शङ्का दूरत एव निरस्ता भवति । यो हि निश्वासवदप्रयत्नेनैव सर्वं करोति तत्र इदं न करोतीति का शङ्का । ततश्च निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च भगवतस्सिद्धं भवति । अतस्सोऽप्यत्र यतश्शब्देनार्थो विवक्षित इत्यभिप्रेत्योक्तं—**यतःसर्वज्ञात्सर्वशक्तेरिति । अनेक-**

---

1. मु. विना जग०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्तृभोक्तृसंयुक्तस्य इत्यनेन जीवानां सृज्यकोटौ निवेशात् तेषां जगत्कर्तृत्वं न सम्भवतीति[1] सूचितम्। **प्रतिनियतेति**। किञ्चित्कार्यं प्रति देशो नियतो भवति। यथा कृष्णमृगादौ। किञ्चित्प्रति नियतः कालः। यथा रसालमञ्जरीणां उद्भेदे वसन्तरूपः। एवं निमित्तक्रिययोरपि यथायथं नैयत्यं द्रष्टव्यम्। एतादृशविभागाभिज्ञो हि तत्र कर्ता भवति। जीवैस्तु तत् मनसाऽपि चिन्तयितुमशक्यं, दूरे तत्करणशक्तिः—इत्यभिप्रेत्याह—**मनसाऽपीति**।

अनेन च भाष्येण 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' [श्वे. उ. १-२] इतिश्वेताश्वतरमन्त्रार्थः संगृहीतः। स्वभावादेव सर्वं भवतीति स्वभावपक्षः। नियतिः—अदृष्टम्। किमपि नियामकं नास्तीति यदृच्छापक्षः। योनिः–प्रधानम्। पुरुषो जीवः। एते सर्वेऽपि निरीश्वरकारणपक्षाश्चिन्त्याः।

तत्र प्रधानादिपूर्वपक्षा ईक्षत्यधिकरणमारभ्य निराकरिष्यन्ते। जीवपूर्वपक्षस्तु श्रुत्यन्तरावलम्बनः [2]अन्यत्र न निराकृतः इहैव सूत्रसूचितेन सर्वज्ञत्वसर्वशक्तित्वेन निराचिकीर्षितः। तथा हि प्रश्नोपनिषदि—'अथ हैनं सुकेशा भारद्वाजः पप्रच्छ। भगवन् हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैनं प्रश्नमपृच्छत- षोडशकलं भारद्वाज पुरुषं वेत्थ। तमहं कुमारमब्रुवं नाहमिमं वेद' [प्र. उ. ६-१] इत्युपक्रम्य 'तं त्वा पृच्छामि क्वासौ पुरुषः' इति पिप्पलादं प्रति भारद्वाजप्रश्ने षोडशकलं पुरुषं प्रस्तुत्याम्नायते—'इहैवान्तश्शरीरे सोम्य पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति। स ईक्षाञ्चक्रे कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति। स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च' इति। अत्र प्राणोत्क्रान्तिप्रतिष्ठाभ्यां उत्क्रान्तिप्रतिष्ठावत्त्वं शरीरान्तस्स्थत्वं च जीवलिङ्गम्। तदनुसारेण प्राणादिनामान्तषोडशकलास्रष्टृत्वमपि जीवस्यैव स्वीकर्तव्यम्। ततश्च

---

1. मु. ०तीत्युक्तम्

2. **अन्यत्र न निराकृत इति** जगद्वाचित्वाधिकरणं 'यस्य वा एतत् कर्म' इति श्रुतिगतस्य कर्मपदस्य ब्रह्मसमन्वयानानुगुण्यनिराकरणपरम्, न तु जीवपूर्वपक्षनिराकरणपरं इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम् ।

सर्वाणि कारणवाक्यानि जीवपराण्येव यथाकथञ्चिद्व्याख्येयानि, न तु ब्रह्मपराणि, निर्धर्मकस्य जगत्कारणत्वविरोधात्—इति शङ्को मन्यते ।

परिहारस्तु—सर्वासूपनिषत्सु सर्वज्ञत्वादिभिस्संसारिष्वसम्भवद्भिर्गुणैः जगत्कारणं प्रतिपाद्यते । जीवाश्च हिरण्यगर्भादयोऽपि सृज्यकोटौ निवेश्यन्ते 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' [श्वे. उ. ६-१८] इत्यादिभिर्वचनैः । न च तानि सर्वाण्येकेन वचनेन, अन्यथा नेतुं युक्तानि । न च निर्धर्मके जगत्कारणत्वादिविरोधः इति प्रागेव व्युत्पादितम् । अतः प्रश्नोपनिषद्वाक्यमपि परब्रह्मपरमेव । तत्र जीवलिङ्गं जीवरूपेण ब्रह्मैव संसरतीत्यभेदाभिप्रायम् । अत एव ब्रह्मज्ञानैकसाध्यममृतत्वं प्रकृतषोडशकलपुरुषद्रष्टुः 'एवमेवास्य परिद्रष्टुः' इत्यादिना 'स एषोऽकलोऽमृतो भवति' इत्यन्तेन नदीसमुद्रविलयनदृष्टान्तपूर्वकं प्रतिपादितम् । 'एतावदेवाहमेतत् परं ब्रह्म वेद नातः परमस्ति' इति च अन्ते उपसंहृतमिति ।

ननु जन्मादिभ्यस्त्रिभ्योऽन्येऽपि भावविकारा वृद्धिविपरिणामापक्षयरूपाः प्रसिद्धाः, तेऽपि कुत आदिशब्देन न गृहीताः—इत्याशङ्क्याह—अन्येषामपीति । वृद्धिस्तावदवयवोपचयरूपा उत्पत्तिरेव, विपरिणामोऽपि त्रिविधः—धर्मलक्षणो मृदादेर्घटादिरूपः, लक्षणलक्षणोऽतीतत्ववर्तमानत्वानागतत्वादिरूपः, अवस्थालक्षणः [1]चिरातीतत्वातिवर्तमानत्वात्यन्तानागतत्वादिरूपः, [2]तत्तद्धर्मविशिष्टतया उत्पत्तिरेव, अपक्षयस्तु अवयवविश्लेषः नाशान्तर्गत एवेति त्रिष्वेवोत्पत्त्यादिषु[3] वृद्ध्यादीनामन्तर्भाव इत्यर्थः ।

ननु—यतोवेत्यादिश्रुतिवाक्यं उदाहृत्य अवशिष्टानां तेष्वेवान्तर्भाव इति क्लेशेन व्याख्याने किं प्रयोजनम्, 'जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यति' इत्येवं यास्कवचनमेव कुतो नोदाह्रियते—इत्याशङ्क्य, तदुदाहरणे

1. मु. चिरातीतत्वादिवर्त०

2. मु. तद्धर्मं

3. मु. ०षु अन्तर्भाव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यास्कपरिपठितानां तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्यमानत्वात् मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत, तन्मा शङ्कीति, या उत्पत्तिर्ब्रह्मणः तत्रैव स्थितिः प्रलयश्च त एव गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वा अन्यतः प्रधानादचेतनादणुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम्। नच स्वभावतः, विशिष्टदेशकालनिमित्तानामिहोपादानात्।

मूलकारणाज्जगदुत्पत्तिः [1]गृहीता न स्यात्। तद्धि वचनं पौरुषेयं मूलप्रमाणमपेक्षमाणं यतोवेत्यादिवाक्यं नोपस्थापयति। अर्थप्रत्यभिज्ञानाभावात्। अतः प्रत्यक्षमेव वक्तव्यम्। न च मूलकारणं तद्विषयः। तस्यालौकिकत्वात्। न च ऋषेस्तद्दर्शनं योगमाहात्म्यात् कल्पनीयम्। कल्पकाभावात्। 'जायते' इति वचनस्य सृष्ट्यनन्तरं भौतिकेषु षड्भावविकारान् दृष्ट्वा प्रणीतमिति कल्पनस्य [2]सम्भवात्। अतः तदुदाहरणेमूलकारणाग्रहणशङ्कानिवृत्त्यर्थं, योत्पत्तिर्ब्रह्मणस्सकाशाज्जगतः या च तत्रैव ब्रह्मणि जगतस्स्थितिः यश्च तत्रैव ब्रह्मणि प्रलयो जगतः ते यतोवेत्यादिवाक्योदाहरणपूर्वकं गृह्यन्त इत्याह—**यास्केत्यादिना गृह्यन्त इत्यन्तेन**। पूर्वोक्तजगद्विशेषणव्यावर्त्यमाह——**न यथोक्तविशेषणस्येति**। अभावादिति शून्यवादिमतोपन्यासः। **विशिष्टेति**। तत्तत्कार्योचितेत्यर्थः।

यद्यप्यत्र प्रश्नोपनिषद्वाक्यजनिता जीवाशङ्कैव निराकरणीया, अन्यासां प्रधानादिगोचरशङ्कानां अधिकरणान्तरेषु निराकरिष्यमाणत्वात्; तथाऽपि यथा प्रधानादिभ्यो न सम्भवति तथा संसारिणोऽपि न सम्भवतीति उपमानोपमेयभावेन योजनीयम्[3]।

---

1. मु. संगृहीता

2. **सम्भवादिति** न च यास्कवचनस्य स्मृतित्वात् मूलश्रुत्यनुमानमिति वाच्यम्। दृष्टमूलाभावे एव तदनुमानात् इति भावः।

3. **योजनीयमिति** 'प्रधानादचेतनात्' ...इत्यादिभाष्यं इत्यादिः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणिनः ।

अस्मिन् सूत्रे यज्जगत उत्पद्यमानत्वमुक्तं [1]इदमेव हेतूकृत्य 'अदृष्टाद्वारकजन्यकृत्यजन्यानि जन्यान्यंकुरादीनि उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि, उत्पद्यमानत्वात्, घटवत्' [2]इतिप्रकारेण संसारिव्यतिरिक्तमीश्वरं साधयन्तीत्याह—**एतदेवेति**। ततश्च यत् स्वयं पूर्ववाक्ये, यथोक्तविशेषणस्य जगतः संसारिणस्सकाशादुत्पत्तिर्नसम्भवतीत्युक्तं, तत् युक्तिकुशलानामपि सम्मतमिति भावः ।

मन्यन्त इति तन्मते अस्वरसोद्भावनम् । तद्यथा—अनेन हि जगदुत्पत्त्युपयोगिकृत्यादिमान् एकः तद्गतं कृत्यादिकं च नित्यं सर्वविषयं च यदि सिध्येत्, तदा खलु संसारिवैलक्षण्यं [3]तस्मिन् सिध्येत्। न तु तदस्ति। कार्यत्वहेतोस्तत्र सामर्थ्याभावात्। स हि तत्र कर्तारमपेक्षते। तदेकत्वे कृत्यादीनां [4]नित्यत्वादौ च उदासीन एव ।

लाघवतर्कसहकृतः तदेकत्वादिकं साधयिष्यतीति चेन्न। एकत्वं किं एकत्वरूपसङ्ख्यावैशिष्ट्यं अनुमितिविषयतया उपनयति, किं वा अनेकत्वाभाववैशिष्ट्यम्? नाद्यः। प्रत्येकं बहूनामप्यंकुरादिकर्तॄणामेकत्वसम्भवात् न विवक्षितार्थसिद्धिः। न द्वितीयः। न हि, यत् अग्रे वस्तुलाघवपर्यवसितं स्वानुग्राह्यप्रमाणजन्यज्ञानस्य विषयगौरवमापादयति तत् प्रमाणसहकारितया क्लृप्तं लाघवम्। अत एव पुरोवर्तिज्ञानस्य इष्टभेदग्रहदशायां प्रवृत्तिजनकत्वाभावेन तादृशप्रतिबन्धकव्यावृत्तयेऽधिककारणविवक्षाप्रसक्तौ प्रवृत्तिकारणताग्रहविषयतया अग्रे व्यधिकरणप्रकारकज्ञानान्तरकल्पनाराहित्यरूपलाघवानुसन्धानं न इष्टभेदग्रहाभावमुपनयति 'प्रवृत्तिः इष्टभेदग्रहविरोधिकारणजन्या [5]तत्प्रतिबद्धयत्वात्' इति । स्वानुग्राह्यप्रमाणजन्यज्ञानस्य

1. मु. तदेव
2. **इति प्रकारेण**—इत्यादिन्यायप्रयोगेण । तत्त्वचिन्तामण्युक्तोऽयं प्रयोगः ।
3. मु. 'तस्मिन्' नास्ति
4. मु. नित्यत्वे
5. मु. तत्प्रतिबद्ध०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुरुविषयतापादकत्वात्। अपि तु 'भाविगौरवं सोढ्वाऽपि स्वानुग्राह्यप्रमाणजन्यज्ञानस्य विषयलघुतापादकं [1]इष्टाभेदग्रहरूपत्वमेव पुरोवर्तिज्ञानस्य कारणताकोटौ अवच्छेदकं कल्पनीयम्, भावरूपतया स्वरूपतो लाघवात्, समीचीनज्ञानस्थले ज्ञानवित्तिवेद्यतयोभयसम्मततया उपस्थितितोऽपि लघुत्वात्, कारणतावच्छेदककोटौ निवेशकल्पनेन कारणान्तरकल्पनाभावरूपलाघवसम्भवाच्च' इत्यनुसन्धानमेव उक्तप्रमाणस्य पुरोवर्तिज्ञाने इष्टाभेदविषयोपनायकं कल्प्यते। अतो न लाघवानुसारेण अनेकत्वाभावविशिष्टकर्तृसिद्धिः।

अपि च नात्र भाविगौरवमपि। न हि, कर्तृमात्रसिद्धावपि एकः कर्ता न सिध्येदिति वदता क्लृप्तजीवव्यतिरिक्ता एव बहवः कर्तार आपाद्यन्ते, येन गौरवग्रस्ततया तदापादनमनुन्मिषितम्। किं तु क्लृप्तेष्वेव जीवेषु जगत्कर्तृत्वमस्तु। न चासम्भवः तेषां जगत्कृतौ। अस्मदादीनामसम्भवेऽपि महामहिमशालिनामगस्त्यविश्वामित्रादिसदृशानां तत्सम्भवात्। प्रसिद्धं हि विश्वामित्रागस्त्ययोः अस्मदाद्यसम्भावितमप्यभिनवसर्गाम्बुधिचुलुकीकरणादिकम्। योगशास्त्रे च योगमाहात्म्यं सृष्ट्याद्युपयोगि प्रतिपादितम्। एवं च क्लृप्तानामेव जीवानां तत्कृत्यादीनां च जगदुत्पत्त्युपयोगित्वे धर्ममात्रकल्पनमेव अपूर्वेश्वरतत्कृतितद्गतजगदुपयोगित्व[2]धर्मधर्मिकल्पनाद्वरम्। अतो विपरीतं गौरवमिति शङ्काकलङ्कितो हेतुः कथमलौकिकमर्थं साधयेत्।

अपि च कर्त्रेकत्वसाधनविपरीतसाधनमपि जगत उपलभ्यते विचित्रमहाकार्यत्वरूपम्। यद्धि विचित्रं महत् गोपुरप्रासादादिकं तत् सर्वं क्रमभाव्यसर्वविषयज्ञानादिभिरनेकैश्शिल्पिभिः क्रमशः क्रियमाणं दृष्टम्, जगदपि विचित्रमहाकार्यत्वात्तथास्त्विति कथं नित्यसर्वविषयज्ञानादिमानेकः कर्ता सिध्येत्।

अपि च कृत्यादिषु जन्यत्वे लाघवात् कृतित्वादिकमेव[3] प्रयोजकम्। न तु जैवकृतित्वादिकमपि। गौरवात्। ततश्च 'या या कृतिः सा सर्वापि जन्या' इत्यादिव्याप्तिविरोधात् नित्यकृत्यादिसिद्धिः कथं स्यात्।

---

1. मु. इष्टभेदग्रहरूपमेव
2. मु. 'धर्म' नास्ति
3. मु. ०मेव तत्र प्र०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे ।

अपि च यथा किञ्चित्कार्यं ससम्प्रदानकं किञ्चित् नेति, [1]यथा किञ्चित्कार्यं [2]सापादानकं किञ्चित् नेति, तथा किञ्चित् सकर्तृकं किञ्चित् नेत्यस्तु । एवं च लोके कृतत्वेन घटादिव्यवहारः अकृतत्वेनांकुरादिव्यवहारश्चोपपद्यते ।

नन्वेवं तार्किकोक्तानुमानस्यात्यन्तासङ्गतत्वे किमर्थं तन्मतोपन्यासः एतदेवानुमानमितिवाक्येन कृत इति चेत्—

उच्यते—यद्यपि हैतुकस्य सा युक्तिः निर्णयोपयोगिनी न भवति, तथाप्यौपनिषदस्य श्रुत्यर्थपरिशोधकतया निर्णयोपयोगिनी भवत्येव । जगतः कर्ता कश्चिदस्ति वा न वेति सन्दिहानं प्रति यत्र यत्र घटादिषु कार्यत्वमस्ति तत्र सर्वत्र सकर्तृकत्वं दृष्टमिति कर्तृकारकस्य [3]सम्प्रदानादिकारकवत् स्पष्टव्यभिचारनिर्णयाभावात् उक्तशङ्काशूके सत्यपि कार्यत्वं भूयोगृहीतसहचारतया कर्तुरस्तित्वकोटिमुत्कटामापादयति । तावन्मात्रेण सम्भावितमतिर्बोध्यः श्रुत्या सुखेन बोधयितुं शक्य इति । तदेकत्वतत्सर्वज्ञत्वाद्यंशे तु उपन्यस्तानेकयुक्तिविरोधात् सम्भावनाऽपि न भवति । तथाऽपि सर्वज्ञत्वैकत्वादिसंशये दुर्बलाया अपि एकत्वसर्वज्ञत्वकोटेः यत्किञ्चित्तार्किकोपन्यस्तयुक्त्याभाससन्दब्धायाःतावन्मात्रेण श्रुतिसाहाय्यमाचरन्त्याः श्रुत्याऽनुवादात् दृढता भवति । सोऽयं वनसिंहन्यायो ह्रदनक्रन्यायश्च । ह्रदनक्रयोः सिंहवनयोश्च परस्परं वियुक्तयोः धीवरशबराभ्यां प्रधर्षणीयता भवति, संयुक्तयोस्तु परस्परं साहाय्यमाचरतोर्दुर्धर्षता भवति, तद्वद्युक्त्यागमयोरपि द्रष्टव्यमिति तात्पर्यार्थः ।

उक्तमर्थमाक्षेपसमाधानाभ्यामुपपादयति—**नन्विहापीति** ।

यथा हि चोदनासूत्रे 'यश्चोदनाप्रमाणकस्स धर्मः' 'चोदनाप्रमाणगम्यो धर्मः' इति वचनव्यक्तिद्वयेन लक्षणप्रमाणोभयपरम्, एवं जन्मादिसूत्रमपि 'यज्जगज्जन्मादिकारणं तत् ब्रह्म' 'यज्जगज्जन्मादिकारणं तत् ब्रह्म अस्ति' इति वचनव्यक्ति-

---

1. आ. तथा
2. आ. सोपादानकं
3. मु. सम्प्रदानकारकवत्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न—वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्। वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते। वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, न अनुमानादिप्रमाणान्तरनिर्वृत्ता। सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्याय अनुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवत् न निवार्यते, श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात्। तथाहि—'श्रोतव्यो मन्तव्यः' (बृ. उ. २।४।५) इति श्रुतिः 'पण्डितो मेधावी गन्धारानेवोपसंपद्येत एवमेवेहाचार्यवान् पुरुषो वेद' (छा. उ. ६।१४।२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति।

द्वयेन लक्षणप्रमाणोभयपरम्। ततश्च अनुमानमेव कार्यत्वलिङ्गकं तेन सूच्यताम्। ततश्च कथं तस्मिन्नस्वरससूचनमिति[1] शङ्कते—**नन्विति**।

शास्त्रयोनित्वाधिकरणपर्यालोचनया प्रमाणतया [2]अत्र श्रुतिरेव सूत्रितेति परिहरति—**न—वेदान्तेति**। न चेहापि प्रमाणतया शास्त्रे उदाहृते शास्त्रयोनित्वाधिकरणं व्यर्थं स्यादिति वाच्यम्। [3]विरुद्धत्वाशङ्कानिराकरणार्थत्वादस्य[4]। **वेदान्तवाक्यानीति**। उत्तरसूत्रगतशास्त्रशब्दस्वारस्यादित्यर्थः। उत्तरसूत्रस्य वा शास्त्रे किमर्थं निर्बन्ध इत्याशङ्क्याह—**वाक्यार्थेति**। **अध्यवसानेति**। विचारितवेदान्तवाक्यजन्यशाब्दबोधरूपाध्यवसानेत्यर्थः। ब्रह्मावगतिः—अविद्यानिवर्तको वृत्तिविशेषरूपः साक्षात्कार इत्यर्थः। **नानुमानादीति**। 'नावेदविन्मनुते तं बृहन्तं' [शा. उ. ४] इति श्रुतेः, अलौकिके तस्मिन् अनुमानायोगाच्चेति भावः। एवं तर्हि सर्वात्मना अनुमानानुपयोगःस्यादित्याशङ्क्य, प्रमेयासम्भावनानिवृत्तौ तदुपयोग इत्याह—**सत्सु तु वेदान्तवाक्येष्विति**। अनुमानस्य साक्षात्कारोपयोगे प्रमाणमाह—**श्रोतव्यो मन्तव्य इति**। तस्करैर्गन्धारदेशेभ्यः पिहितनेत्रं पुरुषमानीय वने

---

1. मु. मितिभावः। शास्त्र

2. मु. 'अत्र' नास्ति

3. **विरुद्धत्वेति** श्रुत्युक्तजगत्कारणत्वरूपस्य लक्षणस्य लक्ष्यस्वरूपविरुद्धत्वेत्यर्थः। आ. विरुद्धत्वादि

4. **अस्य**—जन्माद्यधिकरणस्य।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्। किंतु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम्, अनुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य।

[1]अतिजने विसृष्टं स्ववृत्तान्तकथनपूर्वकं क्रोशन्तमुपलक्ष्य नेत्रपिधानदूरीकरणपूर्वकं 'अस्यां दिशि गन्धाराः' इति साधुना कृतोपदेशं तदुपदिष्टदिशं पुरस्कृत्य गच्छन्तं प्रकृत्य आम्नातं पण्डितोमेधावीति वाक्यं, यथा प्रकृतः पुरुषः उपदेशस्य सम्यग्गृहीतत्वात् पण्डितः तत्र ऊहापोहसमर्थत्वात् मेधावी गन्धारदेशान् प्राप्नोति एवमेवेह आचार्यवान् पुरुषो लब्धाचार्योपदेशः तदुक्तार्थपरिष्कारकुशलश्च यो भवति स एवात्मतत्त्वं वेदेति प्रतिपादयत्, पूर्वोक्तस्य मेधावित्वस्य एवंशब्देन परामर्शात् आत्मतत्त्वापरोक्ष्ये युक्तिमभ्यनुजानाति। [2]अत एव च सूत्रकृता प्रत्यक्षादिविषयविवेचिका युक्तयो द्वितीयाध्याये निबद्धाः।

ननु यथा जैमिनिना 'प्रत्यक्षादिप्रमाणविषयस्यानृतत्वेऽपि न लौकिकव्यवहारविरोधः' इति निर्णयाद्युपयोगिनो न्यायाः स्वशास्त्रे उपेक्षिताः एवं बादरायणेनापि कुतो नोपेक्षिताः—इत्याशङ्क्याह—**न धर्मजिज्ञासायामिति। प्रमाणमिति।** उपन्यसनीयमिति शेषः। ननु धर्मब्रह्मजिज्ञासयोरेतादृशवैषम्ये किं नियामकमित्याशङ्क्याह—**अनुभवावसानत्वादिति**। धर्मजिज्ञासा हि स्वर्गादिरूपपुरुषार्थसिद्ध्यर्थं स्वप्रमेयानुष्ठानावसाना। ब्रह्मजिज्ञासा तु मोक्षरूपपुरुषार्थावसानाय स्वप्रमेयस्य ब्रह्मणः अप्रतिबद्धसाक्षात्कारपर्यवसाना। तत्र च प्रत्यक्षादिविषयविवेचनरूपमननाभावे आचार्योपदेशपूर्वकमुपासनया तत्त्वसाक्षात्कारेऽपि प्रत्यक्षादिविरोधानुसन्धानक्षुभितचित्तस्य अयं साक्षात्कारो विधुरपरिभावितकामिनीसाक्षात्कारवत् न तत्त्वनिष्ठः, प्रत्यक्षविरुद्धेऽर्थे श्रुतितात्पर्यायोगेन मूलप्रमाणविकलत्वादितिशङ्काकलङ्कसम्भवात् मननापेक्षा। तथा च श्रुतिः 'तत्त्वेव भयं विदुषोऽमन्वानस्य' [तै. उ. १-७.] इति। अतः आवश्यकमस्मिन् शास्त्रे युक्तिनिबन्धनम्। ननु—यथा विरुद्धयोस्समबलयोरशास्त्रयोर्विकल्पमाश्रित्य विरोधः परिह्रियते, तद्वत् प्रकृतेऽपि सप्रपञ्चत्व-

1. मु. अतिसृष्टे
2. **अत एव**—युक्त्यनुसन्धानस्य आत्मतत्त्वापरोक्ष्योपयोगित्वादेव।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्तव्ये हि विषये नानुभवापेक्षाऽस्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्, पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य। कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म, यथा—अश्वेन गच्छति, पद्भ्यां अन्यथा वा, न वा गच्छतीति। तथा 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोति, अनुदिते जुहोति' इति। विधिप्रतिषेधाश्च अत्रार्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च।

न तु—वस्तु, एवं नैवम्, अस्ति नास्तीति वा—विकल्प्यते। विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः। न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्। किं

निष्प्रपञ्चत्वयोर्विकल्पसम्भवात् प्रत्यक्षादिप्रमितसप्रपञ्चत्वस्य सत्यत्वेऽपि कादाचित्कीं निष्प्रपञ्चतामादाय आत्मनि निष्प्रपञ्चत्वसाक्षात्कारोऽपि प्रमाणमस्तु—इत्याशङ्क्याह—भूतेति। भूतं-पुरुषेच्छानधीनम्। यद्धि पुरुषेच्छाधीनं तद्विकल्प्यते, सप्रपञ्चत्वनिष्प्रपञ्चत्वे तु न तथेति भावः।

सङ्गृहीतं हेतुद्वयं विवृणोति—कर्तव्ये हीत्यादिना भूतवस्तुविषयत्वादित्यन्तेन। पुरुषाधीनात्मलाभत्वाच्चेत्येतद्विवृणोति—पुरुषेणेति। लौकिकमुदाहरति—यथाऽश्वेनेति। अन्यथा वेति। उन्मत्तादिसादृश्येनेत्यर्थः। वैदिकमन्यथाकरणमुदाहरति—अनुदित इति। ननु वैदिकस्यापि कर्मणः पुरुषेच्छाधीनत्वे विधिप्रतिषेधौ व्यर्थौ स्यातामित्याशङ्क्याह—विधिप्रतिषेधाश्चेति। पुरुषेच्छासिद्ध्यर्थमेव इष्टसाधनताबोधी विधिरपेक्षितः करणाय, पुरुषेच्छाप्रतिबन्धाय अनिष्टसाधनताबोधी निषेधोऽकरणायापेक्षितः, अतो न तयोर्वैयर्थ्यमिति भावः। ननु विधिप्रतिषेधयोरेकस्मिन्नेव षोडशिग्रहादौ कथं निवेशस्स्यात् विरुद्धत्वात्—इत्याशङ्क्याह—विकल्पेति। यथा सामान्यविशेषशास्त्रयोर्विरोधपरिहाराय उत्सर्गापवादरूपः प्रकार आश्रीयते, तद्वद्विरुद्धयो[1]स्समबलयोः अतिरात्रे षोडशिग्रहविधिनिषेधयोः विरोधपरिहाराय विकल्प आश्रीयत इत्यर्थः।

एवं कर्तव्ये विकल्पमाश्रित्य विरोधपरिहारमुक्त्वा सिद्धे वस्तुनि न विकल्पसम्भव इत्याह—नत्विति। एकः प्रकारविकल्पः। अपरो वस्तुस्वरूपविकल्पः। ननु स्थाणुर्वा पुरुषो वेति सिद्धे वस्तुन्यपि विकल्प उपलभ्यते, नेत्याह—विकल्प-

1. मु. समानकालयोः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तर्हि. वस्तुतन्त्रमेव तत् । न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति । तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम् । स्थाणुरेवेति तत्त्वज्ञानं, वस्तुतन्त्रत्वात् । एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम् ।

तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव, भूतवस्तुविषयत्वात् ।

ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणा अनर्थिकैव प्राप्ता ।

न—इन्द्रियाविषयत्वेन संबन्धाग्रहणात् । स्वभावतो विषयविषयानास्त्विति । अयं हि कोट्युपस्थित्यादिकारणवशात्, यादृशं वस्तुस्वरूपं तद्विपरीतरूपावगाहिसंशय एव, न तु विकल्पः । [1]तस्य निश्चयरूपत्वात् । अत एव, व्रीहिभिर्यवैर्वा यष्टव्यमिति सन्दिहानं प्रति 'व्रीहिभिर्वा यजेत, यवैर्वा यजेत' इतिवाक्यं विकल्पजनकमपि निश्चायकं भवति । विकल्पस्य प्रमारूपत्वे च न पुरुषबुद्धिमात्रमुपयुक्तम् । किं तु यादृशं वस्तुस्वरूपं [2]तदवगाहित्वमपि । ततश्च कर्तव्ये वस्तुनि विरुद्धकोटिद्वयावगाहिनामपि ज्ञानानां वस्तुतत्त्वानुसारित्वात् प्रामाण्यमुपपद्यते, न सिद्धे वस्तुनि, तादृशज्ञानस्य तत्त्वानुसारित्वाभावादित्यर्थः ।

प्रकृतमुपसंहरति—**तत्रैवमिति** । वस्तुतन्त्रमेव सत् प्रमाणमित्यर्थः । अतोऽप्रतिबद्धसाक्षात्कारोपयोगितया [3]युक्तिसूत्रणमावश्यकमिति भावः ।

ननु—यत् सिद्धार्थप्रतिपादकं तत् प्रमाणान्तरमूलकं वाक्यं भवति, यथा—नद्यास्तीरेपञ्चफलानिसन्तीतिवाक्यम् । ततश्च वेदान्तानामपि सिद्धार्थबोधकत्वे प्रमाणान्तरमूलता प्रसज्येतेति शङ्कते—**नन्विति** ।

न हि भूतवस्तुविषयत्वं प्रमाणान्तरमूलकतायां वाक्यस्य प्रयोजकम् । तथानियमे प्रमाणाभावात् । अपि तु अर्थं प्रमाणान्तरेणोपलभ्य तदनुसारेण रचितत्वम् । ब्रह्मणश्च प्रमाणान्तरायोग्यतया नार्थमुपलभ्य रचितत्वं ब्रह्मप्रतिपादकानां वेदान्तानां वक्तुं शक्यते–इति परिहरति—**नेति** । संगृहीतं हेतुं विवृण्वन् प्रत्यक्षाविषयत्वमाह—**स्वभावत इति** । रूपादिहीनत्वात् 'पराञ्चि खानि व्यतृणत् स्वयम्भूः'

---

1. **तस्य**—विकल्पस्य ।
2. मु. तादृशावगा०
3. **युक्तिसूत्रणमिति** द्वितीयाध्याये इत्यादिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

णीन्द्रियाणि, न ब्रह्मविषयाणि। सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा संबद्धं कार्यमिति गृह्येत। कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धं किमन्येन केनचिद्वा संबद्धमिति न शक्यं निश्चेतुम्।

तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं, किं तर्हि, वेदान्तवाक्यप्रदर्शनार्थम्। किं पुनस्तद्वेदान्तवाक्यं यत् सूत्रेणेह लिलक्षयिषितम्? 'भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति' इत्युपक्रम्याह—'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति' (तै. उ. ३-१)। तस्य च निर्णयवाक्यम्—'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते।

[क. उ. ४-१] इत्यादिश्रुतेश्च [1]न ब्रह्मण इन्द्रियविषयत्वमिति भावः। ततश्च 'यत् कार्यं तत् सर्वज्ञत्वादिगुणविशिष्टकर्तृकं' इति [2]विशिष्य व्याप्तेरग्रहात् 'कार्यं सकर्तृकं' इति [3]सामान्यव्याप्तिग्रहेण नाभिलषितवस्तुसिद्धिरित्याह—**सति हीति**।

एवं लौकिकशब्दागोचरत्वमपि यथायथं द्रष्टव्यं इत्यभिप्रेत्योपसंहरति—**तस्मादिति**। विजिज्ञासस्वेति मध्यमपुरुषापेक्षितसम्बोध्यचेतनप्रदर्शनार्थं सोपक्रमं वाक्यमुदाहरति—**भृगुरिति**। अधीहि—अध्यापयेत्यर्थः। ननु—नानेन वाक्येन अलौकिको वस्तुविशेषो ब्रह्मशब्दार्थ इति निश्चयस्सम्भवति, 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इति वाक्येन आनन्दशब्देन प्रसिद्धानन्दानुवादेन पूर्वोक्तजगत्कारणतायाः पर्यवसानकरणात्। ततश्च प्रसिद्धस्य लौकिकानन्दस्य अदृष्टादिवत् शास्त्रप्रामाण्यात् कारणत्वं प्राप्नोतीत्याशङ्क्याह—**तस्य चेति**। नानेन वाक्येन लौकिकानन्दमुद्दिश्य जगत्कारणता विधीयते, तथा सति शब्दासन्निहिततया लौकि-

---

1. न ब्रह्मण इत्यादि ननु 'पराञ्चि खानि' इति मन्त्रमुदाहृत्य ब्रह्मण इन्द्रियाविषयत्वोक्तिरयुक्ता, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्' इति तन्मन्त्रोत्तरार्ध एव विद्वदिन्द्रियग्राह्यताया उक्तत्वात्—इति चेत्—सत्यम्—तत्र श्रवणादिवासितेन्द्रियग्राह्यत्वोक्तावपि शब्दमनपेक्ष्य स्वातन्त्र्येणेन्द्रियग्राह्यत्वस्य निराकरणे विरोधाभावात्, 'ऐक्षत्' इति शब्दापरोक्षस्यैवोक्तिसम्भवाच्च इति भावः।

2. मु. 'विशिष्य' नास्ति

3. मु. 'सामान्य' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति' (तै. उ. ३-६) इति। अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाणि उदाहर्तव्यानि ॥ २ ॥

कानन्दस्य तदनुवादे क्लेशः स्यात्, तन्माभूदिति यतोवेत्यादिश्रुतिप्रसिद्धं जगत्कारणमुद्दिश्य तस्य आनन्दस्वरूपता बोध्यते। तत्र च सत्यादिवाक्यैकवाक्यतया यज्जगज्जन्मादिकारणं सर्वज्ञत्वादिगुणगणोपबृंहितं तत् सत्यादिरूपं त्रिविधपरिच्छेदशून्यमिति वचनव्यक्त्या स्वाभिमतवस्तुस्वरूपसिद्धिरित्यभिप्रेत्याह—अन्यान्यपीति ॥ २ ॥

इति जन्माद्यधिकरणम् ॥ २ ॥

'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदस्सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि' [बृ. उ. ४-४-११] इति वाक्यं विषयः। तत् किं वेदे स्वतन्त्रमीश्वरं कर्तारं प्रतिपादयति उत नेति संशयः।

तत्र पूर्वः पक्षः—न प्रतिपादयतीति। तथा सति 'वाचा विरूप नित्यया' [ऋ. सं. अ. ६. अ. ६५] इतिवचनावगतनित्यत्वविरोधापत्तेः।

ननु च—उभयोश्श्रुतित्वाविशेषे नित्यत्वप्रतिपादकवचनानुरोधेनैव निश्वसितश्रुतेस्स्वार्थप्रतिपादनाक्षमत्वमिति कथं [1]नियम्यत इति चेत्—

उच्यते—निश्वसितश्रुतिर्हि यथाश्रुता गृह्यमाणा, यथा व्यासादिर्भारतादावादिकर्ता तथा परमेश्वरोऽपि वेदे आदिकर्तेति प्रतिपादयतीति वक्तव्यम्। ततश्च भारतादिवद्वेदस्यापि पौरुषेयत्वं प्राप्नोति। ततश्च[2]मूलभूतपौरुषेयज्ञानप्रामाण्याप्रामाण्यसंशये वेदस्यापि तथा सन्दिग्धता स्यात्। न च तत्कर्तुरीश्वरस्य सर्वज्ञतया निर्णीतत्वात् तस्मिन् लौकिकपुरुषवद्भ्रमादिपुरुषदोषाणां न शङ्कास्पदत्वमिति वाच्यम्। सर्वज्ञतया ईश्वरनिर्णयो ह्यनुमानान्न सम्भवतीत्युक्तम्। वेदादेव तन्निर्णये च प्राप्तमन्योन्याश्रयत्वं—वेदप्रामाण्यनिर्णये सर्वज्ञत्वादिनिर्णयः तन्निर्णये च भ्रमादिशङ्कानिरासपूर्वकं वेदप्रामाण्यनिर्णयः—इति। अतः कृत्स्नवेदाप्रामाण्यापादकं

---

1. मु. निश्चीयत इति
2. आ. तन्मूल

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्वचनम् । नित्यत्ववचनं तु वेदापौरुषेयतां न विरुणद्धीति तदादर एवोचितः । न च—अपौरुषेयत्वेऽपि कथं प्रामाण्यनिर्वाहः । इदमेव ह्यपौरुषेयत्वं, यत् प्रमाणान्तरेणार्थमुपलभ्य तदनुसारेण रचितत्वाभावः । न चैतावता प्रामाण्यं सम्भवति । तथासति काकतालीयसम्पन्नस्यालौकिकार्थगोचरस्य प्रमाणान्तरबाधरहितस्य अर्थज्ञानं विना विरचितस्य 'नालिकेरसलिलपानेन स्वर्गो भवति' इत्यादिवाक्यस्यापि वेदतुल्यतया प्रामाण्यं स्यादिति—वाच्यम् । अस्मिन् हि वाक्ये पुरुषविशेषविनिर्मितत्वं प्रत्यक्षेण गृह्यते । तस्य च वाक्यस्य अर्थज्ञानं विना रचितत्वात् भ्रमवञ्चनादिमूलत्वासम्भवेऽपि प्रमादमूलत्वं सम्भवत्येव । न ह्यप्रमत्तस्तथा वाक्यं रचयति । अतः स्वतन्त्रकर्तृकत्वेनानुसन्धीयमानेषु वाक्येषु प्रमामूलकत्वानुसन्धानं विना न प्रामाण्यनिर्णयः । वेदस्य तु तादृशपुरुषजन्यत्वे प्रमाणाभावात् न कर्तृगतदोषमूलत्वाशङ्का नापि लौकिकबाधोपलब्धिरिति आकाङ्क्षादिमत्तया योग्यवाक्यत्वेन ज्ञानजनकस्य उत्सर्गतः प्राप्तं प्रामाण्यं अनपोदितमेव भवति । तस्मात् अपौरुषेयतया वेदप्रामाण्यनिर्वाहार्थं [1]सम्प्रदायप्रवर्तकत्वाभिप्रायं निश्वसितवाक्यं व्याख्येयमिति ।

सिद्धान्तस्तु—सत्यं वेदस्यापौरुषेयत्वेन प्रामाण्यम् । न तु तद्विरोधि निश्वसितवाक्यम् । तेन हि वाक्येन कश्चिदतिनिपुण उपाध्यायः सुप्त्वोत्थितः अनायासेन वेदान् माणवकेभ्यः पूर्वं यथाऽध्यापितवान् तथैवाध्यापयति पुनरपि, एवमीश्वरोऽपीति प्रतिपाद्यते । परं तु लौकिकाध्यापकस्य वेदप्राप्तिरुपाध्यायान्तराधीना । ईश्वरस्तु पूर्वकल्पेऽपि स्वयमेव उपाध्यायान्तरमनपेक्ष्य यथाऽवस्थितान् वेदान् मन्वादिभ्योऽध्यापयामास, ततः प्रलये स्वस्मिन्नेव संस्कारावशेषान् वेदान् सृष्ट्यारम्भे यथावस्थितानेव स्मृत्वा मन्वादिभ्योऽध्यापयामासेति, लौकिकोपाध्यायवदेव सम्प्रदायप्रवर्तकत्वमेवास्थीयते । न च एतावन्मात्रेण भारतादिवत् पुरुषबुद्धिप्रभवत्वं शङ्कितुं शक्यते । भारतादिकं स्वयं प्रमाणान्तरेणार्थमुपलभ्य हि तदनुसारेण अपूर्वां वर्णावलीं मनसाऽऽलोच्य रचितमिति भारतादिवचनैरेवावगम्यते । वेदे तु यद्यपि, निश्वसितश्रुत्या '[2]अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् ।

---

1. **सम्प्रदायः**—अध्यापकाध्येतृपरम्परा ।

2. **अष्टादशानामिति** 'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश । आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः । अर्थशास्त्रं चतुर्थन्तु विद्याह्यष्टादशैव ताः ।' [वि. पु. ३. ६. २८-२९] इत्युक्तानाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आदिकर्ता कविस्साक्षाच्छूलपाणिरिति श्रुतिः ॥' इति वचनेन च सृष्ट्यारम्भे वेदकर्तृत्वावगमात् उपाध्यायान्तरानपेक्षत्वम्, आदिकवित्वेन च निरूपणात् विवक्षापूर्वकं कर्तृत्वमवगम्यते ; तथापि पूर्वस्मिन् कल्पे यादृशी वर्णावली यच्च तात्पर्यं तदनुसन्धाय अस्मिन्नपि कल्पे तथैव करोतीति उपगम्यते । न चैतावता पूर्वकल्पीयक्रमादिसापेक्षतामात्रेण तस्य स्वातन्त्र्यं विहन्यते । न हि यादृशः कटः पूर्वं रचितः तमाकारमनुसन्धाय क्रयादिव्यवहारार्थं तादृशमेव पुनः कटं सृजतः तत्र स्वातन्त्र्यविघातो भवति । एवं च सति 'धाता यथापूर्वमकल्पयत्' [म. ना. उ. ६-३] इत्यादिवचनमनुसृतं भवति ।

न चैतादृशेन ईश्वरकृतत्वेन वाचाविरूपनित्ययेति वचनं विरुध्यते । तद्धि वचनं न [1]आहत्यैव वेदस्य नित्यत्वं प्रतिपादयति । [2]वर्णानां नित्यत्वेऽपि, न वर्णा एव वेदः, अपि तु क्रमविशेषेण स्वरविशेषेण च विशिष्टाः, नित्यानां विभूनां च वर्णानां न देशतः कालतो वा क्रमस्सम्भवति, स्वरोऽपि न स्थानविशेषनिष्पत्तिप्रयुक्तो नित्येषु सम्भवति, अपि तु तदभिव्यञ्जकध्वन्युपाधिक एव [3]क्रमादिः स्वीकर्तव्यः, ततश्च विशेषणीभूतक्रमादेस्तदुपाधेर्ध्वनेश्चानित्यतया कथं वेदः स्वरूपेण नित्यःस्यात् । तस्मात् [4]प्रवाहनित्यताभिप्रायमेव तद्वचनमुपेयम् । तच्च अस्माकमपि सम्मतमेव ।

न च वेदस्य परमेश्वरकृतत्वाभ्युपगमे सिद्धान्ते अपौरुषेयत्वाभ्युपगमो विरुध्यत इति वाच्यम् । तार्किकैर्हि [5]यादृशं पौरुषेयत्वमभ्युपेयते, प्रमाया गुणजन्यत्वाभ्युपगमात् ईश्वरप्रमाधीनं तन्मूलस्य वेदस्य प्रामाण्यं यथा कालिदासादिवाक्यार्थप्रमाधीनं तत्कृतस्य वाक्यस्य प्रामाण्यं, नैवमुपेयते । तदभिप्राया सिद्धान्ते अपौरुषेयत्वोक्तिः तत्रतत्र । ततश्च 'कर्तृज्ञानप्रामाण्यसंशये वेदेऽपि प्रामाण्यसंशयः, न चेश्वरस्य परमाप्तत्वं वेदप्रामाण्यनिर्णयं विनाऽधिगन्तुं शक्यम्' इत्यादिपूर्वपक्ष-

---

1. **आहत्य**—साक्षात्—स्वरूपेण ।

2. **वर्णानां नित्यत्वेऽपीति** 'कथं वेदः स्वरूपेण नित्यः स्यात्' इत्यनेन सम्बद्ध्यते ।

3. मु. स्वरादिः

4. **प्रवाहनित्यता**—कालत्वव्यापकस्वसजातीयकत्वम् ।

5. **यादृशं पौरुषेयत्वमभ्युपेयते इति** नैवमुपेयते इत्यनेन सम्बद्ध्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३. शास्त्रयोनित्वाधिकरणम्

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्, तदेव द्रढयन्नाह—

शास्त्रयोनित्वात् ॥ ३ ॥

महत ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य

दूषणानां अनवसरः । [1]न चेदमपौरुषेयत्वं मीमांसकमर्यादया उपेयते । ते हि सृष्टिप्रलयादिकमनङ्गीकृत्य अध्यापकाध्येतृपरम्परामविच्छिन्नां स्वीकृत्य स्वतन्त्रमीश्वरं [2]वक्तारं नेच्छन्ति । येन निश्वसितश्रुतिर्विरुध्येत । तस्मादादिकर्तुरीश्वरस्याभ्युपगमात् तस्यापि पूर्वपूर्वकल्पानुसारेणैव वेदविरचनोपगमात् वेदस्य च योग्यवाक्यत्वेनैव असति बाधे प्रमाजनकत्वोपगमात् [3]अनादितात्पर्योपगमाच्च न श्रुतिस्मृतिविरोधः, [4]नापि सापेक्षत्वापादनम्—इति ।

ततश्च **शास्त्रस्य**—वेदस्य [5]**योनिः**—कारणं, तथाभूतत्वात् इति सूत्रार्थः ।

अत्रेयं शङ्का भवति—निश्वसितश्रुतेर्वेदनित्यत्वश्रुतेश्चाविरोधोपपादनपूर्वकं वेदस्येश्वरकृतत्वप्रतिपादनं वियत्पाद एव सङ्गतम्, न त्वत्र । अपि च शास्त्रयोनित्वादिति हेतोः साकांक्षता साध्यालाभात्—इति । तां निराकर्तुमाह—**जगत्कारणत्वेति** । ततश्च [6]पूर्वाधिकरणोपक्षिप्तसर्वज्ञत्वदृढीकरणार्थत्वात् नासङ्गतिः । सर्वज्ञमिति पदाध्याहारेण ब्रह्मपदानुषङ्गेण च सूत्रं पूरणीयं—वेदकर्तृत्वात् ब्रह्म

---

1. **न चेदमपौरुषेयत्वं मीमांसकमर्यादया उपेयते** इति 'येन निश्वसितश्रुतिर्विरुद्ध्येत' इत्यनेन सम्बद्ध्यते ।

2. मु. 'वक्तारं' नास्ति

3. **अनादितात्पर्यम्**—तत्प्रमानुकूलशक्तिः तात्पर्यम्, तच्च अनादि ।

4. **नापि सापेक्षत्वापादनं इतीति** 'सिद्धान्तः' इति पूर्वेण सम्बद्ध्यते ।

5. मु. योनित्वात्—कारणत्वात्

6. **पूर्वाधिकरणोपक्षिप्तेति** उपक्षिप्तं-आक्षिप्तं—अर्थात् ज्ञापितम् । यद्वा, 'यतः' इति यच्छब्देन उपस्थापितम्, उपस्थापनप्रकारश्च पूर्वाधिकरणे 'यतः सर्वज्ञात्' इति भाष्यावतरणिकायां द्रष्टव्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वज्ञमिति। न चैवं सति पूर्वाधिकरणगुणसूत्रतापत्त्या अधिकरणान्तरता न स्यादिति शङ्क्यम्। पूर्वाधिकरणाक्षिप्तसर्वज्ञत्वे हेत्वन्तरसमर्पकतया तदुपयोगित्वेऽपि तस्यैवासिद्धस्य हेतोस्साधकतया अधिकरणान्तरत्वोपपत्तेः।

निर्विशेषवस्तुविचारात्मके शास्त्रे [1]सर्वज्ञत्वनिरूपणं क्वोपयुज्यते? पूर्वाधिकरणापेक्षितजीवव्यावृत्तिप्रतिपादने। सर्वज्ञत्ववत् [2]सर्वशक्तित्वमपि तद्व्यावृत्तावुपयुज्यत इति तदपि कुतो न निरूप्यते? निरूपितप्रायमेव हि तदपि। 'अस्य निश्वसितमेतत्' इत्यत्र वैदिकप्रपञ्चोत्पत्त्यनन्तरं 'अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैव निश्वसितानि' [बृ. उ. ४-४-११] इति लौकिकप्रपञ्चस्यापि निश्वसितन्यायेन सृष्टिराम्नाता। ततश्च सर्वशक्तित्वमपि सिद्धम्। तदपि शास्त्रयोनित्वसूत्रेण [3]सूचितमेव। [4]आहत्य तु नोक्तम्। वेदांशे शङ्काविशेषस्येव निराकरणीयस्य लोकांशे अभावात्।

शास्त्रयोनित्वहेतुकं सर्वज्ञत्वसाधकं सूत्रप्रणीतमनुमानं प्रपञ्चयति—**महत इत्यादिना सर्वज्ञत्वमित्यन्तेन**। महत इत्यादि कारणंब्रह्मेत्यन्तं हेतुवाक्यम्। न हीदृशस्येत्यादि सर्वज्ञादन्यतस्सम्भवोऽस्तीत्यन्तं व्यतिरेकमुखेन सर्वज्ञत्वप्रतिज्ञापरम्। यद्यद्विस्तरार्थशास्त्रमित्यादि प्रसिद्धंलोके इत्यन्तं उदाहरणवाक्यम्। किमुवक्तव्यमित्यादि श्रुतेरित्यन्तं उपनयः। तस्येत्यादि निगमनम्। महत इति ग्रन्थतोऽर्थतश्च महत्त्वं विवक्षितं निरतिशयसार्वज्ञ्योपपादनाय[5]। ग्रन्थतो महत्त्वविवरणम्—**ऋग्वेदादेरिति**। अर्थतो महत्त्वं विवृणोति—**अनेकेति**। 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च

---

1. **सर्वज्ञत्वेति** सविशेषगतेत्यादिः।

2. **सर्वशक्तित्वमपीति** न च तत् पूर्वाधिकरणेन नाक्षिप्तमिति शङ्क्यम्। सर्वशक्तित्वमन्तरा जगत्कारणत्वानुपपत्त्या तेन तस्याप्याक्षेपात्।

3. **सूचितमेवेति** बृहदारण्यकषष्ठमैत्रेयीब्राह्मणगतनिश्वसितश्रुत्युदाहरणमुखेनेति भावः। अत एव 'किमु वक्तव्यं......सर्वशक्तिमत्वं चेति' इति सूत्रार्थवर्णनपरं भाष्यं समञ्जसम्।

4. **आहत्य**—साक्षात्—कण्ठतः—वाच्यवृत्त्या।

5. मु. सार्वज्ञ्योपपादनात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः—कारणं ब्रह्म । न हीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति ।

[1]'चतुर्दश' [इत्येवमनेकेत्यर्थः] । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि । उपबृंह्मणीयाश्चत्वारो वेदाः । तत्र पुराणानि, सृष्ट्यादिप्रतिपादक वाक्यानि परकृतिपुराकल्परूपानर्थवादांश्च प्राधान्येनोपबृंह्मयन्ति । प्रसङ्गादद्वैतभागं कर्मभागं चोपबृंह्मयन्ति । न्यायशास्त्रं तु प्रमाणप्रमेयलक्षणनिरूपणेन पदार्थान् विविच्य ज्ञापयदुपबृंह्मयति । पूर्वोत्तरमीमांसे तु तात्पर्यनिर्णयद्वारा उपयुक्ते । धर्मशास्त्रं तु श्रुतमनुमितं वा विधिभागं उपबृंह्मयति । शिक्षा तु स्थानकरणादिनिरूपणपरा[2] स्वाध्यायोऽध्येतव्यइतिविध्यर्थमुपबृंह्मयति । कल्पस्तु प्रयोगनिरूपणार्थ उपयुक्तः । व्याकरणं तु अस्मिन्नर्थे इदं पदं साध्विति पदार्थान् व्याकरोति । निरुक्तं तु तेषुतेषु पदेषु यौगिकमर्थं प्रतिपादयति । छन्दश्शास्त्रं तु वेदगतान् गायत्र्यादिशब्दान् लक्षणमुखेन विशदयति । ज्योतिषं तु 'पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेत' इत्यादिनोपात्तं कालविशेषं व्यवस्थापयति । तथा च तत्तदेकदेशव्याख्यानाय बहवो महर्षयः पुराणादिनिबन्धनप्रणेतारो यत्र प्रवृत्ताः तस्य महार्थत्वं व्यक्तमेवेति भावः । प्रदीपवदिति । अनेन स्पष्टज्ञानजनकत्वं विवक्षितम् । तथा च न [3]सन्देहाज्ञान[4]विपर्यासजनकतया वेदस्याप्रामाण्यमिति । नन्वाधुनिकपुरुषपाणिगतवराटकसंख्याद्यप्रतिपादकतया कथं सर्वावद्योतकत्वं इत्यत आह—सर्वज्ञकल्पस्येति । ईषदूनस्सर्वज्ञः सर्वज्ञकल्पः । करणे कर्तृत्वोपचारात् 'इगुपधज्ञाप्रीकिरः कः' [पा सू. ३-१-१३५] इति कप्रत्ययो द्रष्टव्यः । सर्वज्ञकल्पस्य योनिः इत्यनेन च, शास्त्रस्य योनिः—शास्त्रयोनिः तस्य भावः तस्मात् इति सूत्रे विग्रहो दर्शितः । सर्वज्ञगुणान्वितस्येति । सर्वज्ञस्य कर्तुः सर्वविषयकज्ञानजननानुकूला कर्तृकारकशक्तिर्गुणः, वेदे तु तादृशज्ञानानुकूला करणकारकशक्तिः । तयोश्च

1. मु चतुर्दशेति.
2. मु. निरूपणद्वारा
3. आ. सन्देहज्ञान
4. अज्ञानेति अज्ञानजनकत्वम्—अबोधकत्वम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् संभवति, यथा व्याकरणादि पाणिन्यादेः ज्ञेयैकदेशार्थमपि, स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके।

शक्त्योः सर्वविषयकज्ञानजननानुकूलशक्तित्वेन सादृश्यात् सर्वज्ञशक्तिरूपगुणसदृशगुणान्वितस्येत्यर्थो द्रष्टव्यः।

अत्रायं प्रयोगः—वेदकर्तृत्वेन निश्वसितश्रुतिप्रतिपादित ईश्वरः वेदानधीन [1]वेदार्थतदधिकार्थगोचरज्ञानवान्, उपाध्यायान्तरमनपेक्ष्य कृत्स्नवेदकर्तृत्वात्। मन्वादीनामपि वेदार्थतदधिकवर्णावलीविशेषादिरूपार्थज्ञानं वर्तते। परं तु तत् वेदाधीनम्। ईश्वरज्ञानस्य तद्वैलक्षण्यद्योतनाय वेदानधीनेत्युक्तम्। ततश्च, यस्य वेदं विना वेदार्थतदधिकार्थगोचरं ज्ञानं तस्य आधुनिकपुरुषविशेषपाणिगतवराटकसङ्ख्याज्ञानमपि कैमुतिकन्यायेन सिध्यतीत्यभिप्रेत्य भाष्ये 'न हि सर्वज्ञादन्यतस्सम्भवोऽस्ति' इत्युक्तम्।

वेदं विना उक्तरूपज्ञानसिद्धावपि सर्वज्ञत्वं कथं सिध्यतीति चेत्, उच्यते—परमेश्वरस्य वेदकर्तृत्वेन निरुक्तसाध्यपर्यवसानं उपायान्तराभावात् [2]स्वशक्तिमादाय पर्यवस्यतीति वक्तव्यम्। ततश्च यस्य शक्तिर्वेदार्थतदधिकार्थज्ञानजननक्षमा तस्य इतरविषयमपि ज्ञानमस्तीत्यत्र को विवादः। न च 'सर्वज्ञः' इत्येव कुतस्साध्यनिर्देशो न क्रियत इति वाच्यम्। वक्ष्यमाणव्याप्तेस्तत्र सामर्थ्याभावात्। आधुनिकोपाध्यायस्य वेदार्थज्ञानविधुरस्यापि वेदकर्तृत्वमस्तीति तद्व्यावृत्त्यर्थं कृत्स्नवेदकर्तृत्वम्। तदपि मन्वादिषु विद्यत इति तद्व्यावृत्त्यर्थम् उपाध्यायान्तरमनपेक्ष्येति। मन्वादीनां त्वीश्वर एव उपाध्यायः। यद्यप्युपाध्यायान्तरानपेक्षत्वेनैव आधुनिकोपाध्यायव्यावृत्तिर्लभ्यते, तथापि घुणाक्षरन्यायेन वेदसमानानुपूर्वीकं स्वत एव यदि कश्चिद्रचयेत् तद्व्यावृत्त्यर्थं कृत्स्नेत्यपि विशेषणमावश्यकम्।

अत्र सामान्यव्याप्तिमाह—**यद्यद्विस्तरार्थमिति**। अत्र 'यो विवक्षापूर्वकं यद्वाक्यं रचयति स तदर्थतदधिकार्थज्ञानवान्' इति व्याप्तिर्विवक्षिता। यथा व्याकरणादिकर्ता पाणिन्यादिरिति दृष्टान्तः। **ज्ञेयैकदेशार्थमपीति** व्याकरणविशेषणम्।

1. मु. वेदार्थाधिक
2. **स्वशक्तिमिति** परमेश्वरस्य शक्तिः ज्ञानपरिणामिनी माया, चैतन्यरूपा वा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तच्च, वेदैकदेशार्थपरिष्कारोपयोगिव्याकरणकर्तुरपि पाणिनेः लोके सर्वज्ञत्वप्रसिद्धिरस्ति ततस्सकलवेदकर्तुरीश्वरस्य सर्वज्ञत्वे का शङ्का इति द्योतनाय। व्याप्तौ च विवक्षां विना वाक्यरचयितुश्शुकादेः न वाक्यार्थज्ञानमस्तीति व्यभिचारव्यावृत्तये विवक्षापूर्वकत्वं विशेषणम्। तच्च भाष्ये पुरुषविशेषपदेन सूचितम्। अस्याश्च सामान्यव्याप्तेः पक्षे पर्यवसाने सति वेदस्यापि विवक्षापूर्वकं रचितत्वं लभ्यते। ततश्च— 'अस्त्वीश्वरस्य कृत्स्नवेदकर्तृत्वम्, तावता वेदरचने उपयुक्तं वर्णावलीज्ञानमेवेश्वरस्य सिध्येत्, न तु तदर्थज्ञानमपि' इति शङ्का-निरस्ता। अर्थज्ञानं विना अस्माच्छब्दादयमर्थावगमोऽस्त्विवतिविवक्षाया असम्भवात्।

न च अर्थज्ञानपूर्वकं विवक्षापूर्वकं च वेदकर्तृत्वाभ्युपगमे वेदस्य सापेक्षत्वमिति वाच्यम्। वेदस्य विवक्षापूर्वकमीश्वरः कर्तेति, निश्वसितश्रुत्या 'तदेव ब्रह्म परमं कवीनाम्' [म. ना. उ. १-६] इति श्रुत्या चावगन्तव्यम्, न तु प्रकारान्तरेण। ततश्च योग्यवाक्यत्वेन निर्दोषत्वेन च प्रागेव प्रामाण्यमवधारणीयम्। अतोऽनेन वाक्येन स्वोपजीव्यतयाप्रागेवावधृतप्रामाण्याविघातेनैव कर्ता प्रतिपादनीय इति तत्प्रतिपाद्यः परमेश्वरो निर्दोष एव सिध्यतीति तत्प्रमासापेक्षत्वेऽपि न अप्रामाण्यापादकसापेक्षत्वप्रसङ्गः। [1]परं त्वीश्वरस्य निर्दुष्टतयापरमाप्तत्वनिर्णयात् प्रागेव वेदप्रामाण्यनिर्णयस्यावश्यकतया न तदर्थमीश्वरज्ञानप्रामाण्यनिर्णयोऽपेक्षित इति वस्तुस्थितिः। ततश्च विवक्षोपयोगितया वेदार्थज्ञानमीश्वरस्य सिध्यतीति प्रकृतसाध्यसिद्धौ न कोऽपि विवादः।

ननु—यदि वेदार्थज्ञानमीश्वरस्य स्वीक्रियते, तदा 'स प्रजापतिरात्मनो वपामुदखिदत्' [तै. सं. २-१-१] 'स्तेनंमनोऽनृतवादिनीवाक्' 'श्रृणोत ग्रावाणः' [तै. सं. १-३-१३] इत्यादिमन्त्रार्थवादप्रतिपाद्यासदर्थगोचरमपि तस्मिन् ज्ञानं प्राप्नुयात्। ततश्च कथं निर्दुष्टतयेश्वरसिद्धिः। असदर्थावगाहिज्ञानस्य दोषमूलत्वात्—इत्याशङ्क्योक्तं—**यद्यद्विस्तरार्थं शास्त्रमिति**। अत्र 'प्रथने वावशब्दे' [पा. सू. ३-३-३३] इति सूत्रेण वावुपसर्गे उपपदे अशब्दधर्मिके प्रथने गम्यमाने [2]स्तॄधातोः घञ् भवतीति प्रतिपादकेन 'ॠदोरप्' [पा. सू. ३-३-५७] इति

1. आ. परमेश्वरस्य

2. मु. स्तृघातोस्तॄधातोश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किमु वक्तव्यं—अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्य अप्रयत्नेनैव लीलान्यायेन

सूत्रापवादभूते घञि कृते विस्तार इति स्यात्, तन्माभूदिति अर्थशब्दस्य वस्तुसामान्यवाचकस्य धर्मरूपवस्तुविशेषे पर्यवसानं कृत्वा विस्तररूपोऽर्थो धर्मो यस्येति विगृह्य ऋदोरबिति सूत्रेण ऋकारान्तादुकारान्ताच्च अप्प्रत्ययो भवतीति प्रतिपादकेन अप्प्रत्ययमाश्रित्य [1]विस्तृतमित्यर्थकं [2]विस्तरार्थमिति [3]स्वीकर्तव्यम् । शास्त्रपदं हितसाधनताबोधकशब्दराशिपरम् । ततश्च हितसाधनं प्ररोचयितुं [4]शब्दप्रपञ्च एव स्तेनादिवाक्यम्, न तु [5]तत्र स्वार्थे तात्पर्यपर्यवसानमस्तीत्यभिप्रायः । न च प्ररोचनोपयोगिन्यसदर्थालम्बने [6]तात्पर्यपर्यवसानविधुरे ज्ञानेऽभ्युपगम्यमाने परमेश्वरस्य आप्तत्वं विहन्यते भ्रान्तत्वं वा प्राप्नोति । लोके हि औषधपानादिकं प्ररोचयितुं शिखावर्धनादिकमसदपि प्रतिपादयन्तो वृद्धाः परमाप्ता एव प्रमाणभूता एव च भवन्ति । तत् कस्य हेतोः । यथाकथञ्चित् बाल औषधं पिबत्विति तात्पर्यात् । एवं सर्वोऽपि जनः यथाऽधिकारं सन्मार्गे प्रवृत्तो भवत्विति असदर्थमाहरतोऽपीश्वरस्य परमाप्तत्वे प्रमाणत्वे च न काचिदनुपपत्तिः ।

किमु वक्तव्यमिति । अनेकेत्यादिविशेषणविशिष्टस्य ऋग्वेदाद्याख्यस्य अस्येत्यादिश्रुतेः यस्मात् सम्भवः तस्य सर्वज्ञत्वादिकं किमुवक्तव्यमित्यन्वयः ।

---

1. **विस्तृतमित्यर्थकमिति** तथा च विस्तरार्थमित्यत्र विस्तरशब्दः शब्दप्रपञ्चार्थक इति भावः ।

2. मु. विस्तरमिति

3. **स्वीकर्तव्यमिति** पदं इत्यादिः ।

4. **शब्दप्रपञ्च एवेति**—एवञ्च ऋग्वेदादिरूपे शास्त्रे अर्थवादादिबहुले शब्दमात्रस्यैव प्रपञ्चो नार्थस्येति विस्तरार्थविशेषणेन ज्ञापनात् वेदस्य ब्रह्मज्ञानस्य च तुल्यविषयत्वभ्रान्तिर्निवर्तिता भवति, तेन वेदार्थाधिकविषयज्ञानवत्त्वं अबाधितं सिद्ध्यतीति भावः ।

5. आ. तत्तत्स्वार्थे

6. **तात्पर्यपर्यवसानविधुरे ज्ञाने इति** अयं भावः—ईश्वरस्य वैदिकासदर्थोपाख्यानाद्यर्थविषयज्ञानवत्त्वेऽपि तस्य ज्ञानस्य प्रमित्युपयोग्याहार्यज्ञानत्वात् न तेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरुषनिःश्वासवत् यस्मान्महतोभूताद्योनेः संभवः, 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ. उ. ४-४-११) इत्यादिश्रुतेः, तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं च—इति ।

अथवा, यथोक्तमृग्वेदादिशास्त्रं योनिः-कारणं-प्रमाणं अस्य ब्रह्मणो यथावत् स्वरूपाधिगमे । शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्म अधिगम्यते-इत्यभिप्रायः । शास्त्रमुदाहृतं पूर्वसूत्रे 'यतो वा इमानि भूतानि जायन्ते' इत्यादि । किमर्थं तर्हीदं सूत्रं, यावता पूर्वसूत्रे[एव](णैव) एवं-जातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम् । उच्यते—तत्र सूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानात् जन्मादि केवलमनुमानमुपन्यस्तं इत्याशङ्क्येत, तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते शास्त्रयोनित्वादिति ॥ ३ ॥

'अयं च लोकः परश्च लोकः' इत्यादिवाक्यपर्यालोचनलभ्यार्थकथनं सर्वशक्तिमत्त्वं चेति । अत्र शास्त्रयोनित्वादितिहेतुसमर्थनोपयोग्यधिकरणे, पूर्वपक्षे वेदस्येश्वरकृतत्वानभ्युपगमात् न कृत्स्नप्रपञ्चकारणत्वमीश्वरस्य, सिद्धान्ते तु तदङ्गीकारात् कृत्स्न-प्रपञ्चकारणत्वं निर्व्यूढमिति ।

एवं शास्त्रकर्ता ईश्वर इत्यभिप्रायं सूत्रं व्याख्याय, शास्त्रैकगम्य ईश्वर इत्यभि-प्रायेण सूत्रं व्याचष्टे—अथवेति । अत्र 'तं त्वौपनिषदं पुरुषं पृच्छामि' [बृ. उ. ३-९-२६] 'नावेदविन्मनुते तं बृहन्तं' [शाट्या. उ. ४ काठ. ३-९] इत्यादि-शास्त्रं विषयः । तत् किं वेदैकगम्यत्वमीश्वरस्य प्रतिपादयति उत नेति संशयः । एवं च सति यदि वेदैकगम्यो न भवेदीश्वरः प्रमाणान्तरगम्यत्वादिति, तदा प्रमाणान्तरगम्ये वेदस्य तात्पर्याभावात् तद्विचारो न कर्तव्य इति पूर्वपक्षे फलम् । सिद्धान्ते तु तद्वैपरीत्यम् ।

भ्रान्तिमत्त्वप्रसक्तिः । न ह्यभावप्रमित्युपयोग्यधिकरणगोचरप्रतियोगितदवच्छेदकारोपवन्तः पुरुषाः धर्मार्थिप्रमित्युपयोगिकपोताख्यायिकाहंसकाकोपाख्यानादिरचनामूलारोपवन्तो वाल्मीकिकृष्णद्वैपायनादयो भ्रान्ता इति व्यपदिश्यन्ते । किञ्च, यत् सत्तानिश्चयरूपं न भवति न.तेनान्यत्रान्यवैशिष्ट्यावगाहिनाऽपि भ्रान्त इति व्यपदिश्यते । न हि शुक्तौ रजतत्ववैशिष्ट्यज्ञानवानिव 'अस्य पुरोवर्तिनि रजतत्ववैशिष्ट्यावगाहिज्ञानं अप्रमाणं' इति तदीयभ्रान्तिविषयतया पुरोवर्तिनि रजतत्ववैशिष्ट्यं गृह्णन् भ्रान्तिज्ञोऽपि भ्रान्त उच्यते—इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४ समन्वयाधिकरणम्

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. सू. १-२-१) इति क्रियापरत्वं

तत्र 'जगज्जन्मादिकारणं सर्वज्ञं सर्वशक्तिसमन्वितं परं ब्रह्म परमार्थगत्या त्रिविधपरिच्छेदशून्यं सत्यज्ञानानन्दात्मकं प्रत्यगभिन्नम्' इति प्रतिपादनार्थं शास्त्रं नापेक्षितम्। जगज्जन्मादिकारणत्वस्य अनुमानेन सिद्धत्वात्, तेनैव [1]लाघवानुगृहीतेन सर्वज्ञत्वादेरपि सिद्धत्वात्, भेदप्रपञ्चस्य च दृश्यत्वहेतुना मिथ्यात्वसिद्धेः, भेदमात्र-मिथ्यात्वे च जीवब्रह्मणोरैक्यस्यापि सिद्धतया, प्रत्यगभिन्नब्रह्मणश्च 'अहमस्मि सदा भामि कदाचिन्नाहमप्रियः' इति सत्यादिरूपतायाः प्रत्यक्षसिद्धतया, न शास्त्रेण किञ्चित्कृत्यमिति तत्त्वौपनिषदमित्यादिवाक्यं यथाकथञ्चिन्नेयमिति पूर्वः पक्षः।

सर्वज्ञेश्वरसिद्धिरनुमानाद्यथा न भवति तथा प्रागेवोक्तम्। न च दृश्यत्वहेतु-मात्रेण मूलभूतश्रुतिरूपप्रमाणाभावे भेदमिथ्यात्वं प्रत्यक्षादिप्रमाणविरोधनिरासपूर्वकं निरूपयितुं शक्यम्। अतो मूलभूतं श्रुतिप्रमाणमेव परमात्मस्वरूपनिरूपणोपयोगि। उक्तानुमानं तस्मिन् मूलभूतप्रमाणे विद्यमाने तमर्थं सम्भावयत् तत्रोपयुज्यते। एतच्च सर्वमत्रवक्तव्यमेव नन्विहापीत्यादिभाष्येण [2]प्रागुपपादितम्। ततश्चायं सूत्रार्थः—ब्रह्म शास्त्रप्रमाणकम्, शास्त्रैकगम्यत्वात्—इति ॥ ३ ॥

इति शास्त्रयोनित्वाधिकरणम् ॥ ३ ॥

'सदेव सोम्येदमग्र आसीत्' [छा. उ. ६-२-१] इत्येवमादीनि वेदान्त-वाक्यानि पूर्वाधिकरणे ब्रह्मप्रमाणतया व्यवस्थापितानि प्राधान्येन ब्रह्म प्रतिपादयन्ति किं वा अन्यशेषतयेति, प्राधान्येन प्रतिपादने फलनिरपेक्षत्वयोस्सदसद्भावाभ्यां संशये, पूर्वः पक्षः—न स्वातन्त्र्येण ब्रह्म प्रतिपादयन्ति, अपि तु अन्यशेषतया—इति। ब्रह्मणोऽक्रियारूपस्य प्रतिपादने वेदान्तानां फलं न लभ्यते इत्यमुमर्थं जैमिनीय-सूत्रोदाहरणपूर्वकं दर्शयति—**कथंपुनरिति**।

आम्नायस्येति। आम्नायस्यक्रियार्थत्वादितिसूत्रे, यो भागः साक्षात् क्रियां न प्रतिपादयति मन्त्रार्थवादादिरूपः तमुदाहृत्य विचारितं—किमयं स्वार्थपरः उत

1. मु. लाघवाद्यनु०

2. **प्राक्**—जन्माद्यधिकरणे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शास्त्रस्य प्रदर्शितम्। अतो वेदान्तानामानर्थक्यं, अक्रियार्थत्वात्। कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं, उपासनादिक्रियान्तरविधानार्थत्वं वा। न हि परिनिष्ठितवस्तुस्वरूपप्रतिपादनं संभवति, प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्।

नेति। तत्र पूर्वः पक्षः—स्वार्थपर एवेति। न च—तत्प्रतिपादने प्रयोजनं न लभ्यते। क्वचिच्च 'अग्निर्हिमस्य भेषजं' इत्यादौ प्रमाणान्तरसिद्धार्थता, 'स्तेनं मनोऽनृतवादिनी वाक्' इत्यादौ च [1]प्रमाणान्तरविरुद्धार्थता प्रतीयते। तत् कथं तत्परत्वमिति—वाच्यम्। न ह्येतावता प्रतीयमानोऽर्थः परित्यक्तुं शक्यते। निष्फलत्वादिकं प्राप्नोतीति चेत् तदप्यस्तु। न हि 'यथा निष्फलत्वादिकं न प्रसज्यते तथा कृत्स्नोऽपि वेदो व्याख्येयः' इत्यत्र निर्बन्धे किञ्चिन्नियामकमस्ति। तस्मादर्थवादादयो यथाश्रुतार्था एवेति [2]पूर्वपक्षप्रतिपादकं आम्नायस्येतिसूत्रम्। तथा चायमर्थः—वेदस्य क्रियाप्रयोजनकत्वात् तस्य च प्रयोजनस्य यजेतेतिविधिवाक्येष्वेव सम्भवात् क्रियारूपप्रयोजनरहितानां आनर्थक्यम्, प्रयोजनान्तरस्यासम्भवात्। अतोऽर्थवादादिकं अनित्यं—लौकिकवाक्यसदृशमिति।

सिद्धान्तस्तु—भवेदेतदेवम्, यदि 'प्रयोजनवदबाधितानधिगतार्थत्वमेव वेदस्य' इत्यत्र किञ्चिन्नियामकं न भवेत्, अस्ति तु नियामकम्। स्वाध्यायस्य हि उत्सर्गतः प्राप्तप्रामाण्यसंरक्षणे सम्भवति न तत्परित्यागो न्याय्यः। 'अध्येतव्यः' इत्यध्ययनविधिश्च प्रयोजनवदर्थपरतां स्वाध्यायस्य बोधयति। तच्च प्रयोजनं प्रवृत्तिनिवृत्तिप्रतिपादकयोर्विधिप्रतिषेधयोः इष्टप्राप्तिरनिष्टनिवृत्तिश्च अर्थान्तरलक्षकतां

---

1. **प्रमाणान्तरविरुद्धार्थतेति** मनसः परद्रव्यापहरणरूपं स्तेयं बाधितम्। अनृतमेव वदति न तु सत्यं इति अनृतवादिनी, ताच्छीलिको णिनिः। वाचश्चेदं अनृतवदनैकस्वभावत्वं बाधितम्, सत्यवदनस्यापि दर्शनात् इति भावः।

2. **पूर्वपक्षप्रतिपादकं आम्नायस्येति सूत्रमिति** जैमिनीये इदं पूर्वपक्षसूत्रमपि सत् पूर्वपक्ष्युक्तं अक्रियार्थानामानर्थक्यमङ्गीकृत्यैव अर्थवादानां विध्येकवाक्यतया प्रामाण्याद्युपपादनात् प्रकृताधिकरणपूर्वपक्षिणां जैमिनीयानामेव अनुकूलम्। सिद्धान्तिनस्तु दूष्यम्। दूष्यसूत्रोपन्यासस्तु सिद्धान्तिनः तस्मिन्नर्थे विश्वासार्हता न भवतीत्येवमर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनैव लभ्यते, अर्थवादादीनां तु विधिनिषेधोपयुक्तार्थलक्षकतां विना न लभ्यत इति तत्समभिव्याहृतानां अर्थवादादीनां तदुपयुक्तस्तुत्यादिलक्षकतामुपेत्य प्रयोजनवत्त्वं प्रामाण्यं च समर्थनीयम्—इति । तथा च सूत्रं 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' इति । विधिग्रहणं निषेधस्याप्युपलक्षणम् । स्तुतिपदं निन्दाया अप्युपलक्षणम् । ततश्च विधिनिषेधयोः (तावत्) प्ररोचनाद्वेषयोरभावे प्रवृत्तिनिवृत्तिसम्पादकत्वासम्भवात् प्ररोचनाद्वेषापेक्षयोः, अर्थवादानां च प्रयोजनसाकाङ्क्षाणां स्तुतिनिन्दा[1]लक्षणया प्ररोचनाद्वेषसम्पादकत्वसम्भवात्, अवगतैकवाक्यतानिर्वाहार्थं यथायथं स्तुतिनिन्दालक्षणां प्राप्ता अर्थवादाः प्रमाणं स्युः—इति सूत्रार्थः ।

एवं—मन्त्राणामपि अध्ययनविधिपरिगृहीतानां प्रयोजनमपेक्षमाणानां प्रकरणादिना कर्मसु विनियोगेन कर्मोपकारकत्वेऽवगते, किं दृष्टविधया कर्मोपकारकत्वं उतादृष्टविधयेति सन्दिह्य 'येनाप्यनुष्ठेयार्थप्रकाशनं दृष्टप्रयोजनमुच्यते तेनापि, उपायान्तरेण उपदेष्ट्रादिवचनेन सम्भवदप्यनुष्ठेयार्थप्रकाशनं मन्त्रनियमबलात् व्यावर्त्य नियमांशे अदृष्टं स्वीकर्तव्यम् । ततश्चावश्यकत्वाददृष्टकल्पनस्य किमनुष्ठेयार्थप्रकाशकत्वकल्पनाक्लेशेन । ततश्च प्रयाजादिवत् मन्त्रोच्चारणमप्यदृष्टार्थम्' इति पूर्वपक्षं कृत्वा, 'भवेदेवं यद्यनुष्ठेयार्थप्रकाशनं कल्प्यं स्यात् । न तु तथा । शक्त्या लक्षणया वा लोकत एव तस्य क्लृप्तत्वात् । एवं च यस्मिन्नंशे दृष्टं न सम्भवति तत्रैव—नियमांशे अदृष्टं कल्पनीयम्, न तु सर्वत्र[2] । तथा च मन्त्रविनियोगविधेर्लाघवं भवति, पाक्षिकाप्राप्त्यंशपरिपूरणमात्रफलकत्वात् । अदृष्टार्थत्वे तु अत्यन्ताप्राप्तप्रापकतया गौरवं स्यात् । तस्मात् इषेत्वेत्यादीनां [3]छिनद्मीत्यादिपदाध्याहारं कृत्वा अनुष्ठेयार्थप्रकाशकतया कर्मोपकारकत्वमास्थेयम्' इति सिद्धान्तितम् ।

ततश्च सिद्धवस्तुप्रतिपादकवेदभागस्य [4]क्रियापरशेषतया प्रयोजनवत्त्वं समर्थनीयम् ।

अपि च—सिद्धस्य वस्तुनः प्रमाणान्तरयोग्यतया सापेक्षत्वं प्रसज्यते, क्रियायाश्च धर्मत्वेन प्रमाणान्तरायोग्यत्वात् न तत्परत्वे सापेक्षत्वं प्रसज्यत इति,

---

1. मु. लक्षणप्रो०
2. सर्वत्र—मन्त्रोच्चारणांशेऽपि ।
3. मु. छिनद्मीति पदा०
4. मु. क्रियापदशेषतया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत एव 'सोऽरोदीत्' इत्येवमादीनामानर्थक्यं मा भूदिति 'विधिना

वेदान्तानां स्वार्थपरत्वे क्रियापरत्वासम्भवात् क्रियापरत्वसिद्ध्यर्थं क्रियाशेषभूतदेवतादिस्तावकत्वं स्वीकर्तव्यम्। यदि तु कर्मप्रतिपादकविधिभ्यो दूरपठिततया तत्समभिव्याहाराभावात् न कर्मस्तावकत्वमित्युच्येत, तदा वेदान्तपठितोपासनाविध्येकवाक्यतामुपेत्य उपास्यसमर्पकताऽस्तु। ततश्च—अन्यपरेभ्यो वेदान्तेभ्यो ब्रह्मसिद्धिर्देवताधिकरणन्यायेन[1] वक्तव्या, न च प्रमाणान्तरविरोधे तन्न्यायप्रवृत्तिरिति तत्त्वमस्यादिवाक्यानां प्रमाणान्तरविरुद्धार्थतया 'वाचंधेनुमुपासीत' [बृ. उ. ५.८] इतिवत् आरोपितजीवब्रह्माभेदमादायैवोपासनाविधिः पर्यवसितो भविष्यतीति—न [2]प्रत्यक्षादिबाधकत्वमपि वेदान्तानां भविष्यति।

उपासनादिक्रियान्तरविधानार्थत्वंवेत्यन्तं सङ्ग्रहवाक्यम्। **नहीत्यारभ्य** तद्विवरणम्। **परिनिष्ठितं**—क्रियानन्वितम्।

सोऽरोदीदित्येवमादीनामिति। 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रु शीर्यत तद्रजतं हिरण्यमभवत्तस्माद्रजतं हिरण्यमदक्षिण्यमश्रुजं हि यो बर्हिषि ददाति पुराऽस्य संवत्सरात् गृहे रुदन्ति' [तै. सं. १-५-१] इति वाक्यं अश्रुप्रभवरजतस्य बर्हिषि[3]दाने संवत्सरात्पुरा गृहे रोदनं भवतीति प्रतिपादनद्वारा [4]रजतनिन्दायां

---

1. **देवताधिकरणन्यायेन**—प्रमाणान्तरप्राप्तिविरोधयोरसतोः अन्यपराण्यपि वाक्यानि यथाश्रुतवाक्यार्थे प्रमाणानि भवन्ति—इति न्यायेन। देवताविग्रहादिसदसद्भावमधिकृत्य प्रवृत्तेऽधिकरणे सूत्रितत्वादस्य न्यायस्य देवताधिकरणन्यायत्वेन शास्त्रे व्यवहारः।

2. **प्रत्यक्षेति** जीवब्रह्मभेदघटपटादिस्वरूपतत्सत्यत्वादिग्राहकप्रत्यक्षेत्यर्थः। प्रत्यक्षादीत्यादिपदेन विरुद्धधर्माश्रयत्वार्थक्रियाकारित्वहेतुकानुमानं ग्राह्यम्।

3. मु. निधाने

4. **रजतनिन्दायां पर्यवस्यतीति** रजतनिन्दायां—रजतदाननिन्दायाम्। **निन्दा**—बलवदनिष्टजनकता। **पर्यवस्यति**—लाक्षणिको भवति। न च रजतदानस्य संवत्सरात्प्राग्रोदनरूपबलवदनिष्टजनकत्वस्य उक्तवाक्येनैव प्रतिपादनात् प्रतिपादनद्वारा निन्दायां पर्यवसानोक्तिः अयुक्तेति वाच्यम्। सत्यपि बर्हिषि रजतदाने संवत्सरात् प्राक् रोदनस्य क्वचित्क्वचिददर्शनेन उक्तवाक्यस्य पारलौकिकबलवदनिष्टजनकतालक्षकतायाः अवश्याश्रयणीयत्वात्—इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' (जै. सू. १-२-७) इति स्तावकत्वेनार्थवत्त्वमुक्तम्। मन्त्राणां च 'इषे त्वा' इत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम्। न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टा उपपन्ना वा। न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति, क्रियाविषयत्वाद्विधेः। तस्मात् कर्मापेक्षितकर्तृदेवतादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम्। अथ प्रकरणान्तरभयात् नैतदभ्युपगम्यते, तथाऽपि स्ववाक्यगतोपासनादिकर्मपरत्वम्।

पर्यवस्यति। तच्च बर्हिषिरजतंनदेयमितिनिषेधशेषभूतम्। आदिपदेन'वायुर्वै क्षेपिष्ठा देवता' इत्यादिवाक्यं संगृह्यते। स्तावकत्वेनेति। निन्दकत्वेनेत्यपि द्रष्टव्यम्।

ननु—यदि विधिपरत्वमेव वाक्यस्य वक्तव्यमिति निर्बन्धः तदा वेदान्तानां [1]यथाश्रुतार्थत्वेऽपि न काचिदनुपपत्तिः, सिद्धेऽपि ब्रह्मणि [2]उत्पत्तिविधिसम्भवात्, अज्ञातज्ञापनं हि उत्पत्तिविधिरित्युच्यते—इत्याशङ्कयाह—न चेति। क्रियाविषयत्वादिति। यथा हि प्रयोजनपर्यवसानं भविष्यति तथा वाक्यार्थो वर्णनीयः। न चाज्ञातस्य वस्तुनो ज्ञापने तस्य ज्ञानस्य प्रवृत्तिपर्यवसानाभावे प्रयोजनं लभ्यते। अतोऽज्ञातज्ञापनमपि क्रियाविषयमेव [3]स्वीकर्तव्यम्। यथा 'अग्निहोत्रं जुहुयात्' इति। तेन हि वाक्येन अग्निहोत्रनामिकायां होमरूपायां क्रियायां बोधितायां, तस्य होमस्य 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वाक्येन स्वर्गसाधनतायां बोधितायां, तज्जन्यस्य स्वर्गस्य तत्कर्तृस्वर्गकामपुरुषसम्बन्धे बोधिते, 'सायं जुहोति' 'प्रातर्जुहोति' इतिवाक्याभ्यामनुष्ठानविशेषे बोधिते, तत्र पुरुषः प्रवर्तते। नैवं सिद्धब्रह्मबोधमात्रेण [4]प्रवृत्तिशेषतां विना पुरुषः प्रवर्तते। ततश्च चतूरूपस्य विधेः यस्मिन् विषये अवकाशः तत्रैव पुरुषः प्रवर्तते। स च क्रियायामेव। तत्र यद्यपि अग्निहोत्रंजुहुयादित्येवं[5] यथा अग्निहोत्रहोमेन स्वस्येष्टं भवति तथा होमे व्याप्रियेतेति

1. **यथाश्रुतार्थत्वेऽपीति** अक्रियार्थत्वेऽपीत्यर्थः।
2. मु. उत्पत्यादिविधि॰
3. **स्वीकर्तव्यमिति** उत्पत्तिविधिरिति इत्यादिः
4. **प्रवृत्तिशेषतां**—प्रवृत्तिविषयक्रियाशेषताम्
5. **इत्येवमिति** इत्येवंरूपेणेत्यर्थः। 'एकेनैव वाक्येन' इत्यनेन सम्बद्धयते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मात् न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते, उच्यते—

तत्तु समन्वयात् ॥ ४ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । तत्–ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्ति-

एकेनैव वाक्येन उत्पत्तिविनियोगाधिकार[1]प्रयोगरूपाश्चत्वारोऽपि प्रकारा लभ्यन्ते । उत्पत्तिः अज्ञातज्ञप्तिः । [2]फलसाधनताबोधनं विनियोगः । फलस्य कर्तृसम्बन्ध-[3]बोधनं अधिकारः । तच्च आत्मनेपदेन क्वचित्, सर्वत्र च विधिबलात् । न हि तज्जन्यफलस्य स्वेन सम्बन्धाभावे [4]तत् पुरुषः करोति । अतो विधिना स्वस्य प्रवर्तकतानिर्वाहार्थं तत्[5] आक्षिप्यते । अनुष्ठेयताबोधनं प्रयोगः । तथापि—तत्त-द्विशेषबोधनार्थं वाक्यान्तराणामावश्यकतया तेभ्य एव विनियोगादिलाभे अग्निहोत्रं जुहुयादितिवाक्यं उत्पत्तिविधिरित्युच्यते । प्रयोगाद्यंशे वाक्यान्तरप्राप्तार्थानुवादक-त्वात् तत्र तात्पर्याभावेन न विनियोगादिविधित्वेन व्यवह्रियते । अतोऽज्ञातज्ञापन-रूपस्यापि विधेः फलवत्प्रवृत्तिपर्यवसायिनः क्रियाविषयत्वमेव न सिद्धवस्तुविषय-त्वमिति भावः ।

तच्छब्दः सूत्रे प्रकृतब्रह्मपरामर्शार्थः । अधिकारादेव ब्रह्मलाभेऽपि, जन्मादि-सूत्रे यादृशं ब्रह्म निरूपितं तादृशे ब्रह्मणि प्रमाणोपन्यासपरः उत्तरसन्दर्भः इति प्रतिपादनार्थं पुनःपरामर्श इति द्योतयन् शास्त्रयोनि[6]पदं प्रथमान्ततया विपरिणमय्य तदनुषङ्गेण [7]द्वितीयव्याख्यानानुसारेण सूत्रं व्याचष्टे । तुशब्द इत्यादिना ।

---

1. मु. प्रयोगाश्चत्वा०

2. फलसाधनतेति क्रियायाः फलसाधनत्वस्येव अङ्गानां प्रधानशेषत्वस्य बोधनमपि विनियोग एव । स्थालीपुलाकन्यायेन तु एकोपादानम् ।

3. मु. बोधोऽधिकारः

4. तत्—फलसाधनम्

5. तत्—फलस्य कर्तृसंबन्धः ।

6. मु. योनित्वादितिपदं

7. द्वितीयव्याख्यानानुसारेणेति शास्त्रयोनिपदस्य इत्यादिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थितिलयकारणं वेदान्तशास्त्रादवगम्यते । कथम् ? समन्वयात् । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येण एतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि ।

पूर्वपक्षिणा क्रियाशेषतया ब्रह्म प्रतिपाद्यत इत्युक्तम्, तद्व्यावृत्त्यर्थस्तुशब्दः । तथा च यज्जगज्जन्मादिकारणं वस्तुतस्त्रिविधपरिच्छेदशून्यं सत्यादिरूपं ब्रह्म, तत् क्रियाशेषतां विनैव शास्त्रयोनि–वेदान्तादवगम्यते इति प्रतिज्ञा[1] लभ्यते ।

पूर्वपक्षोक्तयुक्तिं मनसि निधाय शङ्कते—**कथमिति** ।

समन्वयादिति सौत्रहेतुगतसंपदलभ्यार्थकथनपूर्वकं उक्तशङ्कां परिहरति—**समन्वयादिति** । संशब्दः तात्पर्यार्थकः । तात्पर्यं द्विविधम् । 'अस्माच्छब्दादेतदर्थबोधो भवतु' इति वक्तृविवक्षारूपं गुणप्रधानपदार्थसाधारणम् । अपरं तु तत्प्रतीत्युद्देश्यकत्वरूपं प्रधानपदार्थसाधारणम् । यथा कृत्स्नस्य दर्शपूर्णमासप्रकरणस्य 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इतिवाक्यप्रतिपाद्यायां भावनायाम् । तेन हि वाक्येन 'दर्शपूर्णमासनामकैर्यागैः यथा स्वर्गो भवति तथा व्याप्रियेत' इति प्रतिपादिते यागकरणकस्वर्गभाव्यकव्यापारस्य सामान्येन जातां प्रतीतिं, स्वकार्यभूतां प्रवृत्तिं जनयितुं भावनाविशेष[2]रूपमपेक्षमाणां, अन्यानि वाक्यानि भावनाविशेषरूपं समर्पयन्ति स्वजन्यावान्तरवाक्यार्थज्ञानद्वारा [3]उपकुर्वन्तीति यागकरणकभावनाप्रतीत्युद्देश्यकत्वं कृत्स्नस्य वाक्यस्येति । द्विविधे तात्पर्ये आद्यस्य तात्पर्यस्य [4]अन्वयादित्यनेनैव लाभे संशब्दो व्यर्थस्स्यादिति द्वितीयमेव तात्पर्यं संशब्देन विवक्षितम् । प्रतिपाद्यप्रतिपादकभावो हि वाक्यस्यार्थेनान्वयः । [5]यत्र न वक्तृविवक्षा न तत्र वाक्यस्य प्रतिपादकता । तथा च तत्प्रतीत्युद्देशेन [6]ब्रह्मप्रतिपादकत्वादिति हेतुभागार्थः ।

---

1. **इति प्रतिज्ञेति** आर्थिकीयं प्रतिज्ञा । वेदान्ताः उक्तरूपे ब्रह्मणि प्रमाणानि—इत्येव प्रतिज्ञास्वरूपम् । अत एव 'तत्प्रतीत्युद्देशेन ब्रह्मप्रतिपादकत्वात् इति हेतुभागार्थः' इति अनुपदं वक्ष्यमाणं सङ्गच्छते ।
2. मु. 'रूप' नास्ति ।
3. मु. तासुप
4. मु. अन्वयादित्येव
5. **यत्र**—यस्मिन् विषये
6. मु. 'ब्रह्म' नास्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्' (छा. उ. ६-२-१)

एतादृशतात्पर्यं कथं ब्रह्मणीत्याशङ्क्य 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥' इति अभियुक्तप्रसिद्धतात्पर्यलिङ्गेषु, 'गतिसामान्यात्' [ब्र. सू. १-१-१०] इति सूत्रोक्तं नानाशाखास्वेकेनैवरूपेणप्रतिपादनात्मकमभ्यासविशेषं दर्शयति—सदेवेति।

नन्वत्र कथं सूत्रकृता 'समन्वयात्' इति सिद्धवत् परं प्रति हेतुरुपादीयते। यदि तु वक्ष्यमाणैरीक्षत्याद्यधिकरणैः तत्तद्वाक्योदाहरणपूर्वकं तस्य साधयिष्यमाणत्वादित्यभिप्रायेण, तर्ह्युत्तराधिकरणेषु उपक्रमोपसंहारादिकमेव प्रतिपादनीयम्। तेषामेव प्रकृताधिकरणहेतूकृतसमन्वयसाधकत्वात्। न तु श्रुतिलिङ्गादिकम्। तेषां गुणप्रधानपदार्थसाधारणत्वात्। ननु उपक्रमोपसंहारादयोऽप्युच्यन्ते—'प्राणस्तथानुगमात्, वाक्यान्वयात्[1]' 'आनन्दमयोऽभ्यासात्[2]' 'कार्याख्यानादपूर्वम्[3]' 'तन्निष्ठस्य मोक्षोपदेशात्, अस्मिन्नस्य च तद्योगं शास्ति[4]' 'स्वाप्ययात्, तद्धेतुव्यपदेशाच्च[5]' 'ब्रह्मदृष्टिरुत्कर्षात्' [6]इत्यादिषु [7]उत्तरसूत्रेषु। तर्हि श्रुतिलिङ्गादीनां किमर्थमुपदेशः— इति चेत्—

उच्यते—यत्प्रतीत्युपयोगिश्रुतिलिङ्गादिकमादावन्ते च दृश्यते यस्मिन् पदनिकुरुम्बे तद्वाक्यं तदुपक्रमोपसंहारमुच्यते। एवं [8]श्रुत्यादीनां पौनःपुन्यं अभ्यासो नाम। ततश्चोपक्रमादेस्स्वरूपलाभोपयोगितया श्रुतिलिङ्गादिकमपेक्षितमेवेति तदपि सूत्रकृता निरूप्यते। न चैवमावश्यकत्वात् [9]श्रुत्यादिभिरेवोपपत्तौ [10]उपक्रमादिकं

---

1. अनयोः उपक्रमोपसंहारैकरूप्यं सूत्रितम्।
2. अभ्यासोऽत्र सूत्रितः।
3. अपूर्वत्वं अत्र सूत्रितम्।
4. फलं अनयोः सूत्रितम्।
5. अनयोः अर्थवादः सूत्रितः।
6. उपपत्तिः अत्र सूत्रिता।
7. मु. तत्तत्सूत्रेषु
8. **श्रुत्यादीनामिति** आदिशब्देन लिङ्गादिपरिग्रहः। लिङ्गाद्यनेकत्वमपि अभ्यासत्वेन विवक्षित इति भावः।
9. **श्रुत्यादिभिः**— श्रुत्यादिनिरूपणैः।
10. **उपक्रमादिकं**—उपक्रमादिनिरूपणम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किमर्थमिति वाच्यम् । अनेकार्थसमावेशो निर्णायकतया तदावश्यकत्वात् । तत्र उपक्रमोपसंहारैकरूप्यमेकं लिङ्गम् । तेन च—अनेकार्थगोचरश्रुतिलिङ्गादीनां एकस्मिन् [1]सन्दर्भे समाविष्टानां, अवगतैकवाक्यतानिर्वाहाय किमनुसारेण कस्य नयनं कर्तव्यं, इत्यपेक्षायां प्रबलानुसारेण दुर्बलस्य नयने स्थिते, यद्विषये उपक्रमोपसंहारैकरूप्यं लिङ्गं दृश्यते तत् प्रबलमिति—निर्धार्यते । एवमभ्यासादिष्वपि द्रष्टव्यम् । न चैवं श्रुतिलिङ्गादीनामुपक्रमोपसंहारादीनां च परस्परापेक्षतया किमपि न सिध्येदिति वाच्यम् । उपक्रमादिभिर्हि स्वरूपलाभार्थं श्रुत्यादिकमपेक्षितं श्रुत्यादिभिस्तु प्राबल्य-निर्णयार्थं उपक्रमादिकमपेक्षितमिति द्वारभेदात् न अन्योन्याश्रयो दोषावहः । दृश्यते ह्युत्पत्तिप्रतीतिरूपद्वारभेदेन [2]परस्परापेक्षत्व वह्निधूमयोः ।

ननु प्रकरणमहावाक्याभ्यां स्वरूपलाभार्थमेवोपक्रमादिकमपेक्षितम् । प्रकरणं नाम प्रधानाकांक्षा । एकार्थप्रधानकोऽनेकावान्तरवाक्यनिचयः साकांक्षो महावाक्य-मित्युच्यते । तत्र च प्राधान्यं उद्देश्यप्रतीतिविषयतारूपं वक्तृतात्पर्यनिर्णायकैरुप-क्रमादिभिरवगन्तव्यम् । लोके योऽर्थ उद्दिष्टो भवति तमेव आदावन्ते मध्ये च पुनः पुनः परामृशति । अतः प्राधान्यनिर्णयाधीनत्वात्प्रकरणमहावाक्यनिर्णयस्य कथं तेन [3]उपक्रमादिसमुन्मेष इति चेत्—

सत्यम् । अत एव श्रुतिलिङ्गावान्तरवाक्यानामेवोपक्रमादिसमुन्मेषकता कल्प्यते ।

एवमपूर्वत्वादीनामपि तात्पर्यनिर्णायकत्वम् । एतच्च सर्वं उत्तरेष्वधिकरणेषु स्पष्टीभविष्यति ।

[4]नन्वेवमपि सद्विद्यायाः सदेवसोम्येदमितिप्रतीकेन भाष्योदाहृतायाः कथं

---

1. **सन्दर्भे समाविष्टानां**—पदसमुदाये दृष्टानाम् ।

2. **परस्परापेक्षत्वं वन्हिधूमयोरिति** धूमस्योत्पत्तौ वन्ह्यपेक्षा, वन्हेः अनुमितौ धूमापेक्षा, ज्ञायमानधूमस्य वन्ह्यनुमापकत्वात्—इति भावः ।

3. **उपक्रमादिसमुन्मेषः** 'अयं एतद्विषयोपक्रमादिः' इति निर्णयः ।

4. निर्विशेषब्रह्मापलापिनां सद्विद्यायाःसविशेषपरत्वमुपपादयतां विशिष्टाद्वैतिनां मतं परिशीलयितुमारभते परिमलन्यायरक्षामणिशिवाद्वैतनिर्णयानुसारेण—**नन्वेवमपी-त्यादिना** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निर्विशेषे ब्रह्मणि तात्पर्यं निर्धारयितुं शक्यते । उपक्रमोपसंहारयोः ब्रह्मविषयत्वेन क्रियाप्राधान्याभावेऽपि सविशेषस्य जीवभिन्नस्यैव ब्रह्मणः प्रतिपादनावगमात् ।

उपक्रमे हि 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं [छा. उ. ६-१-३] इति सविशेषमेव ब्रह्म प्रतिपाद्यते । आदेशशब्दो हि शासितृपरः । आङ्पूर्वस्य दिशेः शासनार्थत्वात् । शासनं च जगन्नियमनानुकूलो व्यापारविशेषः आज्ञादिरूपः ।

एकविज्ञानेन सर्वविज्ञानं च यद्यपि कार्यस्वरूपविशेषाकारमादाय न शक्यते वक्तुम्, ज्ञातेऽपि ब्रह्मणि कार्यं विशेषाकारेण हि न ज्ञायते । तथाऽपि 'तत्तदवस्थाविशेषविशिष्टं कारणस्वरूपमेव कार्यम्' इत्यारम्भणाधिकरणे निरूपयिष्यमाणं [1]कार्यकारणानन्यत्वं स्वीकृत्य 'ब्रह्मणि विदिते उपादानतया कार्यानुप्रविष्टो ब्रह्माकारो ज्ञात एव' इत्येतदभिप्रायं सत् ब्रह्मण [2]उपादानताद्योतकमिति स्वीकर्तव्यम् । ब्रह्मणश्च उपादानत्वं यद्यपि विवर्तमाश्रित्य वक्तुं शक्यते, तथाऽपि 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' [छा. उ. ६-१-४] इति दृष्टान्ते परिणाम्युपादानस्य प्रतिपादनात् [3]परिणामितया ब्रह्म विवक्षितम् ।

अतः सप्रपञ्चमेव उपादानभूतं निमित्तकारणं च ब्रह्म अवगम्यते ।

तथा 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' [छा. उ. ६-२-१] इत्यत्रापि, इदंशब्देन [4]जगदुपादानात् तस्य सदेवेत्यनेन सृष्टेःप्रागपि सत्यत्वावधारणात्, अग्र इति कालस्य च तस्यां दशायां सत्ताप्रतिपादनात्, तदनन्तरं तदैक्षतेति वाक्येन सृष्ट्यनुकूलज्ञानसङ्कल्पकृतीनां प्रतिपादनात्, सविशेषपर एवोपक्रमोऽवधार्यते ।

---

1. **कार्यकारणानन्यत्वं**—कार्यस्य कारणाभेदं, न तु कारणव्यतिरेकेण कार्यस्य दुर्निरूपत्वम् । इत्थमेव विशिष्टाद्वैतिभिः तदनन्यत्वाधिकरणे स्वीयभाष्ये निरूपितम् ।

2. मु. उपादानतापरमिति

3. **परिणामितयेति** स्वसमसत्ताककार्योपादनतयेत्यर्थः । 'मृत्तिकेत्येव सत्यम्' इति श्रुतिः न कार्यानृतत्वपरा 'घटो मृत्तिका' इत्येव सत्यं—प्रामाणिकं, मृद्घटयोः द्रव्यैक्यं, न तु तार्किकाणामिव भिन्नद्रव्यत्वम्—इत्यर्थपरा—इति भावः ।

4. **जगदुपादानात्**—जगतो बोधनात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मध्ये च 'सन्मूलास्सोम्येमास्सर्वाः प्रजाः सदायतनास्सत्प्रतिष्ठाः' [छा. उ. ६-८-६] इति प्रजाशब्दोदितानां जीवानां सच्छब्दोदितात् ब्रह्मणो [1]मूलमूलिभावादिना भेदप्रतिपादनमुलभ्यते ।

'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' [छा. उ. ६-८-७] इति उपसंहारे च इदंशब्दोदितं तच्छब्देन परामृश्य तत्सत्यमिति सर्वस्य प्रपञ्चस्य सत्यत्वावधारणात्, सम्बोध्यसंबोधकभावेन श्वेतकेतूद्दालकयोर्भेदप्रतिपादनेन जीवनानात्वावगमाच्च, सप्रपञ्चतैवावगम्यते ।

अतः सद्विद्याया उपक्रमोपसंहारपर्यालोचनया परमार्थतस्सप्रपञ्चब्रह्मप्रतिपादनपरत्वावगमात् तदनुसारेण तत्त्वमसीति वाक्यमपि जीवब्रह्मभेदाविरोधेनैव व्याख्येयम् ।

[2]तथा हि—'अनृक्षरा ऋजवस्सन्तु पन्थाः' इति यथा बहुवचनस्य [3]स्वादेशः, यथा वा 'उत यत् सुन्वन्ति सामिधेनीस्तदन्वाह' इति यत्तद्भ्यां सप्तम्या लुक् भवति 'सुपां सुलुक्' [पा. सू. ७-१-३९] इति सूत्रेण, यथा वा 'गायत्रीं छन्दसां माता' इत्यत्र विभक्तिव्यत्ययेन [4]प्रथमार्थे द्वितीया, तथा तत्त्वमसीत्यत्रापि चतुर्थ्याः स्वादेशादीनामन्यतमं स्वीकृत्य तस्मै त्वमर्पणीयोऽसि[5] इत्यर्थः स्वीकार्यः, 'ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत' [म. ना. उ. २४-२] इति श्रुतेः ।

---

1. मु. मूलमूलिभावादीनामेव प्रति०

2. प्रथमसूत्रार्थनिरूपणावसाने विचारात् प्राक्तनायाः तत्त्वमसिवाक्यजन्यप्रतीतेः आपातप्रसिद्धिरूपत्वोपपादनावसरे परिमले वर्णितमर्थं अत्र योजयन् पूर्वपक्षमुत्तम्भयति—**तथाहीत्यादिना** ।

3. **स्वादेश इति** सुपांसुलुगितिसूत्रेणेत्यनेनान्वेति ।

4. **प्रथमार्थे द्वितीयेति** 'व्यत्ययो बहुलम्' इति सूत्रेणेति शेषः । यद्यपि विकरणाधिकारे अस्य सूत्रस्य पाठात् विकरणव्यत्ययपरता प्रतीयते, तथाऽपि बहुलग्रहणात् विभक्तिव्यत्ययपरताऽपि भवति । तथा च पातञ्जलं भाष्यम्—

'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेन ॥" इति ।

5. मु. 'असि' नास्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चम्या वा स्वादेशादीनामन्यतमं स्वीकृत्य तस्मात्त्वमुत्पन्नोऽसीत्यर्थः स्वीकर्तव्यः, 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतेः।

षष्ठ्या वा तत्त्रितयं स्वीकृत्य, तस्य त्वमसि—तत्स्वामिकोऽसीति यावत्— इति प्रतिपादनीयम्, 'स कारणं करणाधिपाधिपः' [श्वे. उ. ६-९] इति श्रुतेः।

सप्तम्या वा तत्त्रितयमुपेत्य तस्मिंस्त्वमसीत्यर्थो ग्राह्यः, 'सन्मूलास्सोम्येमास्सर्वाः प्रजाः सदायतनास्सत्प्रतिष्ठाः' इति श्रुतेः।

शरीरशरीरिभावाभिप्रायं वा सामानाधिकरण्यं भविष्यति मनुष्योऽहमित्यादिवत्, 'यस्यात्मा शरीरम्' [बृ. उ. ३-७-२२] इति श्रुतेः[1]। 'अघोरापापकाशिनी' इत्यत्र अपापकाशिनीति प्रश्लेषवत् [2]अतत्त्वमसीति वा सआत्मातत्त्वमसीत्यत्रापि प्रश्लेषो भविष्यति।

तस्मात् सद्विद्यायाः सप्रपञ्चजीवभिन्नब्रह्मपरत्वावगमात् कथं प्रत्यगभिन्ननिष्प्रपञ्चब्रह्मपरत्वमिति चेत्—

उच्यते—उततमादेशमित्युपक्रमो न ब्रह्मणश्शासितृत्वं प्रतिपादयति। तथात्वे कर्तरि घञं स्वीकृत्य तत्परत्वं वक्तव्यम्। न च तदुपपद्यते। 'अकर्तरि च कारके संज्ञायाम्'[3] [पा. सू. ३-३-१९] इति कर्तरि तस्य पर्युदासात्। न च करणार्थकस्यैव कर्तर्युपचारो भविष्यतीति सांप्रतम्। तथाक्लेशकल्पनायां मूलाभावात्, अक्लेशेनैवोपपत्तौ तदयोगाच्च, उपदेशोऽपि हि आङ्पूर्वस्य दिशेः प्रचुरः प्रयोग उपलभ्यते—'आदित्यो ब्रह्मेत्यादेशः' [छा. उ. ३-१९-१] 'उभयमेवादिष्टं भवति अध्यात्मं चाधिदैवतं च' [छा. उ. ३-१८-२] 'अथात आदेशो नेति नेति' [बृ. उ. २-३-६] 'गुह्या एवादेशा मधुकृतः' [छा. उ. ३-५-१] 'तदादिष्टेन [4]मार्गेण' इत्यादौ। यद्यपि उपदेशादेशयोः भेदेन प्रयोग उपलभ्यते

---

1. श्रुतेरिति माध्यन्दिनपाठानुसारिणी इयं श्रुतिः।

2. अतत्त्वमसीति वा प्रश्लेषो भविष्यतीति संबन्धः। 'द्वा सुपर्णा......अनश्नन्न्योऽभिचाकशीति' इति भेदश्रुतेः इति शेषः। प्रश्लेष इत्यस्य अकारस्य इत्यादिः। प्रश्लेषः- अन्तर्भावः।

3. संज्ञायामिति संज्ञाशब्देन रूढिर्विवक्षिता इति व्याख्यातारः। अत एव रञ्जनक्रियार्थकस्य रागशब्दस्य साधुत्वमिति तेषां भावः।

4. आ. वर्त्मनेत्यादौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'एष आदेशः एष उपदेशः' [तै. उ. १-११-४] इति, तथापि आदेशशब्देन उपदेशसामान्ये प्रतिपादिते गोबलीवर्दन्यायेन उपदेशशब्दः चोदनात्मकोपदेश-[1]विशेषपरो भविष्यति। 'एषा वेदोपनिषत्, एतदनुशासनम्' [तै. उ. १-११-४] इत्युत्तरत्र [2]तथैव दर्शनात्। उपदेशार्थत्वस्वीकारे च कर्मणि घञं स्वीकृत्य उपदेशैकगम्यत्वेन ब्रह्मोपक्रान्तमिति लभ्यते। न च अकर्तरिचेतिसूत्रे संज्ञायामिति ग्रहणात् प्रकृते कर्मणि घञ् न सम्भवतीति वाच्यम्। 'को भवता दायो दत्तः, को भवता लाभो लब्धः' इति प्रयोगोपपत्तये [3]असंज्ञायामिति प्रश्लेषस्याप्युपगमात्। अवश्यं चोपक्रमे उपदेशैकगम्यत्वं वक्तव्यम्। श्वेतकेतुं स्वपुत्रं गुरुकुलात् सर्वान्वेदानधीत्य गृहमागतं स्तब्धं मानिनं प्रति उद्दालकस्य स्तब्धतापनोदनार्थोऽयं प्रश्नः 'उत तमादेशमप्राक्ष्यः' इति–[4]स्तब्धस्य मानिनः 'किमत्र प्रष्टव्यं स्वत एवायमर्थ ऊहितुं शक्यते' इति शङ्का मा भूदिति। एवं च 'आचार्यवान् पुरुषो वेद' [छा. उ. ६-१४-२] इत्युपसंहारस्याप्युपक्रमानुगुण्यं लभ्यते।

एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च विवर्ताभिप्रायेणैव व्याख्येया, न तु परिणामाभिप्रायेण। वाक्यशेषानुसारात्। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति हि[5] विकारानृततापरम्। वाचाया आरम्भणं—आलम्बनं, विकारः–घटशरावादिः। तर्हि वाक् च तदालम्बनं च विकार इति द्वयं प्राप्तम्, नेत्याह—नामधेयं–घटःशराव इति नाममात्रम्। न तु तत्र वस्तुसत्ताऽस्तीति द्योत्यते नामधेयपदेन। दृष्टं च [6]नामपदस्याभासताद्योतकत्वं 'यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्' [भ. गी. १६-१७] इति। लोकेऽपि पुत्राभासे 'पुत्र इति नामधेयं नात्र पुत्रत्वमस्ति' इति। कथं तर्हि 'सन् घटः' इत्यादिव्यवहारः, इत्यत

---

1. मु॰ 'विशेष' नास्ति

2. **तथैव दर्शनादिति** गोबलीवर्दन्यायेनैव अर्थभेददर्शनात्, आदेशाद्यपौनरुक्त्याय अनुशासनमित्यस्य ईश्वरवचनमित्यर्थकरणात् इति भावः।

3. **असंज्ञायामिति प्रश्लेषस्येति** संज्ञायामिति प्रायिकं इति, भाष्यानुसारिणः पाणिनिसूत्रवृत्तिकृतः। असंज्ञायामिति प्रश्लेषस्य नावश्यकतेति तेषां भावः।

4. तत्र स्तब्धस्य

5. मु. 'हि' नास्ति

6. आ. नामधेयपदस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आह—मृत्तिकेत्येव सत्यमिति। मृत्तिकात्मनैव घटादिकं सत्यम्, न तु स्वरूपेणे-त्यभिप्रायः। [1]एवकारार्थप्रधानं चेदं वाक्यं [2]गुडजिह्विकान्यायेन मृदः सत्यत्वानुवादपूर्वकं विकारानृततप्रतिपादनाय। एवं उत्तरेष्वपि लोहादिदृष्टान्तेषु द्रष्टव्यम्। अमुमर्थं दार्ष्टान्तिके दर्शयति 'एवं सोम्य स आदेशो भवति' इति[3]। एवंशब्देन च 'वाचारम्भणं विकारो नामधेयम्, आदेश एव सत्यः'[4] इति प्रतिपादितं भवति। [5]इत्थमेव तैजसानां पदार्थानां त्रिवृत्करणनिरूपणावसरे स्पष्टमेव प्रतिपादितं—'यदग्ने रोहित रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्' [छा. उ. ६-४-१] इति। अत्र अपागादग्नेरग्नित्वमिति स्पष्टमेव विकारोपमर्दो दर्शितः। अतः स्वरसतो वाचारम्भणश्रुत्या विकारानृतत्वमवधार्यते।

[6]इत्थमेव विष्णुपुराणेऽपि प्रतिपादितं—'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः। [7]तमेवार्थस्वरूपेण भ्रान्तिदर्शनतस्स्थितम्॥' [वि. पु. १-२-६] इति। ज्ञानस्वरूपस्यैव परमात्मनोऽर्थाकारता भ्रमसिद्धेति हि श्लोकार्थः। तथा 'वस्त्वस्ति किं कुत्रचिदादिमध्यपर्यन्तहीनं सततैकरूपम्। यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तत्र[8] कुतो हि तत्त्वम्॥' [वि. पु. २-१२-४१] इति। विकारवर्गे आदिमध्यान्तवर्जितं पारमार्थिकं वस्तु नास्ति, अन्यथाभवतो वस्तुत्वाभावादित्यर्थः।

---

1. **एवकारार्थप्रधानमिति** अन्ययोगव्यवच्छेदपरमित्यर्थः।

2. **गुडजिह्विकान्यायेनेति** यथा बालानां जिह्वायां, औषधं ग्राहयितुं गुडो निक्षिप्यते, तथा विकारानृतताप्रतिपादनाय मृदः सत्यत्वोक्तिः, अन्यथा शून्यवादापत्तिभिया विकारानृततां न विश्वसेत्—इति भावः

3. मु. 'इति' नास्ति

4. मु. सत्यमिति

5. मु. 'एव' नास्ति

6. इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति व्यासवचनानुसारेण, उक्तार्थिकां वाचारम्भणश्रुतिं पुराणेन उपबृंहयन्, 'विष्णुपुराणं विशिष्टाद्वैतपरं' इति विशिष्टाद्वैतिनां अभिमानं निरस्यति—**इत्थमेवेत्यादिना**

7. **तमेवेति** पूर्वस्मिन् पद्ये प्रस्तुतस्य पुरुषोत्तमस्य विशेषणमिदम्। तमेव—परमार्थतो ज्ञानस्वरूपमेव सन्तं भ्रान्त्या अर्थस्वरूपेण स्थितं इत्यर्थः। प्रणम्येति अनन्तरपद्येनान्वयः।

8. मु. तस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा 'मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः । जनैस्स्वकर्मस्तिमितात्मबोधैराक्ष्यते ब्रूहि किमत्र वस्तु । [वि. पु. २-१२-४२] सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।' [वि. पु. २-१२-४५] इत्यादीनि प्रपञ्चानृततप्रतिपादकानि वचनानि दर्शनीयानि । अतो विवर्तमभिप्रेत्यैव एकविज्ञानेन सर्वविज्ञानं प्रतिपादनीयम्, न तु परिणामाभिप्रायेण । मृदादिदृष्टान्ताश्च उपादानस्वरूपे ज्ञाते तदात्मना उपादेयं विज्ञातं भवतीत्येवमभिप्रायाः, [1]न तु परिणामाभिप्रायाः ।

एवं 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' इत्यत्रापि निष्प्रपञ्चमेवात्मतत्त्वमुपक्षिप्यते । अत्र हि सच्छब्दो न सत्ताश्रयतया इदंशब्दार्थे पर्यवसितः । अपि तु ब्रह्मपरः । 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्स्मृतः ।' [भ. गी. १७-२३] इति स्मृतेः । तदैक्षतेति तच्छब्देन सत्पदार्थमाकृष्य ईक्षणादिपूर्वकस्रष्टृताप्रतिपादनात्, 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनास्सत्प्रतिष्ठाः' इति स्पष्टं तेन पदेन ब्रह्मण एव प्रतिपादनाच्च । एकमेवाद्वितीयमिति च सत्पदार्थविशेषणम् । उत्तरत्र ईक्षणादिभिस्तस्यैव विशेषणात् । 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यत्र सच्छब्दस्य स्थाने आत्मपदमुपक्षिप्य एक इति पुल्लिङ्गेन तस्यैव विशेषणाच्च । ततश्च अथात आदेशो नेति नेतीत्यादिश्रुतिसिद्धं यदेकमेवाद्वितीयं—सकलद्वैतशून्यं सत्तामात्रमात्मरूपं तद्व्यतिरेकेण सृष्टेः प्राक् इदं नामरूपात्मकं किमपि नासीदिति एवकारार्थप्रधानेन सदेवेत्यनेन प्रतिपाद्यते । अत्र नेतिनेतीतिश्रुतिसिद्धार्थकथनपूर्वकं प्रलयनिरूपणं, प्रलयकालस्य तदाधेयस्य प्रपञ्चसूक्ष्मरूपस्य च वस्तुतस्सत्तां निराकर्तुम् । प्रलयोपक्षेपश्च सृष्ट्युपक्षेपवत्, प्रपञ्चः कदाचित् सूक्ष्मावस्थः कदाचित् स्थूलावस्थ इत्यनेकविकारात्मको वाचारम्भणश्रुतिप्रतिपादितेन न्यायेन अनृत इति प्रतिपादनार्थः । यदाहुः—'मृल्लोहविष्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन ।' [मा. का. ३-१५] इति । तस्मात् उपक्रमे तावत् उपदेशैकगम्यं निष्प्रपञ्चमात्मतत्त्वं सोपपत्ति प्रतिपादितम् ।

मध्येऽपि जीवब्रह्मणोरभेदः परामृश्यते । 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति । यद्यपि च परमात्मनः 'यस्सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो

---

1. आ. 'न तु परिणामाभिप्रायाः' नास्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूतेभ्योऽन्तरः' [बृ. उ. ३-७-१५] इत्यन्तर्यामिरूपेणाप्यनुप्रवेशोऽस्ति, तथापि स नेह विवक्षितः। [1]जीवेनेति विशेषणात्।

एवमुपसंहारोऽप्युपक्रमानुगुण एवोपलभ्यते 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति। ऐतदात्म्यमिदंसर्वमिति हि 'इदं सर्वं यदयमात्मा' [बृ. उ. २-४६] इति श्रुत्यन्तरानुसारात् सदेवसोम्येदमग्र आसीदित्युपक्रमानुसाराच्च, एष आत्मा अस्येति बहुव्रीहिं कृत्वा ततो भावप्रत्यये कृते भावप्रत्ययस्य प्रकृत्यर्थप्रकारीभूतार्थपरत्वात् बहुव्रीह्यर्थविशेषणीभूतात्मपरामर्शकत्वेन 'एष आत्मा इदं सर्वम्' इति प्रतिपादयति। 'एष आत्मा इदं सर्वम्' इत्येव वक्तव्ये, सामानाधिकरण्यं आत्मात्मीयभावेनौपचारिकं–इति शङ्का माभूदिति द्योतनाय बहुव्रीहिभावप्रत्यययोरुपादानम्। तथासति, बहुव्रीहिणैव मुख्यया वृत्त्या आत्मात्मीयभावे लब्धे पुनर्भावप्रत्ययरूपयत्नान्तरकरणं व्यर्थं स्यादिति तर्केण सा शङ्का अपोदिता भविष्यतीति। तच्च सामानाधिकरण्यं 'मृत् घटः' इति परिणामाभिप्रायेण 'रजतं शुक्तिः' इत्यारोपितबाधाभिप्रायेण इति द्वेधाऽपि सम्भवतीति, तन्निर्धारणार्थं तत्सत्यमिति वाक्यम्। तत्र हि तच्छब्दः प्रकृतमात्मानं परामृशति। तस्यैव तात्पर्यविषयतया अस्मिन् सन्दर्भे प्राधान्यात्, सआत्मेतिवाक्ये तस्यैव परामर्शेन तदैकार्थ्यानुसाराच्च। ततश्च तच्छब्देनात्मानं परामृश्य तस्य विशिष्य सत्यताप्रतिपादनं अनात्मनोऽनृततां बोधयत् पूर्वोपक्षिप्तं सामानाधिकरण्यं बाधायामेवेति[2] व्यवस्थापयति।

ततश्च तत्त्वमसीति वाक्यमपि[3] [4]स्वस्वारस्यानुसारेणोपक्रमस्वारस्यानुसारेण च यथाश्रुतमेव। न तु विभक्तिलोपादिना क्लेशेन व्याख्येयम्। अपि च स्वस्वारस्य-

---

1. **जीवेनेति विशेषणादिति** न च जीवयतीति व्युत्पत्या जीवशब्देन अन्तर्याम्यभिधीयते इति वाच्यम्। जीवशब्दस्य जीवात्मनि रूढत्वात्, रूढिपरित्यागे कारणाभावात्, रूढेर्योगापहारित्वाच्च, जीवेनेति विशेषणं विनैव अन्तर्यामिरूपेण प्रवेशलाभसम्भवेन जीवेनेति विशेषणवैयर्थ्यापत्तेश्च इति भावः।

2. मु. 'इति' नास्ति

3. मु. 'अपि' नास्ति

4. **स्वस्वारस्यानुसारेण** — अभेदबोधानुकूलं समानविभक्तिकपदद्वयघटितत्वं स्वस्वारस्यं, तदबाधाय।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परित्यागेन विभक्तिलोपाद्याश्रयणे व्यामोह एव शङ्कावसरप्रदर्शितवचनव्यक्तिभिः स्यात्[1]। न हि–इयमेव वचनव्यक्तिः स्वीकर्तव्या नेयमिति–किञ्चिन्नियामकमस्ति।

ननु शरीरशरीरिभावेन योजनास्वीकारे स्वारस्यापरित्यागात् सैव स्वीकर्तव्येति भेदिपक्षेऽपि निर्धारणं लभ्यत इति चेत्—

न–शरीरवाचकानां शब्दानां शरीरिपर्यन्तत्वस्य [2]प्रागेव निराकृतत्वात्। [3]अपि च शरीरवाचकानां शरीरिपर्यन्तत्वस्वीकारेऽपि न तत्त्वमसीति वाक्यं यथाश्रुतार्थं सम्भवति। न ह्यत्र त्वंशब्दस्येश्वरशरीरभूतजीववाचकस्य ईश्वरे वृत्तिरभ्युपेयते। त्वंशब्दार्थस्य तच्छब्दार्थे विशेषणत्वाभावात्। किं तु तच्छब्दस्यैव प्रकृतपरमात्मपरामर्शकस्य त्वंशब्दार्थे [4]जीवे अभेदसम्बन्धेन विशेषणसमर्पकता। अन्यथा असीति मध्यमपुरुषो न स्यात्। त्वंशब्दार्थस्य इतरविशेषणत्वे आकांक्षाभावेन आख्यातसामानाधिकरण्यायोगात्। युष्मच्छब्दस्याख्यातसामानाधिकरण्य एव 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' [पा. सू. १-४-१०५] इति सूत्रेण मध्यमपुरुषो विधीयते। अतः त्वंशब्दार्थस्य विशेष्यत्वमभ्युपेतव्यम्। तत्र च परमात्मपरस्य तच्छब्दस्य वृत्तिः शरीरवाचकानां शरीरिपर्यन्तत्वाभ्युपगमेऽपि न सम्भवति, ईश्वरस्य जीवं प्रति शरीरत्वाभावात्। अतो मध्यमपुरुषोपपत्तये त्वंशब्दार्थविशेष्यकमेव [5]सामानाधिकरण्यमुपेयम्[6]। एवम् 'अहं ब्रह्मास्मि'

---

1. मु. 'स्यात्' नास्ति

2. प्रागेव—शास्त्राणामविद्यावद्विषयत्वोपपादकभाष्यव्याख्यानावसरे एव।

3. अपि चेत्यादि शिवाद्वैतविनिर्णये उपपादितमेतत्।

4. मु. 'जीवे' नास्ति

5. सामानाधिकरण्यं—अभेदबोधः।

6. उपेयमिति न च–त्वंशब्दः जीववाचकः जीवान्तर्यामिपर्यन्तः, शरीरवाचकानां शरीरिपर्यन्तत्वात्। जीवान्तर्यामिणि त्वम्पदार्थे तत्पदार्थविशेषणको बोधोऽभ्युपेयते, प्राधान्येन सम्बोध्याबोधकत्वेऽपि त्वंपदसमभिव्याहारमात्रेण असीति मध्यमपुरुषोपपत्तिः—इति वाच्यम्। यतः तत्र त्वंशब्दनिर्दिष्टे तच्छब्दनिर्दिष्टप्राग्वर्णितजगत्कारणपरमेश्वराभेदो बोध्यत इति असिशब्दप्रयोगादवगतेः त्वंशब्दः सम्बोध्यजीवमात्रपरः, न तु तदन्तर्यामिपर्यन्तः। सम्बोध्यं प्रति स्वात्मन इव स्वान्तर्यामिणः स्वानुभवेन वा प्राचीनोपदेशेन वा प्रसिद्धत्वाभावेन तस्य तं प्रत्युद्देश्यत्वानर्हत्वात्, प्रकृतस्य सद्रूपस्य परमेश्वरस्य कथञ्चित् स्वान्तर्यामितया प्रागुपदिष्टत्वसमर्थने तत्र तद्भेदशङ्काऽनुदयेन पौनःपुन्येन तद्बोधनानपेक्षणात् इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[बृ. उ. १-४-१०] इति सामानाधिकरण्यमपि उत्तमपुरुषोपपत्तये जीवविशेष्यक-मेव स्वीकर्तव्यम् । दृश्यते हि त्वमहंशब्दार्थयोर्विशेषणविशेष्यभावव्यत्यासे मध्य-मोत्तमपुरुषयोर्व्यत्यासः 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि' इति व्यतिहारवाक्ये । तथा अन्यत्रापि 'यदग्ने स्यामहं त्वं त्वं स्या अहं स्युष्टे सत्या इहाशिषः' इति । ततश्च असीतिपदानुसारेण त्वंशब्दार्थविशेष्यके सामानाधिकरण्ये स्थिते, शरीरवाचकानां शब्दानां शरीरिपर्यन्तत्वमिति व्युत्पत्त्यभ्युपगमेऽपि स्वारस्य-हानेरवर्जनीयतया, शङ्कावसरप्रदर्शितवचनव्यक्तिभिर्व्यामोह एव प्राप्नोतीति जीव-ब्रह्मणोस्स्वरूपाभेदमुपेत्यैव यथाश्रुतार्थोऽभ्युपेतव्यः ।

ननु—सिद्धान्तेऽपि एकधर्मिपर्यवसिततया त्रयाणां पदानां अखण्डार्थ-त्वाभ्युपगमेन मध्यमपुरुषस्वारस्यं परित्यक्तमेव, क्रियाकारकभावेनान्वयानभ्युपगमात् । कृत्स्नवाक्यस्वारस्यमपि परित्यक्तमेव, सर्वेषां पदानां लक्षणोपगमात्—इति चेत्, न ह्येतावता मध्यमपुरुषप्रयोगोऽसाधुर्भवति । [1]आलम्बनीभूते वाच्यार्थे अभेद-संसर्गेण तत्पदार्थप्रकारकत्वंपदार्थविशेष्यकबोधाभ्युपगमेन मध्यमपुरुषोपपादन-सम्भवात् । इत्थमेव हि स्तुतिपर्यवसितेष्वर्थवादेषु मध्यमादिपुरुषाणां गतिः ।

ननु च—तव कथमभेदेन वाच्यार्थवर्णनं कर्तुं शक्यम्, विरुद्धधर्माक्रान्तयोः 'नाहं सर्वज्ञः' इति भेदेनावगतयोश्च अभेदबोधनासम्भवात् । यदि च विरुद्धधर्माणां भेदस्य च मिथ्यात्वेन पारमार्थिकाभेदबोधने विरोधो नास्तीत्युच्येत, तदा वाच्यार्थ-पर्यवसानमस्तु, किमखण्डवस्तुलक्षकत्वेन—इति चेत्, न हि वयं [2]वाच्यार्थान्वयानुप पत्त्या अखण्डे वस्तुनि लक्षणां स्वीकुर्मः । किं तु ब्रह्मप्रकरणे सर्वत्र भेदप्रपञ्चनिषेध[3]-तन्निन्दावाक्यैः अद्वितीयवस्तुमात्रे वाक्यतात्पर्यस्य पर्यवसिततया तदुपपादनाय । ततश्च आलम्बनीभूतेऽर्थे पदस्वारस्यं न परित्यक्तमेव । पर्यवसितस्तु वाक्यार्थः तात्पर्यानुसार्येव ग्राह्य इति तदपरित्यागात् न कुत्रापि स्वारस्यहानम्, तात्पर्यानुसारेणैव महावाक्यार्थवर्णनस्य स्वारसिकत्वात् । दर्शपूर्णमासमहावाक्यार्थस्य श्रुतिलिङ्गाद्यनेक-

---

1. आलम्बनीभूते—द्वारीभूते । वाच्यार्थे इति सप्तम्यर्थविषयिताया बोधे अन्वयः ।

2. वाक्यार्था०

3, मु. निषेधनिन्दा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रमाणानुसारेण तत्तत्पदलक्षणाध्याहारादिभिर्वर्ण्यमानस्यापि न स्वारसिकता अपगता भवति । तत् कस्य हेतोः । तात्पर्यानुसारित्वात् । तथा प्रकृतेऽपि भविष्यति ।

ततश्च उपक्रमोपसंहारपरामर्शैर्गतिसामान्येन च सद्विद्याया निष्प्रपञ्चप्रत्यगभिन्नब्रह्मपरत्वे स्थिते, मध्ये यानि सृष्ट्याद्युपयोगिगुणप्रतिपादकानि [1]वाक्यानि तानि 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति न्यायमनुसृत्य तदुपयोगितयैव व्याख्येयानि ।

सन्मूलइतिवाक्यं च न मूलमूलिभावादिना भेदप्रतिपादनपरम् । अपि तु 'तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' इत्युपक्रमानुसारेण 'अस्ति सर्वप्रजानामुत्पत्तिस्थितिलयेष्वाधारभूतं सद्वस्तु' इत्येतावन्मात्रपरम् । तस्य च सद्वस्तुनः एकमेवाद्वितीयमिति प्रागेव स्वरूपं निर्णीतमिति तदनुसारेण, अन्यपरात् वाक्यात् प्रतीयमानो भेदो व्यावहारिको भविष्यतीति, न किञ्चिदेतत् ।

तत्त्वमसीत्यादौ सम्बोध्यसम्बोधकभावेन अर्थात् प्रतीयमानो भेदो न शास्त्रार्थः ।

[2]एवमुपक्रमोपसंहाराद्यनेकप्रमाणसिद्धतात्पर्यानुसारेण सद्विद्यायां अद्वैतात्मतत्त्वमेव प्रतिपाद्यत इति मनसि निधाय, [3]बादरायणेनापि मोक्षधर्मेषु श्वेतकेतुसुवर्चलोपाख्यानेन अद्वितीयात्मवस्तुपरतया सद्विद्या उपबृंहिता ।

एवं हि तत्रोपाख्यायते—[4]देवलस्य कन्या सुवर्चला जन्मान्तरसिद्धसहजब्रह्मात्मतत्त्वानुभवा तादृशं पतिमिच्छन्ती श्वेतकेतुं पितृसमीपतोलब्धात्मतत्त्वावबोधं उपश्रुत्य तं वृतवती । पित्राऽपि तस्मै निवेदिता । ताभ्यां दम्पतिभ्यां ब्रह्मनिष्ठाभ्यां वैदिककर्मानुष्ठानयुक्तं गार्हस्थ्यमाश्रित्य स्थितमिति ।

तत्र तयोरित्थं ब्रह्मोद्यकथारूपस्संवादःप्रवृत्तः—

"ततः कदाचित् भर्तारं श्वेतकेतुं सुवर्चला ।

---

1. **वाक्यानि**—'तदैक्षत' इत्यादीनि ।

2. अद्वैतात्मपरत्वे सद्विद्यायाः महाभारतोपबृंहणं शिवाद्वैतनिर्णये श्रीमदप्पय्यदीक्षितेन्द्रैः विस्तरेणोपपादितम्, तत् तथैवात्र योजयति—**एवमित्यादिना** ।

3. **बादरायणेनापि**—बादरायणेनैव । आन्ध्रपाठे 'अपि' नास्ति ।

4. मु. देवकन्या

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पप्रच्छ को भवानत्र ब्रूहि मे तद्द्विजोत्तम ।
तामाह भगवान् वाग्मी त्वया ज्ञातो न संशयः ।
द्विजोत्तमोऽहं सुभगे सत्यव्रतपरायणः ।
सा तमाह [1]अहमात्मानं पृच्छामि हृदिशायिनम् ।
तच्छ्रुत्वा प्रत्युवाचैनां [2]स न वक्ष्यति भामिनि ।
मनसैव समायुक्तमात्मानं मन्यसे यदि ।
तन्मिथ्या गोत्रसद्भावे वर्तते देहबन्धनः ।
[3]अहमित्येष भावोऽत्र त्वयि चापि समाहितः ।
त्वमप्यहमहं सर्वमहमित्येव वर्तते ।
नात्र [4]तत् परमार्थं तद्यन्मां त्वमनुपृच्छसि ॥" इति ।

अत्र—सद्विद्यायां तत्त्वमसीत्यसकृत्पित्रोपदिष्टः श्वेतकेतुः कथमात्मानं बुध्यते इति जिज्ञासमानया सुवर्चलया कस्त्वं द्विजोत्तमेति प्रश्नः कृतः, तत्प्रश्नाभिप्रायमवगच्छताऽपि श्वेतकेतुना 'क्रमेण सा तमर्थं बोधनीया' इति मत्वा तत्रोत्तरमुक्तम्-द्विजोत्तमेति संबोधयन्त्या त्वया ब्राह्मणोऽहमित्यवगतमेव, किमत्र प्रष्टव्यमिति । ततस्सुवर्चलया 'देहोपाधिकत्वेनात्मनि कल्पितं प्रत्यक्षं ब्राह्मण्यं न पृच्छामि, किं तु द्विजोत्तमोऽहमित्यहंशब्देन देहाद्विविक्तं यमात्मानं हृदिशायिनं निर्दिशसि तं पृच्छामि' इत्युक्ते तत्रोत्तरमुक्तम्—'अहंशब्दो मनश्शबलितात्मस्वरूपे प्रवर्तते । मनश्शबलितात्मस्वरूपं च मिथ्या ब्राह्मणकुलोत्पन्नदेहोपाधिके आत्मनि ब्राह्मण्यमिव । अतः आत्मतत्त्वजिज्ञासुभिः न अहंशब्दार्थः प्रष्टव्यः । अपि च अहंभावस्सर्वसाधारणः प्रत्यक्षसिद्धः । अतः परमार्थवस्तुजिज्ञासा चेत्, न अहम्भावः प्रश्नार्हः' इति । तदनन्तरं 'कर्तृत्वभोक्तृत्वादियुक्तं अहम्भावं यद्यनृतं त्वमवगच्छसि, तर्हि कर्तृत्वपूर्वकं वैदिकं कर्म कथमाचरसि' इति पृष्टे लोकसङ्ग्रहार्थं वैदिककर्माचरण-

---

1. मु. महात्मानं
2. मु. सर्वज्ञो मुनिपुङ्गवः
3. मु. इदमर्धं नास्ति
4. तत्—तस्मात् कारणात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मित्युक्तम्। तदनन्तरं 'सर्वैरात्मनि प्रयुज्यमानस्याहंशब्दस्य कथं तदर्थता न स्यात्' इति मनसि निधाय शब्दार्थसम्बन्धप्रश्ने कृते 'न संयोगादिः शब्दार्थयोस्सम्बन्धः, अपि तु वाच्यवाचकभावः' इत्युत्तरमुक्तम्। तदनन्तरं दम्पत्योरियं प्रश्नोत्तरपरम्परा।

सुवर्चला—सदाऽहङ्कारशब्दोऽयं व्यक्तमात्मनि संश्रितः।
न वाचस्तत्र वर्तन्त इति मिथ्या भविष्यति॥

श्वेतकेतुः—अहंशब्दो ह्यहंभावे नात्मभावे शुभप्रभे।
न वर्तन्ते परेऽचिन्त्ये वाचः सगुणलक्षणाः॥

सुवर्चला—अहम्भावोऽत्र को नाम ह्यात्मभावस्तथैव च।
तन्मे ब्रूहि यथान्यायमेवञ्चेन्मुनिसत्तम॥

श्वेतकेतुः—मृण्मयो हि घटाभासः तादृग्भाव इहेष्यते।
अहम्भावः, परेऽचिन्त्ये ह्यात्मभावो महान् परः।
न वाचस्तत्र वर्तन्त इति नैव विरुध्यते॥ इति॥

अत्र शब्दार्थयोर्वाच्यवाचकभावसम्बन्धोऽस्ति चेत् कथमहंशब्द आत्मवाचको न स्यादिति प्रश्ने कृते 'अहंशब्दो न आत्मनि मुख्यया वृत्त्या प्रवर्तते, किं तु अहमर्थे' इत्युत्तरमुक्तम्। ततः को नाम अहमर्थादन्य आत्मेति पृष्टे 'मृदि [1]घटाकारवत् आत्मन्यहंभावोऽप्याभासः' इति अहमर्थादात्मनो विवेकं दर्शयित्वा कल्पिताकारोपधानेन प्रवर्तमानश्शब्दो न शुद्धाधिष्ठानपर्यन्तं प्रवर्तते रजतोपधानेन प्रवर्तमानः शुक्तौ रजतशब्द इव। अतः 'कल्पितोपाधिनिमित्तोऽहंशब्दो न शुद्धात्मनि मुख्यया वृत्त्या प्रवर्तते' इति न विरुध्यत इत्युपसंहृतम्। ततोऽहंकाराद्विविक्त आत्मैव प्रपञ्चाधिष्ठानं ब्रह्मेति सिद्धवत्कृत्य, यथा आकाशस्य प्रपञ्चाश्रयत्वेऽपि तदसङ्गित्वं एवं ब्रह्मणोऽप्यसङ्गित्वे श्वेतकेतुना प्रतिपादिते पुनः इमे[2] प्रश्नोत्तरे—

सुवर्चला—निर्विकारं ह्यमूर्तं च निरंशं सर्वगं तथा।
दृश्यते च वियन्नित्यं तादृगात्मा न दृश्यते॥

1. मु. घटाभासवत्
2. मु. 'इमे' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'आत्मा वा इदमेक एवाग्र आसीत् [नान्यत् किञ्चन मिषत्]'

श्वेतकेतुः— त्वचा स्पृशति वै वायुमाकाशस्थं पुनः पुनः ।
तत्स्थं गन्धं तथा घ्राति ज्योतिः पश्यति चक्षुषा ॥

तमोरश्मिगणं चैव मेघजालं तथैव च ।
वर्षं तारागणं चैव नाकाशं दृश्यते पुनः ॥

आकाशस्याप्यथाकाशं सद्रूपमिति निश्चितम् ।
सदर्थे [1]कल्पितं ह्येतत् तत् सत्यं विष्णुरेव च ।
यानि नामानि गौणानि ह्युपचारात् परात्मनि ।

न चक्षुषा न मनसा न चान्येन परो विभुः ।
चिन्त्यते सूक्ष्मया बुद्ध्या वाचा वक्तुं न शक्यते ।
एतत्प्रपञ्चमखिलं तस्मिन्नेव प्रतिष्ठितम् । इति ।

अत्र–आकाशवत् प्रपञ्चाधिष्ठानं ब्रह्म कुतो न दृश्यत इति प्रश्ने 'आकाशस्थस्य वाय्वादेरेव ग्रहणमस्ति, न तु विविच्य आकाशस्य । यदा लौकिकाकाश एवेयं गतिः, तदा कैव कथा परमात्मनि ततोऽपि सूक्ष्मे । ततः सदर्थे कल्पितं सर्वम्, तच्च सद्रूपं सर्वाधिष्ठानत्वाद्व्यापकम्, तत्रोपाधिमाश्रित्य प्रवर्तमानाः शब्दाः शुद्धे साक्षात् न प्रवर्तन्ते' इत्युत्तरमुक्तम् ।

अस्यां प्रश्नोत्तरपरम्परायां 'मृण्मयो हि घटाभासः' इति दृष्टान्तोक्त्या वाचारम्भणश्रुत्यर्थः, '[2]सद्रूपमिति निश्चितम्' इति आत्मशब्देन प्रकृतस्य जीवस्य सद्रूपत्वोक्त्या तत्त्वमसीति वाक्यार्थः, 'सदर्थे कल्पितं ह्येतत् तत् सत्यं विष्णुरेव च' इत्यनेन 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा' इति श्रुत्यर्थश्च निष्प्रपञ्चप्रत्यगभिन्नब्रह्मप्रतिपत्त्यनुकूलो दर्शितः ।

तत् सिद्धं सद्विद्यायाः तात्पर्यग्राहकैर्लिङ्गैः क्रियाशेषतां विनैव निष्प्रपञ्चप्रत्यगभिन्नब्रह्मपरत्वम् ।

---

1. मु. कल्पितं सर्वं
2. मु. सत्स्वरूपमिति आत्म

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ऐ. उ. १-१-१) 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यं अयमात्मा ब्रह्म सर्वानुभूः' बृ. उ २-५-१९) 'ब्रह्मैवेदममृतं पुरस्तात्' (मु. उ. २ २-११) इत्यादीनि । न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमाने अर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । न च तेषां कर्तृस्वरूपप्रतिपादनपरताऽवसीयते, 'तत् केन कं पश्येत्' (बृ. उ. २ ४ १३) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः ।

आत्मा वा इदमिति । यथा चास्य वाक्यस्य निष्प्रपञ्चपरमात्मपरत्वं तथा 'आत्मगृहीतिः....' इत्यधिकरणे स्पष्टं भविष्यति । [1]मिषत्—चलत् ।

तदेतदिति । मधुब्राह्मणे पृथिव्यादिपर्यायेषु यत् सर्वात्मतया प्रतिपादितं तत् [2]एतत् ब्रह्म अपूर्वं कारणरहितम्, अनपरं—कार्यरहितम्, किं बहुना, आन्तरबाह्यसर्वद्वैतवर्जितं, सर्वानुभवरूपोऽयं आत्माऽपि ब्रह्मैवेति ।

यद्विज्ञानात् सर्वविज्ञानं प्रागुपक्षिप्तं तद्व्यतिरेकेण पुरस्तात् किमपि नास्तीत्याह—ब्रह्मैवेति । निश्चिते इति । निश्चायकैरुपक्रमादिभिरुपेते [3]इत्यर्थः । श्रुतेति । [4]श्रुतितात्पर्यविषयीभूतेत्यर्थः ।

यत्तु पूर्वपक्षिणोक्तं कर्तृस्तावकता वेदान्तानां भविष्यतीति, तन्न—'तत् केन कं पश्येत्' इत्यादिवाक्यानां कर्तृत्वादिनिषेधकानां तत्स्तावकत्वस्याप्रतीतेरित्याह—न च तेषामिति ।

यत्तु सिद्धवस्तुपराणां प्रमाणान्तरमूलकत्वमिति, तन्न—तथासति क्रियाप्रतिपादकानामपि 'तृप्तिकामः पचेत्' इति दृष्टान्तेन प्रमाणान्तरमूलकता किं न स्यात् ।

---

1. मु. 'मिषत्-चलत्' नास्ति । आन्ध्रपाठे वर्तते । तेन ज्ञायते-भाष्ये 'नान्यत् किञ्चन मिषत्' इत्यन्ता श्रुत्युदाहृतिः स्यात्—इति । तत्र अद्वितीयत्वप्रदर्शनार्थं तदन्तोक्तिः इति ज्ञेयम् ।

2. **एतत्**—बुद्ध्यादिसाक्षिरूपम् ।

3. **इत्यर्थ इति** एतेन 'निश्चिते' 'अवगम्यमाने' इति पुनरुक्तमिति शङ्का निरस्ता । भाष्ये **समन्वयः** तात्पर्यम् ।

4. क्रियाविधिशेषत्वेऽपि न श्रुतिवाच्यार्थहानिः, अतो व्याचष्टे—**श्रुतितात्पर्यविषयीभूतेति** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' (छा. उ. ६-८-७) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति, नैष दोषः—हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः।

यदि त्वलौकिकश्रेयस्साधनताकारस्य [1]प्रमाणान्तरायोग्यतया [2]तत्पराणां 'यजेत स्वर्गकामः' इत्यादीनां न प्रमाणान्तरमूलकत्वं तदा प्रकृतेऽपि तुल्यमित्याह—**न च परिनिष्ठिनेति**। **हेयोपादेयेति**। हेयत्वोपादेयत्वेत्यर्थः। **सर्वक्लेशप्रहाणादिति**। पूर्वपक्षिणा हि यथा प्रयोजनं लभ्यते तथा वाक्यार्थो वर्णनीय इत्युक्तम्। तदभ्युपगम्यत एव। परं तु वेदान्तानां कर्मविध्येकवाक्यत्वे न साक्षात्तल्लभ्यते, अपि तु प्रवृत्त्यादिद्वारा। प्रत्यगभिन्नब्रह्मपरत्वे तु तज्जनितज्ञानेन सर्वानर्थमूलाया अविद्याया निवृत्तेः साक्षादेव प्रयोजनं लभ्यत इति [3]भावः।

यत्तु पूर्वपक्षिणा उपासनाविधिशेषत्वं ब्रह्मप्रतिपादकानां पदानां भविष्यतीति पक्षान्तरमुक्तम्, तत्र, यानि दहरशाण्डिल्याद्युपासनाप्रकरणगतानि तेषामुपासनाविधिशेषता उपगतैव। यानि तु निष्प्रपञ्चात्मप्रकरणगतानि तेषां नोपासनाविधिशेषत्वम्। सर्वत्र [4]तदश्रवणात्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति क्वचिन्निर्विशेषब्रह्मप्रकरणे ध्यानविधिश्रवणेऽपि अहेयोपादेये जीवब्रह्मैक्ये प्रतिपादिते सति तज्ज्ञानमात्रेण क्रियाकारकात्मकस्यानर्थस्य निवृत्तेः प्रयोजनपर्यवसाने सति न उपक्रमाद्यवगतप्राधान्यभङ्गेन ध्यानविधिशेषतया ब्रह्मप्रतिपादनम्। किं तु ब्रह्मप्रतिपत्त्युपयोगितया ब्रह्मशेषतयैव [5]ध्यानप्रतिपादनम्। तदपि च ध्यानं भेदवासनानिवृत्तिपर्यन्तमेव, न तु तदनन्तरमपि। ततश्च निवृत्तभेदवासनस्य पुरुषस्य उपदेशमात्रेण सकलद्वैतनिवर्तकात्मसाक्षात्कारसिद्धेः तं प्रति

---

1. **प्रमाणान्तरायोग्यतयेति** तथा च भट्टवचनम्—'श्रेयस्साधनता ह्येषां नित्यं वेदात् प्रतीयते। ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः' इति।

2. मु. 'तत्पराणां' नास्ति

3. **भाव इति** ब्रह्मात्मतावगमादेवेतिभाष्यस्यैवकारलभ्योऽयं भावः।

4. **तदश्रवणादिति** उपासनाविधिः तच्छब्दार्थः।

5. मु. ध्यानादिप्रति०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः । न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति, एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । न हि ब्रह्मैकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति, येन उपासनाविधिशेषत्वं ब्रह्मणः प्रतिपाद्येत ।

यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टं, तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वात् न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम् । न च अनुमानगम्यं शास्त्रप्रामाण्यम् , येन अन्यत्र

ध्यानविधिर्निरालम्बन एवेत्याह—देवतादिप्रतिपादनस्येत्यादिना प्रतिपाद्येतेत्यन्तेन ।

यद्यप्यर्थवादवाक्यानां स्वार्थपरत्वं त्यक्तं विधेयस्तावकतया च विधिपरत्वमभ्युपगतं, तथाऽपि तेषां तत् स्वार्थप्रयोजनानवाप्तेरुपगतम् , वेदान्तानां तु स्वार्थे प्रयोजनलाभेन अर्थवादेषु स्वार्थपरित्यागो [1]दृष्ट इत्येतावता [2]स्वार्थपरता त्यक्तुं न शक्यत इत्याह—यद्यपीति । ननु—वेदान्तवाक्यं सिद्धब्रह्मप्रमितिजनकं—इत्यनुमितिर्न सम्भवति । [3]तथाभूतस्य वैदिकवाक्यान्तरस्य अदर्शनात्, तादृशानुमित्यभावे च कथं ब्रह्मप्रमाजनकत्वं—इति यदि कश्चिच्छङ्केत, तं प्रति, तादृशानुमित्यभावेऽप्याकाङ्क्षायोग्यतादिमत्तया ब्रह्मबोधकता सम्भवत्येवेत्याह—न चेति । [4]अनुमानगम्यं सत् शास्त्रस्य प्रमाजनकत्वं न भवतीत्यर्थः ।

---

1. मु. ‘ द्रष्टव्य ’

2. मु. ‘ स्वार्थः परित्यक्तुं ’

3. **तथाभूतस्य**–सिद्धब्रह्मप्रमितिजनकस्य, सिद्धार्थप्रमितिजनकस्य वा । **अदर्शनादिति** तथा च दृष्टान्ताभावेन व्याप्तिनिर्णयरूपकारणाभावात् नानुमितिः सम्भवतीत्यर्थः ।

4. स्वतःप्रमात्ववादेऽपि शास्त्रप्रामाण्यस्य अनुमानेनापि ज्ञेयत्वसम्भवात् ‘ न चानुमानगम्यं ’ इति भाष्यासाङ्गत्यमाशङ्क्य भाष्यं व्याचष्टे—**अनुमानगम्यं**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृष्टं निदर्शनमपेक्षेत । तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम् ।

अत्रापरे प्रत्यवतिष्ठन्ते—यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथाऽपि

एवं 'वेदान्तानां सिद्धब्रह्मपरत्वे प्रयोजनं न लभ्यत इति, लौकिकपदानां कार्यानन्विते शक्तौ सत्यामपि क्रियापदैस्सत्यादिपदानामन्वयः स्वीकर्तव्यः, ततश्च सत्यादिरूपस्यब्रह्मणःप्रत्यगभेदेनोपासनाकरणिका या भावना तस्यामेव वेदान्तानां तात्पर्यात् प्रत्यक्षादिविरुद्धेंऽशे आरोपमादायैवोपासनं सम्पादनीयम्' इति शङ्का 'सिद्धवस्तुपरत्वेऽपि प्रयोजनं लभ्यते' इति व्युत्पादनेन परिहृता ।

एकदेशिनस्तु–कार्यान्विते एव पदानां शक्तिः, अन्यपरेभ्योऽपि वाक्येभ्यो ब्रह्मसत्ता च सिध्यति–इति वदन्ति । तन्मतमनुवदति—अत्रापर इति ।

तेषामयमाशयः— लौकिकपदार्थव्युत्पत्त्यनुसारेण वेदे वाक्यार्थो वर्णनीयः । लौकिकी च व्युत्पत्तिः पदानां कार्ये एव । तत्रैवाद्यव्युत्पत्तिग्रहसम्भवात् । न हि कोशादिभ्य आद्यव्युत्पत्तिग्रहः सम्भवति । अत्यन्ताव्युत्पन्नस्य कोशाद्यर्थज्ञानासम्भवात् । ततश्च प्रयोज्यप्रयोजकवृद्धव्यवहाराधीन आद्यशक्तिग्रहो वर्णनीयः । स च व्युत्पित्सोरेवं भवति—प्रयोजकवृद्धस्य 'घटमानय, गाम्बधान' [1]इति शब्दोच्चारणानन्तरं प्रयोज्यवृद्धेन कृतं घटानयनं गोबन्धनं च पश्यतो घटानयनगोबन्धनयोः [2]कारणतया स्वीयस्तन्यपानादिदृष्टान्तेन कृतिचिकीर्षयोर्मध्यमवृद्धगतयोरनुमाने सति चिकीर्षायाः कार्यताज्ञानमूलकत्वात् 'नूनमनेन आनयनबन्धनयोः कार्यता अवगता' इति बुद्धिर्भवति । तस्यां च बुद्धौ शब्दोच्चारणातिरिक्तस्य कारणस्य असम्भवात् प्रयोजकवृद्धोच्चारितःशब्द एव कारणमिति निर्णये, अशक्तस्य कारणत्वासम्भवात् 'एतादृशश्शब्दः कार्यविशेषे आनयनादौ शक्तः' इति निर्णयो भवति । ततश्च आवापोद्वापाभ्यां यथायथं, कार्यसामान्यं प्रथमावगतं अविहायैव तेषु तेषु समभि-

---

सदिति । तथा च—'शास्त्रस्य प्रमाजनकत्वं अनुमानगम्यं सत् भवति—उत्पद्यते इति न—इति भाष्यार्थ इति भावः । अनुमानगम्यं न भवति–अनुमानेन न भवति–इति भाष्यार्थ इति **कल्पतरुः** । मु. सम्भवतीत्यर्थः

1. मु. इत्यादि
2. मु. कार्यतया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याहारविशेषेषु तत्तत्कार्यविशेषप्रत्ययः। ततश्च कोशादिभ्योऽपि उपजीव्यप्राथमिकव्युत्पत्तिग्रहानुसारेण कार्यान्वित एव तत्तत्पदार्थे शक्तिग्रहः, न तु तदनन्विते–इति।

ननु—कार्यान्विते शक्तिरित्यपि नियमो न सम्भवति। देवदत्तोगच्छतीत्यादौ गम्यादेः [1]कार्यान्वितार्थप्रतिपादकत्वासम्भवादिति–चेत्—

न—कार्ये पदानां शक्तिरित्येव नियमः न तु कार्यान्विते, तच्च कार्यं क्वचित् स्वातन्त्र्येण प्रतिपाद्यते क्वचिच्च कारकादिसम्बन्धितया–इत्येवं स्वीक्रियते। न च–अयमपि नियमो न सम्भवति 'कस्यायं पुरुषः' 'राज्ञः' इति कार्यानन्वितार्थप्रतिपादकानामपि समभिव्याहाराणां, भूयसामुपलम्भादिति–वाच्यम्। तत्रापि 'स [2]आकारणीयः' इत्यादिपदाध्याहारेणैव शाब्दबोधजनकता। तदभावे तु पदार्थासंसर्गाग्रह एव, आद्यव्युत्पत्त्यनुरोधात्।

ननु–कार्यं विहायापि आद्यव्युत्पत्तिग्रहः सम्भवति। मात्रादयोऽङ्गुल्या घटादिकं निर्दिश्य 'अयं घटः' इति यदा शब्दं प्रयुञ्जते तदा हि बालस्य 'घटशब्दवाच्योऽयं' इति प्रतीतिर्भवति। न च–तदाऽपि कथमेषा प्रतीतिः? 'अङ्गुलीनिर्देशपूर्वकशब्दोच्चारणं तत्र तत्र विषये शक्तिग्रहार्थम्' इति बालेन प्रागपरिज्ञानादिति–वाच्यम्। यद्यपि बालेन अङ्गुलीनिर्देशेनोच्चारणकालेऽयमर्थो न ज्ञातः 'एषोऽङ्गुलीनिर्देशश्शब्दोच्चारणसहितश्शक्तिग्रहार्थः' इति, तथापि तादृशं निर्देशं बहुधा दृष्ट्वा 'अयं शब्द एतदर्थसहचरितः' इति ज्ञातमेव। तेन च सम्बन्धेन 'सम्बन्धिदर्शनात् सम्बध्यन्तरे स्मृतिः' इति न्यायेन घटशब्दोच्चारणे बालस्य घटबोधो जायते। ततः तद्बोधनिर्वाहकतया तस्मिन्नर्थे [3]शब्दस्य शक्तिं कल्पयति–इति चेत्—

---

1. आ. कार्यान्तरान्विता०

2. आकारणं—आह्वानम्।

3. मु. 'शब्दस्य' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न—बालस्य प्राग्बोधो घटादिविषयकः घटशब्दोच्चारणे साहचर्यसम्बन्धमादाय [1]यो वृत्तः न तत्र उत्तरभाविशक्तिकल्पनमुपयुज्यते । अर्थज्ञानात् प्रागेव शक्तिज्ञानस्यापेक्षितत्वात् । नाप्युत्तरभावितत्तदर्थज्ञानाय । यथा प्राक् शक्तिग्रहं विनैव साहचर्यज्ञानमात्रेणार्थबोध उपपन्नः उत्तरत्रापि तथैवोपपादनसम्भवात् ।

अथापि स्यात्—'पुत्रस्ते जातः' इति वाक्यात् सिद्धेऽप्याद्यव्युत्पत्तिग्रहः सम्भवति । व्युत्पित्सुर्बालो यदा देवदत्तगृहे पुत्रजन्म [2]दृष्ट्वा तद्वार्ताहारेण सह देवदत्तसमीपमागच्छति, तदा 'देवदत्त पुत्रस्ते जातः' इति वार्ताहारवाक्यश्रवणानन्तरं हर्षपूर्वकं देवदत्तं स्नानंकुर्वाणमुपलभ्य हर्षपूर्वकस्नानकरणे देवदत्तस्य किं निमित्तमित्यालोचयन् 'मया देवदत्तस्य गृहे दृष्टं यत् पुत्रजन्म तत् नूनमनेन ज्ञातं' इति निश्चिन्वन् 'तज्ज्ञाने कारणान्तरस्याभावात् 'पुत्रस्ते जातः' इति शब्द एव तज्ज्ञाने कारणम्' इति निश्चयवान् भवेदिति ।

न स्यात्—बालेन दृष्टेषु बहुषु पदार्थेषु सत्सु इतरपदार्थज्ञानमेव कुतो हर्षपूर्वकस्नानकारणत्वेन न कल्प्यते । यदि तेषां हर्षपूर्वकस्नानकारणत्वं तेन न गृहीतमित्युच्यते, तदा इदमपि कथं गृहीतमिति वक्तव्यम् । न ह्यत्यन्ताव्युत्पन्नस्य 'पुत्रजन्म श्रुत्वा हर्षपूर्वकं स्नान्ति, पुत्रजन्म च हर्षकारणं' इत्युपदेशजनितं ज्ञानं सम्भवति । ततश्च केषुचिच्छब्देषु [3]वृद्धव्यवहारानुसारेण व्युत्पन्नस्य आप्तोपदेशेन 'पुत्रजन्म हर्षकारणं, तच्छ्रुत्वा च स्नान्ति' इति निश्चयवत एव तथाऽनुमितिपूर्वकं शब्दशक्तिग्रह इति वक्तव्यम् । ततश्च आद्यव्युत्पत्तिग्रहस्य [4]कार्यस्थल एव वक्तव्यतया तदनुसारेण 'पुत्रस्ते जातः' इति वाक्यमपि 'अतः स्नानं कर्तव्यं' इत्यध्याहारसंयुक्तमेव तदर्थप्रतिपादकमित्यपि निश्चिनोति ।

तत् सिद्धं सर्वेषां पदानां कार्यबोधकतयैव शाब्दज्ञानजनकत्वमिति ।

अतो लोकव्युत्पत्त्यनुसारेण वेदान्तानामपि कार्यपरत्वमेव, न तु सिद्धब्रह्म-

---

1. मु. प्रवृत्तः
2. मु. दृष्ट्वा वार्ता०
3. मु. 'वृद्ध' नास्ति
4. मु. कार्यव्युत्पत्तिस्थले

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते, यथा यूपाहवनीयादीनि

मात्रपरत्वम् । ततश्च वैदिकलिङां धात्वर्थातिरिक्तकार्यप्रतिपादकतायाः [1]स्वर्गकामादिपदसमभिव्याहारेण निर्णीततया वेदान्तेष्वपि उपासीतेतितिलिङ धात्वर्थातिरिक्तमेव कार्यं प्रतिपादनीयम् । कार्यं च कृतिसाध्यम् । कृतिश्च सविषया । सा च साक्षात् धात्वर्थमेव यागपाकादिकं[2] जनयति अपूर्वं तु न [3]तथेति अपूर्वस्य कृतिजन्यतायां मध्ये घटकापेक्षायां कृतेर्विषयापेक्षायां च, यथा 'यजेत स्वर्गकामः इत्यत्र विषयतया घटकतया च याग एवान्वेति तथा प्रकृतेऽप्युपासीतेत्यत्र उपासनमेव कृतेर्विषयापेक्षायां घटकापेक्षायां चान्वेति । कृतिविषय एव च अपूर्वविषय इत्युच्यते । घटक एव च करणमित्युच्यते । यदाहुः[4]—'कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः । कार्येऽसंघटिताकारे करणत्वेन सम्मतः ॥' इति । ततश्च उपासनाविषयके कार्येऽवगते उपासनायाः ज्ञानसन्ततिरूपायाःसविषयतया विषयापेक्षायां आत्मा विषयतया 'आत्मेत्येवोपासीत' [बृ. उ. १-४-७] इति स्ववाक्ये श्रुतः सम्बध्यते । ततश्च आत्मनः अपूर्वापरपर्याये विधौ परम्परया विषयता । तदिदमुक्तम् —**प्रतिपत्तिविधिविषयतयेति** । ततश्च 'किंरूप आत्मा'

---

1. **स्वर्गकामादिपदसमभिव्याहारेणेति** 'स्वर्गकामो यजेत' इत्यत्र लिङर्थे कार्ये स्वर्गकामो नियोज्यत्वेनान्वेति । नियोज्यान्वयं विना कार्यस्य प्रतीत्यपर्यवसानात्, स्वर्गकामस्य च समभिव्याहृतपदबोध्यस्य तथाऽन्वययोग्यत्वात् । तस्य च नियोज्यत्वं 'ममेदं कार्यं' इति बोद्धृत्वम् । तदुक्तं प्राभाकरैः—नियोज्यः स च कार्यं यः स्वकीयत्वेन बुद्ध्यते' इति । स च बोधः स्वर्गकामस्य स्वर्गसाधत्वेन ज्ञाते विषये न भवति । धात्वर्थक्रियारूपं च कार्यं आशुतरविनाशित्वात् कालान्तरभाविस्वर्गसाधनतया निश्चितम् । अतः स्वर्गकामपदसमभिव्याहृतलिङः धात्वर्थातिरिक्तस्थायिकार्यप्रतिपादकत्वं इति भावः ।

2. आ ०दिकं स्वविषयं जन०

3. **तथा**—साक्षात् कृतिजन्यम् ।

4. **आहुरिति** भवनाथादय इति शेषः । पद्यस्यायमर्थः—लिङा ह्यपूर्वं कार्यत्वेन अभिधेयम्, न तु अपूर्वत्वादिना । तेन रूपेण पूर्वमनुपस्थिते तत्र शक्तिग्रहासम्भवात् । कार्यत्वं च कृतिसाध्यत्वं, कृतिश्च विषयनिरूपणाधीननिरूपणा । कृतेश्च विषयः धात्वर्थो यागः । ततश्च कार्यत्वेन प्रतीतौ यागो विषयो भवति । कार्यस्वरूपसिद्धौ तु करणं भवति यागः । प्रतिपत्त्यनुबन्धो विषयः, स्वरूपसिद्ध्यनुबन्धः करणं—इति । **असङ्घटिताकारे**—अलब्धस्वरूपे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते तद्वत् ।

इत्यपेक्षायां 'सत्यंज्ञानमनन्तं' इत्यादिवाक्यजातं तत्स्वरूपबोधकतया उपयुक्तं भवति ।

[1]ननु सत्यादिवाक्यस्य किं उपासनाविध्येकवाक्यतां प्राप्तस्य सत्यादिरूपब्रह्मावबोधकत्वम्, उत तदेकवाक्यतामनापन्नस्य । नाद्यः । उपासनानियोगे हि सत्यादिपदार्थस्य साक्षात् परम्परया वा विषयत्वेनान्वयो वक्तुं न शक्यते । स्ववाक्यगताभ्यां [2]उपासनात्मभ्यामवरोधात् । न द्वितीयः । कार्यान्वयं विना वाक्यस्याबोधकत्वात् । अतो न सत्यादिरूपब्रह्मस्वरूपलाभ इति चेत्—

न—उपासनानियोगो हि स्वविषयतयाऽवगतस्यात्मनस्स्वरूपनिर्धारणमपेक्षते । सत्यादिपदार्थाश्च तत्प्रकरणपठिता वाक्यार्थीभावमपेक्षमाणाः स्वशेषितया उपासनानियोगेनैव अन्वयं प्राप्नुवन्ति । तथा च उभयाकाङ्क्षा निवृत्ता भविष्यति । शेषशेषिभावेनान्वय एव च ग्राहकग्रहणमिति प्राभाकरैर्व्यवह्रियते । ततश्च यद्यपि सत्यादिपदार्थस्य न साक्षादुपास्यकोटौ निवेशः, तत्कोटेः समानवाक्योपात्तेनात्मना अवरुद्धत्वात् ; [3]तथाऽपि स्वान्वितानां सत्यादिपदार्थानां उपास्यस्वरूपापेक्षायां अवगतान्वयनिर्वाहार्थं उपासनानियोग एव तेषामात्मविशेषणतामाक्षिपतीति उपादानापरपर्याय-[4]विध्याक्षेपरूपप्रमाणसहकृतो वेदान्तवाक्यनिचयः सत्याद्यात्मकमुपास्यं समर्पयतीति न काचिदनुपपत्तिः ।

---

1. आत्मनः स्वरूपं केवलं शास्त्रप्रमाणकम्, न तु तस्य सत्यज्ञानादिरूपत्वम्—इति शङ्कते—**नन्विति** ।

2. **उपासनात्मभ्यामवरोधादिति** धात्वर्थोपासनान्वयेन साक्षाद्विषयाकाङ्क्षायाः उपासनाविषयाकाङ्क्षारूपायाः परम्परया विषयाकाङ्क्षायाः आत्मान्वयेन शान्तत्वेन निराकाङ्क्षत्वात् इत्यर्थः ।

3. **तथाऽपीत्यादि** इत्यत्रयोजना—तथाऽपि उपासनानियोग एव उपास्यस्वरूपापेक्षायां स्वान्वितानां, सत्यादिपदार्थानां अवगतान्वयनिर्वाहार्थं तेषामात्मविशेषणतामाक्षिपति—इति ।

4. **विध्याक्षेपरूपप्रमाणसहकृत इति** विध्याक्षेपरूपविधिव्यापारात्मकं इदं उपादानप्रमाणं शब्दप्रमाणान्तर्भूतम्, न तु 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य । तथा हि शास्त्रतात्पर्यविदामनुक्रमणम्–'दृष्टो हि तस्यार्थः कर्मावबोधनम्' (शाब. भा. १.१.१) इति। 'चोदनेति क्रियायाः प्रवर्तकं वचनम्'। (शाब. भा. १ - १ २) 'तस्य ज्ञानमुपदेशः—' (जै. सू. १·१·५) 'तत् भूतानां क्रियार्थेन समाम्नायः—' (जै. सू १-१ २५) 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्—' (जै. सू १ २ १) इति च। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत् कुतश्चिद्विषयविशेषान्निवर्तयच्च अर्थवत् शास्त्रम् । तच्छेषतया चान्यदुपयुक्तम् । तत्सामान्यात् वेदान्तानामपि तथैवार्थवत्त्वं स्यात् ।

न च–नियोगपरेभ्यो वाक्येभ्यः ब्रह्मसिद्धिः देवताधिकरणन्यायेन वक्तव्या, स च प्रमाणान्तरविरोधे[1] न प्रवर्तत इति कथं प्रत्यगभिन्नं निष्प्रपञ्चं ब्रह्म एकदेश्यभिमतं शास्त्रेण सिध्येदिति—साम्प्रतम् । सप्रपञ्चत्वनिष्प्रपञ्चत्वयोश्शुक्तिरजतन्यायेन, एकस्यैव ब्रह्मणो जीवेश्वरात्मना भेदस्यौपाधिकाकाशभेदन्यायेन च उपपादयितुं शक्यतया प्रमाणान्तरविरोधपरिहारसम्भवात् । ततश्च [2]यथा—'यूपे पशुं बध्नाति, यूपमष्टाश्रीकरोति, यूपं तक्षति, खादिरो यूपो भवति' इत्यादिवाक्यपर्यालोचनया पशुनियोजनयोग्यः काष्ठविशेषः यूपशब्दार्थः, 'अग्नीनादधीत, नक्तं गार्हपत्यमादधाति, दिवाऽऽहवनीयं' इत्यादिवाक्यपर्यालोचनया आधानविशेषसंस्कृतोऽग्निराहवनीयादिशब्दार्थः, इति च पशुनियोजनादिपरेभ्यो वाक्येभ्योऽवगम्यते, तथा उपासनाविधिपरादेव वाक्यात् ब्रह्म सिध्यति ।

एतत्सर्वमभिप्रेत्याह — यद्यपि शास्त्रप्रमाणकमिति । **प्रवृत्तिनिवृत्तिप्रयोजनत्वादिति**। विधिरूपं शास्त्रं प्रवृत्तिप्रयोजनकम् । प्रवृत्तिश्च कार्यताज्ञानाधीनेति प्रवृत्तिसिद्ध्यर्थं 'यजेत स्वर्गकामः' इत्यत्र स्वर्गकामनियोज्यकं यागविषयकं कार्यं प्रतिपाद्यते । निवृत्तिप्रयोजनकं निषेधशास्त्रम् । निवृत्तिश्च तत्तत्क्रियाप्रागभाव-

---

लौकिकवाक्यार्थज्ञानमूलकश्रुतार्थापत्तिवत् शाब्दप्रमोपजीवि तदनन्तरं प्रवर्तमानं प्रमाणान्तरं—इति गुरुमतमर्यादा । अतः विध्याक्षिप्तस्यापि श्रौतत्वम् ।

1. मु. विरुद्धे

2. मु. 'यथा' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सति च विधिपरत्वे यथा स्वर्गादिकामस्य अग्निहोत्रादि साधनं विधीयते एवं अमृतत्वकामस्य ब्रह्मज्ञानं विधीयते इति युक्तम् ।

परिपालनानुकूलो यत्नविशेषः, सोऽपि कार्यताज्ञानाधीन इति 'न कलञ्जं भक्षयेत्' इत्यत्र कलञ्जभक्षणप्रागभावपरिपालनविषयकं कार्यं प्रतिपादनीयम् । ततश्च सर्वं शास्त्रं कार्यप्रतिपादकमेवेति वेदान्तानामपि कार्यप्रतिपादकत्वं स्वीकृत्य तच्छेषतयैव ब्रह्मप्रतिपादकता आस्थेयेति भावः । शास्त्रतात्पर्यविदां — वेदतात्पर्यविदाम् । अनुक्रमणं–वेदार्थसङ्ग्राहकवचनजातम् । दृष्टोहीति चोदनेतीति च शबरस्वामिवचनम् । वेदस्य कार्यप्रतिपादनमेव दृष्टं प्रयोजनमिति, चोदनासूत्रे चोदनाशब्दः कार्यानुकूलप्रवृत्तिजनकशब्दपर इति च, वाक्यद्वयस्यार्थः। तस्येत्यारभ्य जैमिनिसूत्रावयवाः । कार्यस्य ज्ञानजनको विधिः—इति, तत्–तत्र सिद्धे पदार्थे विद्यमानानां कार्यप्रतिपादकेन पदेन सह समभिव्याहारो द्रष्टव्यः—इति, वेदस्य कार्यपरत्वात् अतत्पराणां आनर्थक्यं—इति च, सूत्रावयवार्थः । एतद्वचनपर्यालोचनया 'लिङादिभिः साक्षात् कार्यं प्रतिपाद्यते, अवशिष्टो वेदभागः तच्छेषभूतः, अन्यथा आनर्थक्यं स्यात्' इति स्पष्टमेव प्रतीयते ।

ननु—नियोगः पुरुषकृतिसाध्यतयाऽवगतः कृतिमपेक्षते । पुरुषकृतिश्च स्वविषये मयेदंकर्तव्यमितिज्ञानं विना न भवति । तत् ज्ञानं साश्रयम् । यश्च तादृशज्ञानाश्रयः स एव नियोज्यः । अतो नियोगो नियोज्यमपेक्षते । पुरुषस्य च भाविनि कार्ये 'कर्तुं शक्यं एतन्मया' इति ज्ञानं तदैव भवति यदा लोकवेदसिद्धकारणकलापवत्ताज्ञानं स्वस्मिन् भवति । लोकतश्च कार्यमात्रे 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायेन तत्तत्कार्यजन्यफलकामना कारणमिति इहापि नियोज्यविशेषणतया फलकामनायां लोकतस्सिद्धायां कामनाविषयीभूतम्फलमिदमिति विशिष्य निर्धारणं कथं भविष्यतीति अत आह—सति चेति । नन्वग्निहोत्रादौ स्वर्गादिकामनायाः नियोज्यविशेषणतया श्रुतत्वात् अस्तु तत्र नियोगस्य निराकाङ्क्षता, प्रकृते त्वमृतत्वकामना नियोज्यविशेषणतया न श्रुतेति चेत्, सत्यं न श्रुता । किं तु यथा—'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इत्यत्र रात्रिसत्रस्य नियोज्यविशेषणतया फलकामनायामपेक्षितायां 'प्रतितिष्ठन्ति ह वा इत्यर्थवादावगतायाः प्रतिष्ठाया एव 'प्रतितिष्ठासन्ति' इति सन्नर्थविपरिणामं यच्छब्दस्य व्यवहितान्वयं चाश्रित्य, 'ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयुः' इति लिङर्थकल्पनेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्—कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति। तत्र धर्मज्ञानफलादनुष्ठाना-पेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति।

नार्हत्येवं भवितुम्। कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमान-त्वात्। 'आत्मा वा अरे द्रष्टव्यः' (बृ. उ. २-४-५) 'य आत्माऽपह-तपाप्मा....सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा. उ. ८-७-१) 'आत्मे-

फलत्वं स्वीकृत्य, प्रतिष्ठाकामना रात्रिसत्रनियोज्यविशेषणतया कल्प्यते, तथा— 'येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहि' [बृ. उ. ३-२-४-१] इति अमृतत्वसाधनप्रश्नोपक्रमात् 'एतावदरे खल्वमृतत्वम्' इति तदुपसंहाराच्च 'अत्मा वा अरे द्रष्टव्यः' इति विहितोपासनायां 'योऽमृतत्व-कामः तेनात्मा द्रष्टव्यः' इति [1]वचनव्यक्त्या अमृतत्वकामना अधिकारिविशेषणं भविष्यति।

ननु—वेदान्तेषु यद्यमृतत्वकामस्य ब्रह्मोपासनं विधीयते, तर्ह्यस्मिन् वेदान्त-मीमांसाशास्त्रेऽपि तदुपासनमेव प्राधान्येन विचारणीयं स्यात्। ततश्च उपासनस्यापि धर्मत्वाविशेषात् 'अथातो धर्मजिज्ञासा' इति प्रतिज्ञयैव ब्रह्मोपासनाविचारोऽपि प्रतिज्ञातः स्यात्। न च जैमिनिना उपासनारूपं ज्योतिष्टोमादिरूपं च धर्मं विचार्यत्वेन प्रतिज्ञाय उपासना न विचारितेति वक्तुं शक्यम्। अतोऽस्मिञ्च्छास्त्रे प्राधान्येन विचारणीयस्यार्थस्य शास्त्रान्तरेणैव विचारिततया एतच्छास्त्रारम्भो व्यर्थः प्रसज्येत। अपि च उपासनाजन्यत्वे मोक्षस्य स्वर्गादिवदनित्यता च स्यात्—इति शङ्कते—**नन्विति**।

नार्हत्येवमिति। 'अथातो धर्मजिज्ञासा' इत्यत्र धर्मपदं यद्यपि [2]साधार-ण्येन बाह्यं ज्योतिष्टोमादिकं आन्तरं च उपासनादिकं प्रतिपादयति, तथाऽपि जैमि-

---

1. **वचनव्यक्त्या**—वचनविपरिणामेन।

2. **साधारण्येन**—वेदार्थत्वेन अलौकिकश्रेयस्साधनताकत्वेन वा रूपेण। उप-पादितश्चैतत् जिज्ञासासूत्रस्याथशब्दार्थविचारावसरे पूर्वोत्तरमीमांसयोरैकशास्त्र्योप-पादनाय।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्येवोपासीत' (बृ. उ. १-४-१५)। 'आत्मानमेव लोकमुपासीत' (बृ. उ. १-४ १५) 'ब्रह्म वेद ब्रह्मैव भवति' (मु. उ. ३-२-९) इत्यादिषु विधानेषु सत्सु 'कोऽसावात्मा किं तद्ब्रह्म' इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे-वेदान्ता उपयुक्ताः—'नित्यः, सर्वज्ञः, सर्वगतः, नित्यतृप्तः, नित्यशुद्ध-बुद्धमुक्तस्वभावः' 'विज्ञानमानन्दं ब्रह्म' इत्येवमादयः। तदुपासनाच्च शास्त्र-दृष्टोऽदृष्टो मोक्षः फलं भविष्यति। कर्तव्यविध्यननुप्रवेशे तु वस्तुमात्रकथने

निना कृतेऽपि विचारे उपासनाया अनिरूपितत्वात् अस्मिञ्च्छास्त्रे वक्ष्यमाणानां न्यायानां तत्रासूत्रितत्वाच्च तत्रत्यो धर्मशब्दो नोपासनापरः। किं तु तद्व्यतिरिक्त-धर्मपरः। न चोपासनासाध्यत्वेनानित्यता मोक्षस्य, 'यत् कृतकं तदनित्यं' इति-लोकसिद्धन्यायस्य अमृतत्वश्रुतिबलादेव बाधनोपपत्तेः—इति भावः। कार्यविधि-प्रयुक्तस्येति। कार्यरूपो यो विधिः तदाक्षिप्तस्येत्यर्थः। यद्यपि ब्रह्मणो ब्रह्मादि-शब्देभ्य एवावगमात् न विधिप्रयुक्तत्वं, तथाऽपि सत्याद्यात्मना विधिप्रयुक्तत्वं भविष्यतीत्यभिप्रेत्य सङ्ग्रहवाक्यं विवृणोति—आत्मा वा अरे इत्यादिना। यथा च सत्याद्यात्मकस्य ब्रह्मणः विधिप्रयुक्तत्वं तथा [1]प्रागेव व्युत्पादितम्। सोऽन्वे-ष्टव्य इति। अन्वेषणं-विचारः। विजिज्ञासा तु, साक्षात्कारात्मकं यद्विशेषज्ञानं तदिच्छासाध्यः साक्षात्कारानुकूलो विचारादन्यो ध्यानरूपो व्यापारः। आत्मेत्ये-वोपासीतेति। अत्र इतिशब्दः 'क्रमादमुं नारद इत्यबोधि सः' [माघ. १-३] इत्यत्रेव द्वितीयार्थे। तथा च आत्मानमेवोपासीतेत्यर्थः। आत्मानमेवलोकमिति। आत्मोपासनासाध्यं फलं मोक्षोऽपि आत्मस्वरूप इत्यभिप्रेत्य लोकमिति आत्मविशे-षणम्। शास्त्रदृष्टोऽदृष्ट इति। [2]शास्त्रादवगतः प्रमाणान्तरानवगत इत्यर्थः।

एवं कार्यपरत्वाभावे वेदान्तानां बोधकता न स्यादिति निरूप्य, तथासति फलवत्त्वं च न स्यादित्याह—कर्तव्येति। ब्रह्मस्वरूपज्ञानमात्रेण मोक्षरूपफला-दर्शनात् प्रकृते नायंसर्पइति[3]वाक्यन्यायो न प्रवर्तत इत्युक्त्वा, तावन्मात्रेण फलसिद्धौ

---

1. प्राक्—'प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते' इति भाष्याशय-निरूपणावसरे।

2. शास्त्रादवगत इति शास्त्रदृष्टपदव्याख्या। प्रमाणान्तरानवगत इति अदृष्टपदव्याख्या।

3. 'वाक्य' नास्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हानोपादानासंभवात्, 'सप्तद्वीपा वसुमती' 'राजाऽसौ गच्छति' इत्यादिवाक्यवत् वेदान्तवाक्यानामानर्थक्यमेव स्यात्।

ननु वस्तुमात्रकथनेऽपि 'रज्जुरियं, नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं, तथा इहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्—

स्यादेतदेवं, यदि रज्जुस्वरूपश्रवणमात्रेणेव सर्पभ्रान्तिः संसारित्वभ्रान्तिः ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत। न तु निवर्तते, श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारिधर्मदर्शनात्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. उ. २-४-५) इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात्। तस्मात् प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति।

अत्राभिधीयते—न। कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं

श्रवणानन्तरं मनननिदिध्यासनविधिवैयर्थ्यं च स्यादित्याह—श्रोतव्योमन्तव्यइति। श्रवणमात्रेणैव ब्रह्मज्ञानस्य सिद्धत्वादिति भावः।

एकदेशिना मोक्षस्योपासनाध्यत्वं वदता उपासनाया मानसधर्मत्वात् मोक्षोऽप्युपासनासाध्यो धर्मफलमित्युक्तं भवेत्। तत्तु न सम्भवति, मोक्षस्य धर्मफलविलक्षणत्वात्। अतः तदुपपत्तये ज्ञानफलत्वमेव मोक्षस्योपेयमिति प्रतिपादयन् एकदेशिमतं निराकरोति—नेति। सङ्ग्रहवाक्यं विवृणोति। शारीरमित्यादिना।

जैमिनिना 'अथातो धर्मजिज्ञासा' इति प्रतिज्ञाय 'चोदनालक्षणोऽर्थो धर्मः' इति सूत्रेण, अलौकिकश्रेयस्साधनं बलवदनिष्टाननुबन्धि धर्मशब्दप्रतिपाद्यमिति प्रतिपादितमिति यथाश्रुतसूत्रपर्यालोचनया अवगम्यते। उत्तरत्र अधर्मस्यापि विचारिततया तस्यापि प्रतिज्ञासिद्ध्यर्थं सूत्रद्वयेऽपि अधर्म इति पदच्छेदं कृत्वा आद्यसूत्रेणाधर्मविचारप्रतिज्ञा द्वितीयसूत्रे अर्थशब्दस्य विपरीतलक्षणया अनर्थ इत्यर्थं स्वीकृत्य बलवदनिष्टसाधनत्वं अधर्मलक्षणं च लम्भनीयम्। धर्मफलं च कृत्स्नं अधर्मफलसहितमेव।

न च—अहंग्रहोपासनारूपधर्मवशात् अत्रैव सकलपापक्षयानन्तरं अर्चिरादिमार्गप्राप्त्या ब्राह्मलौकिकसुखानुभवकाले न अधर्मफलगन्धोऽस्तीति कथं कृत्स्नं धर्मफलं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अधर्मफलसहितम् । ततश्च 'न ह वै' इति श्रुतिः ब्राह्मलौकिकशरीरव्यतिरिक्त-विषया व्याख्येयेति-वाच्यम् । तत्रापि 'स वै नैव रेमे' 'सोऽबिभेत्' इतिवचन-पर्यालोचनया हिरण्यगर्भस्यापि दुःखावगमेन तदन्येषां कैमुतिकन्यायसिद्धतया अहं-ग्रहोपासकानामपि सशरीरताप्रयुक्तं किञ्चित्पापमनुवर्तत एव । अतः कर्माधीन-शरीराणां पापफलमप्रियं नियतमेवेति 'न ह वै' इति श्रुतिः यथाश्रुतार्थैव । अयमर्थः 'ब्रह्मादिस्थावरान्तेषु प्रसिद्धे' इत्यन्तेन भाष्येण [1]दर्शितः । धर्माधर्मफलयोस्साहि-त्येऽपि-मनुष्यलोकादारभ्योर्ध्वगतेषु पापफलं स्वल्पम्, पुण्यफलमधिकम्, अधोगतेषु पापफलमधिकम्, पुण्यफलं स्वल्पम्, मनुष्यलोकेषु तु उभयफलं समानम्—इत्येवं-रूपं तारतम्यम् । धर्मफलेऽपि [2]साधनतारतम्यात् तारतम्यम् ।

न च—अहंग्रहोपासकानां सर्वेषां उपासनारूपस्य [3]धर्मस्य—क्वचिदुपासने अधिका गुणाः क्वचित् न्यूनाः, येन बाल्यमारभ्य उपासनं कृतं येन च मध्यमे-वयस्युपासनमारब्धं तेन सर्वेणापि प्रायणपर्यन्तमेव कर्तव्यम्, तथा च कालन्यून-ताधिक्ये—इत्येवंरूपेण तारतम्ये सत्यपि 'विकल्पोऽविशिष्टफलत्वात्' इति तुल्य-फलता निरूपयिष्यते । अतः कथं साधनतारतम्यात् फलतारतम्यम् । न च—साधन-तारतम्यात् फलतारतम्यमित्यपि नियन्तुं शक्यम् । दुर्बलेन बलवता च क्रियमाणे लौकिककार्ये आयासतारतम्ये सत्यपि बुद्धिमता अबुद्धिमता च क्रियमाणे वेदाध्ययने आयासतारतम्ये सत्यपि, वेतनवेदग्रहणयोः [4]फलयोः तारतम्यादर्शनात् । अतः कृत्स्नं धर्मफलं साधनतारतम्यात् तरतमभावयुक्तमिति वक्तुमशक्यम्—इति साम्प्रतम् ।

साधनतारतम्यात् फलतारतम्यमित्युत्सर्गः । तस्य क्वचित् दुर्बलबलवत्कृत-साधनस्थले प्रमाणानुसारेण अपवादे सत्यपि 'अहंग्रहोपासकानां सर्वेषामपि साधनतार-

---

1. दर्शित इति भाष्ये अस्मिन् प्रकरणे 'अधर्मोऽपि' इति अधर्मोक्त्याऽपि 'पुण्यफलभोगावसान इव उपास्तिफलभोगसमाप्तौ अधर्मफलं भोक्तव्यं' इत्येतदर्थप्रदर्श-नार्थया अयमर्थो दर्शितः—इत्यपि ध्येयम् । स्पष्टश्चैतत् कल्पतरौ । परिमले कल्पत-रूक्तोऽयमर्थः अभ्युच्चयमात्रं-इत्युक्तम् । अत्र तु—स्वातन्त्र्येण प्रकृतार्थसाधकत्वसम्पत्तये समर्थितोऽयमर्थः, उपोद्बलितश्च 'ब्रह्मादिषु' इत्यादिभाष्यप्रमाणप्रदर्शनेन ।

2. मु. साधनादितारतम्यात् धर्मतारतम्येन फलतारतम्यम्

3. धर्मस्येति 'एवंरूपेण तारतम्ये सत्यपि' इत्युत्तरेण सम्बद्ध्यते ।

4. मु. 'फलयोः' नास्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यं, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' (जै. सू. १·१·१) इति सूत्रिता, अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वात् जिज्ञास्यः परिहाराय। तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादि[षु]स्थावरान्तेषु प्रसिद्धे। मनुष्यादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते। ततश्च तद्धेतोर्धर्मस्यापि तारतम्यं गम्यते। धर्मतारतम्यादधिकारितारतम्यम्। प्रसिद्धं च अर्थित्वसामर्थ्यादिकृतमधिकारितारतम्यम्। तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधि-

तम्येऽपि फलतारतम्यं नास्ति' इत्यत्र [1]प्रमाणस्य विशिष्यानवतारात् न तत्रापवाद आश्रीयते। तथा च श्रुतिः अहंग्रहोपासकानामपि 'तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति' इति फलतारतम्यं दर्शयति। यस्य ईषदपरिपक्वमुपासनं तस्य सलोकता अन्यस्य सायुज्यं इति हि तदर्थः। एवं गुणादितारतम्येऽपि द्रष्टव्यम्। विकल्पोऽविशिष्टफलत्वादित्यत्र [2]तुल्यफलत्वप्रतिपादनं तु, ब्रह्मलोकप्राप्तिरूपं सर्वेषामुपासकानां साधारणं इत्येवमभिप्रायम्। अत एव 'एवं मुक्तिफलानियमः' इत्यत्र भाष्य एव गुणादितारतम्याधीनं ब्राह्मलौकिकफलतारतम्यं निरूपयिष्यते। तत् सिद्धं धर्मफलं तरतमभावयुक्तम्। अमुमर्थं [3]मनुष्यादारभ्येति भाष्यं प्रतिपादयति। इष्टं-श्रौतं, पूर्तं—स्मार्तं[4] दत्तं—दानम्। सम्पतत्यनेन अस्माल्लोकात् अमुंलोकमिति सम्पातः—पुण्यम्। यावत् पुण्यं वर्तते तावत् स्वर्गे लोके उषित्वा अनन्तरं निवर्तन्ते। अस्माद्वचनात् पुण्यफलस्य कालकृतं तारतम्यं अवगम्यते। यद्यप्यहंग्रहोपासनानां परमात्मविषयाणां 'कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्' इति [5]सूत्रे क्रममुक्तिफलकता निरूपयिष्यते, तथाऽपि साधनतारतम्याधीनं अवान्तरफले भोगरूपे तारतम्यमस्त्येव।

1. मु. प्रमाणविशेषानवतारात्
2. मु. तुल्यताप्रति०
3. मु. मनुष्यलोकादारभ्य। 'मनुष्यत्वादारभ्य' इति भाष्ये पाठान्तरम्।
4. स्मार्तं—वापीकूपतटाकादिनिर्माणम्।
5. मु. सूत्रेण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विशेषात् उत्तरेण पथा गमनं, केवलैरिष्टापूर्तदत्तसाधनैः धूमादिक्रमेण दक्षिणेन पथा गमनं, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्रात् 'यावत्संपातमुषित्वा' (छा. उ. ५-१०-५) इत्यस्मात् गम्यते। तथा मनुष्यादिषु स्थावरान्तेषु सुखलवः चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः। तथा ऊर्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात् तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवं अविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यं अनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम्।

तथा च श्रुतिः 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति यथावर्णितं संसाररूपमनुवदति। 'अशरीरं वाव सन्तं न प्रियाप्रिये

श्रुतिस्मृतिन्यायप्रसिद्धमित्युक्तम्, तत्र [1]शरीरावच्छेदेनानुभूयमानस्य सुखस्य दुःखसम्पृक्ततायां श्रुतिमुदाहरति—न ह वै सशरीरस्येति। कर्मफलस्य सशरीरता 'तद्यथा पेशस्कारी पेशसो मात्रामपादाय अन्यन्नवतरं कल्याणतरं रूपं तनुते, एवमेवायमात्मा इदं शरीरं निहत्य अविद्यां गमयित्वा अन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वा अन्येषां वा भूतानाम्' (बृ. उ. ४-४-४) इत्यादिश्रुतिप्रसिद्धा। एवं 'कर्मणा बध्यते जन्तुः' 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन' इत्याद्याः स्मृतयो यथासम्भवमुदाहार्याः। 'यत् कृतकं तदनित्यं' 'तरतमभावापन्नसाधनायत्तं फलं तरतमभावापन्नम्' इत्यादयो न्यायाश्चोदाहर्तव्याः।

मोक्षस्य कर्मफलवैलक्षण्यमाह—अशरीरं वाव सन्तमिति। 'तथा विद्वान्नामरूपाद्विमुक्तः' 'स एषोऽकलोऽमृतो भवति' इत्यादिवचनैः यदशरीरत्वं मोक्षाख्यं प्रसिद्धं तदेवेह प्रियाप्रियासंस्पर्शप्रयोजकतया उपादीयत इति भावः।

ननु—'मोक्षस्योपासनारूपधर्मकार्यत्वेऽभ्युपगम्यमाने अन्येषां धर्मकार्याणां शरीरादिसम्बन्धप्रयुक्तदुःख[2]सम्पृक्तत्वतारतम्यानित्यत्वादिदोषदुष्टतया तत्तुल्यता

1. मु. शरीरावच्छेदेनैवा०

2. मु. संप्रयुक्तत्व०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्पृशतः' (छा. उ. ८ १२-१) इति प्रियाप्रियस्पर्शनप्रतिषेधात् चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्येत।

मोक्षेऽपि स्यात्' इत्यापादनं न सम्भवति। अशरीरंवावसन्तमित्यादिश्रुतिविरोधादेव। न हि धर्मकार्यत्वमात्रेण सामान्येन अन्यत्र दृष्टं सर्वमापादयितुं शक्यम्। यत्किञ्चित्सामान्यमादाय सर्वत्र सर्वस्यापादयितुं शक्यतया अतिप्रसङ्गापादकत्वात्। न च नित्यस्य मोक्षस्य उपासनारूपधर्मसाध्यत्वानुपपत्तिरिति वाच्यम्। मोक्षो हि ध्वंसविशेषः। देवदत्तस्य हि मोक्षो देवदत्तशरीरतत्प्रागभावासमानकालिको देवदत्तशरीरध्वंसः। मरणमात्रस्य मोक्षत्वव्यावर्तनाय देवदत्तशरीरतत्प्रागभावासमानकालिक इति विशेषणम्। देवदत्तशरीरासमानकालिक इत्युक्ते प्रलयकालिकदेवदत्तशरीरध्वंसेऽतिव्याप्तिः स्यात्। ततः तत्प्रागभावेत्यादिविशेषणम्। तावत्युक्तेऽपि, देवदत्तोपान्त्यशरीरध्वंसो यदि कदाचित् चरमशरीरोत्पत्तिकाले तदुत्पत्त्यनन्तरं वा स्यात् तदा तत्रातिव्याप्तिः, तद्व्यावर्तनाय शरीरेति विशेषणम्। [1]अन्यदीयशरीरतत्प्रागभावसमानकालिके देवदत्तशरीरध्वंसे [2]अव्याप्तिवारणाय [3]आद्यं देवदत्तपदम्। देवदत्तमुक्तिकालिके अन्यदीयशरीरध्वंसे देवदत्तमोक्षत्ववारणाय द्वितीयं देवदत्तपदम्। स च ध्वंसः कर्मजन्योऽपि नित्यो भविष्यतीति उपासनाजन्यत्वे [4]मोक्षस्य अभ्युपगम्यमाने कोऽपि दोषो नास्तीत्यभिप्रेत्य शङ्कते—अशरीर-

---

1. मु. अन्यदीयशरीरतत्प्रागभावासमानकालिके देवदत्तशरीरध्वंसे अतिव्याप्तिवारणाय

2. अव्याप्तीत्यादि न च ध्वंसस्य अविनाशित्वेन देवदत्तशरीरध्वंसस्य चरममुक्तशरीरध्वंसोत्पत्त्यनन्तरमप्यनुवर्तमानस्य, तदनन्तरं अमुक्तस्याभावात् अन्यदीयशरीरतत्प्रागभावासमानकालिकत्वसम्भवेन, देवदत्तमोक्षलक्षणस्य अव्याप्तिकथनमसङ्गतमितिवाच्यम्। उत्पत्तिक्षणावच्छिन्ने घटे गुणवत्त्वरूपद्रव्यलक्षणस्य अव्याप्तिकथनवत् अन्यदीयशरीरतत्प्रागभावाधिकरणक्षणावच्छिन्ने देवदत्तमोक्षे अव्याप्तिकथनसम्भवात्, चरममुक्तशरीरध्वंसोत्पत्तेः प्राक् देवदत्तशरीरध्वंसे देवदत्तमोक्षव्यवहाराभावप्रसङ्गस्य अव्याप्तिपदेन विवक्षणसम्भवाच्च।

3. आद्यं—लक्षणशरीरे आद्यम्। एवं द्वितीयमित्यत्रापि।

4. मु. 'मोक्षस्य' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अशरीरत्वमेव धर्मकार्यमिति चेत्, न—तस्य स्वाभाविकत्वात्। 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (क. उ. २-२-२१) 'अप्राणो ह्यमनाः शुभ्रः' (मु. उ. २-१-२ 'असङ्गो ह्ययं पुरुषः' (बृ उ ४-३-१५) इत्यादिश्रुतिभ्यः। अत एव अनुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्।

त्वमेवेति। तस्य स्वाभाविकत्वादिति। अयमाशयः—मोक्षो हि 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिपर्यालोचनया स्वप्रकाशानन्दस्वरूपब्रह्मात्मकोऽवगम्यते। अतो न शरीरध्वंस एव मोक्षः। सुखस्यैव पुरुषार्थतया ध्वंसस्यापुरुषार्थत्वाच्च। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इत्यादौ च न शरीरध्वंसो निर्दिश्यते। अपि तु [1]शरीरमिथ्यात्वघटकीभूतो योऽधिष्ठानात्मकोऽत्यन्ताभावः स एव निर्दिश्यते। न च तस्याप्युपासनारूपधर्मसाध्यता सम्भवति, स्वाभाविकत्वात्—इति। स्वाभाविकत्वे अशरीरत्वस्य श्रुतिमुदाहरति—अशरीरमिति। अत्र शरीरावस्थानकाल एव अशरीरत्वप्रतिपादनात् काल्पनिकं सशरीरत्वं स्वाभाविकमशरीरत्वं इति गम्यते। महान्तं—परिच्छेदत्रयशून्यम्। विभुं—सर्वाधिष्ठानतया सर्वपदार्थसंसृष्टम्। शुभ्रः—कलङ्करहितः।

ननु—ब्रह्मस्वरूपस्यापि मोक्षस्य कर्मसाध्यता किं न स्यात्। अनादेरपि हि दुःखप्रागभावस्य प्रायश्चित्तसाध्यतादर्शनात्। न च—प्रायश्चित्ताभावे अग्रिमक्षणे दुःखरूपः तद्ध्वंसः प्रसक्त इति प्रायश्चित्तपरिपाल्यत्वरूपे तत्साध्यत्वे सत्यपि ब्रह्मणो ध्वंसाप्रसक्तेः न तादृश्यपि साध्यता सम्भवतीति—वाच्यम्। तथासति मोक्षस्य ज्ञानसाध्यताऽपि न स्यात्। यदि तु—ज्ञानाभावे 'ब्रह्मस्वरूपभूत आनन्दो मम नास्ति' इति भ्रमसिद्धं तदसत्त्वं प्रसक्तम्, अतो यस्मिन् सति अग्रिमक्षणे यस्य सत्त्वं यदभावे यस्याभावः तत्तस्य साध्यमिति, ज्ञानाभावे ब्रह्मासत्त्वस्य भ्रमसिद्धस्य प्रसक्तेः ज्ञानसाध्यत्वमुपपद्यते—इत्युच्यते, तर्हि तथैव उपासनात्मकधर्मसाध्यता किं न स्यादिति चेत्—

---

1. शरीरमिथ्यात्वघटकीभूत इति शरीरतदवभासकालेऽप्यनुवर्तमानः इत्यर्थः। ध्वंसस्य न तथेति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र, किंचित् परिणामिनित्यं यस्मिन् विक्रियमाणेऽपि तदेवेदमिति बुद्धिः न विहन्यते। यथा पृथिव्यादि जगन्नित्यत्ववादिनाम्। यथा च साङ्ख्यानां गुणाः। इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्सर्वव्यापि

न—एवं हि सति, यथा [1]दुःखोत्पत्तिप्रतिबन्धकतया प्रायश्चित्तपरिपाल्यत्वं तत्प्रागभावस्य एवं मोक्षस्याप्यारोपितासत्त्वनिवृत्त्यात्मना साध्यता वक्तव्या। तत्र च न कर्मापेक्षा, आरोपितपदार्थव्यावृतेरधिष्ठानसाक्षात्कारमात्रायत्तत्वात्।

अमुमर्थं मनसि निधाय उपसंहरति—**अत एवेति**। स्वाभाविकत्वादेवेत्यर्थः। यत्तु—श्रुतिविरोधे सति सामान्यतोदर्शनमात्रेण मोक्षस्य दुःखसंपृक्तत्वाद्यापादनं न सम्भवतीति, तन्न—येन हि वक्ष्यमाणया रीत्या मोक्षस्यापूर्वजन्यत्वेऽनेकश्रुतिविरोधे सत्यपि आद्यव्युत्पत्तिग्रहस्य कार्यस्थल एव दर्शनमात्रेण उपासनापूर्वजन्यत्वमुपेयते तं प्रति तदापादनं [2]सम्भवत्येव।

ननु नित्यस्य ब्रह्मणो मोक्षरूपस्य उत्पाद्यत्वासम्भवेऽपि प्रकारान्तरेण साध्यता स्यात्—इत्याशङ्कां निराकर्तुं नित्यं वस्तु द्वेधा विभजते—**तत्रेति**। परिणामो नाम उपजनापायशालिन्योऽवस्थाः। **पृथिव्यादीति**। पृथिवी कदाचित् तृणवृक्षाद्यवस्थां प्राप्नोति, पुनः तृणादिनाशे मृदवस्थाम्। अवस्थाद्वयेऽपि पृथिवी अनुस्यूतैव। अतः सा परिणामिनित्या। एवं सर्वेषु परिणामिनित्येषु द्रष्टव्यम्। **साङ्ख्यानां गुणा इति**। सत्वरजस्तमांसि गुणाः। ते हि प्रलये साम्यात्मिकां प्रधानावस्थां प्राप्नुवन्ति, सृष्टौ तु गुणप्रधानभावेन सुखदुःखमोहाद्यात्मकतां प्राप्नुवन्ति, अवस्थाद्वयेऽपि गुणा अनुस्यूता एव। **इदं त्विति**। 'निष्कलं निष्क्रियं शान्तं' 'कूटस्थमचलं ध्रुवम्' इत्यादिश्रुतिस्मृतिपर्यालोचनया [3]ब्रह्मणो निर्विकारतया कूटस्थनित्यत्वमिति भावः। ननु कूटस्थनित्यत्वाभ्युपगमे 'तदात्मानं स्वयमकुरुत' इति श्रुतिविरोध इत्याशङ्क्य, 'वाचारम्भणं विकारो नामधेयम्' इति श्रुत्या कार्यवर्गस्या-

---

1. **दुःखोत्पत्तिप्रतिबन्धकतयेति** दुःखप्रागभावनिवृत्तिप्रतिबन्धकतयेत्यर्थः।

2. **सम्भवत्येवेति** प्रत्यक्षप्राबल्यमाश्रित्य श्रुतिविरुद्धार्थमङ्गीकर्तुः श्रुत्या प्रत्यक्षबाधोक्तिः असङ्गता इति भावः।

3. **मु. 'ब्रह्मणो निर्विकारतया' नास्ति**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयञ्ज्योतिरस्वभावम्, यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' (क. उ. १-२-१४) इत्यादिश्रुतिभ्यः। अतः तद्ब्रह्म, यस्येयं जिज्ञासा प्रस्तुता। तद्यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते। अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः।

नृततया न पारमार्थिककूटस्थताविरोधः इत्यभिप्रेत्योक्तं—**पारमार्थिकमिति**। कूटस्थनित्यतया न विकार्यतयासाध्यत्वमित्याह—**सर्वविक्रियारहितमिति**। प्राप्यकर्मतानिवृत्तये व्योमवदिति। ननु प्रत्यगभिन्ने ब्रह्मणि अशनायादिदोषसम्भवात् दोषापनयनेन संस्कार्यता स्यात्, इत्यत आह—**नित्यतृप्तमिति**। अशनायादिकं परमार्थतो नास्त्येव, आरोपितानां च तेषां निवृत्तिः न उपासनामपेक्षते, अधिष्ठानसाक्षात्कारमात्रायत्तत्वात्। अथ गुणाधानेन संस्कार्यता स्यात्, तत्राह—**निरवयवमिति**। किं प्रकाशाख्यो गुण आधातव्यः, उत ततोऽन्य एव। नाद्यः—स्वयञ्ज्योतिषः स्वतस्सिद्धप्रकाशत्वात्। निरवयवत्वं धर्मरहितत्वम्, ततश्च नान्योऽपि गुण आधातुं शक्यत इति भावः। यत्रेत्यादिना 'अन्यत्र धर्मात्' इति श्रुतिर्व्याख्याता। धर्मात् तत्कार्याच्च अन्यत्। एवं अधर्मात्तत्कार्याच्चान्यत्। तदिदमुक्तम्—**यत्र धर्माधर्मौ सहकार्येणेति**। कृताकृतं—वर्तमानम्। भव्यं—भविष्यत्। तदिदमुक्तम्—**कालत्रयं चेति**। स्वपक्षे सूत्रस्वारस्यमाह—**अत इति**। यत उपासनासाध्यो मोक्षो न भवति, अतः सूत्रकृता ब्रह्मैव विचार्यतया प्रतिज्ञातम्, उपासनासाध्यत्वे तु मोक्षस्य तदनुष्ठानोपयोगितया प्राधान्येन तद्विचार एव प्रतिज्ञातस्स्यादिति [1]भावः।

एवमुपासनासाध्यत्वे मोक्षस्यानित्यत्वादिदोषजातमापाद्य, उपासनाविषयकापूर्वसाध्यत्वाभ्युपगमेन [2]कालान्तरभाविता मोक्षस्य वक्तव्या। तथा च ज्ञानाव्यवहितो-

1. भाव इति यतः उपासनासाध्यो मोक्षो न भवति अतः यस्येयं जिज्ञासा प्रस्तुता तत् ब्रह्म—ब्रह्मैव, न तु ब्रह्मोपासनं—इति भाष्यार्थ इति भावः।

2. मु. अभ्युपगमे काला०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च 'ब्रह्म वेद ब्रह्मैव भवति' (मु. उ. ३-२-९) 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु. उ. २-२-८)। 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (तै. उ. २-९)। 'अभयं वै जनक प्राप्तोऽसि' (बृ. उ. ४-२-४)। 'तदात्मानमेवावेत् अहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (बृ. उ. १-४-१०)। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई. उ. ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरमेव मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति। तथा 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च' (बृ. उ. १-४-१०) इति ब्रह्मदर्शन-सर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणाय उदाहार्यम्, यथा तिष्ठन्गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते।

'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि'

तत्क्षणे मोक्षप्रतिपादकानि वचनानि विरुध्येरन्–इत्याह—अपि चेति। परावरे–उत्कृष्टनिकृष्टसर्ववस्त्वात्मके। तदात्मानमेवावेदिति। ब्रह्मणस्सर्वात्मत्वं किंविषयकज्ञानात् इत्यभिप्रायेण 'किमु तद्ब्रह्मावेत् यस्मात् तत्सर्वमभवत्' इति पृष्टे, तदात्मानमेवावेदित्युत्तरम्। तद्धैतदिति। तत्–ब्रह्म एतत्–प्रत्यग्रूपं पश्यन् वामदेवः ऋषिः 'अहं मनुरभवम्' इत्यादिसूक्तं सर्वात्मत्वप्रकाशकं प्रतिपेदे ह—इत्यर्थः। अनेन सूक्तेन वामदेवस्य सर्वात्मत्वं प्रकाश्यते। ततश्च प्रत्यगभिन्नब्रह्मज्ञानेन अविद्यायां निवृत्तायां स्वस्य सर्वात्मत्वं साक्षात्कृत्य तत्प्रकाशकं सूक्तं स्मृतवानिति पर्यवसितोऽर्थः। तिष्ठतिगायत्योर्मध्ये। [1]तदर्थयोर्मध्ये इत्यर्थः।

एवं अपूर्वद्वारकत्वे मोक्षस्योच्यमाने अव्यवहितफलताप्रतिपादकवचनविरोधमुपन्यस्य, अविद्यानिवृत्तिद्वारताप्रतिपादकवचनविरोधमुपन्यस्यति–त्वं हि नः पितेति।

---

1. 'तिष्ठतिगायत्योः' इति श्तिपा निर्देशात् धातुस्वरूपमुक्तं भवति, अविवक्षितार्थस्य धातुस्वरूपस्य च न प्रकृतोपयोगसम्भवः, अतः धात्वर्थो लक्षणीय इत्याशयेनाह—तदर्थयोरिति। प्रसिद्धा चेयं लक्षणा 'इतिकर्तव्यताऽविधेः यजतेः पूर्ववत्त्वम्' इति जैमिनिसूत्रे यजतिशब्दस्य, 'ईक्षतेर्नाशब्दम्' इति बादरायणसूत्रे ईक्षतिशब्दस्य। अतो निरूढेयं लक्षणेति अयं प्रयोगोऽनवद्यः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(प्र. उ. ६-८) **'श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु'** (छा. उ. ७-१-३) **'तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमारः'** (छा. उ. ७-२६-२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेव आत्मज्ञानस्य फलं दर्शयन्ति।

तथा च आचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्—**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरापायात् अपवर्गः'** (न्या. सू. १-१-२) इति। **मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति।**

भारद्वाजादीनां षण्णामृषीणां ब्रह्मोपदेशानन्तरं गुरुं प्रति प्रार्थनावचनमेतत्। परं—पुनरावृत्तिशून्यम्। पारं—अविद्याविनिर्मुक्तम्। तारयसि—प्रापयसि। अतः अत्यन्तहितकारितया त्वमेवास्माकं पितेत्यर्थः। **श्रुतं ह्येव म इति।** इदं ब्रह्मविद्यार्थमुपसन्नस्य नारदस्य सनत्कुमारं प्रति प्रार्थनावचनं उपक्रमगतम्। शोकं—शोकनिदानभूतं तमः इत्यर्थः। तरति—अतिक्रामति—नाशयतीत्यर्थः। **शोकस्य पारं तारयत्विति।** शोकातीतमात्मानं प्रापयतु इत्यर्थः। **तस्मा इति।** तत्रैवेदमुपसंहारवचनम्। मृदितकषायाय—निरस्तान्तःकरणदोषाय।

मोक्षे अविद्यानिवृत्तिः द्वारभूतेत्यत्र वृद्धसम्मतिमाह—**दुःखजन्मेति।** मिथ्याज्ञानं अनात्मसु देहादिषु आत्मत्वज्ञानम्, तस्य कार्यं रागादिः दोषः, रागादेः पुण्यपापानुकूला प्रवृत्तिः, प्रवृत्तेः कार्यं तासु तासु योनिषु जन्म, तत्कार्यं दुःखम्। [1]अत्र उत्तरोत्तरत्वं सूत्रनिर्देशक्रमानुसारेण द्रष्टव्यम्। ततश्च कारणनाशात् कार्यनाशः। मिथ्याज्ञाननिवृत्तिश्च एतत्सूत्रप्रणेतुस्तार्किकवृद्धस्य मते षोडशपदार्थतत्त्वज्ञानात् भवति, सिद्धान्ते तु प्रत्यगभिन्नब्रह्मसाक्षात्कारात् भवतीत्याह—**मिथ्याज्ञानापायश्चेति।**

किञ्च—येन उपासनमेव मोक्षाय विधीयत इत्युच्यते तेनेदं वक्तव्यम्। किमिदं जीवब्रह्मणोरभेदेनोपासनं सम्पद्रूपम्? यथा [2]ब्रह्मणः मनसि विश्वदेवोपासनम्।

---

1. मु. अत्रोत्तरत्वं

2. ब्रह्मणः—पद्मे [illegible]ः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य [1]सम्पद्रूपता च कर्मसम्बद्धोपासनारूपतया। कर्मसम्बद्धोपासनं हि 'अथ सम्पदः' इति श्रुतिव्याख्यानावसरे बृहदारण्यकभाष्ये तद्वार्तिके च वर्णितं सम्पत्त्वेन। अल्पेषु कर्मस्वग्निहोत्रादिषु शास्त्रानुसारेण महतां कर्मणां बुद्ध्या सम्पादनं महतां कर्मणां यत् फलं तत्कामनया क्रियमाणं–सम्पदुपासनम्। अथवा–महान्ति अश्वमेधादीनि कर्माणि कात्स्न्येंनानुष्ठातुमशक्तानां सम्भवदङ्गसाहित्येनानुतिष्ठतां अङ्गलोपकृतवैगुण्यपरिहारार्थं [2]शास्त्रानुसारेण फलसिद्धये तदङ्गाश्रितं क्रियमाणमुपासनं साङ्गस्य कर्मणो यत् फलं तत्फलसम्पादकतया सम्पन्नामकं भवतीति।

तथा च वार्तिकं—

'फलवत्कर्मणां क्वापि किञ्चित्सामान्यसंश्रयात्।
सम्पत्तिर्महतां सम्पत् अल्पीयःकर्मसूच्यते॥

यदि वा तत्फलस्यैव किञ्चित्सामान्यवर्त्मना।
सम्पादनं भवेत् सम्पत् अग्निहोत्रादिकर्मणि॥

नातिभारोऽस्ति नो बुद्धेः शास्त्रं चेत् तत्परं भवेत्।
विदुषां श्रेयसेऽतोऽध्वा न क्वचित् प्रतिहन्यते॥' इति।

ततश्च, 'याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीति एकयेति कतमा सेकेति मन एवेति अनन्तं वै मनः अनन्ता विश्वेदेवाः अनन्तमेव स तेन लोकं जयति' [बृ. उ. ३-१-९] इति वचनेन कर्मगोपनसाधने ब्रह्मणो मनसि विहितमुपासनं यथा सम्पद्रूपं, तथा कर्मकर्तृतया कर्माङ्गभूते आत्मनि 'आत्मा वा अरे द्रष्टव्यः' इति वचनेन विधीयमानमुपासनं सम्पद्रूपम्।

अथ वा अध्यासरूपम्। कर्मसम्बन्धं विहायैव अन्यस्मिन्नन्यदृष्टिरध्यासः। यथा 'मनो ब्रह्म' इत्यादिना विधीयमानं अध्यासरूपं, एवं 'तदिदमप्येतर्हि य एवं वेद अहं ब्रह्मास्मीति' इति विधीयमानं अध्यासरूपम्। 'आरोप्यप्रधाना सम्पत्, अधिष्ठानप्रधानोऽध्यासः' इति अध्याससम्पदोर्विभागः [3]कल्पतरौ दर्शितः।

---

1. सम्पद्रूपता—सम्पत्पदार्थता।
2. शास्त्रानुसारेण क्रियमाणं इति सम्बन्धः।
3. कल्पतरौ दर्शित इति भाष्यवार्तिकयोः प्रतिपादितं सम्पदध्यासयोर्विभागं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्। यथा 'अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' (बृ. उ. ३-१-९) इति।

अथ वा विशिष्टक्रियानिमित्तम्। यथा—वायुर्वाव संवर्गः यदा वा अग्निरुद्वायति वायुमेवाप्येति, यदा सूर्योऽस्तमेति वायुमेवाप्येति, यदा चन्द्रोऽस्तमेति वायुमेवाप्येति, यदाऽऽप उच्छुष्यन्ति वायुमेवापियन्ति, वायुर्ह्येवैतान् सर्वान् संवृङ्क्ते इत्यधिदैवतम्, अथाध्यात्मं—प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणम्मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्ते इति, तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु' इति, प्रलयविशेषे अग्न्यादिनिवृत्तावपि वायोर्विद्यमानतया स्वापकाले वागादिनिवृत्तावपि प्राणस्य विद्यमानतया तयोः 'वृजीवर्जने' इति धातुनिष्पन्नेन [1]'संवृङ्क्ते' इत्यनेन वर्जनापरपर्यायसंहरणक्रियाकर्तृत्वेन संवर्गत्वं निरूप्य तेन रूपेण ध्येयत्वं विवक्ष्यते, तथा 'अहम्ब्रह्मास्मीत्यादिवाक्यैः शरीरादिबृम्हणरूपया क्रियया जीवस्य ब्रह्मत्वेनोपासनम्।

अथ वा 'पत्न्यवेक्षितमाज्यं भवति' इत्यादिवाक्यैर्विधीयमानमीक्षणं आज्यसंस्कारतया यथा कर्माङ्गं, तथा आत्मा वा अरे द्रष्टव्य इत्यादिवाक्यैर्विधीयमानमात्मदर्शनं क्रतुकर्तृसंस्कारभूतम्।

तत्र—अनारभ्याधीतस्यात्मज्ञानस्य यथा क्रतुकर्तृसंस्कारकतया क्रत्वङ्गत्वं नास्ति तथा 'पुरुषार्थोऽतश्शब्दात्' इत्यधिकरणे स्पष्टं भविष्यति[2]।

सम्पत्पक्षेऽध्यासपक्षे च आरोपितो जीवब्रह्मणोरभेदः। विशिष्टक्रियानिमित्तत्वपक्षे च न कथञ्चिदपि जीवस्य परमात्माभेदः, अपि तु यत् शरीरादिपरिणमयितृत्वं जीवस्य तत्त्वेन उपासनम्। जीवे ब्रह्मपदसामानाधिकरण्यस्य परिणामात्मकबृम्हणक्रियाप्रयोजककर्तृत्वप्रयुक्तत्वात्।

तेषु च सर्वेषु गतिसामान्यादिरूपतात्पर्यलिङ्गोपबृम्हितजीवब्रह्माभेदप्रतिपत्तिपरवाक्यविरोधः तज्ज्ञानाच्चाविद्यानिवृत्तिद्वाराब्रह्मात्मतावस्थितिरूपफलप्रतिपादक-

---

सिद्धं कृत्वैव सम्पदुपासनानामारोप्यप्राधान्यं अध्यासशब्दितानां प्रतीकोपासनानां नधिष्ठानप्राधान्यञ्च अनादिवृद्धव्यवहारसम्प्रदायसिद्धं कल्पतरौ प्रदर्शितं इति ध्येयम्।

1. मु. वृङ्क्ते
2. आ. 'इति' इत्यधिकम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च अध्यासरूपम् । यथा 'मनो ब्रह्मेत्युपासीत' (छा. उ. ३-१८-१) 'आदित्यो ब्रह्मेत्यादेशः' (छा. उ. ३-१९-१) इति च मन-आदित्यादिषु ब्रह्मदृष्टयध्यासः ।

नापि विशिष्टक्रियायोगनिमित्तं 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' (छा. उ. ४ ३-१) इतिवत् ।

नाप्याज्यावेक्षणादिकर्मवत्कर्माङ्गसंस्काररूपम् ।

संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने 'तत्त्वमसि' (छा. उ. ६-८ ७) 'अहं ब्रह्मास्मि' (बृ. उ. १४-१०) 'अयमात्मा ब्रह्म' (बृ. उ. २-५-१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीडयेत ।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' (मु. उ. २-२-८) इति चैवमादीनि अविद्यानिवृत्तिफलश्रवणानि उपरुध्येरन् ।

'ब्रह्म वेद ब्रह्मैव भवति' (मु. उ. ३-२-९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिरूपत्वे न सामञ्जस्येनोपपद्येरन् ।

तस्मात् न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम् ।

अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या । किं तर्हि, प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवत् वस्तुतन्त्रैव । एवंभूतस्य ब्रह्मणः तज्ज्ञानस्य [वा][च] न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम् ।

वाक्यविरोधश्च स्यात् इत्याह—न चेदं ब्रह्मात्मैकत्वविज्ञानं सम्पद्रूपमित्यादिना न सामञ्जस्येन उपपद्येरन्नित्यन्तेन । हृदयग्रन्थिरिति । 'हृदि ह्येष आत्मा [प्र. उ. ३-६] 'तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयं [छा. उ. ८-३-३] इति श्रौतनिर्वचनानुसारेण हृच्छब्दप्रतिपाद्यमनोविशिष्ट आत्मा हृदयशब्दार्थः । ततश्च अन्तःकरणैक्याध्यासनापन्न आत्मैव कर्तृत्वादिबन्धापादकतया ग्रन्थिः ।

न पुरुषव्यापारतन्त्रेति । उपासनात्मकं हि ज्ञानं यागादिवत् पुरुषकृतिसाध्यम्, न तु प्रमाणज्ञानम् । अनाहार्यभ्रमवत् तस्य पुरुषकृत्यन्वयव्यतिरेकानु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः। 'अन्यदेव तद्विदितादथो अविदितादधि' (के. न. उ. १-३) इति विदिक्रियाकर्मत्वप्रतिषेधात्, 'येनेदं सर्वं विजानाति तं केन विजानीयात्' (बृ. उ. २-४-१३) इति च। तथा उपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति—'यद्वाचाऽनभ्युदितं

विधानाभावात्। ज्ञानं द्विविधं आहार्यमनाहार्यं च। उभयमपि प्रमाणरूपं अप्रमाणरूपं च। 'योषा वाव गौतमाग्निः' इति अप्रमाणरूपमाहार्यज्ञानम्। यथावस्थितदेवतास्वरूपध्यानं तु प्रमाणरूपमाहार्यम्। उभयविधमप्याहार्यं पुरुषकृतिसाध्यम्। अनाहार्यभ्रमरूपं तु पुरुषकृत्यसाध्यमपि दोषमात्रायत्तं न वस्तुसत्तामपेक्षत इति न वस्तुतन्त्रम्। घटादिगोचरप्रमाणज्ञानं तु अनाहार्यतया न पुरुषकृतिसाध्यम्। किं तु यादृशमाकारमुल्लिखति तस्य व्यावहारिकीं सत्तां अपेक्षत इति वस्तुतन्त्रमित्युच्यते। एवं ब्रह्मज्ञानमपि [1]अनाहार्यज्ञानकरणत्वेन क्लृप्तात् शब्दप्रमाणात् जायमानं असति बाधे प्रमाणरूपं यादृशमाकारमुल्लिखति तस्य सत्तामपेक्षत इति वस्तुतन्त्रमित्युच्यते। अतो न प्रमाणरूपं ब्रह्मज्ञानं विधेयमिति न 'प्रतिपत्तिविधिविषयतया शास्त्रेण ब्रह्म समर्प्यते' इति शक्यं वक्तुम्।

एवं 'विधेयज्ञानविषयतया शास्त्रेण ब्रह्म समर्प्यते' इति यत् पूर्वपक्षिणोक्तं तत्र प्रमाणज्ञानं विधातुं न शक्यत इत्युक्तम्। ज्ञानविषयत्वमपि यदि वृत्तिप्रतिफलितचैतन्यविषयत्वं तदा [श्रुति] विरोध इति वक्तुं तं पक्षमुपक्षिप्य निषेधति—न चेति। अविदितादधि—अविदितादन्यत्। ननु—न 'प्रमाणज्ञानं विधेयं' इत्युच्यते। किं तु, निदिध्यासितव्यइत्यादिभिर्वाक्यैः उपासनारूपं ज्ञानमेव विधेयम्, तच्छेषतया च ब्रह्म प्रतिपाद्यते इति—इत्याशङ्क्य; उपक्रमाद्यवगतब्रह्मप्राधान्यनिर्वाहाय कृत्स्नोपनिषद्वाक्यं ब्रह्मप्रधानमेव, 'निदिध्यासितव्यः' इत्यादिवाक्यैस्तु ब्रह्मसाक्षात्कारोपयोगितयैव उपासना विधीयते, तस्याश्च साक्षात्कारद्वारा ब्रह्मण्येव शेषतया न ब्रह्मप्राधान्यविरोधिता—इत्यमुमर्थं मनसि निधाय, उपासनाविषयत्वमपि यद्युपासनावृत्त्यभिव्यक्तचैतन्यविषयत्वं तदा श्रुतिविरोधमाह—तथोपास्तिक्रियेति।

---

1. अनाहार्येत्यादि 'घटाभाववद्भूतलं घटवत्' इति वाक्यात् शाब्दबोधो न जायते, अयोग्यतानिश्चयेन प्रतिबन्धात्, एवं बाधकालेऽपि इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मण उपन्यस्य, 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (केन. उ. १-४) इति ।

अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्, न—अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। न हि शास्त्रं इदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति । किं तर्हि, प्रत्यगात्मत्वेनाविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदं अपनयति । तथा च शास्त्रम्—'यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्' (के. उ. २-३) 'न दृष्टेर्द्रष्टारं पश्येः' 'न विज्ञातेर्विज्ञातारं विजानीयाः,' (बृ. ३-४-२) इति चैवमादि । अतः अविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणात् न मोक्षस्यानित्यत्वदोषः ।

'न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः । न विद्मो न विजानीमो यथैतदनुशिष्यात्' [1]इतिपूर्ववाक्येन अविषयत्वं ब्रह्मण उपन्यस्य ।

ज्ञानाविषयत्वे शास्त्रप्रमाणकत्वं ब्रह्मणो न स्यात्, शास्त्रजन्यज्ञानविषयत्वं हि शास्त्रप्रमाणकत्वं—इति शङ्कते—अविषयत्व इति । शास्त्रजन्यवृत्तिप्रतिफलितचैतन्याविषयत्वेऽपि अविद्यानिवृत्त्युपयोगितया शास्त्रजन्यवृत्तिविषयत्वमुपेयते, अतो न विरोध इति परिहरति—न—अविद्याकल्पितेति । **यस्यामतमिति ।** अत्र मतत्वामतत्वादीनां विरोधपरिहारार्थं, मननवृत्तिप्रतिफलितचैतन्याविषयत्वं अमतत्वप्रतिपादनालम्बनं मननवृत्तिविषयत्वं मतत्वप्रतिपादनालम्बनं व्याख्येयम् । एवमविज्ञातत्वादावपि । एवं च यत् पूर्वपक्षिणोक्तं—उपासनासाध्यस्यापि मोक्षस्य अमृतत्वश्रुतिबलादेव नित्यता भविष्यतीति, तन्न—नित्यस्यापि मोक्षस्य कण्ठचामीकरन्यायेन अप्राप्तत्वभ्रमव्युदासेन साध्यत्वोपपत्तौ, 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति श्रुतिपरिगृहीतस्य 'यत् कृतकं तदनित्यं' इति न्यायस्य बाधं विनैव अमृतत्वश्रुतिनयनोपपत्तौ च तद्विरोधस्यानुचितत्वात्, इत्यभिप्रेत्याह—**अत इति ।**

---

1. **इतिपूर्ववाक्येनेति** इत्यादिना 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते' इत्यन्तेन पूर्ववाक्येन इत्यर्थः । यद्वाचेत्यादिवाक्यस्यापि हि अविषयत्वप्रतिपादकत्वमुक्तं कल्पतरौ, अत्रापि प्रतर्दनाधिकरणे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यस्य तु उत्पाद्यो मोक्षः, तस्य मानसं वाचिकं कायिकं वा कार्यं अपेक्षत इति युक्तम्। तथा विकार्यत्वे च। तयोः पक्षयोः मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्यं उत्पाद्यं वा घटादि नित्यं दृष्टं लोके। न च आप्यत्वेनापि कार्यापेक्षा, स्वात्मस्वरूपत्वे सति अनाप्यत्वात्। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं, सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मण आकाशस्येव।

नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात् दोषापनयनेन वा। न तावत् गुणाधानेन संभवति, अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य। नापि दोषापनयनेन, नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य। स्वात्मधर्म एव सन् तिरोभूतो मोक्षः क्रियया आत्मनि संस्क्रियमाणेऽभिव्यज्यते, यथा आदर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्मः इतिचेत्, न – क्रियाश्रयत्वानुपपत्तेरात्मनः। यदाश्रया क्रिया तमविकुर्वती नैव आत्मानं लभते। यद्यात्मा स्वाश्रय-

इदंतुपारमार्थिकमित्यादिना यत् ब्रह्मस्वरूपस्य मोक्षस्य उत्पाद्यादिचतुर्विधद्रव्यविलक्षणत्वमुक्तं तत् प्रपञ्चयति—यस्य तूत्पाद्यो मोक्ष इत्यादिना क्रियाया गन्धमात्रस्यापि अनुप्रवेश इह नोपपद्यते इत्यन्तेन। गुणाधानेनेति। यथा मुखस्य ताम्बूलचर्वणादिना। दोषापनयनेनेति। यथा स्नानादिना शरीरादेः। परमार्थगत्या ब्रह्मणि गुणाधानं न सम्भवति, वस्तुतो निर्धर्मकत्वादित्याह—अनाधेयातिशयेति। परमार्थगत्या ब्रह्मणि दोषाभावात् दोषापनयनमपि न सम्भवति। तदाह—नित्यशुद्धेति। ननु निर्धर्मकस्यापि ब्रह्मणः अपारमार्थिकदोषापनयनेन स्वरूपाभिव्यक्तिरूपः संस्कारः सम्भवतीति शङ्कते—स्वात्मधर्म एव सन्निति। जन्यधर्मानाश्रयत्वेऽपि नित्यो धर्मो मोक्षाख्यो भविष्यतीत्यभिप्रायेण धर्मशब्दः, स्वरूपपरो वा। आरोपितावरणस्य ज्ञानेनैव निवृत्तेः क्रियापेक्षैव नास्ति। अपेक्ष्यमाणाऽपि अविकार्यब्रह्मगता न सम्भवति। अन्याश्रया तु क्रिया अन्यत्र मलनिवृत्तौ नोपयुज्यते। यद्यपि इष्टकाचूर्णस्य दर्पणेन संयोगविभागप्रचयानुकूलो व्यापारो हस्तचालनतदनुकूलयत्नादिरूपोऽन्यगतोऽपि भवति, तथापि मलापकर्षणे पुरुषव्यापारस्य द्वारीभूतो यः संयोगविभागप्रचयः स दर्पणगतो भवत्येव, नैवं ब्रह्मणि सम्भवतीति परिहरति—न–क्रियाश्रयत्वानुपपत्तेरिति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रियया विक्रियेत, अनित्यत्वमात्मनः प्रसज्येत । 'अविकार्योऽयमुच्यते' इति चैवमादीनि वाक्यानि बाध्येरन् । तच्चानिष्टम् । तस्मात् न स्वाश्रया क्रिया आत्मनः संभवति । अन्याश्रयायास्तु क्रियाया अविषयत्वात् न तया आत्मा संस्क्रियते ।

ननु देहाश्रयया स्नानाचमनयज्ञोपवीतधारणादिकया क्रियया देही संस्क्रियमाणो दृष्टः, न—देहादिसंहतस्यैव अविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात् । प्रत्यक्षं हि स्नानाचमनादेः देहसमवायित्वम् । तया देहाश्रयया तत्संहत एव कश्चित् अविद्यया आत्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम् । यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलं, 'अहमरोगः' इति यत्र बुद्धिरुत्पद्यते, एवं स्नानाचमनयज्ञोपवीतधारणादिना 'अहं शुद्धः संस्कृतः' इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते । स च देहेन संहत एव । तेनैव ह्यहंकर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते । तत्फलं च स एवाश्नाति, 'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति (मु. उ. ३-१-१) इति मन्त्रवर्णात् । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (क. उ. १-३-४) इति च । तथा 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च'

देहगतया क्रियया देहिनः संस्कारदर्शनात्, अन्यगतया क्रियया अन्यस्य संस्कारो न सम्भवतीति न नियन्तुं शक्यम्—इत्याशङ्क्य, तत्राप्यन्तःकरणाध्यासविशिष्टस्यैव स्नानाचमनादिप्रयोजकयत्नाश्रयतया देहैक्याध्यासमापन्नस्य च स्नानाद्याश्रयतया प्रत्यक्षसिद्धतया नोक्तदोष इत्याह—नन्वित्यादिना । विशिष्टस्यैव क्रियाजन्यफलभोक्तृत्वे श्रुतिमाह—तयोरिति । जीवपरमेश्वरयोर्मध्ये जीवः कर्मफलं पिप्पलशब्दोदितमत्ति, ईश्वरस्तु शुद्धसाक्षिरूपः परमार्थगत्या अभुञ्जान एव अभिचाकशीति—स्वप्रकाशतया वर्तते । भोक्तेत्याहुरिति । इतिः द्वितीयार्थे । भोक्तारमाहुरित्यर्थः । आत्मेन्द्रियेत्यत्र आत्मशब्दः शरीरपरः ।

एको देव इति । यथा आकाशादिः निबिडेषु भित्त्यादिषु अन्तरननुप्रविश्यैव सर्वभूतसंयोगितामात्रेण व्यापको भवति नैवं परमात्मा । अपि तु सर्वेषां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(श्वे. उ ६ ११) इति, 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धम्' (ई. उ. ८) इति च एतौ मन्त्रौ अनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः। ब्रह्मभावश्च मोक्षः। तस्मात् न संस्कार्योऽपि मोक्षः।

भूतानां अन्तरात्मा। सर्वाधिष्ठानस्य [1]परमात्मनः अन्तर्बहिः सर्वत्र सम्बन्धोऽस्तीति भावः। सर्वभूताधिवासत्वं सर्वपरिपालकत्वम्, तच्च पुण्यपापात्मककर्मफलव्यवस्थापकतया—इति प्रतिपादयितुं कर्माध्यक्ष इति। य एको देवः सर्वव्यापित्वादिधर्मविशिष्टः, स एव जीवरूपेण सर्वेषु भूतेषु गूढ इति योजना। ईश्वररूपेण सर्वव्यापित्वादयो [2]ये गुणाः प्रसञ्जिताः तन्निषेधार्थं निर्गुण इति। जीवरूपेण यत् सर्वभूतगूढत्वं—सर्वभूताभिमानशालित्वं प्रसक्तं तद्व्यावृत्त्यर्थं साक्षीति। तस्य व्याख्या चेता केवल इति। अभिमानरहित एव सन् तदवभासक इत्यर्थः। स पर्यगादिति। शुक्रमित्यादौ प्रथमार्थे द्वितीया। शुक्राद्यात्मकः सः पर्यगात्—व्याप्तवानित्यर्थः। शुक्रः-स्वप्रकाशः। अस्नाविरं-स्नावाः सिराः, तद्रहितम्। अव्रणं अस्नाविरं इत्येव कायनिषेधे सिद्धे पुनस्तन्निषेधो[3] लीलाधृतदिव्यविग्रहस्यापि अनृतताप्रतिपादनार्थः। तथा च विश्वरूपधरस्य परमात्मनो वचनम्—

'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं नैवं मां द्रष्टुमर्हसि॥' [शान्तिपर्व. ३३९-४५] इति।

शरीरोपादानभूताविद्याराहित्याय शुद्धमिति। [4]तन्निमित्तराहित्याय अपापविद्धमिति। यत् पूर्वमुक्तं अनाधेयातिशयत्वं [5]निर्दोषत्वं च ब्रह्मणः, तत्रैतौ मन्त्रौ प्रमाणमित्याह—इति चैतौ मन्त्राविति।

---

1. मु. आत्मनः
2. मु. 'ये' नास्ति
3. तन्निषेधः—'अकायं' इति शरीरनिषेधः।
4. तन्निमित्तेति तच्छब्दार्थः शरीरम्।
5. मु. निर्विशेषत्वं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतोऽन्यत् मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुम्। तस्मात् ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते।

ननु ज्ञानं नाम मानसी क्रिया। न—वैलक्षण्यात्। क्रिया हि नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च। यथा 'यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद्वषट्करिष्यन्' इति, 'सन्ध्यां मनसा ध्यायेत्' (ऐ. ब्रा. ३-८ १) इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसं, तथाऽपि पुरुषेण कर्तुमकर्तुं अन्यथा वा कर्तुं शक्यं, पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम्, प्रमाणं च यथाभूतवस्तु-विषयम्, अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम्। केवलं वस्तुतन्त्र-मेव तत्। न चोदनातन्त्रम्, नापि पुरुषतन्त्रम्। तस्मात् मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्। यथा च 'पुरुषो वाव गौतमाग्निः' 'योषा वाव

पूर्वेणात्मनो वृत्तिप्रतिफलितचैतन्याविषयत्वेऽपि यत् वृत्तिविषयत्वमुक्तं तदत्रो-पसंहृतं ज्ञानमेकं मुक्त्वेति। तत्र लब्धावसरः—ध्यानान्तर्गतानां मानसवृत्तीनां ज्ञानरूपाणां क्रियात्वेन यथा विधेयता एवं प्रमाणवृत्तीनामपि किं न स्यात्, ततश्च ज्ञानविधिशेषतयैव ब्रह्म प्रतिपाद्यते—इति शङ्कते—ननु ज्ञानमिति। यथा हि ध्यानान्तर्गतवृत्तीनां प्रमाणवृत्तीनां च मानसत्वाविशेषेऽपि एकत्र वस्त्वनपेक्षा अन्यत्र तदपेक्षा, एवं ध्यानवृत्तीनां पुरुषकृतिसाध्यत्वेन विधेयत्वेऽपि न प्रमाणवृत्तेर्विधेयता, पुरुषकृत्यसाध्यत्वात्—इत्याह—न वैलक्षण्यादिति। यत्रेति। येत्यर्थः। वषट्करिष्यन् होता। किंचिद्ध्यानं यथावस्थितवस्त्वनुसार्यपि वस्तुनिरपेक्षत्वेऽपि। तदभिप्रायेण यस्यैदेवतायै इति सन्ध्यांमनसेति च उदाहरणद्वयम्। किञ्चित्पुनर्ध्यानं वस्त्वननु-सार्यपि भवति। [1]तदभिप्रायेण [2]पुरुषोवावेति योषावावेति च उदाहरणद्वयम्। अतो ध्यानस्य वस्त्वनुसारे तदननुसारे च न निर्बन्धः, कृतिसाध्यत्वं तु नियतमेवेति विधेयत्वमुपपद्यते, प्रमाणज्ञानं तु कृत्यसाध्यतया न विधेयम्—इति तात्पर्यम्।

1. मु. तदनुसारेण

2. मु. पुरुषोवावेत्युदाहरणम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गौतमाग्निः ' (छा उ. ५-७, ८-१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिः मानसी भवति। केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च। या तु प्रसिद्धेऽग्नावग्निबुद्धिः, न सा चोदनातन्त्रा नापि पुरुषतन्त्रा; किं तर्हि, प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतत्, न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादयः श्रूयमाणा अपि अनियोज्यविषयत्वात् कुण्ठीभवन्ति उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्, अहेयानुपादेयवस्तुविषयत्वात्।

किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः—इष्टं मे भूयात् अनिष्टं मा भूदिति, न

ज्ञानस्याविधेयत्वे 'आत्मा वा अरे द्रष्टव्यः' इति तव्यप्रत्ययः किमर्थः स्यादिति चेत्—यो हि पुरुषो बहिर्मुखः प्रवर्तते तस्य आत्मज्ञानानुकूलवेदान्तवाक्यश्रवणादौ[1], त्वदभिलषितं यत् दुःखं विना सुखेनावस्थानं तस्मिन् आत्मदर्शनमेव साधनं न बाह्यवस्तुदर्शनमिति प्रतिपादनाय आत्मैव दर्शनार्हो नान्यदिति प्रतिपादयन् रुच्यतिशयं सम्पादयतीति, अर्थो भविष्यति—[2]इत्यमुमर्थं शङ्कासमाधानाभ्यां [3]व्युत्पादयिष्यति[4]।

तद्विषय इति। आत्मानंचेद्विजानीयादिति लिङ् ज्ञाने श्रूयते। अनियोज्यविषयत्वादिति। नियोज्यरहितत्वात् विषयरहितत्वाच्चेत्यर्थः। ममेदंकार्यमित्यवगतिमान् हि[5] नियोज्यो भवति। कृतिसाध्यश्च विधिविषयो भवति। ज्ञानस्य च कृत्यसाध्यत्वात् नोभयमपि सम्भवतीति भावः।

---

1. श्रवणादाविति रुच्यतिशयं संपादयति इत्यनेन सम्बद्ध्यते।
2. मु. 'इति' नास्ति
3. व्युत्पादयिष्यति अनुपदं स्वाभाविकप्रवृत्तीत्यादिना।
4. मु. व्युत्पादयति
5. मु. 'हि' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च तत्र आत्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविकात् कार्यकरणसंघातप्रवृत्तिगोचरात् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि। तस्य आत्मान्वेषणाय प्रवृत्तस्य अहेयमनुपादेयंचात्मतत्त्वमुपदिश्यते 'इदं सर्वं यदयमात्मा' (बृ. उ. २ ४·६) 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् केन कं विजानीयात् विज्ञातारमरे केन विजानीयात्' (बृ. उ. ४-५ १५) 'अयमात्मा ब्रह्म' (बृ. उ. २ ५·१९) इत्यादिभिः।

यदपि अकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते। अलङ्कारो ह्ययमस्माकं यत् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति। तथा च श्रुतिः–'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥' (बृ. उ. ४ ४ १२) इति। 'एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत'। (भ. गी. १५ २०) इति च स्मृतिः। तस्मात् न प्रतिपत्तिविधिशेषतया ब्रह्मणः समर्पणम्।

यदपि केचिदाहुः—'प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवल-

ज्ञानस्याविधेयत्वेऽपि तत्र श्रूयमाणानां लिङादीनां हेतुहेतुमद्भावप्रतिपादकत्वं अर्हार्थत्वं च [1]यथायथं भविष्यति प्ररोचनायेति व्युत्पाद्य, यदेकदेशिनोक्तं 'ज्ञानविधिपरत्वाभावे प्रवृत्तिनिवृत्तिप्रयोजनकता वाक्यस्य न स्यात्' इति तत्रेष्टापत्तिमाह—यदपीत्यादिना। शरीरमनुसंज्वरेदिति। स्थूलसूक्ष्मकारणरूपशरीरत्रयाध्यासमापन्नो बाह्यानि वस्तूनि कामयमानो जन्तुः काम्यमानपदार्थालाभे तापमनुभवति, आत्मैक्यसाक्षात्कारेण तु तदध्यासनिवृत्तौ न तापत्रयमनुभवतीत्यर्थः।

'कार्यविधिप्रयुक्तमेव ब्रह्म प्रतिपाद्यते' इति यदेकदेशिनोक्तं तदनूद्य निराकरोति—यदपीति।

---

1. यथायथमिति 'आत्मानं चेद्विजानीयात्' इत्यत्र लिङ् 'हेतुहेतुमतोर्लिङ्' इति सूत्रविहिता हेतुहेतुमद्भावार्थिका, 'आत्मा वा अरे द्रष्टव्यः' इत्यत्र लिङ् 'अर्हे कृत्यतृचश्च' इति सूत्रविहिता अर्हार्थिका इत्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वस्तुवादी वेदभागो नास्ति' इति, तन्न—

तन्नेति। 'विधिशेषतयैव ब्रह्म प्रतिपाद्यते' इति किं 'कार्यान्वित एव पदानां शक्तिः' इतिनियममनुसृत्योच्यते, उत वेदान्तवाक्यपर्यालोचनयैव कार्यशेषतया ब्रह्मावगम्यते? नाद्यः—कार्यान्वितेशक्तिरिति नियमासम्भवात्। तथात्वे सिद्धार्थपराणां [1]काव्यानां बोधकता न स्यात्। न च—आद्यव्युत्पत्तिग्रहानुसारेण तत्रापि कार्यवाचकपदाध्याहार एव, तदभावे तु असंसर्गाग्रह एव—इति वाच्यम्। आद्यव्युत्पत्ति[2]ग्रहस्थले बालेन स्वप्रवृत्तिदृष्टान्तेन प्रयोज्यवृद्धे कार्यान्वितपदार्थज्ञानमनुमितमिति तत्रैव शक्तिर्गृह्यत इति वक्तव्यम्। [3]तथा सति 'स्वस्य यथा कार्यान्वितपदार्थज्ञानं शुद्धपदार्थज्ञानपूर्वकम्, एवं प्रयोज्यवृद्धस्य कार्यान्वितपदार्थज्ञानमपि शुद्धपदार्थज्ञानपूर्वकं' इत्यनुमितिरपि सम्भवति। ततश्च कार्यान्वितपदार्थज्ञानमूलतया अनुमितं यच्छुद्धपदार्थज्ञानं तत्रैव शक्तिग्रहो बालस्य किं न स्यात्। शक्तिग्रहोपयोगिकार्यान्वितार्थज्ञानानुकूला शुद्धपदार्थोपस्थितिरेव प्राभाकरैः निमित्तावस्था उच्यते। यथोक्तं [4]निबन्धनपञ्चिकायां ऋजुविमलायाम्—'अनन्वितावस्था हि [5]सम्बन्धग्रहणोपायतां गच्छन्ती वाक्यार्थप्रतिपत्तौ निमित्तम्। एवं हि सम्बन्धग्रहणम्—'अयमर्थः अनेन शब्देन आकाङ्क्षितसन्निहितयोग्यार्थान्तरान्वितस्सन् अभिधीयते' इति। अत्र, अयमर्थ इति अनन्वितावस्थस्य शुद्धस्य गवादेः उपस्थितिरुक्ता।

ननु—या प्रयोज्यवृद्धगता शुद्धपदार्थोपस्थितिरनुमिता सा यद्यपि शब्दजन्यैव, कारणान्तरानिरूपणात्, तथाऽपि न सा साक्षात् प्रवृत्तिकारणम्। किं तु कार्यान्वितपदार्थोपस्थितिरेव। या च निमित्तावस्थारूपा पदार्थोपस्थितिः सा तु बालस्य प्रत्यक्षरूपैव। अतो न 'उपस्थितिमात्रं शुद्धपदार्थस्य वर्तते' इति कृत्वा

---

1. आ. वाक्यानां

2. मु. 'ग्रह' नास्ति

3. तथा सतीति प्रत्यक्षाधीनस्वप्रवृत्तिस्थले इति शेषः।

4. निबन्धनपञ्चिकायामिति प्रभाकरगुरुविरचिता शाबरभाष्यटीका बृहतीनाम्नी निबन्धनशब्देन व्यवह्रियते, विस्तरेण तदर्थप्रतिपादिका निबन्धनपञ्चिका। सा च शालिकानाथेन विरचिता टीका ऋजुविमला इत्युच्यते।

5. मु. सम्बन्धोपायतां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र शक्तिग्रहं तु शक्यते। अतः प्रवृत्तिजनिका शब्दजन्योपस्थितिः कार्यान्वितविषया या बालेनानुमिता तस्यामेव [1]शब्दस्य शक्तिः बालेन कल्प्यत इति चेत्—तर्हि, ममेदमिदानीं कार्यमित्येव ज्ञानं साक्षात्प्रवृत्तिजनकमिति तत्रैव ज्ञाने वाक्यस्य शक्तिग्रहः स्यात्।

अथोच्येत—शब्दात् 'अयमर्थः कार्यः' इति ज्ञाने जाते मदंशादिघटितं कार्यताज्ञानं अनुमित्यात्मकं भविष्यतीति न मदंशाद्यन्विते तत्र शक्तिः शब्दस्य कल्प्यत इति ; तर्हि, शुद्धा एव पदार्थाः पदैरुपस्थाप्यन्ते शक्त्या कार्यान्वयज्ञानं तु कार्यवाचकपदसमभिव्याहारात् भविष्यतीति न कार्यान्वयेऽपि पदानां शक्तिः कल्पनीया।

अपि च—कार्यान्विततया बालेन पदार्थज्ञानमनुमितमिति तत्र शक्तिग्रहकल्पने कर्मकारकाद्यन्वितपदार्थज्ञानमपि बालेनानुमितमिति तत्तत्कारकान्वितेऽपि शक्तिः स्यात्। यदि तु तत्तत्कारकान्वयव्यतिरेकेणापि शाब्दबोधदर्शनात् न तत्तदन्वये शक्तिः कल्प्यते ; तथा सति कार्यान्वयं विहायापि सिद्धार्थमात्रे वाक्यप्रयोगदर्शनात् तदन्वयेऽपि शक्तिर्मास्तु। यदि तु आद्यव्युत्पत्तिग्रहस्थले कार्यान्वयो नियत इत्येतावन्मात्रेण तदन्विते शक्तिः कल्प्येत, तथा सति प्रथमव्युत्पत्तिग्रहस्थले प्रमाणान्तरजन्योपस्थितेविषयत्वं नियतमिति प्रमाणान्तरजन्योपस्थितिविषयेष्वेव शक्तिः पदानां स्यात्। यदि तु प्रमाणान्तरजन्योपस्थितिः शक्तिग्रहे निमित्तमात्रं न तु शक्त्यवच्छेदिका, तर्हि कार्यान्वयोऽपि तथाऽस्तु।

तस्मात् प्रमाणान्तरोपस्थितिविषयत्वमुपाधीकृत्य यथा लौकिकवैदिकपदार्थसाधारण्येन शक्तिग्रहः तथा कार्यान्वयमुपाधीकृत्य केवलसिद्धार्थप्रतिपादककाव्यादिसाधारण्येन शुद्ध एव पदार्थे शक्तिग्रहः[2] न तु कार्यान्विते इति न सिद्धार्थपदसमभिव्याहारेषु कार्यपदाध्याहारो वा असंसर्गाग्रहो वा कल्पयितुं शक्यते। [3]वृद्धव्यवहारविरोधात्।

---

1. **शब्दस्य शक्तिः**—वाक्यस्य सामर्थ्यम्, एवमुत्तरत्रापि।

2. मु. 'ग्रह' नास्ति

3. **वृद्धव्यवहारविरोधादिति** प्रयोज्यप्रयोजकवृद्धव्यवहारस्थले प्रथमोपस्थिते शुद्धे शक्तिग्रहस्य व्यवस्थापितत्वात् तद्विरोध इति भावः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च कार्यान्वयं विहायापि आद्यव्युत्पत्तिग्रहो भवतीति 'आद्यव्युत्पत्तिग्रहे सर्वत्र कार्यान्वयो नियतः' इत्येतदपि नास्ति। मात्रादिभिः अङ्गुल्या निर्दिश्य घटादिशब्दोच्चारणे स्तनन्धयस्य तत्र शक्तिग्रहदर्शनात्। न च 'अङ्गुलीनिर्देशपूर्वकं शब्दोच्चारणं शक्तिग्रहार्थं' इति बालेन प्रागज्ञातमिति कथं शक्तिग्रह इति वाच्यम्। फलबलेन जन्मान्तरीयसंस्कारोद्बोधकल्पनात्। अङ्गुल्या घटादिकं निर्दिश्य शब्दोच्चारणे क्रियमाणे बालानां अनन्तरं तत्तच्छब्दस्य तस्मिंस्तस्मिन् अर्थे व्यवहारदर्शनेन अन्यो बालोऽवधारयति 'अङ्गुलीनिर्देशपूर्वकं शब्दोच्चारणं शक्तिग्रहार्थम्' इति। स च तत्संस्कारयुक्तो जन्मान्तरं प्राप्य मात्रादिभिः अङ्गुलीनिर्देशपूर्वकं व्युत्पाद्यमानो जन्मान्तरीयसंस्कारस्योद्बोधात् 'अयं अङ्गुलीनिर्देशपूर्वकं शब्दप्रयोगः शक्तिग्रहार्थः' इति स्मृत्वा तत्र शक्तिं गृह्णातीति प्रवाहानादितया तथा [1]व्युत्पादनस्य, आद्यशक्तिग्रहः उक्तप्रकारेण सिद्धार्थेऽपि भवति।

एवं 'पुत्रस्ते जातः' इति वाक्यप्रयोगकालेऽपि हर्षपूर्वकस्नानाचरणं दृष्ट्वा 'पुत्रजन्म हर्षपूर्वकस्नानाचरणे निमित्तं' इति जन्मान्तरीयसंस्कारोद्बोधात् यस्य स्मृतिर्भवति तेन 'पुत्रस्तेजातइतिवाक्यं पुत्रजन्मप्रतिपादकं' इति [2]निर्णीयत एव। अतः प्रथमव्युत्पत्तिग्रहः सिद्धस्थलेऽपि भवतीति न कार्यान्वित एव पदानां शक्तिः। यत्रत्वाख्यातपदान्वयः तत्र परं तत्प्रयुक्तः कार्यान्वयो भासत इति अन्यलभ्यत्वादपि न पदानां तत्र शक्तिः कल्पनीया।

नन्वेवं अन्वितेऽपि पदानां शक्तिर्न स्यात् अन्यलभ्यत्वाविशेषादिति चेत्, [3]अस्तु को दोषः।

---

1. मु. व्युत्पाद्यमानस्य

2. **निर्णीयत एव इति** एतेन—बहूनां हर्षहेतूनां सम्भवात् अनिर्णय इति पूर्वपक्षोक्तं निरस्तम्।

3. **अस्तु को दोष इति** एतावता प्रबन्धेन पदानां अभिधानं शुद्धे एवार्थे, न तु कार्यान्विते अन्विते वा इत्येतत् उपपादितम्। तदाक्षिपन् प्रत्यवतिष्ठते अन्विताभिधानवादी प्राभाकरः **अथकथमित्यादिना अन्वयांशे शक्त्यभावे कथं तद्बोधः स्यात्** इत्यन्तेन। तत्र नैयायिकोक्तं उक्ताक्षेपसमाधानं उपपाद्य निराकरोति अन्विताभिधानवादी—**ननु मास्त्वित्यादिना अतः शाब्दबोधविषयस्य वृत्तिविषयत्वं नियतं** इत्यन्तेन।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ कथमन्यलभ्यत्वम्, आख्यातपदवत् कार्यांशे, पदान्तरस्य अन्वयांशे अभावात्। ननु—मास्तु पदान्तरं, पदार्थोपस्थापकैरेव पदैः आकाङ्क्षादिसाचिव्यात् अशक्य एवान्वयः पदार्थानामनुभाव्यते। न च प्रमाणभूतस्य शब्दस्य [1]स्वप्रमेये-नान्वयेन सह असम्बन्धे [2]कथं बोधकतेति वाच्यम्। धूमरूपेणानुमानप्रमाणेन व्याप्तिरूपस्वसम्बन्धाभावेऽपि यथा पक्षसाध्यसंसर्गोऽनुभाव्यते, तथा शब्देनापि शक्तिरूपसम्बन्धाभावेऽपि अन्वयबोधो भविष्यति। यदि तु तत्र [3]पक्षधर्मताबलात् तद्भानमिति, तदा प्रकृतेऽप्याकाङ्क्षादिबलादन्वयभानमस्तु। न च शब्दस्य वृत्तिविषये एव बोधजनकतेति वृत्तिं विना कथमन्वयस्य शाब्दबोधविषयतेति वाच्यम्। 'भूतले घटो न' 'भूतलं घटो न' इति, अत्यन्ताभावस्थले घटतदभावयोः प्रतियोग्यनुयोगिभावस्य अन्योन्याभावस्थले अधिकरणाधेयभावस्य प्रतियोग्यनुयोगि-भावस्य च अशक्यस्यैव शब्दात्प्रतीतेरिति चेत्, न—वृत्त्यविषये शब्दस्याबोधक-त्वात्। न च प्रकारतया विशेष्यतया वा यस्योपस्थितिः[4] शाब्दे तस्यैव वृत्तिविष-यत्वं न तु शाब्दविषयस्य सर्वस्यापीति वाच्यम्। गौरवेण प्रकारतादेः नियमशरीरे प्रवेशयितुमशक्यत्वात्। अनुमाने नायं नियम इति न तत्र पक्षसंसर्गांशेऽपि व्याप्तिर-पेक्ष्यते, साध्यांश एव हेतोर्व्याप्तिरपेक्ष्यते नान्यत्र। शाब्दे तु विशिष्य स्वप्रमेये वृत्तिरपेक्ष्यत इति नियमः। अत एव पक्षसाध्ययोस्संसर्गबोधने शब्देन क्रियमाणे [5]तत्र मतुप् प्रयुज्यते 'पर्वतो वन्हिमान्' इति। न च 'भूतले घटो न' इति निषेधे प्रतियोग्यनुयोगिभावोऽशक्य एव भासत इति वाच्यम्। [6]अनुयोगितायां नञश्शक्ति-

---

1. 'स्व' नास्ति।

2. **कथं बोधकतेति** प्रत्यक्षे प्रकारविशेष्ययोरिव संसर्गांशेऽपि प्रमाणसन्निकर्षा-पेक्षादर्शनात् इति भावः।

3. **पक्षधर्मताबलात् तद्भानमिति** साध्यसमानाधिकरणत्वेन नियतस्य हेतोः पक्षसंबन्धज्ञानात् साध्यस्य पक्षसम्बन्धज्ञानम्, अन्यथा निश्चितस्य हेतोस्साध्य-सामानाधिकरण्यनियमस्य अनिर्वाहात् इति भावः।

4. **उपस्थितिः** भानम्।

5. **तत्र**—सम्बन्धबोधिका। मु. 'तत्र' नास्ति

6. **अनुयोगितायां**—अनुयोगितायामपि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वीकारात्। [1]अत एव अभावपदे अनुयोगिताया अशक्यतया तत्प्रतिपादनाय घटशब्दानन्तरं [2]तत्र षष्ठीप्रयोगो दृश्यते। ततश्च 'घटानुयोग्यभाव:' इति शाब्दबोधः शक्यविषय एव। एवं 'भूतलं घटो न' इति [3]नञा 'भूतलाधेयो घटानुयोगी भेदः' इति प्रतिपादनार्थं आधेयतानुयोगितासम्पुटित[4] एव भेदोऽभिधीयते। अन्यथा 'भूतले घटस्य भेदः' इति प्रयोग इव षष्ठीसप्तमीप्रयोगः[5] प्रसज्येत। अतः शाब्दबोधविषयस्य वृत्तिविषयत्वं नियतमिति अन्वयांशे शक्त्यभावे कथं तद्बोधः स्यात्—इति चेत्।

[6]उच्यते—शक्त्यभावेऽपि अन्वितस्य लक्षणया बोधो भविष्यति। ततश्च देवदत्तःपचतीत्यत्र 'पाकानुकूलकृत्याश्रयो देवदत्तः' इति वा 'देवदत्तकर्तृकः पाकानुकूलो व्यापारः' इति वा यथायथं मतभेदेन [8]तत्तद्गुणविशिष्टः प्रधानपदार्थो लक्षणीयः। एवं च गुणभूतपदार्थानां तत्तत्संसर्गाणां च भेदेऽपि प्रधानपदार्थैक्यात् वाक्याभेदः। 'अर्थैकत्वादेकं वाक्यम्' [जै. सू. २-१-४६] इत्यत्र प्रधानपदार्थैक्यस्यैव एकवाक्यताप्रयोजकता विवक्षिता। इयं च विशिष्टे वाक्यार्थे लक्षणा प्रधानपदस्यैव, यदि पदस्यैव वृत्तिर्लक्षणेति निर्बन्धः।

---

1. अत एवेत्यस्यैव विवरणं अशक्यतयेत्यन्तम्। अभावपदनिष्ठशक्त्यविषयतया नञ एव शक्यतया—इत्यर्थः।

2. तत्र—घटस्य अभावः इति अभावपदसमभिव्याहारस्थले।

3. नञा अभिधीयते इति सम्बन्धः।

4. सम्पुटित इति आधेयत्वं अनुयोगित्वं भेदश्चेति त्रयं नञ्पदशक्यम्, भेदे च द्वयं विशेषणतया भासते, 'भूतलाधेयो भेदः घटानुयोगी' इति 'घटानुयोगी भेदः भूतलाधेयः' इति वा बोधः। एवं पूर्वोत्तरभावेन आधेयत्वानुयोगित्वाभ्यां विशिष्टत्वाद्भेदस्य आधेयताऽनुयोगितासम्पुटित इत्युक्तम्। अत्र बोधे भेदस्य सम्पुटितत्वं अभिधाने उपचरितं इति ध्येयम्।

5. प्रयोगः 'भूतले घटस्य न' इति प्रयोगः।

6. उपपादितं अन्विताभिधानवादं अभिहितान्वयवादाश्रयणेन निराकर्तुमारभते—उच्यते इत्यादिना अताऽन्यलभ्यत्वात् नान्वयांशेऽपि शक्तिः स्वीकर्तुमुचित इत्यन्तेन ग्रन्थेन।

7. मतभेदेनेति आद्यं नैयायिकमतम्, द्वितीयं मीमांसकमतम्।

8. मु. तत्तद्गुणेन विशिष्टः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदित्वर्थवादवाक्यानुसारेण सर्वेषामपि सम्भूयाप्यर्थलक्षकत्वमुपेयते, तदा सर्वाण्यपि वाक्यान्तर्गतानि पदानि विशिष्टार्थं लक्षयन्तीत्यस्तु । न तत्र निर्बन्धः ।

[1]ननु—तथा सति लक्ष्यस्यान्वयस्य शक्यैः पदार्थैः सम्बन्धो वक्तव्यः, शक्यसम्बन्धरूपत्वात् लक्षणायाः । न च [2]अन्वयेनान्वयान्तरमस्ति । शक्यार्थ-ग्रहणानुपपत्तिश्च लक्षणाबीजम्, ततश्च शक्यानामर्थानां शाब्दे अभानं प्राप्नोति, यथा अर्थवादपदानां प्राशस्त्यलक्षणास्थले । किं च शक्यसम्बन्धोऽपि ज्ञात एव लाक्षणिकपदार्थोपस्थितौ प्रयोजकः, इह तु वाक्यार्थस्यापूर्वत्वात् कथं तदज्ञाने तेन सह [3]शक्यार्थसम्बन्धज्ञानम् ।

उच्यते—अन्वयस्य अन्वयान्तरं नास्तीत्येतदसङ्गतम् । 'एतस्य अनेन पदार्थेन सह अयमन्वयः' इति प्रतीतिसिद्धः अस्ति[4] कश्चित् अन्वयेन सह पदार्थानां सम्बन्धः । सोऽत्र लक्षणा भविष्यति । लाक्षणिकशाब्दबोधस्थले मुख्यार्थाभानं तु जहल्लक्षणायामेव, न त्वजहल्लक्षणायाम् । मुख्यान्वयानुपपत्तिः न लक्षणायां सार्वत्रिकं प्रयोजकम्, 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र तदभावात् । अपि तु तात्पर्यानुप-पत्तिः । सा च प्रकृतेऽप्यस्ति । [5]विशिष्टवाक्यार्थोद्देशेनैव वाक्यप्रवृत्तेः । अपूर्व-स्यापि वाक्यार्थस्य, यथा [6]'हरिद्रायां नद्यां घोषः' इत्यत्र नदीपदसामानाधि-

---

1. वाक्यार्थस्य लक्ष्यत्वे अन्विताभिधानवादिनः आक्षेपं उत्थापयति—**ननु तथा सतीत्यादिना** । यथाऽऽह **शालिकानाथः**—'वाच्यार्थस्य च वाक्यार्थे संसर्गानु-पपत्तितः । तत्संबन्धवशप्राप्तस्यान्वयात् लक्षणोच्यते' इति ।

2. **अन्वयेन** वाक्यार्थरूपेण पदार्थसंसर्गेण **अन्वयान्तरं** पदार्थानां संसर्गान्तरं नास्ति इत्यर्थः । अननुभवात् इति भावः । संसर्गस्य वाक्यार्थत्वे इदं दूषणम् । संसृष्टस्य वाक्यार्थत्वे विशिष्टकेवलयोः तादात्म्यसंबन्धसम्भवेन उक्तदोषानवकाशः ।

3. मु. **वाक्यार्थसंबन्ध**

4. **अस्तीति** अन्यथा 'एतस्य अन्वयः' इति षष्ठ्या अभिलापो न स्यात् इति भावः ।

5. **विशिष्टवाक्यार्थोद्देशेनैवेति** 'विशिष्टार्थप्रयुक्ता हि सममिव्याहृतिर्जने' इति मण्डनमिश्रोक्तेः ।

6. **हरिद्रायां नद्यामिति चोलदेशस्थचम्पकारण्यक्षेत्रस्थः** इदानीं सरोविशेष-तटाकात्मकः हरिद्रानदीति चोलदेशे प्रसिद्धः । अस्योदाहरणेन 'चोलदेशीया इमे व्याख्यातारः' इति प्रसिद्धिः दृढीभवति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करण्येन हरिद्रापदं नदीविशेषनामेति निश्चित्य तत्र घोषाधारतानुपपत्त्यनुसन्धानेन प्रागज्ञातमेव[1] हरिद्रानदीतीरं हरिद्रानदीसम्बन्धित्वेनानुसन्दधाति[2] तथा अपूर्वमपि वाक्यार्थं अन्वयरूपं आकाङ्क्षादिबलादुपस्थितं पदार्थसम्बन्धित्वेनानुसन्धास्यतीति, शाब्दत्वसिद्धये[3] लाक्षणिकत्वाभ्युपगमे न काचिदनुपपत्तिः। अतः अन्यलभ्यत्वात् नान्वयांशेऽपि शक्तिः स्वीकर्तुमुचिता।

[4]एतेन—यत् प्राभाकरैरुच्यते 'लोके कार्यताप्रतिपादकत्वस्य लिङादिषु निर्धारितत्वात् वेदे स्वर्गकामपदसमभिव्याहारेण स्वर्गकामिकार्यताया अस्थिरे यागे अन्वयायोग्यतानुसन्धाने तदन्वययोग्यमपूर्वमेव लिङादिप्रतिपाद्यम्' इति—तदपि निरस्तम्। आक्षेपलभ्यस्य तस्य शब्दवाच्यत्वानुपपत्तेः, अपूर्वद्वारा स्वर्गजनकत्वानुसन्धाने स्वर्गकामिकार्यत्वस्य यागेऽपि अन्वयबोधोपपत्तेश्च।

अपि च लिङादिश्रवणानन्तरं प्रवृत्तिदर्शनात् यज्ज्ञानं प्रवृत्तिहेतुः तत्र लिङादेः शक्तिर्वक्तव्या।

कः पुनः प्रवृत्तिजनकज्ञानविषयः?

तत्र केचिदाहुः—'ज्वरितः पथ्यमश्नीयात्' इत्यादावाप्तोपदेशे पथ्याशनविषयकमाप्ताभिप्रायमवगम्य गां बधानेत्यादौ च आज्ञादिरूपमाचार्याभिप्रायमवगम्य पुरुषप्रवृत्तिदर्शनात् आज्ञादिरूपः पुरुषव्यापार एव प्रवर्तकज्ञानविषय इति स एव प्रेरणात्वेन लिङादिभिः प्रतिपाद्यते। एवं च सति—पुरुषाशयविशेषाणां प्रार्थनादीनां अनुगतत्वाभावेन लिङादीनामनेकार्थता[5] स्यात्—इत्यपि शङ्का निरस्ता। [6]यद्यपि—पथ्य-

---

1. **प्रागज्ञातमेवेति** तदानीमेव नदीरूपलिङ्गात् अनुमितम्।

2. **अनुसन्दधातीति** चम्पकारण्यक्षेत्रवृत्तान्तानभिज्ञः कश्चित् प्रागविज्ञातहरिद्रानामकनदीविशेषः इत्यादिः। इदमनुसन्धानं लक्षणाज्ञानम्। तीरबोधस्य शाब्दत्वसिद्धये आवश्यकमिदम्।

3. **शाब्दत्वसिद्धये इति** वृत्त्युपस्थाप्यत्वसिद्ध्यर्थं इति शेषः।

4. **एतेन**—अन्यलभ्यस्य अशक्यत्वोपपादनेन।

5. **अनेकार्थता**—शक्ततावच्छेदकैक्ये सति विभिन्नशक्यतावच्छेदककत्वम्। निष्कर्षस्तु व्युत्पत्तिवादे पञ्चम्यर्थनिरूपणावसरे द्रष्टव्यः।

6. उक्तमेवार्थं शङ्कासमाधानाभ्यां उपपादयति—**यद्यपीत्यादिना**।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मश्नीयादित्यादौ सुहृदुपदेशे उपदेष्टुः [1]अभिसन्धिगोचरस्य फलस्य अभावेन तदीयाशयविशेषः अयंपथ्याशनेप्रवर्ततामित्येवंरूपः [2]विधिरित्युच्यते, उपदेष्टुः स्वप्रयोजनाभिसन्धौ तु उत्कृष्टत्वे तदीयाशयविशेष आज्ञेत्युच्यते, निकृष्टत्वे तु प्रार्थनेत्युच्यते। तथा च विधित्वादिकमननुगतमेव—तथापि, तेषु सर्वेषु प्रवर्तनात्वापरपर्यायं प्रेरणात्वमस्तीति तेन रूपेण शक्तेरुपगमात् [3]नानुपपत्तिः। सा च प्रेरणा यद्यपि पुरुषाशयविशेषरूपा वेदे पौरुषेयत्वं वदत ईश्वराशयविशेषरूपा शक्या वक्तुम्, अपौरुषेयत्ववादिनस्तु तथोपपादनं न सम्भवति, तथापि लिङः प्रेरणात्वेन शक्तिग्रहात् वदिकैरपि लिङादिभिः आकृत्यधिकरणन्यायेन प्रेरणात्वे अभिहिते तदाश्रयाकाङ्क्षायां लिङादिगत एव प्रवर्तनाख्योऽपूर्वो [4]धर्मः कल्प्यते। स च, घटादिव्यक्तयोऽपि यथा घटादिशब्दप्रतिपाद्या भवन्ति घटत्वादिप्रतिपादनद्वारा, तथा प्रवर्तनात्वप्रतिपादनद्वारा लिङादिप्रतिपाद्यो भवति। अथ वा न अपूर्वो व्यापारः प्रवर्तनात्वाश्रयतया कल्पनीयः। किं तु लिङादिषु क्लृप्त एव अभिधाख्ये व्यापारे लिङ्वाच्यत्व प्रवर्तनात्वाश्रयत्वं च कल्पनीयं लाघवात्—इति

सर्वथाऽपि नापूर्वं लिङादिप्रतिपाद्यम्। तज्ज्ञानस्य लोके प्रवृत्तिजनकत्वादर्शनात्।

प्रवर्तना[5] च प्रवृत्तिप्रयोजको धर्मः। ततश्च तस्य प्रयोज्यतासंसर्गेण समानपदोपात्तायां [6]भावनायामन्वयः। लिङादिभिर्हि लिङ्त्वादिना प्रवर्तना प्रतिपाद्यते। आख्यातत्वेन भावनापरपर्यायः पुरुषव्यापारः प्रतिपाद्यते।

[7]ननु—कथमाख्यातेन व्यापारः प्रतिपाद्यते? यावता पच्यादिधातुभिरेव स प्रतिपादितः। पचिधातुर्हि विक्लित्त्यनुकूलं व्यापारं प्रतिपादयति। एवं गमिधातुः

---

1. **अभिसन्धि** - इच्छा।
2. **विधिः**—उपदेशः।
3. **मु.** 'नानुपपत्तिः' नास्ति
4. **धर्मः**—व्यापाररूपो धर्मः।
5. **प्रवर्तना**—इयमेव शाब्दीभावनेत्युच्यते।
6. **भावनायां**—प्रवृत्तिशब्दितायां अर्थभावनायाम्।
7. प्राचीनवैयाकरणानां नवीननैयायिकानां च मतेन शङ्कते—**नन्विति**।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तरदेशसंयोगानुकूलम् । त्यजिधातुः पूर्वदेशविभागानुकूलम् । तत्र च विक्लित्त्यादिकं फलं तदनुकूलो व्यापारश्च धातुभिरेव प्रतिपादित इति कथमाख्यातस्य व्यापारप्रतिपादकता—इति चेत्,

[1]उच्यते—उभयं धातुभिः प्रतिपाद्यत इति वक्तुमशक्यम् । गौरवात् । ननु—तर्हि व्यापार एव प्रतिपाद्यताम्, फलं तु द्वितीयार्थो भविष्यति । न च फलानामननुगतत्वात् द्वितीयार्थता नोपपद्यत इति वाच्यम् । [2]सर्वनामन्यायेन धातूपात्तव्यापारफलत्वेन क्रोडीकृतानां पच्यादिधातुसमभिव्याहारेण विक्लित्तित्वादिरूपेण प्रतिपादकता भविष्यतीति चेत्—न—तथात्वे त्यजिगम्योः पर्यायता स्यात् । एक एव हि व्यापारः पूर्वदेशविभागानुकूल उत्तरदेशसंयोगानुकूलश्च । अतस्तत्र पूर्वोत्तरदेशविभागसंयोगरूपफलप्रतिपादकतयैव अपर्यायता वक्तव्या । अतः तदैकरूप्याय सर्वधातूनां फलप्रतिपादकतैवास्तु । न तु व्यापारप्रतिपादकता । स तु आख्यातेनैवाभिधीयते । न चैवं द्वितीयाया वैयर्थ्यम् । फलाधारताप्रतिपादकतोपपत्तेः । न च तथा सति सप्तमीतो विशेषो द्वितीयाया न स्यात् आधारताप्रतिपादनतौल्यात् इति वाच्यम् । कर्तृकर्मद्वारा क्रियाधारता[3]सप्तमीप्रतिपाद्या, फलनिरूपिताधारता तु द्वितीयया—इति भेदोपपत्तेः । कर्तृतृतीयया तु [4]साक्षात् क्रियानिरूपिताधारता प्रतिपाद्यत इति तस्या अपि वैलक्षण्यम् ।

नन्वेवं धातूपात्तव्यापारव्यधिकरणफलशालित्वं कर्मत्वमिति कर्मत्वलक्षणं वक्तुं न शक्यते, फलस्यैव धात्वर्थत्वेन धातूपात्तव्यापारेत्यंशस्यासम्भवदुक्तिकत्वात् । न च धातूपात्तफलशालित्वमेव तदिति वाच्यम् । तथासति 'देवदत्तः शेते' इति प्रयोगे शीङ्धातूपात्तस्य विशेषविज्ञानाभावरूपस्य फलस्य देवदत्ते सत्त्वेन

---

1. 'फलमेव धात्वर्थः' इति मण्डनाचार्याणां मतानुसारं समाधातुं उपक्रमते—**उच्यते** इत्यादिना ।

2. **सर्वनामन्यायेनेति** तदादिसर्वनामार्थानां अननुगतदेवदत्तादीनां वक्तृबुद्धिविषयत्वेन उपलक्षणेन यथा अनुगमः तथेत्यर्थः ।

3. **सप्तमीप्रतिपाद्येत्यादि** 'भूतले देवदत्तः तिष्ठति' 'स्थाल्यां तण्डुलं पचति' 'देवदत्तेन तण्डुलः पच्यते' इति यथाक्रमं उदाहरणानि ।

4. **मु. 'साक्षात्' नास्ति**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य कर्मतापत्तेः । न चैकस्य कर्तृत्वकर्मत्वानुपपत्तिः । 'आत्मानं [1]आत्मा जानाति' इति प्रयोगदर्शनात् । न च तत्र भेदकल्पनया तथा प्रयोग इति वाच्यम् । प्रकृतेऽपि भेदकल्पनया सकर्मकप्रयोगापत्तेः[2] । न च आख्यातोपात्तव्यापारव्यधिकरणफलशालित्वं तदिति वाच्यम् । तथा सति यजतीति प्रयोगे स्वर्गस्यापि कर्मता स्यात् । आख्यातोपात्तकर्तृव्यापारजन्योत्पत्तिरूपफलाश्रयत्वात् । शेते इत्यादौ च तज्जन्यसुखस्यापि कर्मता स्यात् । [3]अपि च फलस्यैव धात्वर्थत्वे विक्लित्त्यनुत्पत्ति-दशायां पचतीतिप्रयोगश्च असाधुस्स्यात्, [4]पाकस्यावर्तमानत्वात्—इति चेत्—

उच्यते—आख्यातोपात्तव्यापारव्यधिकरणधातूपात्तफलशालित्वेन यद्विवक्षितं तत् कर्मेति । ज्ञाधातूपात्तं तु [5]फलं पुरुषव्यापारव्यधिकरणं घटादौ प्रसिद्धमेव, तदाश्रयतया आत्मनो विवक्षायां कर्मता भवति । शीङ्धातूपात्तं तु फलं विशेष-विज्ञानोपरमरूपं न व्यापारव्यधिकरणं प्रसिद्धमस्तीति न तस्य सकर्मकता । यजि-समभिव्याहारे स्वर्गादेस्तु कर्मता न भवति । धातूपात्तस्वत्वनिवृत्तिरूपफलानाधार-त्वात् । 'यागेन स्वर्गं करोति' इति निर्देशस्तु भवति । कृञ्धातूपात्तोत्पत्तिरूप-फलाधारत्वात् । पाकानुत्पत्तिदशायां पचतीतिप्रयोगश्च नासाधुः । न हि तत्र लडर्थवर्त-मानत्वं प्रकृत्यर्थे फले अन्वेति, अपि तु आख्यातोपात्ते व्यापारे । तस्य च वर्तमान-त्वात् नानुपपत्तिः । न च एवमपि पाकानुत्पत्तिदशायां 'पाको वर्तते' इति कथं प्रयोगः स्यात् पाकसत्ताया [6]अवर्तमानत्वादिति वाच्यम् । तत्र भावार्थककृत्प्रत्य-यानां व्यापारवाचकताभ्युपगमेन तदुपपादनसम्भवात् । अवश्यं च भावकृतां व्या-पारवाचकता अभ्युपगन्तव्या । अन्यथा 'काष्ठैः पाकः' इति प्रयोगोऽनुपपन्न एव स्यात् । क्रियां विना कारकविभक्त्यनुपपत्तेः ।

---

1. मु. आत्मना
2. मु. प्रयोगोपपत्तेः
3. आ. 'अपि च' नास्ति
4. **पाकस्य**—पचिधात्वर्थस्य फलस्य ।
5. **फलं**—असत्त्वापादकाज्ञानाविषयत्वम् ।
6. **अवर्तमानत्वादिति** यश्च वर्तते पच्यर्थविक्लित्त्यनुकूलव्यापारः तद्वाचकाख्या तस्य पाकइत्यत्राभावेन तस्य पदानुपस्थितत्वात् तत्र वर्तमानत्वान्वयासंभवात् कृतश्चात्र भावार्थकत्वात् इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च—अस्मिन् पक्षे व्यापारविशेषाणां प्रतीतिर्न स्यात्। पच्यादिभिर्विक्लित्त्यादिफलस्यैव प्रतिपादनात्। न चाख्यातेनैव विक्लित्त्याद्यनुकूलानामधिश्रयणादिव्यापारविशेषाणां प्रतिपादनमस्तु[1]। तथात्वे आख्यातस्य अनेकशक्तिप्रसङ्गात्। [2]अतो व्यापारा एव धातुभिः प्रतिपाद्यन्ते—इति वाच्यम्। येनापि व्यापारप्रतिपादकता स्वीक्रियते तेनापि फलविशेषाणां प्रतीतिः कथं समर्थनीया। द्वितीयया फलविशेषप्रतिपादनमिति चेत्, तथासति फलस्यैव धात्वर्थत्वमिति पक्षेपि आख्यातस्यैव व्यापारविशेषप्रतिपादकता [3]अस्तु। यथा च सर्वनामन्यायेन धातूपात्तव्यापारफलत्वेन क्रोडीकृतानां [फलानां] नानार्थतापादकता[4] नास्ति, तथा धातूपात्तफलानुकूलव्यापारत्वेन क्रोडीकृतानां [5]व्यापाराणामपि न नानार्थतापादकता भविष्यति। यथा च धातुविशेषसमभिव्याहारे योग्यतया फलविशेषप्रतिपादनं तथा धातुविशेषसमभिव्याहारे व्यापारविशेषप्रतिपादकता भविष्यति।

अस्तु वा [6]व्यापारवाचकतैव। न च त्यजिगम्योः पर्यायतापत्तिः। अस्तु को दोषः। 'अमुं ग्रामं परित्यज्य अमुं ग्रामं गच्छति' इतिव्यवहारे यथाश्रुते त्यजिगमिकर्मणोर्व्यत्यासस्तु न भवति। त्यजेः पूर्वदेशविभागद्योतकताभ्युपगमात् तत्समभिव्याहृतकर्मप्रत्ययेन पूर्वदेशविभाग एव प्रतिपाद्यते। एवं गमावुत्तरदेशसंयोगे द्रष्टव्यम्।

यदि तु विनिगमनाविरहात् फलं व्यापारश्चेति [7]द्वयमपि धात्वर्थ इत्युच्यते, तथा नामास्तु, न काचिदनुपपत्तिः। अस्मिंश्च पक्षे 'काष्ठैः पाकः' इतिप्रयोगः सूपपाद एव। भावकृतां तु प्रकृत्यर्थप्रतिपादकतैव भविष्यति प्रातिपदिकार्थमात्र-

---

1. **अस्त्वति** इतीति शेषः। इति न च इति संबन्धः।

2. **अतः**—व्यापारविशेषबोधस्यान्यथानुपपत्तेः। अत्र 'व्यापारः' इति 'प्रतिपाद्यते' इति च पाठान्तरम्।

3. मु. 'अस्तु' नास्ति

4. **नानार्थतापादकतेति** द्वितीयाया इत्यादिः।

5. **व्यापाराणामपि नेति** आख्यातानां इति शेषः।

6. **व्यापारवाचकतैवेति** प्राचीननैयायिकानां मतम्।

7. **द्वयमपि धात्वर्थ इति** प्राचीनवैयाकरणानां नवीननैयायिकानां च मतम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विहितप्रथमावत् । परं तु 'कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति न्यायेन कृत्प्रत्ययेन [1]तत्प्रकृत्यर्थस्यैव प्रतिपादने लिङ्गसङ्ख्यान्वययोग्यत्वरूपं द्रव्यत्वं [2]भवतीति विशेषः ।

ननु—धातुप्रतिपाद्यत्वं यदि केवलव्यापारस्य यदि वा फलविशिष्टव्यापारस्य पक्षद्वयेऽप्याख्यातस्य व्यर्थता स्यात् । न च तदनुकूलः पुरुषप्रयत्न एव आख्यातेन प्रतिपाद्यत इति वाच्यम् । रथोगच्छतीति प्रयोगे व्यापारानुकूलस्य यत्नस्य अभावेन असाधुतापत्तेः—इति चेत्—

उच्यते—आख्यातेन धातुप्रतिपाद्यव्यापारातिरिक्त एव व्यापारः [3]सामान्यरूपेण प्रतिपाद्यते । पचतीत्यत्र हि धातुना विक्लत्त्यनुकूलो व्यापारः प्रतिपाद्यते, आख्यातेन तु तदतिरिक्तः चुल्लीसम्मार्जनादिरूपः स्थाल्यवरोहणान्तो व्यापारनिचयो यः स सर्वोऽपि भावनात्वेन रूपेण अभिधीयते । भावनात्वं च जन्यत्वे सति जनकत्वम् । तच्च यद्यपि घटादावपि वर्तते, तथाऽपि यथा धेनुशब्दे [4]धानकर्मत्वं प्रवृत्तिनिमित्तं गोत्वं प्रयोगोपाधिः तथा आख्यातेऽपि जन्यत्वे सति जनकत्वं प्रवृत्तिनिमित्तं पूर्वापरीभूतक्रियात्वं प्रयोगोपाधिः । पूर्वापरीभूतत्वं च एकस्मिन् क्षणे अपर्यवसितस्वरूपत्वम् । तच्च प्रत्येकं क्रियाणां न सम्भवति । तत्तत्क्षणे पर्यवसितत्वात् प्रत्येकं क्रियाणाम् । किं तु सन्तन्यमानव्यापारनिचय एव । अतः स एव भावनात्वेनाकारेणाभिधीयते । भावनाशब्देन तु यद्यपि पूर्वापरीभूतमेव वस्तु प्रतिपाद्यते, तथाऽपि तस्मिन् शब्दे जनकत्वापरपर्यायं भवनानुकूलत्वमेव प्रवृत्तिनिमित्तम्, न तु साध्यत्वापरपर्यायं जन्यत्वमपि । तावन्मात्रेण च आख्यातभावनाशब्दयोः [5]अदूरविप्रकर्षाभिधानमभियुक्तानाम् ।

---

1. मु. तस्य प्रकृत्यर्थस्यैव आ. 'व्यापारस्य' इत्यधिकम्
2. मु. भविष्यतीति
3. मु. सामान्येन
4. **धानं**—दोहनम् ।
5. **अदूरविप्रकर्षेति** जन्यत्वेनाभिवायकत्वतदभावाभ्यां आख्यातस्य भावनाशब्दस्य चास्ति विप्रकर्षः । स च अदूरः । यतः जनकत्वेनाभिधायकत्वस्य उभयोः सत्त्वात् अस्ति सन्निकर्षः । अतः आख्यातभावनाशब्दौ अदूरविप्रकृष्टौ इत्यभिदधते अभियुक्ताः इत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत् सिद्धं समानपदोपात्तायां भावनायां प्रवर्तनायाः प्रयोज्यप्रयोजकभावेनान्वय इति ।

प्रवर्तनायाः प्रवृत्तिप्रयोजकत्वं च तत्र इष्टसाधनताक्षेपद्वारा ।

अत्रेदं वक्तव्यम्—यदि प्रवर्तनायामभिहितायामपि प्रवृत्तिजननार्थमिष्टसाधनताक्षेपोऽभ्युपगम्यते, तदा तस्या एव लिङर्थत्वमस्तु । प्रवर्तनाज्ञानस्यापीष्टसाधनताक्षेपकत्वेनाभ्युपगततया इष्टसाधनताज्ञानस्यैव प्रवर्तकताभ्युपगमात् अन्यथासिद्धस्य तस्य प्रवर्तकत्वानुपपत्तेश्च । न च–प्रवर्तनया स्वस्य प्रवृत्तिजननार्थमेव इष्टसाधनत्वस्याक्षिप्ततया कथं द्वारभूतेन तेन अन्यथासिद्धत्वम् , अन्यथा अपूर्वेणान्यथासिद्धस्य यागादेरपि स्वर्गजनकता न स्यादिति–वाच्यम् । युक्तं अपूर्वेण यागादेरन्यथासिद्धिर्न भवतीति, यत्कारणं यागस्वर्गयोस्साध्यसाधनभावज्ञानमुपजीव्यैव अपूर्वस्य तद्द्वारतयैव स्वर्गसाधनता कल्प्यते । तत्र च यदि यागस्य स्वर्गसाधनता न स्यात् कस्य निर्वाहाय अपूर्वं स्वर्गसाधनं भवेत् । नैवमिष्टसाधनताज्ञानम् । तस्य प्रत्यक्षाधीनप्रवृत्तिस्थले स्वत एव प्रवृत्तिजनकतायाः सिद्धत्वात् । ततश्च प्रत्यक्षाधीनप्रवृत्तिस्थलेक्लृप्तकारणताकस्येष्टसाधनत्वज्ञानस्यैव शब्दानन्तरभाविप्रवृत्तिजनकत्वोपपत्तौ तत्रैव लिङादीनां शक्तिरस्तु । किं [1]तदाक्षेपिकया प्रवर्तनया । अतः प्रवर्तनावादिनाऽप्यवश्यापेक्षितव्यं इष्टसाधनत्वमेव विध्यर्थः ।

तावन्मात्रज्ञानं च न प्रवृत्तिहेतुः । मधुविषसंपृक्तान्नभोजनादाविष्टसाधनताज्ञाने सत्यपि बलवदनिष्टानुबन्धित्वज्ञानेन प्रवृत्तिप्रतिबन्धदर्शनात् । अतो बलवदनिष्टाननुबन्धित्वमपि विध्यर्थः ।

एवं तर्हि कृत्यसाध्यताज्ञानेऽपि प्रवृत्तिप्रतिबन्धात् कृतिसाध्यत्वमपि लिङर्थोऽस्त्विति चेत्, न–यद्यपि कृतिसाध्यताज्ञानं प्रवृत्तिजनकं भवति, तथाऽपि तस्य प्रत्यक्षादिना अवगन्तुं शक्यतया न विध्यर्थता । न चैवं इष्टसाधनतादेरपि लोके प्रत्यक्षादिना अवगन्तुं शक्यतया विध्यर्थता न स्यादिति वाच्यम् । तस्य लोके प्रत्यक्षादिना अवगन्तुं शक्यत्वेऽपि वेदे तदसम्भवात् । कृतिसाध्यत्वं तु वेदेऽपि यागादौ प्रमाणान्तरावगम्यमेव । ततश्च अस्तु नाम प्रवृत्तिजनकज्ञानविषयतया कृतिसाध्यत्वमपि विध्यर्थः, तथाऽपि वेदे प्रमाणान्तरसिद्धतया तस्मिन्नंशे अनुवाद-

1. आ. तदपेक्षिण्या

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कतैव । अतो वेदे विधिप्रत्ययस्य कार्यतायां तात्पर्यमेव नास्ति, प्रमाणान्तरसिद्ध-त्वात् । अपि तु अज्ञाते बलवदनिष्टाननुबन्धीष्टसाधनत्व एव ।

ननु—प्रत्यक्षादिसिद्धमपि कृतिसाध्यत्वं शब्देन बोध्यत एव । न च निष्प्र योजनत्वं तत्प्रतिपादनस्य । तस्मिन् हि बोधिते 'स्वर्गकामिकृतिसाध्य एव यागादिः स्वर्गकामस्येष्टसाधनं' इति [1]बोधो भवति । तेन च [2]'अन्यकृत एव यागः स्वस्येष्टसाधनं' इति शङ्का अपोदिता भवति । तद्बोधनाभावे हि स्वफल-सिद्धये अन्यमपि पुरुषं प्रार्थनादिना यागादौ प्रवर्तयेत् । न च इयमपि शङ्का फलस्य कर्तृगामिताबोधकेनात्मनेपदेन निवारितेति वाच्यम् । एवमपि 'सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः' इत्यादावात्मनेपदाभावेन शङ्कानिवारणालाभात् । ननु—अग्नीनाद-धीतेति आत्मनेपदेन आधानस्य कर्तृगामिफलकत्वं बोध्यते । तच्च साक्षादाधानफल-मग्निसंस्कारमादाय न सम्भवति, संस्कारस्य अग्निगतत्वेन आत्मगतत्वाभावात् । अतोऽग्निसाध्यक्रतुफलमादायैव तद्वचनं निर्वाह्णीयम् । ततश्च आधानकर्तुरेवाग्निसाध्य-कर्मफलमिति फलस्य न अन्यकृतकर्मसाध्यता वक्तुं शक्यते, इति चेत्—एवमपि यान्यनग्निसाध्यानि जपहोमादीनि तेषां न [3]आधानगतात्मनेपदेन कर्तृगामिता सिध्यति । अग्निसाध्यानामपि कर्तृगामिफलकत्वं न प्राप्नोति । एतावदेव हि तेन सिध्यति 'अग्निसाध्यानां कर्मणां फलं आधानकर्तुरेव' इति । तावताऽपि स्वकृता-धानसम्पादितेषु अग्निषु अन्येन कर्मानुष्ठाने कृतेऽपि [4]स्वफलसिद्धिर्भवत्येवेति न यागादेः स्वर्गकामिकर्तृकता नियमेन प्राप्नोति । अतः तत्सिध्यर्थं कृतिसाध्यत्वमपि प्रतिपादनीयं—इति चेत्—

न—एवमपि 'स्वर्गकामिकृतिसाध्य एव यागः स्वर्गजनकः' इति सिध्यति । ततश्च, योऽन्यार्थं स्वर्गं कामयते सोऽपि स्वर्गकाम इति अन्यदीयस्वर्गार्थं अन्यस्यापि अनुष्ठानं प्राप्नोति ।

---

1. **बोध इति** स्वर्गकामपदसमभिव्याहारात् स्वर्गकामस्य यदिष्टं तत्साधनत्वस्येव स्वर्गकामस्य या कृतिः तत्साध्यत्वस्यापि बोधो भवति, कृतेः पदानुपस्थाप्यत्वे उक्तरीत्या बोधो न भवति, न हि शाब्दं अशाब्देनान्वेति—इति भावः ।

2. **अन्यकृत एवेति** एवकारःअप्यर्थकः ।

3. **आधानगतेति** आधानवाक्यगतेत्यर्थः ।

4. **स्वफलसिद्धिरिति** क्षेत्रजपुत्रोत्पादनन्यायेनेति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र यद्युच्येत–अन्यदीयस्वर्गकामनया तदैव पुरुषः प्रवर्तते यदि स्वर्गितया अन्य इष्टो भवति। ततश्च स्वर्गिपुरुषकत्वमेव तस्य फलं भवति। न चैतन्न्याय्यम्। स्वर्गकामिकृतिसाध्यो यागः स्वर्गकामस्येष्टसाधनं इत्युक्ते[1] स्वारसिकी स्वर्गकामना स्वार्थस्वर्गे एव प्रतीयते। परं तु विधिश्रुत्युपात्तस्य फलस्य यत्र परम्पराग्राहकं प्रमाणमवतरति, यथा श्राद्धवैश्वानरेष्ट्यादौ, तत्र परं स्वरसतः प्रतीयमानोऽर्थः परित्यज्यते, तृप्तिविशेषशालिपितृकत्वं पूतत्वादिमत्पुत्रकत्वं च फलमुपेयते। प्रकृते तु तथाऽङ्गीकारे प्रमाणाभावात् [2]स्वार्थस्वर्गकाम एव स्वर्गकामशब्दोपात्तो भवतीति 'यः स्वार्थं स्वर्गं कामयते तत्कृतिसाध्यो यागः तस्य फलसाधनं' इत्युक्ते, अन्यकृतिसाध्य [3]एव यागः [4]स्वार्थस्वर्गकामस्य फलं प्रयच्छतीति शङ्का निराकृता भवति। अतः कृतिसाध्यत्वमपि प्रतिपादनीयम्–इति—

तन्न—यदि हि स्वर्गकामशब्देन स्वार्थस्वर्गकाम एव प्रतिपाद्यते, तदा आख्यातोपात्ते व्यापारे तस्य कर्तृतया अन्वयात् 'यः स्वार्थं स्वर्गं कामयते तत्कर्तृको व्यापारः तस्येष्टसाधनम्' इति बोधे सति 'अन्यकर्तृकस्य यागस्य स्वफलजनकत्वम्' इतिशङ्कानिराकरणं सुकरमेव[5]।

तत् सिद्धं वेदे तात्पर्यगत्या लिङादिभिः इष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वं च प्रतिपादनीयम्, न तु कार्यत्वं नापि तेन रूपेणापूर्वम्—इति। 'श्येनेनाभिचरन् यजेत' इत्यत्र तु वाक्यान्तरेण नरकसाधनतावगमात् न बलवदनिष्टाननुबन्धित्वांशो बोध्यते। अपि तु इष्टसाधनत्वमात्रम्।

ननु–विधिनैव बलवदनिष्टाननुबन्धित्वे बोधिते अर्थवादा [6]व्यर्थास्स्युरिति चेत्, न—बलवदनिष्टाननुबन्धित्वे अवगतेऽपि स्वर्गादितुल्यमनिष्टं नास्तीति न निर्णीतम्। ततश्च सुखदुःखयोस्तुल्यताशङ्कया पुरुषस्य न अभिरुचिः स्यात्।

---

1. मु. इत्युक्तेः
2. मु. स्वार्थस्वर्ग एव
3. एवकारः अप्यर्थकः।
4. मु. स्वार्थं स्वर्ग
5. सुकरमेवेति 'अतः कृतिसाध्यत्वस्य लिङाद्यर्थत्वं नाभ्युपेयम्' इति शेषः।
6. व्यर्थास्स्युरिति अर्थवादबोध्यप्राशस्त्यस्य बलवदनिष्टाननुबन्धित्वव्यतिरिक्तस्य दुर्निरूपत्वात् इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

औपनिषदस्य पुरुषस्य अनन्यशेषत्वात् । योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी (ब्रह्मस्वरूपः) उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थो-

अतः अर्थवादैः फलतुल्यमनिष्टं नास्तीति बोधनीयम्[1] । अतो न अर्थवादानां व्यर्थता ।

अतः न विधीनामपूर्ववाचकत्वम्, नापि कार्यान्वित एव पदानां शक्तिः, अतो न कार्यशेषतया व्युत्पत्त्यनुरोधेन वेदान्तैः ब्रह्म प्रतिपादनीयम्—[2]इति दूषणं मनसि निधाय 'वेदान्तवाक्यस्वरसादेव कार्यशेषतया ब्रह्मावगम्यते' [3]इत्यत्र दूषणमाह—**औपनिषदस्य पुरुषस्येति** ।

सङ्ग्रहवाक्यं विवृणोति—**योऽसावुपनिषत्स्विति** । उपनिषच्छब्दो ब्रह्म-विद्याप्रतिपादकः । 'ब्राह्मीं वाव त उपनिषदमब्रूमेति तस्यै तपो दमः कर्म' [केन.उ. ४-८] इति प्रयोगात् । तपआदौ शेषिभूता ब्रह्मसंबन्धिनी च ब्रह्मविद्यैव हि भवति । ततश्च—

'उपेतिशब्दः सामीप्ये निशब्दो निर्णयार्थकः ।
सदेर्विशरणार्थत्वं इत्येषोपनिषत् भवेत् ॥

परमात्मानं सामीप्येन—प्रत्यगभेदेन विषयीकृत्य निर्णयरूपा अविद्यां शृणाति—नाशयति' इति निर्वचनं उपनिषच्छब्दे द्रष्टव्यम् । ततश्च ब्रह्मविद्याप्रतिपादकेनोप-निषच्छब्देन प्रकृतभाष्ये तज्जनको वेदान्तभागः प्रतिपाद्यते निरूढलक्षणया । कार्य-शेषता—कार्यसम्बन्धित्वम् । तत् किं कर्तृतया, उत प्रयाजादिवत् इतिकर्तव्यतारूप-

---

1. **बोधनीयमिति** न च अर्थवादरहितविधिस्थले कथं उक्तबोधनिर्वाह इति शङ्क्यम् । तत्र विधिशिरस्येव हि अयं भारो निक्षिप्यते, सति त्वर्थवादे नायं भारः तत्र निक्षेप्तुमुचितः । अथवा—सार्थवादस्थले इष्टतुल्यानिष्टाभावस्य **शाब्दबोधः**, निरर्थवाद-स्थले **कल्पना**—इत्याशयात् । स्फुटीकरिष्यति चैतत् 'अपि च ब्राह्मणो न हन्तव्यः' इत्यादिभाष्यव्याख्यानावसरे निन्दार्थवादसार्थक्यविवेचने स्थित्वा ।

2. **इति दूषणमिति** 'यदपि केचिदाहुः- प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्तीति-तन्न' इतिभाष्यव्याख्यानोपक्रमे पूर्वपक्षिण आशयो द्वेधा विकल्पितः । तत्र आद्यकल्पे दूषणमिदं 'तन्न' इति भाष्यखण्डेन सूचितम् ।

3. **इत्यत्र दूषणं**—द्वितीयकल्पे दूषणम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽनन्यशेषः, नासौ नास्ति इति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' [बृ. उ. ३-९-२६] इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवात्मत्वात्।

नन्वात्मा अहंप्रत्ययविषयत्वात् उपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम्, न—तत्साक्षित्वेन प्रत्युक्तत्वात्। न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण

तया, उत व्रीह्यादिवदवहननादौ उपासनाशेषतया[1], इति विकल्पं मनसि निधाय निराकरोति। असंसारीति कर्तृतायाः, उत्पाद्यादीति शेषतायाः[2], स्वप्रकरणस्थ इति इतिकर्तव्यतारूपतायाः निराकरणं द्रष्टव्यम्। अनन्यशेष इति फलितार्थकथनम्। **नासाविति**। कार्यान्विते शक्तेर्निराकरणात् नाधिगम्यत इति न शक्यते वक्तुम्।

ननु 'अथात आदेशो नेति नेति' इति प्रपञ्चेन सह आत्मनोऽपि निराकरणात् नास्तीति कथं न शक्यते वक्तुं, इत्यत आह—**स एष नेतिनेतीति**। सएषइतिवाक्यं बृहदारण्यकपञ्चमाध्यायगतं 'कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थः' इत्यादिना 'कस्मिन्नूदानः प्रतिष्ठित इति समान इति' इत्यन्तेन प्राणापानव्यानोदानसमानानामुत्तरोत्तरप्रतिष्ठितत्वं निरूप्य आम्नातम्। अथातआदेशोनेतिनेतीति चतुर्थाध्यायगतं तत्रैव[3]। ततश्चायमर्थः—यश्चतुर्थाध्याये नेति नेतीति प्रतिपादितः, स एष आत्मा—यः प्राणादौ समानान्ते जीवरूपेण प्रतिष्ठितः—इति। ततश्च अथातआदेश इति [4]वाक्यस्य श्रुत्यैव आत्मपरिशेषतायां पर्यवसानस्य कृतत्वात् न तेन आत्माऽपि निषिध्यत इति भावः। निराकरणसाक्षित्वादप्यात्मा निराकर्तुं न शक्यत इत्याह—**आत्मनश्चेति**। असाक्षिकस्य निराकरणस्यैव असम्भवादिति भावः।

यदि उपनिषदां प्रत्यगभिन्नब्रह्मपरत्वं, तर्हि कथं प्रामाण्यम्, अनधिगतविषयालाभात्, प्रतीचः अहमितिप्रत्यक्षसिद्धत्वात्—इति शङ्कते—**नन्विति**। शुद्धस्य साक्षिणः प्रत्यक्षेणानिर्णयात् नोक्तदोष इति परिहरति। **नेति**। वेदान्त-

1. मु. शेषितया
2. मु. शेषितायाः
3. तत्रैव—बृहदारण्यके एव
4. मु. श्रुतिवाक्यस्यात्म०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा, अतः स न केनचित् प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः। सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। पुरुषो हि विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्धबुद्धमुक्तस्वभावः। तस्मात् 'पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः' (क. उ. १-३-११)। 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. उ. ३-९-२६) इति च औपनिषदत्वविशेषणं पुरुषस्य उपनिषत्सु (एव) प्राधान्येन

प्रतिपाद्यस्यात्मनः अहंप्रत्ययविषयकर्त्रादिसाक्षित्वेन[1] उक्तशङ्कायाः प्रत्युक्तत्वादित्यर्थः। न केवलं वेदान्तप्रतिपाद्यस्वरूपस्य प्रत्यक्षानधिगतिः, [2]तार्किकैरपि तस्य स्वरूपं ज्ञातुमशक्यं इत्याह—नह्यहंप्रत्ययेति। 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥' इतिवचनमभिप्रेत्य सर्वभूतस्थः सम इत्युक्तम्। ततश्च क्षणिकमनित्यंविज्ञानमात्मेतिसौगतमतानधिगतिः शरीरपरिमाणइतिदिगम्बरमतानधिगतिश्चोक्ता। 'सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः' इति वचनमभिप्रेत्य एक इत्युक्तम्। ततश्च नानात्मवादितार्किकमीमांसकमतानधिगतिरुक्ता। 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते' इति वचनमनुसृत्य कूटस्थनित्य इत्युक्तम्। ततश्च जीवोत्पत्तिवादिमतानधिगतिरुक्ता। सर्वस्यात्मा—सर्वस्य पारमार्थिकस्वरूपम्। विधिशेषत्वं—विधेयत्वं निषेध्यत्वं चेत्यर्थः। उपादेयत्वं कृतिसाध्यत्वं, तदभावात् न विधेयः। निवृत्तिविषयत्वं हेयत्वं, तदभावात् न निषेध्यः। सर्वबाधावधित्वात् सर्वस्य पारमार्थिकं स्वरूपं आत्मा इत्याह—सर्वं हि विनश्यद्विकारजातमिति। तस्मादिति। यस्मात् सर्वविक्रियारहितो मुक्तस्वभाव आत्मा तस्मात् 'पुरुषान्न परं किञ्चित्' इतिवाक्यं परागतिरितिशब्देन परमप्राप्यत्वं प्रतिपादयत् उपपद्यते इत्यर्थः। औपनिषदस्येतियदुक्तं तत्र प्रमाणमाह—तत्वौपनिषदमिति।

---

1. साक्षित्वेनेति आत्मनः संस्कार्यत्वनिरासप्रस्तावे 'अनश्नन्नन्योऽभिचाकशीति 'एको देवः...साक्षी चेता' इति साक्षित्वप्रतिपादकमन्त्रोदाहरणेनेत्यर्थः।

2. आ. तान्त्रिकैरपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाश्यमानत्वे उपपद्यते । अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम् ।

यदपि शास्त्रतात्पर्यविदामनुक्रमणं 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इत्येवमादि, तत् धर्मजिज्ञासाविषयत्वात् विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम् ।

अपि च 'आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानाम्' इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानामानर्थक्यप्रसङ्गः । प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेद्वस्तु उपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः । न हि भूतमुपदिश्यमानं क्रिया भवति । अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेश इति चेत्, नैष दोषः–क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तु उपदिष्टमेव । क्रियार्थत्वं तु

एकदेशिना यत् संप्रदायविद्वचनमुदाहृतम्, तत्राह—यदपीति । यद्यपि तस्य वचनस्य जैमिनिमतानुरोधित्वात् तद्विरोधो न परिहर्तव्य एव, अपि तु न्यायविरोधे तदप्रमाणमित्येव वक्तुमुचितं, तथाऽपि तद्वचनश्रद्धाजडान् प्रति तथोक्तिः ।

'आम्नायस्य क्रियार्थत्वात्' इत्यत्र किं अर्थशब्दः अभिधेयवाची उत प्रयोजनवाची? नाद्य इत्याह—अपि चेति । ननु–भूतोपदेशानामपि नानर्थक्यम्, तेषां[1] विशेषणतया क्रियाप्रतिपादकत्वात्–इत्यत आह—प्रवृत्तिनिवृत्तिव्यतिरेकेणेति । नोपदिशतीति । क्रियां विनैवेति शेषः । को हेतुरिति । [2]'साक्षाद्विशेषणतया वा कार्य एव पदानां शक्तिः' इत्यस्य नियमस्य निर्मूलत्वादिति भावः । न हीति । कस्यैष इति प्रश्ने राज्ञोऽयं इत्युत्तरे च उपदिश्यमानोऽर्थः न क्रिया, नापि तदन्वित इत्यर्थः । नन्वस्तु सिद्धेऽपि पदानां व्युत्पत्तिः, अथापि वेदस्य प्रयोजनवदर्थाभिधायकत्वात् तन्निर्वाहाय क्रियाप्रतिपादकता स्वीकर्तव्या, ततश्च सूत्रेऽप्यर्थशब्दः प्रयोजनपरः– इति द्वितीयं शङ्कते—अक्रियात्वेऽपीति ।

---

1. आ॰ 'अपि' इत्यधिकम् । विशेषणतया क्रियाप्रतिपादकत्वात्—क्रियाकार्यम्, कार्यविशेषणप्रतिपादकत्वात्; कार्यान्वितप्रतिपादकत्वादिति यावत् ।

2. साक्षाद्विशेषणतया वा कार्ये—कार्ये कार्यान्विते वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रयोजनं तस्य। न चैतावता वस्तु अनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति, उच्यते—अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसारहेतोः निवृत्तिः प्रयोजनं क्रियत इति अविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन।

अपि च 'ब्राह्मणो न हन्तव्यः' इति चैवमाद्या निवृत्तिः उपदिश्यते। न च सा क्रिया, नापि क्रियासाधनम्। अक्रियार्थानामुपदेशा

अपि च गुरुमते 'सोमेन यजेत' इत्यादिषु वाक्येषु लिङा कार्यं प्रतिपाद्यते। तस्य च विषयापेक्षायां प्रकृत्युपात्तो याग एव विषयत्वेनान्वेति। न तु सोमादिः उपपदोपात्तः। कृतिविषयो हि कार्यविषय इत्युच्यते। कृतेश्च द्विविधो विषयः–उद्देश्यो जन्यश्चेति। तत्र उद्देश्यो गुणद्रव्यादिसाधारणः। अत एव 'घटं करोति' इति घटस्य उद्देश्यतयाविषयत्वमस्तीति 'यत्नरूपा कृतिरेव कृञ्धात्वर्थः' [1]इति मते द्वितीयानिर्देश उपपद्यते। 'जानाति, इच्छति, करोति' इत्यादिसमभिव्याहारे द्वितीयायाः विषयतायां [2]निरूढत्वाभ्युपगमात्। जन्यस्तु क्रियारूप एव। प्रकृते च कृतिविषयः कृतिकार्ययोः साध्यसाधनभावघटकोऽपेक्षितः। उद्देश्यविषयस्यापूर्वस्य [3]स्वपदेनैव समर्पितत्वात्। घटकश्च कृतिजन्य एव भवति। तत्र यदि सोमादीनां कृतिविषयत्वं स्वीक्रियते तदा तेषामपि कृतिजन्यतासिद्ध्यर्थं व्यापारान्तरमपेक्षितं स्यात्। अतः साक्षात् कृतिसाध्यो यागादिरेव विषयतया अन्वेति। ततश्च यत्र लिङा कार्यं निर्दिश्यते तत्र क्रियारूपो विषयोऽपेक्षितः, अन्यथा कृतिसाध्यत्वेनावगतस्यापूर्वस्य निर्वाहो न भवतीति। एवं[4] तत्प्रक्रियायां स्वीक्रियमाणायां 'ब्राह्मणो न हन्तव्यः' इत्येवमादिनिषेधवाक्येषु कार्यप्रत्ययो न निर्वहति, क्रियारूपविषयालाभात्—इत्याह—अपि चेति। तन्मते

---

1. **इति मते**—नैयायिकमते। व्यापारोऽर्थं इति मण्डनमिश्रमते घटस्य विषयत्वमन्तराऽपि द्वितीयानिर्देशोपपत्तिः।

2. **निरूढत्वाभ्युपगमात्** निरूढलक्षणाभ्युपगमात्।

3. **स्वपदेनैव**—कार्यवाचिलिङ्पदेनैव।

4. मु. एवं सति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽनर्थकश्चेत् 'ब्राह्मणो न हन्तव्यः' इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तम्, तच्चानिष्टम् ।

न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण ।

हि ब्राह्मणोनहन्तव्य इत्यत्र नञर्थोऽभावः । स च हननरूपधात्वर्थे विशेष्यतया अन्वेति । ततश्च हननाभाव इत्यर्थः हन्तिसमभिव्याहृतेन नञा प्रतिपाद्यते । अभाव एव निवृत्तिरित्युच्यते । लिङादिना च कार्यं प्रतिपाद्यते । ततश्च 'हननाभावविषयकं कार्यं' इति वाक्यार्थं वर्णयन्ति । तदेतद्दुर्घटम् । अभावस्य क्रियात्वाभावेन घटकीभूतविषयतया अन्वयासम्भवात् । ततश्च घटकीभूतविषयालाभेन 'ब्राह्मणो न हन्तव्यः' इति कार्यताप्रत्ययोऽनिर्व्यूढ एव भवतीति भावः ।

ननु यत [1]एव नञा प्रतिपादितस्य अभावस्य कृतिं प्रति घटकीभूतविषयत्वासम्भवः, अत एव नञः अभावपरिपालने लक्षणा उपेयते । यदि तु—हननप्रागभावस्य नञा प्रतिपादितस्य परिपालनं नाम उत्तरकालसम्बन्धित्वमेव, [2]तदपि न साक्षात् कृतिसाध्यम्—तर्हि परिपालनानुकूलः वाङ्मनःकायानां निरोधाख्यो व्यापार एव लक्ष्यताम्—इत्याशङ्क्याह—**न चेति**। अनुरागः अन्वयः । निवृत्तिरेवौदासीन्यं—निवृत्त्यौदासीन्यं, तद्व्यतिरेकेणेत्यर्थः ।

अयमाशयः—निरोधाख्ये व्यापारे विषयतया निरूप्यमाणे लक्षणैव [3]तावत् दोषः । न चेष्टापत्तिः । तथासति षाष्ठं प्रतिषेधाधिकरणं [पू. मी. ६-२-५] विरुध्येत । तत्र ह्ययमर्थो निरूपितः—'न कलञ्जं भक्षयेत्' 'न सुरां पिबेत्' इत्यादिवाक्यं किं निषेधार्थकमेव, उत 'तस्य व्रतं' इत्युपक्रम्याम्नातं नेक्षेतोद्यन्तमितिवाक्यं यथा पर्युदासार्थकं एवमिदमपि—इति सन्दिह्य, यथा 'नेक्षेतोद्यन्तमादित्यं' इत्यत्र नञीक्षतिभ्यां ईक्षणप्रागभावानुकूलस्सङ्कल्पो 'नेक्षे' इत्येवंरूपः प्रतिपाद्यते,

---

1. मु. एवं
2. तदपि नेति प्रागभावध्वंससामग्रीविरहादेव उत्तरकालसंबन्धसिद्धेः इति भावः।
3. मु. 'तावत्' नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा 'न हन्तव्यः' इत्यत्रापि नञ्हन्तिभ्यां हननप्रागभावानुकूलः सङ्कल्प एव प्रतिपाद्यते, ततश्च स एव नियोगविषयो भवतीति—पूर्वपक्षं कृत्वा ; तथासति लक्षणा स्यात् , नेक्षेतेत्यत्र तु सा समाश्रिता, तस्य व्रतमित्युपक्रमात् , अतो न सङ्कल्प-लक्षणा इति—सिद्धान्तितम् ; तत् विरुद्ध्येत—इति ।

अपि च अभावकार्यताज्ञानं न निवृत्तौ प्रयोजकम् । अनर्थसाधनताज्ञानं विना पुरुषस्य निवृत्तेरसम्भवात् । अतः लिङाद्यर्थभूतं बलवदनिष्टाननुबन्धित्वविशिष्टेष्ट-साधनत्वमेव नञा निषिध्यते । तन्निषेधे हि कलञ्जभक्षणं दृष्टसुखापेक्षया तीव्रं चिरकालानुभाव्यं च दुःखं सम्पादयतीत्यर्थो लभ्यते । कथम् । लिङर्थनिविष्टं बलवत्त्वं हि अनिष्टस्य इष्टापेक्षया तीव्रत्वं चिरकालानुभाव्यत्वं च । उभयविधानिष्टाननु-बन्धित्वं बलवदनिष्टाननुबन्धित्वम् । न चैवं तीव्रानिष्टचिरकालानिष्टयोर्मध्ये [1]एकैका-निष्टानुबन्धिन्यपि उभयविधानिष्टाननुबन्धित्वं वर्तत इति तद्व्यावृत्तिः कथं स्यादिति वाच्यम् । अन्यतरत्वेन क्रोडीकृत्य उभयविधानिष्टाननुबन्धित्वबोधने तद्व्यावृत्तेरपि [2]लाभसम्भवात् । ततश्च आख्यातेन 'कलञ्जभक्षणभावनागतं बलवदनिष्टाननुबन्धित्व-विशिष्टमिष्टसाधनत्वम्' इति बोधिते नञा च तदन्वयिना विशिष्टाभावे बोधिते इष्ट-साधनत्वांशस्य प्रत्यक्षसिद्धस्य निषेद्धुमशक्यतया बलवदनिष्टाननुबन्धित्वाभावे एव पर्यवसानं अर्थवादैर्लभ्यते । [3]निन्दार्थवादैर्हि बलवदनिष्टानुबन्धित्वमेव लक्ष्यते । यत्र तु निन्दार्थवादो न लभ्यते, तत्र विशिष्टाभावबोधकेन नञा इष्टसाधनत्वांशनिषेध-बाधसहकृतेन बलवदनिष्टाननुबन्धित्वाभावमादायैव पर्यवसानं स्वीक्रियते । न चैवं निन्दार्थवादं विनैव [4]सामर्थ्यात् निषेधस्य बलवदनिष्टानुबन्धित्वपर्यवसानसिद्धौ अर्थ-

---

1. **एकैकेत्यादि** उभयविधानिष्टाननुबन्धित्वं नाम तीव्रानिष्टानुबन्धित्वचिरकालानुभाव्यानिष्टानुबन्धित्वयोः उभयोरभावः । तत्र एकैकमात्रस्य सत्त्वेऽपि उभयोरभावः सम्भवति, एकसत्त्वेऽपि द्वयस्याभावात् , घटसत्त्वेऽपि 'घटपटोभयं नास्ति' इति प्रतीतेः इत्यर्थः ।

2. **लाभसंभवादिति** उभयोरन्यतरसत्त्वे 'अन्यतरत् नास्ति' इत्यप्रतीतेः इति भावः ।

3. **निन्दार्थवादैर्हीति** तथा चाहुर्वृद्धाः—निषेध्येषु तात्कालिकेष्टापेक्षया भाव्यनिष्टस्य गुरुतरत्ववचनं निन्दार्थवादः, विहितेषु तात्कालिकक्लेशापेक्षया भाविन इष्टस्य गुरुतरत्ववचनं स्तुत्यर्थवादः—इति ।

4. **सामर्थ्यात्**—योग्यत्वात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वादवैयर्थ्यमेव स्यादिति वाच्यम् । निन्दार्थवादाम्नानस्थले [1]स्वाध्यायविधिबलेन निन्दार्थवादैरेव पर्यवसानं लम्भनीयम्, न तु सामर्थ्यालोचनसहकृतेन निषेधेन—इति नियमोपपत्तेः ।

नन्वेवमपि 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इति विधिनिषेधयोः समानविषयत्वे का गतिः । न हि तत्र उक्तगतिः सम्भवति । बलवदनिष्टाननुबन्धित्वस्यापि विधिसिद्धत्वात् इति चेत्—

उच्यते—विधिबाधं विना हि निषेधस्य नावकाशो लभ्यते, तत्र परं अल्पबाधोपपत्तौ सर्वबाधो न न्याय्यः । तत्र च इष्टसाधनत्वान्तर्गतं नियतत्वमेव बाध्यते । इष्टसाधनत्वं हि इष्टनियतपूर्ववर्तित्वम् । तत्र पूर्ववर्तित्वांशबाधे सर्वात्मना वचनं बाधितं स्यात् । नियतत्वांशबाधे तु पाक्षिकानुष्ठानसम्पादकतया वचनं चरितार्थं भवति । ततश्च यथा 'व्रीहिभिर्यजेत' 'यवैर्यजेत' इति वचनद्वयविरोधे उभयोरपि पूर्ववर्तितामात्रबोधकता आस्थीयते, तद्वत् 'अतिरात्रे षोडशिनं गृह्णाति' इति वचनं पूर्ववर्तितामात्रबोधकं भविष्यति । परं तु व्रीहियवस्थले वचनद्वयसार्थक्याय शास्त्रीयद्रव्यप्रयुक्त एव अनियमः सह्यते, न तु लौकिकद्रव्यप्रयुक्तोऽपि । तथात्वे वचनं विनैव व्रीहियवयोः प्राप्तत्वेन नियमपरवाक्यवैयर्थ्यापत्तेः । ततश्च 'नातिरात्रे षोडशिनं गृह्णाति' इति विशिष्टनिषेधो नियमांशविशेषणनिषेधमादाय [2]पर्यवसितो भवति ।

ननु—अतिरात्रेषोडशिनंगृह्णातीतिविधिः नियमांशे निषेधवाक्यस्य पर्यवसानेऽपि बाधितो भवति । ततश्च नकलञ्जंभक्षयेदितिवाक्यैकरूप्याय बलवदनिष्टाननुबन्धित्वनिषेधेनैव निषेधवाक्यस्य पर्यवसानं कुतो न स्वीक्रियते । न च तथासत्यनिष्टसाधनतावगमात् षोडशिग्रहे कस्यापि प्रवृत्तिर्न स्यादिति वाच्यम् । यथा हि श्येने अनिष्टसाधनतावगमेऽपि अभिचारे उत्कटरागवशात् प्रवर्तते, तथा

---

1. **स्वाध्यायविधिबलेनेत्यादि** अन्यथा अर्थवादानां प्रयोजनवदर्थपर्यवसायित्वस्य स्वाध्यायविधिबोधितस्य अभावप्रसङ्ग इति भावः ।

2. **पर्यवसित इति** 'न कुर्यान्निष्फलं कर्म' इत्यादिनिषेधेष्वपि मथुरानाथप्रभृतिभिस्तार्किकैः इष्टसाधनत्वनिषेधोऽङ्गीक्रियते ; किमु वक्तव्यं 'नातिरात्रे' इत्यादिविहितप्रतिषिद्धस्थलेषु इत्यपि बोध्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नञश्चैष स्वभावः यत् स्वसंबन्धिनोऽभावं बोधयतीति ।

क्रतुफले उत्कटरागवशात् प्रवृत्तिर्भविष्यति, यथा च श्येनादिविधीनां इष्टसाधनतामात्रबोधेन पर्यवसानं एवं षोडशिग्रहविधेरपि भविष्यति—इति चेत्—

उच्यते—एवं हि सति षोडशिग्रहवाक्यस्य नरकं स्वीकृत्यापि क्रतूपकारार्थं पुरुषप्रवर्तकता वक्तव्या । तच्चासमञ्जसम् । विधेः [1]प्रयुक्तिगौरवापत्तेः । श्येनादौ त्वहिकफले पुरुषस्योत्कटो रागः सर्वलोकसिद्ध इति न तत्र विधेः [2]प्रयुक्तिगौरवम् ।

अपि च तत्र नरकप्रतिपादकस्पष्टवाक्यान्तरसद्भावात् तथा भवतु नाम । प्रकृते तु निषेधमात्रम् । तच्च नियमांशनिषेधमादायापि चरितार्थमिति न तेन षोडशिग्रहस्य नरकसाधनताऽपि कल्पनीया । एवं च शिष्टाविगानमपि समञ्जसं भवति षोडशिग्रहानुष्ठाने । अन्यथा श्येनादिवत् तस्यापि [3]विगीतता स्यात् । न च—एवं षोडशिग्रहाभावेऽपि क्रतूपकारो भवतीत्यर्थपर्यवसाने षोडशिग्रहे कस्यापि प्रवृत्तिर्न स्यात्, श्रमवैफल्यानुसन्धानात् । न च यस्य तदनुसन्धानं नास्ति स प्रवर्ततामिति वाच्यम् । तथाप्याप्तोपदेशे न [4]इयं गतिः दृष्टा, स्वाध्यायविधिश्च षोडशिग्रहांशे प्रयोजनवदर्थावबोधफलको न स्यात्—इति साम्प्रतम् । अत एव हि तत्र षोडशिग्रहतदभावयोर्मुख्यामुख्यकल्पत्वं स्वीकर्तव्यम्, ततश्च शक्ताशक्तविषयतया व्यवस्थितविकल्पो भविष्यति; अथ वा षोडशिग्रहानुष्ठाने फलभूयस्त्वकल्पनया व्यवस्थितविकल्पो भविष्यतीति न किञ्चित् सङ्कटम् ।

अतो निषेधवाक्येषु 'न कलञ्जं भक्षयेत्' इत्यादिषु लिङाद्यर्थभूत[5]बलवदनिष्टासाधनत्वविशिष्टेष्टसाधनत्वनिषेधे बलवदनिष्टसाधनतापर्यवसानं भवति । नान्यथा । अतोऽपि न निषेधवाक्येषु कार्यबोधः—इत्येतदभिप्रेत्याह—**नञश्चैष स्वभाव इति** । चशब्दो गुरुमताद्विशेषद्योतनार्थः । **स्वसम्बन्धिन इति** ।

---

1. मु. प्रवृत्ति
2. मु. प्रवृत्ति
3. मु. निन्दितता
4. **इयं गतिः**—निष्फलप्रवर्तकता ।
5. मु. बलवदनिष्टाननुबन्धीष्टसाधनत्व

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभावबुद्धिश्च औदासीन्ये कारणम् । सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति । तस्मात् प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः'

लिङादिप्रतिपाद्य[1]बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वस्य । तस्यैव व्युत्पत्त्यनुसारेण आकाङ्क्षिततया अर्थद्वारा नञा सम्बन्धित्वात् । [2]विशिष्टनञर्थनिषेधस्य[3]विशेषणनिषेधमादाय पर्यवसानेन निवृत्त्युपयोगमभिप्रेत्याह—**अभावबुद्धिश्चेति** । ननु—निवृत्तिरूपे औदासीन्ये यदि बलवदनिष्टाननुबन्धित्वाभावबुद्धिः परिपालकतया उपयुज्यते, निवृत्तेः प्रवृत्तिप्रागभावरूपाया अनादितया उत्पत्तावनुपयोगात्, तदा राज्यपरिपालने राजेव तत्परिपालनपर्यन्तमनुवर्तेत । तथा च तस्य उत्तरत्र सार्वदिकत्वात् सर्वदैवाभावबुद्धिरनुवृत्ता स्यात्—इत्यत आह—**साचेति** । प्रवृत्तिप्रागभावस्य नाशो हि प्रवृत्तिरेव । ततश्च प्रवृत्तिसामग्री निवृत्तेरुत्तरकालसम्बन्धं व्यावर्तयति । प्रवृत्तिसामग्र्यन्तर्गतं च बलवदनिष्टाननुबन्धित्वज्ञानं, तद्विघटकतया [4]तद्विषयीभूताभावज्ञानं निवृत्तावुपयुज्यते । तद्विघटकता तदुत्पत्तिप्रतिबन्धो वा, उत्पन्ने तत्र अप्रामाण्यापादकता वा । ततश्च सकृदुदितेनैव बलवदनिष्टाननुबन्धित्वाभावज्ञानेन बलवदनिष्टाननुबन्धित्वज्ञानविघटनोपपत्तेः न यावन्निवृत्ति तस्य अनुवर्तनप्रसक्तिः । ततश्च यथा कृषिप्रतिबन्धकं काष्ठादिकं क्षेत्रपतितं दग्धुं प्रयुक्तोऽग्निः प्रतिबन्धकनिरासेनोपशान्तः पुनर्नापेक्ष्यते, तथा इहापि भविष्यति । राज्ञस्तु तत्तद्देशकालोचितव्यवस्थाप्रयोजकतयापरिपालकत्वान् युक्तं यावद्राष्ट्रमनुवर्तनम्—इति भावः ।

नञश्चैपस्वभाव इत्यारभ्य उपशाम्यतीत्यन्तेन स्वमते निषेधार्थं निरूप्य पुनः प्राभाकरमतेनैव 'हननाभावविषयकं कार्यम्' इत्यर्थे निषेधवाक्येषु योग्यविषयालाभेन कार्यप्रतीत्यपर्यवसानं आपादयितुमुपसंहरति—**तस्मादिति** । **निवृत्त्यौ-**

---

1. मु. बलवदनिष्टाननुबन्धीष्टसाधनत्वस्य

2. **विशिष्टनञर्थनिषेधस्येति** विशिष्टप्रतियोगिको यो नञर्थनिषेधः, तस्येत्यर्थः । विशिष्टस्य नञर्थनिषेधः तस्य—इति विग्रहः ।

3. मु. विशेषणमादाय

4. **तद्विषयीभूताभावज्ञानं**—तस्य- बलवदनिष्टाननुबन्धित्वज्ञानस्य विषयीभूतं यत् बलवदनिष्टाननुबन्धित्वं तस्य योऽभावः तस्य ज्ञानम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः । तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयं आनर्थक्याभिधानं द्रष्टव्यम् ।

यदप्युक्तं—कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानं अनर्थकं स्यात् 'सप्तद्वीपा वसुमती' इत्यादिवदिति, तत् परिहृतम् । 'रज्जुरियं नायं सर्पः' इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात् ।

ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनात् न रज्जुस्वरूपकथनवदर्थवत्त्वं इत्युक्तम् । अत्रोच्यते—न अवगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं

दासीन्यमेवेति । न त्वप्राप्तक्रियारूपम्[1] । अन्यत्र प्रजापतिव्रतादिभ्य इति । 'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन' इत्यादिवाक्यविहिता धर्माः प्रजापतिव्रतशब्दप्रतिपाद्याः ।

नावगतब्रह्मात्मभावस्येति । श्रुतब्रह्मणो हि यत् श्रवणोपस्कृतवेदान्तवाक्यजनितं ज्ञानं न तत् अविद्यानिवृत्तिद्वारा परमपुरुषार्थं सहसैव सम्पादयति । अप्रामाण्यशङ्काकलङ्कितस्यानभ्यासदशापन्नजलादिज्ञानस्येव निष्कम्पप्रवृत्तौ, भेदवासनाप्रतिबद्धस्य वेदान्तजन्यज्ञानस्य अविद्यानिवृत्तावसामर्थ्यात् । यथा च समीपोपसर्पणादिना संवादेन अप्रामाण्यशङ्कायां निवर्तितायां तत्कालोत्पन्नचाक्षुषज्ञानं निष्कम्पप्रवृत्तावुपयुज्यते, तथा ध्यानेन भेदवासनायां अपोदितायां तत्कालोत्पन्नवेदान्तवाक्यार्थज्ञानं अविद्यां निवर्तयति । परं तु यावत्प्रारब्धं विक्षेपांशोऽनुवर्तते । अविद्याया अंशद्वयाभ्युपगमात् । स्वप्रकाशेऽपि आत्मनि 'नास्ति न प्रकाशते' इति व्यवहार[2]प्रयोजक एकोंऽशः । स एव आवरणशक्तिरित्युच्यते । कर्तृत्वाद्यनर्थप्रतिभाससम्पादकः अपरोंऽशः । स एव विक्षेपशक्तिरित्युच्यते । ततश्च ध्यानपरिपाकनिवृत्तभेदवासनानामपि वेदान्तजनितेन [3]प्रत्यग्ब्रह्मैक्यापरोक्षेण आवरणशक्त्यंशे निवर्तितेऽपि, आवरणशक्तिनिवृत्तिमात्रेण यथापूर्वं कर्तृत्वाद्यभिनिवेशयुक्त-

---

1. मु. क्रियापरम्
2. मु. जनक
3. मु. प्रत्यग्ब्रह्मापरोक्ष्येण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्यं दर्शयितुम्, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्। न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम्। न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति। तदुक्तं श्रुत्या—'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा. उ. ८-१२-१) इति।

शरीरे पतिते अशरीरत्वं स्यात् न जीवत इति चेत्,

तयासंसारित्वानुवर्तनाभावेऽपि, प्रारब्धदोषेण विक्षेपशक्त्यंशो ज्ञानं निवर्तकं न भवति। तत्र प्रारब्धस्य प्रतिबन्धकत्वाभ्युपगमात्। विक्षेपांशानुवृत्त्या च अभिमानशून्यानामपि ब्रह्मविदां यथाकथञ्चित् कर्तृत्वादिप्रतिभासोऽनुवर्तते। सा चेयं व्यवस्था जीवन्मुक्तिशास्त्रलब्धा विद्वदनुभवसिद्धा च।

अशरीरमित्यत्र शरीराभिमानाभाव एव प्रियाप्रियासंस्पर्शप्रयोजको विवक्षितः। तत्र शङ्कते—शरीरे पतित इति। आत्मनो हि सशरीरत्वं आध्यासिकमिति पूर्ववाक्यपर्यालोचनया अवगम्यते। 'अशरीरं वाव सन्तं' इत्यतश्चेदं पूर्ववाक्यं 'मघवन् मर्त्यं वा इदं शरीरं आत्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानं आत्तो वै सशरीरः प्रियाप्रियाभ्यां न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति। अत्र च [1]अशरीरस्येतिनिषेधपूर्वकमेव आत्मनोऽधिष्ठानमिति शरीरसम्बन्धः प्रतिपाद्यते। अतः स मिथ्याभूत इति वक्तव्यम्। तादृशं सशरीरत्वं प्रियाप्रियसंस्पर्शप्रयोजकं 'आत्तो वै सशरीरः' इत्यनेन प्रतिपाद्यते। आरोपिताश्च रजतसर्पादयः अवगते मिथ्यात्वे दोषविशेषेण भासमाना अपि न यथापूर्वं प्रियाप्रियसंस्पर्शप्रयोजका भवन्ति। तथा च जीवतोऽपि सशरीरतायां मिथ्यात्वनिर्णये न यथापूर्वं प्रियाप्रियसंस्पर्शप्रयोजकता भविष्यतीति आत्तोवाइतिवाक्यार्थप्रतिद्वन्द्वि-

1. मु. अशरीर इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न—सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् । नित्यं अशरीरत्वं अकर्मनिमित्तत्वात् इत्यवोचाम । तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत्, न—शरीरसंबन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः । शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य च इतरेतराश्रयत्वप्रसङ्गात् । अन्धपरम्परा चैषा अनादित्वकल्पना । क्रियासमवायाभावाच्च

प्रतिपादकेन अशरीरंवावेतिवाक्येनापि शरीराभिमानराहित्यमेव प्रियाप्रियासंस्पर्शप्रयोजकतया प्रतिपाद्यते इत्याह—**सशरीरत्वस्येति** ।

एवं सशरीरत्वस्यारोपितस्य तत्त्वज्ञानदशायां प्रतिभासतोऽनुवर्तमानस्यापि न यथापूर्वं प्रियाप्रियसंस्पर्शप्रयोजकत्वमित्युक्तं, तन्न सम्भवति, तस्य जीवकृतधर्माधर्मनिमित्तत्वेन अनृततानुपपत्तेः—इति कश्चिच्छङ्कते—**तत्कृतधर्माधर्मनिमित्तमिति** । यद्यपि स्वप्नगतशरीरवत् अनृतत्वं धर्माधर्मनिमित्तत्वेऽपि न विरुध्यते, तथाऽपि तावन्मात्रेण सत्यमिति शङ्कितुरभिमानः । श्रुतिविरोधे सत्येव दूषणान्तरमाह—**शरीरसम्बन्धस्येति** । शरीरावच्छेदेन ह्यात्मनः कर्तृत्वं, अतः शरीरसम्बन्धं विना धर्माधर्मकर्तृत्वानुपपत्तिरित्यर्थः । ततश्च धर्माधर्मनिमित्तकत्वे शरीरसम्बन्धस्याभ्युपगम्यमाने परस्पराश्रय इत्याह—**शरीरसम्बन्धस्येति** । बीजाङ्कुरवदत्र नान्योन्याश्रयः । येन बीजेन योऽङ्कुरो जन्यते तद्बीजं स्वजनिताङ्कुरादन्येनैवाङ्कुरेण स्वस्मात् प्राचीनेन जन्यते । स्वजनितश्चाङ्कुरः स्वस्मात् अन्यदेव बीजं जनयति । एव येन शरीरेण या [1]धर्माधर्मव्यक्तिर्जन्यते तच्छरीरं स्वजनिताभ्यां धर्माधर्माभ्यां अन्याभ्यामेव धर्माधर्माभ्यां स्वस्मात् प्राचीनाभ्यां जायते । स्वजनितौ च धर्माधर्मौ अन्यस्यैव शरीरस्य प्रयोजकौ । एवं प्रवाहानादित्वात् नान्योन्याश्रय इति चेत्, तत्राह—**अन्धपरम्पराचैषेति** । वर्तमानयोर्हि बीजाङ्कुरयोः जन्यजनकभावः प्रत्यक्षसिद्ध इति पूर्वमपि तथैवेति शक्यमनुमातुम् । शरीरस्य तु धर्माधर्मजन्यत्वं न लौकिकप्रमाणायत्तम् । श्रुत्या तत्सिद्धिः स्वीक्रियते चेत् तत [2]एव तन्मिथ्यात्वमपि प्राप्नोति । अतः

1. मु. धर्मव्यक्ति॰
2. मु. एव मिथ्यात्व

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मनः कर्तृत्वानुपपत्तेः। सन्निधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेत्, न—धनदानाद्युपार्जितभृत्यसंबन्धित्वात् तेषां कर्तृत्वोपपत्तेः। न त्वात्मनो धनदानादिवत् शरीरादिभिः स्वस्वामिभावसंबन्धनिमित्तं किञ्चित् शक्यं कल्पयितुम्। मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः। एतेन यजमानत्वमात्मनो व्याख्यातम्।

अत्राहुः—देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादौ अहमभिमानो गौणो न मिथ्येति-(चेत्) न—प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः, यथा केसरादिमानाकृतिविशेषः अन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाक् मुख्योऽन्यः प्रसिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः सिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः, न अप्रसिद्धवस्तुभेदस्य। तस्य तु अन्यत्र अन्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतः, न गौणौ। यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायां अकस्मात् रजतमिति निश्चितौ शब्दप्रत्ययौ, तद्वत् देहादिसंघाते अहमिति निरुपचारेण शब्दप्रत्ययौ आत्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्।

सत्यत्ववादिना श्रुतिं परित्यज्यैव वक्तव्यम्। ततश्च मूलप्रमाणाभावे धर्माधर्मजन्यत्वस्य शरीरे असिद्धेः निर्मूलेयं कल्पना अन्धपरम्पराप्राप्ता अङ्गारशौक्ल्यज्ञानवत् इत्यर्थः। तस्य त्विति। यद्यपि अगृहीतभेदस्य पुरुषस्य यः प्रत्ययः अन्यत्रान्यशब्दप्रत्ययाविवितिपदेन सङ्गृहीतः स भ्रम एव, न भ्रान्तिनिमित्तः। तथाऽपि भ्रान्तिपदेन भ्रान्तिजनिका सामग्री विवक्षिता। भ्रान्तिपदस्य यथाश्रुतार्थत्वे तु प्रत्ययशब्देन भ्रमानन्तरभाविशब्दजन्यः प्रत्ययो विवक्षितः।

अकस्माद्रजतमिति। ननु भ्रान्तेः [1]उचितकारणजन्यत्वात् कथं अकस्मादिति कारणं विनैव जातत्वमुच्यते? [2]उच्यते—रजतैकपक्षपातिन्या भ्रमसामग्र्या दृष्टरूपाया असम्भवात् अदृष्टापेक्षत्वं अकस्माच्छब्देन विवक्षितम्। तथा

1. उपचितकारणजन्यत्वात्–इति पाठे करणदोषादिबहुनिमित्तापेक्षत्वात् इत्यर्थः।

2. मु. 'उच्यते' नास्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हि—पुरोऽवस्थिते द्रव्ये शुक्तित्वस्य विद्यमानतया चक्षुस्सन्निकर्षस्य लौकिकस्य विद्यमानत्वात् रजतभ्रमात् प्राक् शुक्तित्वनिश्चय एव कस्मात् न भवति । न हि तस्यां दशायां शुक्तित्वंनास्तीति व्यतिरेकनिश्चयो वर्तते । न च—शुक्तित्वोद्बोधकं[1] तत्र नास्ति, तथा च विशेषणोपस्थितेरभावात् न विशिष्टज्ञानमिति—वाच्यम् । संस्कारोद्बोधकाभावेन विशेषणस्मृत्यसम्भवेऽपि सन्निकर्षस्य विद्यमानतया विशेषणांशे निर्विकल्पकानुभवसम्भवात् । अपि च यदेव रजतत्वे संस्कारोद्बोधकं शुक्लभास्वरत्वादिकं, तदेव शुक्तित्वांशेऽपि संस्कारोद्बोधकम् । तस्य उभयसाधारणत्वात् । यदि तु—दोषोऽप्यत्र विद्यते, तथा च न शुक्तित्वप्रमा, दोषस्य प्रतिबन्धकत्वात् प्रमायाम्; तदा तत्संशयोऽस्तु । तत्सामग्र्याः प्रकृते सम्भवात् । संशयसामग्री हि अक्षपादेन त्रिप्रकारा निरूपिता । 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः' [न्यायसू. १-१-२३] इति । समानो धर्मः—साधारणो धर्मः । अनेकस्माद्व्यावृत्तो धर्मः अनेकधर्मः इति [2]शाकपार्थिवादिवत् समासः, सजातीयाद्विजातीयाच्चानेकस्माद्व्यावृत्तो धर्मः, असाधारणो धर्म इत्यर्थः । ततश्च साधारणधर्मदर्शनं असाधारणधर्मदर्शनं विप्रतिपत्तिश्चेति कारणत्रयं संशये दर्शितं भवति । इदं च कारणत्रयं साधकबाधकप्रमाणानवतारदशायामेव प्रयोजकमित्याह—उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति । उपलब्धिः-एकस्यां कोटौ साधकं प्रमाणं, अनुपलब्धिः-अन्यस्यां कोटौ बाधकं प्रमाणं, तदभावे इत्यर्थः । यदा हि दीर्घत्वादिसाधारणधर्मदर्शनात् 'अयं स्थाणुर्वा पुरुषो वा' इति संशयो भवति तदा, यद्युत्तरक्षणे स्थाणुत्वकोटौ साधकं वक्रकोटरादिमत्त्वं स्थाणुत्वव्याप्यं गृह्यते, यदि वा पुरुषत्वबाधकं निश्चेष्टत्वादिकं गृह्यते, तदा न संशयः पुनरुद्भवति । विशेषापेक्ष इत्यनेन [3]अवधारणापेक्ष इत्युक्तम् । ततश्च निष्कम्पप्रवृत्तिजनने अवधारणापेक्षत्वोक्त्या स्वस्य अवधारणात्मत्वं नास्तीति द्योतितम् । ततश्च [4]'अनवधार-

---

1. **शुक्तित्वोद्बोधकं**—शुक्तित्वसंस्कारोद्बोधकम् । क्वचित् तथैव पाठः ।

2. मु. शाकपार्थिवादित्वात्

3. स्वयमवधारणापेक्ष

4. **अनवधारणात्मकं ज्ञानं संशय इति** वात्स्यायनप्रभृतिभिः वृद्धनैयायिकैः अङ्गीकृतमेतल्लक्षणमिति, प्रकारान्तरेण संशयलक्षणं दुर्निरूपमिति, विषयवैलक्षण्यात् ज्ञानवैलक्षण्यं इत्युत्सर्गः असति विषयवैलक्षण्ये विषयतावैलक्षण्यात् ज्ञानवैलक्षण्यमिति,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मानात्मविवेकिनामपि पण्डितानां अजाविपालानामिव अविविक्तौ शब्दप्रत्ययौ भवतः। तस्मात् देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः। तस्मात् मिथ्याप्रत्ययनिमित्तत्वात्सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्। तथा च ब्रह्मविद्विषया श्रुतिः— 'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत एवमेवेदं शरीरं शेते, अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ. उ. ४।४।७) इति।

णात्मकं ज्ञानं सशयः' इत्युक्तं भवति। तत्त्वं च स्वरूपसम्बन्धविशेषेण[1] जायमानज्ञानत्वम्। यथा 'अयं घटः' इति विशिष्टज्ञानस्य 'घटघटत्वसंसर्गाः' इति समूहालम्बनतो विषयकृतविशेषाभावेऽपि विषयज्ञानयोस्स्वरूपसम्बन्धविशेषमादायैव समूहालम्बनात्[2] विशेषो वक्तव्यः, तथा निश्चयाद्व्यावृत्तः [3]स्वरूपसम्बन्धविशेष एव संशयत्वघटको भविष्यति। ततश्च इदंरजतमितिभ्रमस्थले चाकचक्यादिसाधारणधर्मदर्शनस्य उभयकोटिसंशयप्रयोजकता भविष्यतीति कथं रजतमित्येककोटिक एव भ्रमः। न च— रागाख्यदोषवशात् रजतमित्येव भ्रमः स्यात्, रागस्य रजतविषयकस्य रजतभ्रमे एव दोषत्वात्—इति वाच्यम्। वीतरागाणामपि रजतभ्रमदर्शनात्। ततश्च रजतकोट्येकपक्षपातिनः दृष्टकारणस्य निरूपयितुमशक्यतया अदृष्टमेव तदसाधारणं कारणं कल्प्यते। अदृष्टस्य कार्यैकोन्नेयतया यथाकार्यमेव तत् कल्प्यत इति न [4]तथा अत्राप्यव्यवस्थाशङ्कासमुन्मेष इति। निश्चितौ—विषयस्य निश्चितत्वापादकौ।

आत्मानात्मविवेकिनामिति। परोक्षनिश्चयस्यापरोक्षभ्रमविरोधित्वाभावादिति भावः। तद्यथेति। अहिनिल्वयनी-अहित्वक्। अत्र वल्मीकग्रहणेन दार्ष्टान्तिके शरीरसम्बन्धो द्योत्यते। वल्मीकपतिता ह्यहिनिर्ल्वयनी अहिना संयुक्ताऽपि

विषयता च स्वरूपसम्बन्धविशेष एवेति च, सविमर्शं विस्तरेण उपपादितं शिवार्कमणिदीपिकायां जन्माद्यधिकरणे।

1. विशेषेणेति—विषये इति शेषः।

2. मु. ०नात् भेदो०

3. स्वरूपसम्बन्धविशेष एवेति अत्र एवकारेण निष्प्रकारकस्यापि अनवधारणज्ञानत्वरूपं संशयत्वं सम्भवतीति श्रीनृसिम्हाश्रमस्वामिप्रभृतिभिः व्यवस्थापितं सूचितम्।

4. मु. तत्राप्यव्यवस्था

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' इति च। स्मृतिरपि—'स्थितप्रज्ञस्य का भाषा' (भ. गी. २-५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसम्बन्धं दर्शयति। तस्मात् न अवगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम्, यस्य तु यथापूर्वं संसारित्वं नासाववगतब्रह्मात्मभावः, इत्यनवद्यम्।

यत्पुनरुक्तं-श्रवणात्पराचीनयोर्मनननिदिध्यासनयोर्दर्शनात् विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति, न—श्रवणवत् अवगत्यर्थत्वात् मनननिदिध्यासनयोः। यदि ह्यवगतं ब्रह्म अन्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वम्। न तु तदस्ति, मनननिदिध्यासनयोरपि श्रवणवत् अवगत्यर्थत्वात्। तस्मात् न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयात्—इति सिद्धम्।

तदभिमानरहिता यथा भवति, तथा जीवन्मुक्तस्य प्रारब्धवशात् आत्मना सम्बद्धमपि शरीरं न यथापूर्वमभिमानमयं भवति। प्राण एव-प्राणन्नेवेत्यर्थः। 'प्राणन्नेव प्राणो नाम भवति' इति श्रुतेः। **सचक्षुरचक्षुरिवेति**। अत्र इवशब्दैः अभिमानराहित्यं द्योत्यते[1]। स्थितप्रज्ञलक्षणानि—जीवन्मुक्तलक्षणानि। **यस्य त्विति**। श्रुतब्रह्मणोऽपि मनननिदिध्यासनपरिपाकविकलस्य इति शेषः। **श्रवणवदवगत्यर्थत्वान्मनननिदिध्यासनयोरिति**। यद्धि शास्त्रं यत्प्रतीतिमुद्दिश्य प्रवर्तते तच्छास्त्रं तत्प्रधानकम्। सत्यादिवाक्यं च यथा ब्रह्मप्रतीतिमुद्दिश्य प्रवृत्तत्वात् ब्रह्मप्रधानकं, तथा श्रवणादिशास्त्रमपि तदुद्देशेनैव प्रवृत्तत्वात् ब्रह्मप्रधानकम्। यदि त्ववगतं ब्रह्म अन्यत्र विनियुज्येत, तदा यत्र विनियुज्यते ब्रह्म स एवार्थो ब्रह्मोपसर्जनकः प्रतिपाद्यः स्यात्। ततश्च कृत्स्नं वेदान्तवाक्यजातं तत्प्रतीत्युद्देशेन प्रवृत्तमिति स एवार्थः प्रधानं स्यात्। न त्वेतदस्तीत्याह—**यदिह्यवगतमिति**।

---

1. **द्योत्यत इति** अत्र अचक्षुरिवेति यथास्थितयोजना आश्रिता। कल्पतरौ तु—परमार्थतः अचक्षुरपि बाधितानुवृत्त्या सचक्षुरिव—इति इवकारस्य व्यत्यासेन योजना कृता।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक् शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वात् न पृथक् शास्त्रमारभ्येत। आरभ्यमाणं च एवमारभ्येत 'अथातः

प्रतिपत्तिविधिपरत्वे हीति। ननु——वेदान्तानां प्रतिपत्तिविधिपरत्वेऽपि पृथग्वेदान्तशास्त्रारम्भे काऽनुपपत्तिः। ननु–तथा सति अथातोधर्मजिज्ञासेति सूत्रे धर्मशब्देन वेदान्तार्थोऽपि संगृहीतः स्यात्। अस्तु को दोषः। एष दोषः– वेदान्तार्थविचारोऽपि तत्रैव प्रतिज्ञातो भवतीति। प्रतिज्ञातश्चार्थः कात्स्न्र्येन महर्षिणा जैमिनिना निरूपणीयः। ततश्च जैमिनिनैव धर्मस्य कर्मोपासनात्मनो निरूपणप्राप्तेः पृथक्छास्त्रारम्भे व्यर्थता-इति चेत्, न--तावता वेदाध्ययनानन्तरं कर्मोपासनरूपो धर्मो विचारणीय इत्येतावन्मात्रं लभ्यते, न तु जैमिनिनैव तद्विचारविषयीभूता न्याया ग्रथनीया इति प्राप्नोति, स्वयं तद्ग्रथनस्याप्रतिज्ञातत्वात्–इति चेत्——

उच्यते——इदं हि सूत्रं स्वग्रन्थस्य योऽर्थः तत्र अधिकार्यादिनिरूपणपरमिति तावदविवादम्। तन्निरूपणं च तस्मिन् ग्रन्थे अध्येतॄणां प्रवृत्तिसिद्ध्यर्थम्। तत्र यद्यपि मुखतः 'वेदाध्ययनानन्तरं धर्मविचारः कर्तव्यः' इत्येतावदेव प्रतिपाद्यते, तथाऽपि 'स्वग्रन्थे अधीतवेद एवाधिकारी, धर्मज्ञानोपयोगिनो न्याया एव विषयीभूताः' इत्यादिकं अर्थात् सिद्ध्यति। मुखतोऽर्थान्तरप्रतिपादनद्वारा स्वग्रन्थाधिकार्यादिप्रतिपादनं तु ग्रन्थकृतां शैली। ततश्च स्वेन क्रियमाणस्य सूत्रसन्दर्भस्य प्रतिपाद्यं धर्मजिज्ञासापदेन उपात्तमिति धर्मज्ञानोपयोगिन्यायजातं अस्मिञ्छास्त्रे निबध्यत इति अर्थात् सिध्यति। ततश्च वेदान्तानामुपासनापरत्वे तदुपयोगिन्यायजातं अस्मिन्नेव शास्त्रे ग्रथितमिति पृथक्छास्त्रारम्भो व्यर्थ एव प्राप्नोति। सिद्धब्रह्मपरत्वे तु नायं दोषः। धर्मशब्देन ब्रह्मणोऽसङ्गृहीततया तदुपयोगिनां न्यायानां तत्र निरूपणाप्रसक्तेः।

ननु––तत्रत्यधर्मशब्देन वेदान्तार्थसङ्ग्रहेऽपि वेदान्तार्थोपासनोपयोगिनां न्यायानां तत्राग्रथनात् कथं बादरायणकृतस्य निबन्धनस्य उपासनोपयोगिन्यायनिरूपणोपयोगिनः तेन गतार्थतोच्यते। न च–तावता जैमिनेरज्ञता प्राप्ता भवति, [1]यावता साकल्येन प्रतिज्ञातार्थानिर्वहणं––इति वाच्यम्। समयविशेषपूर्वकं

1. यावता — यस्मात्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिशिष्टधर्मजिज्ञासा' इति 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै. ४-१-१) इतिवत्। ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः 'अथातो ब्रह्मजिज्ञासा' इति।

तस्मात् 'अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः सर्वाणि च इतराणि प्रमाणानि। न ह्यहेयानुपादेयाद्वैतात्मावगतौ सत्यां निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्ति इति।

अपि चाहुः—

'गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्।
सद्ब्रह्मात्माऽहमित्येवं बोधे कार्यं कथं भवेत्॥

एकस्यामेव प्रतिज्ञायां उभाभ्यां व्यवस्थया न्यायविशेषनिबन्धनमिति कल्पनोपपत्तेः इत्याशङ्क्य, तथा सति कृत्स्नशास्त्रार्थप्रतिज्ञायाः प्रागेव जातत्वात् [1]अवशिष्टार्थप्रतिज्ञैवेयं स्यात्, ततश्च यथाश्रुतासङ्गतिः इत्याह—अथातःपरिशिष्टेति। ननु ब्रह्मपदस्य सूत्रगतस्य ब्रह्मोपासनापरत्वात् प्रकृतसूत्रेणैव सोऽर्थो लभ्यत इत्याशङ्क्य, तथा सति सूत्रस्थब्रह्मपदस्वारस्यभङ्ग इति मनसि निधाय, स्वमते सूत्राञ्जस्यं वदन् उपसंहरति—ब्रह्मात्मैक्यावगतिस्त्विति। ब्रह्मप्रतीतिमुद्दिश्य शास्त्रस्य प्रवृत्तत्वात् ब्रह्मैव प्रधानं इत्यमुमर्थं, ब्रह्मप्रतीतेरुद्देश्यतासिद्ध्यर्थं तस्याः परमप्रयोजनोपयोगितां प्रतिपादयन् उपसंहरति—तस्मात् अहं ब्रह्मास्मीत्येतदवसाना इति। एतदवगतिपर्यन्ता इत्यर्थः। तावतैव कृतकृत्यत्वादिति भावः। न केवलं प्रत्यगभिन्नब्रह्मसाक्षात्कारे सति लौकिकवैदिकप्रमाणव्यापारो व्यर्थः, अपि तु विरोधान्नैवोन्मिषिष्यतीत्याह—न हीति। बाधितानुवृत्त्या प्रवर्तमानान्यपि न यथापूर्वं प्रवर्तन्ते इत्यर्थः।

उक्तेऽर्थे वृद्धसम्मतिमाह—अपि चाहुरिति। सद्ब्रह्मात्माऽहमित्येवंबोधे पुत्रदेहादिबाधनात्— तद्विषयकममाहमित्यभिमाननिरासात्, गौणात्मा-पुत्रादिः मिथ्यात्मा-देहादिः तयोः असत्त्वे-तद्विषयकरागासत्त्वे कार्यं लौकिकं वैदिकं वा कथं भवेत्,

1. मु. भवशिष्टार्थस्य प्रतिज्ञेयम्।

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः ।
अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्' इति ॥ ४ ॥

चतुस्सूत्री सम्पूर्णा

सवस्यापि कार्यस्य प्रमातृपूर्वकत्वेन ब्रह्मज्ञानानन्तरं तदभावात्—इत्याह—अन्वेष्टव्यात्मविज्ञानादिति । ननु—पाप्मादिदोषवतः अपहतपाप्मना परमेश्वरेण सह ऐक्यं नोपपद्यते, ततश्च कथं सद्ब्रह्मात्माहमितिज्ञानं, इत्यत आह—अन्विष्टस्स्यादिति । प्रमाता विचारितश्चेत् वस्तुगत्या पाप्मादिदोषरहित इत्यर्थः । ननु लौकिकवैदिकपदार्थानामनृतत्वे तज्ज्ञाने कथं प्रामाण्यबुद्धिरित्यत आह—देहात्मप्रत्ययइति । देहात्मज्ञानवदेव तत्र प्रामाण्यबुद्धिः न तु वस्तुगत्या । सा च आत्मनिश्चयात्मकबोधपर्यन्तमनुवर्तते इत्यर्थः ॥

रामानन्दपदाम्भोजं प्लवं कृत्वा मनोहरम् ।
चत्वारोऽप्यर्णवा एते समुत्तीर्णा यथासुखम् ॥

॥ इति समन्वयाधिकरणम् ॥ ४ ॥

चतुस्सूत्री सम्पूर्णा

—:*:—

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
193

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE